नमो नमो निम्मल दंसणस्स

आगमसुत्ताणि

(सटीकं)

भागः - १०

: संशोधक सम्पादकश्च :

मुनि दीपरत्नसागर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः
नमो नमो निम्मल दंसणस्स
श्री आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्योनमः

आगम सुत्ताणि (सटीकं)

भागः-१० प्रज्ञापना-उपाङ्गसूत्रम्-१

-: संशोधकः सम्पादकश्चः :-

मुनि दीपरत्नसागर

ता. १४/४/२००० रविवार २०५६ चैत्र सुद ११

४५- आगम सुत्ताणि-सटीकं
मूल्य रू.११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-
''आगम आराधना केन्द्र'' शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं-१३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ प्रज्ञापनाउपाङ्गसूत्रस्य विषयानुक्रमः

पदानि-१.....१४

પદ-૧૫ થી ૩૬ માટે જુઓ ભાગ-૧૧

मूलाङ्कः	विषयः	पृष्ठाङ्कः
१-१९१	**पदं-१ प्रज्ञापना**	५
	अजीव प्र०, जीव प्रज्ञा०	
-२५६	**पदं-२ स्थानं**	७९
	तिर्यंच-नैरयिक-मनुष्य-देवानाम् स्थानं	
-२९७	**पदं-३ बहुवक्तव्यता**	१२२
	द्वारं-१ दिशा	
	द्वारं-२ गतिः	
	द्वारं-३ इन्द्रियं	
	द्वारं-४ कायः	
	द्वारं-५ योगः	
	द्वारं-६ वेदः	
	द्वारं-७ कषायः	
	द्वारं-८ लेश्या	
	द्वारं-९ दृष्टिः	
	द्वारं-१० ज्ञानं	
	द्वारं-११ अज्ञानं	
	द्वारं-१२ दर्शनं	
	द्वारं-१३ संयतः	
	द्वारं-१४ उपयोगः	
	द्वारं-१५ आहारकः	
	द्वारं-१६ भाषकः	
	द्वारं-१७ परित्तः	
	द्वारं-१८ पर्याप्तः	
	द्वारं-१९ सूक्ष्मं	
	द्वारं-२० संज्ञी	
	द्वारं-२१ भवसिद्धिकः	
	द्वारं-२२ अस्तिकायः	
	द्वारं-२३ चरमः	
	द्वारं-२४ जीवः	
	द्वारं-२५ क्षेत्रं	
	द्वारं-२६ बन्धं	
	द्वारं-२७ पुद्गलः, दिशा-आदिनामल्पबहुत्वम्	
-३०६	**पदं-४ स्थितिः**	१७७
	नैरयिकादिनाम् स्थिति	
-३२५	**पदं-५ विशेषं**	१८८
	जीव-अजीवाभ्याम् अनन्तस्य हेतुः वर्णनम्	
-३५२	**पदं-६ व्युत्क्रान्तिः**	२१४
	द्वारं-१ 'द्वादशः'	
	गतिअपेक्षायाः उपपात-उद्वर्तना-विरहः	
	द्वारं-२ 'चतुर्विंशतिः'	
	चतुर्विंशतिदण्डकायाः	
	उपपात-उद्वर्तना-विरहः	
	द्वारं-३ 'सान्तरं'	
	सान्तर-निरन्तर उपपातः	
	द्वारं-४ 'एकसमयं'	
	एकसमयापेक्षया उपपातादिः	
	द्वारं-५ 'आगतिः'	
	द्वारं-६ उद्वर्तना/गतिः	
	द्वारं-७ परभवायुः	
	द्वारं-८ आकर्षः/आयुबन्धः	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूलाङ्कः	विषयः	पृष्ठाङ्कः
-३५३	पदं-७ 'उच्छ्वासः'	२३०
-३५५	पदं-८ संज्ञा	२३२
-३६०	पदं-९ योनिः चतुर्विंशतिदण्डका पेक्षया जीवस्ययोनि	२३५
-३७४	पदं-१० 'चरिमः' पृथ्वी-संस्थान- जीव-आदि अपेक्षा चरमाचरमं	२३९
-३९९	पदं-११ 'भाषा' भाषायाः चत्वारा भेदाः, आराधक-विराधकभाषादि	२५६
-४०४	पदं-१२ 'शरीरं' शरीराणाम् पञ्चभेदानि	२७९
-४१२	पदं-१३ परिणामः जीव-गति-इन्द्रियं-कषाय-लेश्या-योगः-उपयोगः-ज्ञानाज्ञान-दर्शन चारित्र-वेदानां परिणामं	२९२
	पदं-१४ 'कषायः' कषायस्यचत्वाराभेदाः चतुर्विंशतिदण्डकापेक्षया कषायस्यवर्णनम्	३००

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भागः-१०

प्रज्ञापनाउपाङ्गसूत्रम्-१

पदानि-१.....१४

भागः-११

प्रज्ञापनाउपाङ्गसूत्रम्-२

पदानि-१५.....३६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજયશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ૠચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અટ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स

पंञ्चम गणधर श्री सुधर्मास्वामिने नमः

१५ प्रज्ञापनाउपाङ्गसूत्रम्-१

(सटीकं)

चतुर्थम् उपाङ्गम्-१

(श्यामाचार्य संकलितं मूलसूत्रम् + मलयगिरिआचार्य विरचिता वृत्तिः)

वृ.

॥१॥ जयति नमदमरमुकुटप्रतिबिम्बच्छद्मविहितबहुरूपः ।
उद्धर्त्तुमिव समस्तं विश्वं भवपङ्कतो वीरः ॥

॥२॥ जिनवचनामृतजलधिं वन्दे यद्बिन्दुमात्रमादाय ।
अभवन्नूनं सत्त्वा जन्मजराव्याधिपरिहीणाः ॥

॥३॥ प्रणमत गुरुपदपङ्कजमधरीकृतकामधेनुकल्पलतम् ।
यदुपास्तिवशान्निरुपममश्नुवते ब्रह्म तनुभाजः ॥

॥४॥ जडमतिरपि गुरुचरणोपास्तिसमुद्भूतविपुलमतिविभवः ।
समयानुसारतोऽहं विदधे प्रज्ञापनाविवृतिम् ॥

अथ प्रज्ञापनेति कः शब्दार्थः ?, उच्यते, प्रकर्षेण–निःशेषकुतीर्थितीर्थकरासाध्येन यथावस्थितस्वरूपनिरूपणलक्षणेन ज्ञाप्यन्ते–शिष्यबुद्धावारोप्यन्ते जीवाजीवादयः पदर्था अनयेति प्रज्ञापना, इयं च समवायाख्यस्य चतुर्थाङ्गस्योपाङ्गं, तदुक्तार्थप्रतिपादनात्, उक्तप्रतिपादनमनर्थकमिति चेत्, न, उक्तानामपि विस्तरेणाभिधानस्य मन्दमतिविनेयजनानमुग्रहार्थतया सार्थकत्वात् । इदञ्चोपाङ्गमपि प्रायः सकलजीवाजीवादिपदार्थशासनात् शास्त्रं, शास्त्रस्य चादौ प्रेक्षावतां प्रवृत्त्यर्थमवश्यं प्रयोजनादित्रितयं मङ्गलं च वक्तव्यम्, उक्तं च–

॥१॥ "प्रेक्षावतां प्रवृत्त्यर्थं, फलादित्रितयं स्फुटम् ।
मङ्गलं चैव शास्त्रादौ, वाच्यमिष्टार्थसिद्धये ॥" इति

तत्र प्रयोजनं द्विधा–परमपरं च, पुनरेकैकं द्विधा–कर्तृगतं श्रोतृगतं च, तत्र द्रव्यास्तिकनयमतपर्यालोचनायामागमस्य नित्यत्वात् कर्त्तुरभाव एव, तथाचोक्तम्–

"एषा द्वादशाङ्गी न कदाचिन्नासीत् न कदाचिन्न भवति न कदाचिन्न भविष्यति, ध्रुवा नित्या शाश्वती" त्यादि, पर्यायास्तिकनयमतपर्यालोचनायां चानित्यत्वादवश्यंभावी तत्सद्भावः, तत्त्वपर्यालोचनायां तु सूत्रार्थोभयरूपत्वादागमस्यार्थापेक्षया नित्यत्वात् सूत्रापेक्षया चानित्यत्वात् कथञ्चित् कर्तृसिद्धिः, तत्र सूत्रकर्त्तुरनन्तरं प्रयोजनं सत्त्वानुग्रहः परम्परं त्वपवर्गप्राप्तिः, उक्तं च–

॥१॥ "सर्वज्ञोक्तोपदेशेन, यः सत्त्वानामनुग्रहम् ।
करोति दुःखतप्तानां, स प्राप्नोत्यचिराच्छिवम् ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदर्थप्रतिपादकस्यार्हतः किं प्रयोजनमिति चेत्, न किञ्चित्, कृतकृत्यत्वात्, प्रयोजनमन्तरेणार्थप्रतिपादनप्रयासो निरर्थक इति चत्, न, तस्य तीर्थकरनामकर्मविपाकोदयप्रभवत्वात्, उक्तं च– ''तं च कहं वेइज्जइ ?, अगिलाए धम्म देसणाए उ'' श्रोतृणामनन्तरं प्रयोजनं विवक्षिताध्ययनार्थपरिज्ञानं, परम्परं तु निःश्रेयसावाप्तिः, ते हि विवक्षितमध्ययनमर्थतः सम्यगवगम्य संसाराद्विरज्यन्ते, विरक्ताश्च सन्तः संसाराद्विनिर्जिगमिषवः संयमाध्वनि यथाऽऽगमं सम्यक् प्रवृत्तिमातन्वते, प्रवृत्तानां च संयमप्रकर्षवशत उपजायते सकलकर्म्मक्षयान्निःश्रेयसावाप्तिरिति, उक्तं च–

॥१॥ ''सम्यग्भावपरिज्ञानाद्विरक्ता भवतो जनाः ।
क्रियाऽऽसक्ता ह्यविघ्नेन, गच्छन्ति परमां गतिम् ॥'' इति,

अभिधेयं जीवाजीवस्वरूपं, तच्च प्राक् प्रदर्शितनामव्युत्पत्तिसामर्थ्यमात्रादवगतम् । सम्बन्धो द्वेधा–उपायोयेयभावलक्षणो गुरुपर्वक्रमलक्षणश्च, तत्राद्यस्तर्कानुसारिणः प्रति, तद्यथा–वचनरूपापन्नं प्रकरणमुपायः तत्परिज्ञानं चोपेयं, गुरुपर्वक्रमलक्षणः केवलश्रद्धानुसारिणः प्रति, तं चाग्रे स्वयमेव सूत्रकृदभिधास्यति । इदं च प्रज्ञापनाख्यमुपाङ्गं सम्यग्ज्ञानहेतुत्वादत एव परम्परया मुक्तिपदप्रापकत्वात् श्रेयो- भूतम्, अतो मा भूदत्र विघ्न इति विघ्नविनायकोपशान्तये शिष्याणां मङ्गलबुद्धिपरिग्रहाय स्वतो मङ्गलभूतस्याप्यस्यादिमध्यावसानेषु मङ्गलमभिधातव्यम्, आदिमङ्गलं ह्यविघ्नेन शास्त्रपारगमनार्थं, मध्यमङ्गलमवगृहीतशास्त्रार्थस्थिरीकरणार्थम्, अन्तमङ्गलं शिष्यप्रशिष्यपरम्परया शास्त्रस्याव्य- वच्छेदार्थं, उक्तं च–

॥१॥ ''तं' मङ्गलमाईए मज्झे पज्ंतए य सत्थस्स ।
पढमं सत्थत्थाविग्घपारगमणाय निद्दिट्ठं ॥
॥२॥ तस्सेव य थेज्जत्वं मज्झिमयं अन्तिमंपि तस्सेव ।
अव्वोच्छित्तिनिमित्तं सिस्सपसिस्साइवंसस्स ॥''

तत्र प्रथमपदगतेन 'ववगयजरमरणभये' इत्यादिना ग्रन्थेनादिमङ्गलम्, इष्टदेवतास्तवस्य परममङ्गलत्वात्, उपयोगपदगतेन 'कइविहे णं भंते ! उवओगे पन्नत्ते' इत्यादिना मध्यमङ्गलम्, उपयोगस्य ज्ञानरूपत्वात्, ज्ञानस्य च कर्मक्षयं प्रति प्रधानकारणतया मङ्गलत्वात्, न च कर्मक्षयं प्रति प्रधानकारणता तस्य न प्रसिद्धा, तस्याः साक्षादागमेऽभिधानात्, तथा चागमः–

॥१॥ ''जं अन्नाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं ।
तं नाणी तिहि गुत्तो खवेइ उस्सासमित्तेणं ॥''

''तथा समुद्घातपदगतेन केवलिसमुद्घातपरिसमाप्त्युत्तरकालभाविना सिद्धाधिकारप्रतिबद्धेन–

॥१॥ निच्छिन्नसव्वदुक्खा जाइजरामरणबन्धणविमुक्का ।
सासयमव्वाबाहं चिट्ठन्ति सुही सुहं पत्ता ॥''

–इत्यादिना अवसानमङ्गलम् ॥ अधुनाऽऽदिमङ्गलसूत्रं व्याख्यायते–

पदं – १ – प्रज्ञापना

मू. (१) *ववगयजरमरणभये सिद्धे अभिवंदिऊण तिविहेणं ।*
वंदामि जिनवरिंदं तेलोक्क गुरुं महावीरं ।

वृ. सितं–बद्धमष्टप्रकारं कर्मेन्धनं ध्मातं–दग्धं जाज्वल्यमानशुक्लध्यानानलेन यैस्ते निरुक्तविधिना सिद्धाः, अथवा 'षिधु गतौ' सेधन्ति स्म–अपुनरावृत्त्या निर्वृतिपुरीमगच्छन् यदिवा 'षिध संराद्धौ' सिध्यन्ति स्म–निष्ठितार्था भवन्ति स्म यद्वा 'षिधु शास्त्रे माङ्गल्ये च' सेधन्ते स्म–शासितारोऽभवन् मङ्गल्यरूपतां वाऽनुभवन्ति स्मेति सिद्धाः, अथवा सिद्धाः–नित्या अपर्यवसानस्थितिकत्वात्, प्रख्याता वा भव्यैरुपलब्धगुण- सन्दोहत्वात्, उक्तं च–

॥१॥ "ध्मातं सितं येन पुराणकर्म, यो वा गतो निर्वृतिसौधमूर्ध्नि ।
ख्यातोऽनुशास्ता परिनिष्ठितार्थो, यः सोऽस्तु सिद्धः कृतमङ्गलो मे ॥"

सिद्धाश्च नामादिभेदतोऽनेकधा ततो यथोक्तसिद्धप्रतित्त्यर्थं विशेषणमह–'व्यपगतजरामरणभयान्' जरावयोहनिलक्षणा मरणं–प्राणत्यागरूपम् भयम्–इहलोकादिभेदात्सप्तप्रकारम्, उक्तं च– "इहपरलोगादाणं अकम्हआजीवमरणमसिलोए" इति, विशेषतः–अपुनर्भावरूपतया अपगतानि–परिभ्रष्टानि जरामरणभयानि योभ्यस्ते तथा तान्, 'त्रिविधेन' मनसा वाचा कायेन, अनेन योगत्रयव्यापारविकलं द्रव्यवन्दनमित्याह, 'अभिवन्द्य' अभिमुखं वन्दित्वा, प्रणम्येत्यर्थः

अनेन समानकर्तृकतया पूर्वकाले क्त्वाप्रत्ययविधानान्नित्यानित्यैकान्तपक्षव्यवच्छेदमाह, एकान्तनित्यानित्यपक्षे क्त्वाप्रत्ययस्यासम्भवात्, तथाहि–अप्रच्युतानुत्पन्नस्थिरैकस्वभावं नित्यम्, तस्य कथं भिन्नकालक्रियाद्वयकर्तृत्वोपपत्तिः ?, आकालमेकखभावत्वेनैकस्या एव कस्याश्चित् क्रियायाः सदा भावप्रसङ्गात्, अनित्यमपि प्रकृत्यैकक्षणस्थितिधर्मकम्, ततस्तस्यापि भिन्नकालक्रियाद्वयकतृत्वायोगः, अवस्थानाभावादित्यलं विस्तरेण, अन्यत्र सुचर्चितत्वात्, कत्वाप्रत्ययस्योत्तरक्रियासापेक्षत्वादुत्तरक्रियामाह–'वंदामि जिनवरिंद' मित्यादि,

'सूर वीर विक्रान्तौ' वीरयति स्म कषायादिशत्रून् प्रति विक्रामति स्मेति वीरः, महांश्चासौ वीरश्च महावीरः, इदं च 'महावीर' इति नाम न यादृच्छिकम्, किन्तु यथावस्थितमनन्यासाधारणं परीषहोपसर्गादिविषयं वीरत्वमपेक्ष्य सुरासुरकृतम्, उक्तं च–"अयले भयभेरवाणं खंतिखमे परीसहोवसग्गाणं । देवेहिं खए महावीर" इति, अनेनापायापगमातिशयो ध्वन्यते, तं कथंभूतमित्याह–'जिनवरेन्द्रम्' जयन्ति–रागादिशत्रूनभिभवन्ति जिनाः, ते च चतुर्विधाः, तद्यथा–श्रुतजिना अवधिजिना मनःपर्यायजिना केवलिजिनाः, तत्र केवलिजिनत्वप्रतिपत्तये वरग्रहणम्, जिनानां वराउत्तमा भूतभवद्भाविभावस्वभावा- वभासिकेवलज्ञानकलितत्वात् जिनवराः, ते चातीर्थकरा अपि सन्तः सामान्यकेवलिनो भवन्ति ततस्तीर्थकरत्वप्रतिपत्त्यर्थमिन्द्रग्रहणम्, जिनवराणामिन्द्रो जिनवरेन्द्रः,प्रकृष्टपुण्यस्कन्धरूपतीर्थं करनामकर्मोदयात्तीर्थकर इत्यर्थः ।

अनेन ज्ञानातिशयं पूजातिशयं चाह, ज्ञानातिशयमन्तरेण जिनेषु मध्ये उत्तम त्वस्य पूजातिशयमन्तरेण जिनवराणामपि मध्ये इन्द्रत्वस्यायोगात्, तं पुनः किंभूतमित्याह–'त्रैलोक्यगुरुम्' गृणाति यथावस्थितं प्रवचनार्थमिति गुरुः त्रैलोक्यस्य गुरुस्त्रैलोक्यगुरुः, तथा च भगवान् अधोलोकनिवासिभवनपतिदेवेभ्यस्तिर्यग्लोकनिवासिव्यन्तरनरपशुविद्याधरज्योतिष्केभ्य ऊर्ध्वलोकनिवासिवैमानिकदेवेभ्यश्च धर्मं दिदेश, तम्, अनेन वागतिशयमाह ।

एते चापायापगमातिशयादयश्चत्वारोऽप्यतिशया देहसौगन्ध्यादीनामतिशयानामुपलक्षणम्, तानन्तरेणैषामसम्भवात्, ततश्चतुस्त्रिंशदतिशयोपेतं भगवन्तं महावीरं वन्दे इत्युक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रष्टव्यम् ॥ आह–ननु ऋषभादीन् व्युदस्य किमर्थं भगवतो महावीरस्य वन्दनम् ?, उच्यते, वर्त्तमानती- र्थाधिपतित्वेनासन्नोपकारित्वात, तदेवासन्नोपकारित्वं दर्शयति–

मू. (२) *सुयरयणनिहाणं जिनवरेणं भवियजननिव्वुइकरेणं।*
उवदंसिया भगवया पन्नवणा सव्वभावाणं ॥

वृ. अत्र प्रज्ञापनेति विशेष्यं शेषं सामानाधिकरण्येन वैय्यधिकरण्येन च विशेषणं, 'जिनवरेण'न्ति जिनाः–सामान्यकेवलिनः तेषामपि वरः–उत्तमस्तीर्थकृत्त्वात् जिनवरस्तेन सामर्थ्यात् महावीरेण, अन्यस्य वर्त्तमानतीर्थाधिपतित्वाभावात्, इह छद्मस्थक्षीणमोहजिनापेक्षया सामान्यकेवलिनोऽपि जिनवरा उच्यन्ते ततस्तत्कल्पं मा ज्ञासीद्विनेयजन इति तीर्थकृत्त्वप्रतिपत्तये विशेषणान्तरमाह–'भगवता' भगः–समग्रैश्वर्यादिरूपः, उक्तं च–

॥ १ ॥ "ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः।
धर्मस्याथ प्रयत्नस्य, षण्णां भग इतीङ्गना ॥"

भगोऽस्याऽस्तीति भगवान्, अतिशायने वतुप्रत्ययः, अतिशायी च भगो वर्द्धमानस्वामिनः शेषप्राणिगणापेक्षया, त्रैलोक्याधिपतित्वात्, तेन भगवता, परमार्हन्त्यमहिमोपेतेनेत्यर्थः, पुनः कथंभूतेनेत्याह–'भव्यजननिर्वृतिकरेण' भव्यः–तथाविधानादिपारिणामिकभावात् सिद्धिगमन-योग्यः स चासौ जनश्च भव्यजनः निर्वृतिः–निर्वाणं सकलकर्ममलापगमनेन स्वस्वरूपलाभतः परमं स्वास्थ्यं तद्धेतुः सम्यग्दर्शनाद्यपि कारणे कार्योपचारात् निर्वृतिस्तत्करणशीलो निर्वृतिकरः भव्यजनस्य निर्वृतिकरो भव्यजननिर्वृतिकरस्तेन,

आह–भव्यग्रहणमभव्यव्यवच्छेदार्थमन्यथा तस्य नैरर्थक्यप्रसङ्गात्, तत इदमापतितं–भव्यानामेव सम्यग्दर्शनादिकं करोति नाभव्यानाम्, न चैतदुपपन्नम्, भगवतो वीतरागत्वेन पक्षपाता-सम्भवात्, नैतत्सारम्, सम्यकवस्तुतत्त्वापारिज्ञानात्, भगवान् हि सवितेव प्रकाशमविशेषेण प्रवचनार्थमातनोति, केवलमभव्यानां तथास्वाभाव्यादेव तामसखगकुलानामिव सूर्यप्रकाशो न प्रवचनार्थ उपदिश्यमानोऽपि उपकाराया प्रभवति, तथा चाह वादिमुख्यः–

॥ १ ॥ "सद्धर्म्मबीजवपनानघकौशलस्य, यल्लोकबान्धव ! तवापि खिलान्यभूवन्।
तन्नाद्भुतं खगकुलेषु हि तामसेषु, सूर्यांशवो मधुकरीचरणावदाताः ॥"

ततो भव्यानामेव भगवद्वचनादुपकारो जायते इति भव्यजननिर्वृतिकरेणेत्युक्तम्। किमित्याह–'उवदंसिय'त्ति उप–सामीप्येन यथा श्रोतृणां झटिति यथाऽवस्थितवस्तुतत्त्वावबोधो भवति तथा, स्फुटवचनैरित्यर्थः, दर्शिता–श्रवणगोचरं नीता, उपदिष्टा इत्यर्थः, काऽसौ ? –

'प्रज्ञापना' प्रज्ञाप्यन्ते–प्ररूप्यन्ते जीवादयो भावा अनया शब्दासंहत्या इति प्रज्ञापना, किंविशिष्टेत्यत आह–'श्रुतरत्ननिधानम्' इह रत्नानि द्विविधानि भवन्ति, तद्यथा–द्रव्यरत्नानि भावरत्नानि (च), तत्र द्रव्यरत्नानि वैडूर्यमरकतेन्द्रनीलादीनि, भावरत्नानि श्रुतव्रतादीनि, तत्र द्रव्यरत्नानि न तात्त्विकानीति भावरत्नैरिहाधिकारः, तत एवं समासः–श्रुतान्येव रत्नानि श्रुतरत्नानि न तु श्रुतानि च रत्नानि च, नापि श्रुतानि रत्नानीवेति, कुत इति चेत् ?, उच्यते, प्रथमपक्षे श्रुत-व्यतिरिक्तैर्द्रव्यरत्नैरिहाधिकाराभावात्, द्वितीयपक्षे तु श्रुतानामेव तात्त्विकरत्नत्वात्, शेषरत्नैरु-पमाया अयोगात्, निधानमिव निधानं श्रुतरत्नानां निधानं श्रुतरत्ननिधानं, केषां प्रज्ञापनेत्यत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आह- 'सर्वभावानाम्' सर्वे च ते भावाश्च सर्वभावाः- जीवाजीवाश्रवबन्धसंवरनिर्जरामोक्षाः, तथाहि-अस्यां प्रज्ञापनाया षट्त्रिंशत्पदानि तत्र-

-प्रज्ञापना बहुवक्तव्यविशेषचरमपरिणामसञ्ज्ञेषु पञ्चसु पदेषु जीवाजीवानां प्रज्ञापना प्रयोगपदे क्रियापदे चाश्रवस्य 'कायवाङ्मनःकर्मयोगः (स) आश्रवः' इति वचनात्, कर्मप्रकृतिपदे बन्धस्य समुद्घातपदे केवलिसमुद्घातप्ररूपणायां संवरनिर्जरामोक्षाणां त्रयाणां, शेषेषु तु स्थानादिषु पदेषु क्वचित्कस्यचिदिति, अथवा 'सर्वभावाना'मिति द्रव्यक्षेत्रकालभावानाम्, एतद्व्यतिरेकेणान्यस्य प्रज्ञापनीयस्याभावात्,

तत्र प्रज्ञापनापदे जीवाजीवद्रव्याणां प्रज्ञापना स्थानपदे जीवाधारस्य क्षेत्रस्य स्थितिपदे नारकादिस्थितिनिरूपणात् कालस्य शेषपदेषु सङ्ख्याज्ञानादिपर्यायव्युत्क्रान्त्युच्छ्वासादीनां भावानामिति। अस्याश्च गाथाया 'अज्झयणमिणं चित्त' मित्यनया गाथया सहाभिसम्बन्धः ॥

केवलं येनेयं सत्त्वानुग्रहाय श्रुतसागारादुद्धृ ता असावप्यासन्नतरोपकारित्वादस्मद्विधानां नमस्काराई इति तन्नमस्कारविषयमिदमपान्तराल एवान्यकर्तृकं गाथाद्वयम्-

मू. (३) *वायगवरवंसाओ तेवीसइमेण धीरपुरिसेणं।*
दुद्धरधरेण मुनिना पुव्वसुयसमिद्धबुद्धीण ॥ (प्र०)

वृ. वाचकाः-पूर्वविदः वाचकाश्च ते वराश्च वाचकवराः-वाचकप्रधानाः तेषां वंशः-प्रवाहो वांचकवरवंशः तस्मिन्, सूत्रे च पञ्चमीनिर्देशः प्राकृतत्वात्, प्राकृते हि सर्वासु विभक्तिष्वपि सर्वा विभक्तयो यथायोगं प्रवर्त्तन्ते, तथा चाह पाणिनिः स्वप्राकृतव्याकरणे-'व्यत्ययोऽप्यासा' मिति, त्रयोविंशतितमेन तथा च सुधर्मस्वामिन आरभ्य भगवानार्यश्यास्त्रयोविंशतिता एव, किंभूतेन ?-'धीरपुरुषेण' धीः-बुद्धिस्तया राजते इति धीरः धीरश्चासौ पुरुषश्च धीरपुरुषस्तेन, तथा दुर्द्धराणि प्राणातिपातादिनिवृत्तिलक्षणानि पञ्च महाव्रतानि धारयतीति दुर्द्धरधरस्तेन,

तथा मन्यते जगतस्त्रिकालावयामिति मुनिस्तेन, विशिष्टसंवित्समन्वितेनेत्यर्थः, पुनः कथंभूतेनेत्याह-'पूर्वश्रुतसमृद्धबुद्धिना' पूर्वाणि च तत् श्रुतं च पूर्वश्रुतं तेन समृद्धा-वृद्धिमुपगता बुद्धिर्यस्य स पूर्वश्रुतसमृद्धबुद्धिस्तेन, आह-यो वाचकवरवंशान्तर्गतः स पूर्वश्रुतसम्बद्धबुद्धिरेव भवति, ततः किमनेन विशेषणेन ?, सत्यमेतत्, किन्तु पूर्वविदोऽपि षट्स्थानपतिता भवन्ति, तथा च चतुर्दशपूर्वविदामपि मतिमधिकृत्य षट्स्थानकं वक्ष्यति, तत आधिक्यप्रदर्शनार्थमिदं विशेषणमित्यदोषः, 'समिद्धबुद्धीणे' त्यत्र णाशब्दस्य ह्रस्वत्वं द्धिशब्दस्य च दीर्घताऽऽर्षत्वात्,

मू. (४) *सुयसागरा विणेऊण जेण सुयरयणमुत्तमं दिन्नं।*
सीसगणस्स भगवओ तस्स नमो अज्जसामस्स ॥ (प्र०)

वृ. तथा श्रुतमनर्वाक्पारत्वात् सुभाषितरत्नयुक्तत्वाच्च सागर इव श्रुतसागरः 'व्याघ्रादिभिर्गौणैस्तद्गुणानुक्ताविति' समासः, तस्मात् 'विणेऊणन्ति' देशीवचनमेतत्, साम्प्रतकालीनपुरुषयोग्यं वीनयित्वेत्यर्थः, येनेदं प्रज्ञापनारूपं श्रुतरत्नमुत्तमं-प्रधानं, प्राधान्यं च न शेषश्रुतरत्नापेक्षया, किन्तु स्वरूपतः, दत्तं शिष्यगणाय तस्मै, भगवते-ज्ञानैश्वर्यधर्मादिमते आरात्सर्वहेयधर्मेभ्यो यातः-प्राप्तो गुणैरित्यार्यः स चासौ श्यमाश्च आर्यश्यामः तस्मै, सूत्रे च षष्ठी चतुर्थ्यर्थे द्रष्टव्या, छठ्ठिविभत्तीए मन्नइ चउत्थी' इति वचनात् ॥ अधुनोक्तसम्बन्धैवेयं गाथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५) *अज्झयणमिणं चित्तं सुयरयणं दिट्ठिवायणीसंदं ।*
जह वन्नियं भगवया अहमवि तह वन्नइस्सामि ॥

वृ. अध्ययनमिदं–प्रज्ञापनाख्यम्, ननु यदीदमध्ययनं कमित्यस्यादावनुयोगादिद्वारोपन्यासो न क्रियते ?, उच्यते, नायं नियमो यदवश्यमध्ययनादावुपक्रमाद्युपन्यासः क्रियते इति, अनियमोऽपि कुतोऽवसीयते ? इति चेत्, उच्यते, नन्द्यध्ययनादिपदर्शनात्, तथा चित्रार्थाधिकारयुक्तत्वाचित्रम्, श्रुतमेव रत्नं श्रुतरत्नं दृष्टिवादस्य–द्वादशाङ्गस्य निष्यन्द इव दृष्टिवादनिष्यन्दः, सूत्रे नपुंसकतानिर्देशः प्राकृतत्वात्, यथा वर्णितं भगवता–श्रीमन्महावीरवर्धमानस्वामिना इन्द्रभूमिप्रभृतीनामध्ययनार्थस्य वर्णितत्वात् अध्ययनं वर्णितमित्युक्तम्, अहमपि तथा वर्णयिष्यामि ॥

आह–कथमस्य छद्मस्थस्य तथा वर्णयितुं शक्तिः ?, नैष दोषः, सामान्येनाभिधेयपदार्थवर्णमात्रमधिकृत्यैवमभिधानात्, तथा चाहमपि तथा वर्णयिष्यामीति किमुक्तं भवति ?–तदनुसारेण वर्णयिष्यामि, न स्वमनीषिकयेति ॥ अस्यां च प्रज्ञापनायां षड्त्रिंशत् पदानि भवन्ति, पदं प्रकरणमर्थाधिकार इति पर्यायः, तानि च पदान्यमूनि–

मू. (६) *पन्नवणा ठाणाइं बहवत्तव्वं ठिई विसेसा य ।*
वक्कंती ऊसासो सन्ना जोणी य चरिमाइं ॥

वृ. तत्र प्रथमं पदं प्रज्ञापनाविषयं प्रश्नमधिकृत्य प्रवृत्तत्वात् प्रापना १ एवं द्वितीयं स्थानानि २ तृतीयं बहुवक्तव्यम् ३ चतुर्थं स्थितिः ४ पञ्चमं विशेषाख्यं ५ षष्ठं व्युत्क्रान्तिः, व्युत्क्रान्तिलक्षणार्थाधिकारयुक्तत्वात ६ सप्तममुच्छ्वासः७ अष्टमं संज्ञा ७ नवमं योनिः ९ दशमं चरमाणि चरमाणीति प्रश्नमुद्दिश्य प्रवृत्तत्वात् १० ।

मू. (७) *भासा सरीर परिणाम कसाए इन्दिए पओगे य ।*
लेसा कायठिई या सम्मत्ते अंतकिरिया य ॥

वृ. एकादशं भाषा ११ द्वादशं शरीरं १२ त्रयोदशं परिणामः १३ चतुर्दशं कषायं १४ पञ्चदशमिन्द्रियं १५ षोडशं प्रयोगः १६ सप्तदशं लेश्या १७ अष्टादशं कायस्थितिः १८ एकोनविंशतितमं सम्यकत्वम् १९ विंशतितममन्तक्रिया २० ।

मू. (८) *ओगाहणसण्ठाणा किरिया कम्मे इयावरे ।*
बन्धए वेदे ए वेदस्स बन्धए वेयवेयए ॥

वृ. एकविंशतितममवगाहनास्थानं २१ द्वाविंशतितमं क्रिया २२ त्रयोविंशतितमं कर्म २३ चतुर्विंशतितमं कर्मणो बन्धकः, तस्मिन् हि यथा जीवः कर्मणो बन्धको भवति तथा प्ररूप्यते इति तत्तथानाम २४ एवं पञ्चविंशतितमं कर्मवेदकः २५ षड्विंशतितमं वेदस्य बन्धक इति, वेदयते–अनुभवतीति वेदस्तस्य बन्ध एव बन्धकः, किमुक्तं भवति ?–कति प्रकृतीर्वेदयमानस्य कतिप्रकृ.तीनां बन्धो भवतीति तत्र निरूप्यते ततस्तद्वेदस्य बन्ध इति नाम २६ एवं कां प्रकृतिं वेदयमानः कति प्रकृतीर्वेदयति इत्यर्थप्रतिपादकं वेदवेदको नाम सप्तविंशतितमम् २७ ।

मू. (९) *आहारे उवओगे पावणया सन्नि सञ्जमे चेव ।*
ओही पवियारण वेदना य तत्तो समुग्घाए ॥

वृ. अष्टविंशतितममाहारप्रतिपादकत्वादाहारः २८ एवमेकोनत्रिंशत्तममुपयोगः २९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रिंशत्तमं 'पासणय'त्ति दर्शनता ३० एकत्रिंशत्तमं संज्ञा ३१ द्वात्रिंशत्तमं संयमः ३२ त्रयस्त्रिंशत्तम-मवधिः ३३ चतुस्त्रिंशत्तमं प्रविचारणा ३४ पञ्चत्रिंशत्तमं वेदना ३५ षट्त्रिंशत्तमं समुद्घातः ३६ ॥ तदेवमुपन्यस्तानि पदानि ॥

साम्प्रतं यथाक्रमं पदगतानि सूत्राणि वक्तव्यानि, तत्र प्रथमपदगतमिदमादिसूत्रम्–

(अथ प्रथम–प्रज्ञापना पदं आरभ्यते)

मू. *(१०) से किं तं पन्नवणा ?, पन्नवणा दुविहा पन्नत्ता, तंजहा–जीवपन्नवणा य अजीव-पन्नवणा य ॥*

वृ. अथास्य सूत्रस्य कः प्रस्तावः ?, उच्यते, प्रश्नसूत्रमिदम्, एतच्चादावुपन्यस्तमिदं ज्ञापयति–पृच्छतो मध्यस्थबुद्धिमतोऽर्थिनो भगवर्हदुपदिष्टतत्त्वप्ररूपणा कार्या, न शेषस्य, तथा चोक्तम्–'मध्यस्थो बुद्धिमानर्थी, श्रोता पात्रमिति स्मृतः', तत्र सेशब्दो मागधदेशीप्रसिद्धो निपातः तत्रशब्दार्थे, अथवा अथशब्दार्थे, स च वाक्योपन्यासार्थः, किमिति परप्रश्ने, 'तं'ति तावदिति द्रष्टव्यम्, तच्च क्रमोद्द्योतने, तत एष समुदायार्थः–तिष्ठन्तु स्थानादीनि पदानि प्रष्टव्यानि, वाचः क्रमवर्त्तित्वात् प्रज्ञापनाऽनन्तरं च तेषामुपन्यस्तत्वात्,

तत्रैतावदेव तावत् पृच्छामि–किं प्रज्ञापनेति, ? अथवा प्राकृतशैल्या 'अभिधेयवल्लिङ्गवच-नानि योजनीयानि' इति न्यायादेवं द्रष्टव्यम्, तत्र का तावत् प्रज्ञापनेति ?, एवं सामान्येन केनचित्प्रश्ने कृते सति भगवान् गुरुः शिष्यवचनानुरोधेनादरार्थं किञ्चित् शिष्योक्तं प्रत्युच्चार्याह–'पन्नवणा दुविहा पन्नत्ता' इति, अनेन चागृहीतशिष्याभिधानेन निर्वचनसूत्रेणैतदाचष्टे–न सर्वमेव सूत्रं गणधरप्रश्नतीर्थकरनिर्वचनरूपम्, किन्तु किञ्चिदन्यथाऽपि, बाहुल्येन तु तथारूपम्,

यत उक्तम्–'अत्थं भासइ अरिहा सुत्तं गंथन्ति गणहरा निउण'मित्यादि, तत्र प्रज्ञापनेति पूर्ववत्, 'द्विविधा' द्विप्रकारा 'प्रज्ञप्ता' प्ररूपिता, यदा तीर्थकरा एव निर्वक्तारस्तदाऽयमर्थोऽ-वसेयः–अन्यैरपितीर्थकरैः, यदा पुनरन्यः कश्चिदाचार्यस्तन्मतानुसारी तदा तीर्थकरगणधरैरिति द्वैविध्यमेवोपदर्शयति–'तंजहा जीवपन्नवणा य अजीवपन्नवणा य'

'तद्यथे'ति वक्ष्यमाणभेदकथनप्रकाशनार्थः, जीवन्तिप्राणान् धारयन्तीति जीवाः, प्राणाश्च द्विधा–द्रव्यप्राणा भावप्राणाश्च, तत्र द्रव्यप्राणा इन्द्रियादयो भावप्राणा ज्ञानादीनि, द्रव्यप्राणैरपि प्राणिनः संसारसमापन्ना नारकादयः, केवलभावप्राणैः प्राणिनो व्यपगतसमस्तकर्मसङ्गाः सिद्धाः, जीवानां प्रज्ञापना जीवप्रज्ञापना, न जीवा अजीवा–जीवविपरीतस्वरूपाः, ते च धर्माधर्माकाश-पुद्गलास्तिकायाद्धासमयरूपास्तेषां प्रज्ञापना अजीवप्रज्ञापना, चकारौ द्वयोरपि प्राधान्यख्यापनार्थौ, न खल्विहान्यतरस्याः प्रज्ञापनायाः गुणभावः, एवं सर्वत्राप्यक्षरगमनिका कार्या ॥

तदेवं सामान्येन प्रज्ञापनाद्वयमुपन्यस्य सम्प्रति विशेषस्वरूपावगमार्थमादावल्प-वक्तव्यत्वादजीवप्रज्ञापनां प्रतिपिपादयिषुस्तद्विषयं प्रश्नसूत्रमाह–

मू. *(११) से किं तं अजीवपन्नवणा ?, अजीवपन्नवणा दुविहा पन्नत्ता, तंजहा–रुविअजीव-पन्नवणा य अरूविअजीवपन्नवणा य ।*

वृ. अथ किं तत् अजीवप्रज्ञापनेति ?, अथवा का साऽजीवप्रज्ञापना ?, सूरिराह–'अजीव-पन्नवणा दुविहा पन्नत्ता, तंजहा' इत्यादि, अजीवप्रज्ञापना द्विविधा प्रज्ञप्ता, तद्यथा–रूप्यजीवप्रज्ञापना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च अरूप्यजीवप्रज्ञापना च, रूपमेषामस्तीति रूपिणः, रूपग्रहणं गन्धादीनामुपलक्षणम्, तद्व्यतिरिकेण तस्यासम्भवात्, तथाहि–प्रतिपरमाणु रूपरसगन्धस्पर्शाः, उक्तं च– '

'कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः ।
एकरसगन्धवर्णो द्विस्पर्शः कार्यलिङ्गश्च"

तस्मादव्यतिरेकः परस्परं रूपादीनामिति, अथवा रूपं नाम–स्पर्शरूपादिसम्मूर्च्छनात्मिका मूर्त्तिस्तदेषामस्तीति रूपिणाः, रूपिणश्च तेऽजीवाश्च रूप्यजीवाः तेषां प्रज्ञापना रूप्यजीवप्रज्ञापना, पुद्गलस्वरूपाजीवप्रज्ञापनेतियावत्, पुद्गलानामेव रूपादिमत्त्वात्, रूपिव्यतिरेकेणारूपिणो धर्मास्तिकायादयस्ते च तेऽजीवाश्चारूप्यजीवाः तेषां प्रज्ञापना अरूप्यजीवप्रज्ञापना, चशब्दौ प्राग्वत् ।। तत्राल्पवक्तव्यत्वात् प्रथमतोऽरूप्यजीवप्रज्ञापनां चिकीर्षुरिदमाह–

मू. (१२) *से किं तं अरुविअजीवपन्नवणा ?, अरुविअजीवपन्नवणा दसविहा पन्नत्ता, तंजहा–धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पदेसा अधम्मत्थिकाए अधम्मत्थिकायस्स देसे अधम्मत्थिकायस्स पदेसा आगासत्थिकाए आगासत्थिकायस्स देसे आगासत्थिकायस्स पदेसा अद्धासमए १०, सेत्तं अरूविअजीवपन्नवणा ॥*

वृ. सेशब्दोऽथशब्दार्थः, अथ का सा अरूप्यजीवप्रज्ञापना ?, सूरिराह–अरूप्यजीवप्रज्ञापना 'दशविधा' दशप्रकारा प्रज्ञप्ता, अरूप्यजीवानां दशविधत्वात् तत्प्ररूपणाऽपि दशविधोक्ता, तदेव दशविधत्वं दर्शयति–'तंजहे' त्यादि, तद्यथेति वक्ष्यमाणभेदकथनोद्द्योतनारअथः, 'तद्' दशविधत्वम्, यदिवा 'तदि' त्यव्ययं सर्वलिङ्गवचनेषु सा दशविधाऽरूप्यजीवप्रज्ञापना यथा भवति तथा दर्श्यते– 'धम्मत्थिकाए' त्ति जीवानां पुद्गलानां च स्वभावत एव गतिपरिणामपरिणतानां तत्स्वभाव-धरणात्–तत्स्वभावपोषणाद्धर्मः अस्तयश्चेह प्रदेशास्तेषां कायः–सङ्घातः, 'गण काए य निकाए खन्धे वग्गे तहेव रासी य' इतिवचनात्, अस्तिकायः प्रदेशसङ्घात इत्यर्थः, धर्मश्चासौ अस्तिकायश्च धर्मास्तिकायः, अनेन च सकलमेव धर्मास्तिकायरूपमवयविद्रव्यमाह, अवयवी च नामावयवानां तथारूपसङ्घातपरिणामविशेष एव, न पुनरवयवद्रव्येभ्यः पृथगर्थान्तरं द्रव्यम्, तथाऽनुपलम्भात्, तन्तव एव हि आतानवितानरूपसङ्घातपरिणामविशेषमापन्ना लोके पटव्यपदेशभाज उपलभ्यन्ते, न तदतिरिक्तं पटाख्यं नाम, उक्तं चान्यैरपि–

॥१॥ "तन्त्वादिव्यतिरेकेण, न पटाद्युपलम्भनम् ।
तन्त्वादयो विशिष्टा हि, पटादिव्यपदेशिनः ।।"

कृतं प्रसङ्गेन, अन्यत्र चिन्तित्वादेतद्वादस्य, तथा 'धर्मास्तिकायस्य देश' इति तस्यैव धर्मास्तिकायस्य बुद्धिविकल्पितो द्यादिप्रदेशात्मको विभागः, 'धममत्थिकायस्स पदेसा' इति प्रकृष्टा देशाः प्रदेशाः–निर्विभागा भागा इति भावः, ते चासङ्ख्येयाः, लोकाकाशप्रदेशप्रमाणत्वात् तेषाम्, अत एव बहुवचनम्, धर्मास्तिकायप्रतिपक्षभूतोऽधर्मास्तिकायः, किमुक्तं भवति ? –जीवपुद्गलानां स्थिति परिणामपरिणतानां तत्परिणामोपष्टम्भकोऽमूर्त्तोऽसंख्यातप्रदेशसंघातात्मकोऽधर्मास्तिकायः 'अधर्मास्तिकायस्य देश' इत्यादि पूर्ववत् ।

तथा 'आङि'ति मर्यादया स्वस्वभावापरित्यागरूपया काशन्ते–स्वरूपेण प्रतिभासन्ते अस्मिन् व्यवस्थिताः पदार्था इत्याकाशम्, यदा त्वभिविधावाङ् तदा 'आङि' ति सर्वभावाभिव्याप्तया काशते इत्याकाशम्, अस्तयः–प्रदेशास्तेषां कायोऽस्तिकायः आकाशं च तदस्तिकायश्चा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काशास्तिकायः, 'आकाशस्तिकायस्य देश'; इत्यादि पूर्ववत्, नवरं प्रदेशा अनन्ता द्रष्टव्याः, अलोकस्यानन्तत्वात्। 'अद्धेति' कालस्याख्या, अद्धा चासौ समयश्चाद्धासमयः, अथवाऽद्धायाः समयो निर्विभागो भागः, अयं च एक एव वर्त्तमानः परमार्थः सन्, नातीता नानागताः समयाः, तेषां यथाक्रमं विनष्टानुत्पन्नत्वेनासत्त्वात्, ततः कायत्वाभाव इति देशप्रदेशकल्पनाविरहः, आवलिकादयस्तु पूर्वसमयनिरोधेनैवोत्तरसमयसद्भाव इति ततः समुदयसमित्याद्यसम्भवेन व्यवहारार्थमेव कल्पिता इति द्रष्टव्यम्।

तथा अमीषामित्थं क्रमोपन्यासे किं प्रयोजनम्?, उच्यते, इह धर्मास्तिकाय इति पदं मङ्गलभूतम्, आदौ धर्मशब्दान्वितत्वात्, पदार्थप्ररूपणा च सम्प्रति प्रथमत उक्षिप्ता वर्त्तते, ततो मङ्गलार्थमादौ धर्मास्तिकायस्योपादानम्, धर्मास्तिकायप्रतिपक्षभूतश्चाधर्मास्तिकाय इति तदनन्तरमधर्मास्तिकायस्य, द्वयोरपि चानयोराधारभूतमाकाशमिति तदनन्तरमाकाशास्तिकायस्य,

ततः पुनरजीवसाधर्म्यादद्धासमयस्य, अथवेह धर्माधर्मास्तिकायौ विभू न भवतः, तद्विभुत्वे तत्सामर्थ्यतो जीवपुद्गलानामस्खलितप्रचारप्रवृत्तौ लोकालोकव्यवस्थाऽनुपपत्तेः, अस्ति च लोकालोकव्यवस्था, तत्र तत्र प्रदेशे सूत्रे साक्षाद्दर्शनात्, ततो यावति क्षेत्रेऽवगाढौ तावत्प्रमाणो लोकः शेषस्त्वलोक इति सिद्धम्, उक्तं च–

॥१॥ "धर्माधर्मविभुत्वात् सर्वत्र च दीवपुद्गलविचारात्।
नालोकः कश्चित्स्यान्न च सम्मतमेतदार्याणाम्॥
॥२॥ तस्माद्धर्माधर्माववगाढौ व्याप्य लोकखं सर्वम्।
एवं हि परिच्छिन्नः सिध्यति लोकस्तदविभुत्वात्॥"

ततः एवं लोकालोकव्यवस्थाहेतू धर्माधर्मास्तिकावावित्यनयोरादावुपादानम्, तत्रापि माङ्गलिकत्वात् प्रथमतो धर्मास्तिकायस्य, तत्प्रतिपक्षत्वात् ततोऽधर्मास्तिकाकस्य, ततो लोकालोकव्यापित्वादाकाशास्तिकायस्य, तदनन्तरं लोके समयासमयक्षेत्रव्यवस्थाकारित्वादद्धासमयस्य, स्वमागमानुसारेणान्यदपि युक्तयनुपाति वक्तव्यम्, इत्यलं प्रसङ्गेन।

प्रकृतोपसंहारमाह–'सेत्तं अरूविअजीवपन्नणा' सैषा अरूप्यजीवप्रज्ञापना॥ पुनराह विनेयः–

मू. *(१३) से किं तं रूविअजीवपन्नवणा?, रूविअजीवपन्नवणा चउव्विहा पन्नत्ता, तंजहा–खंधा खंधदेसा खंधपएसा परमाणुपोगला, ते समासओ पंचविहा पन्नत्ता, तंजहा–वण्णपरिणया गंधपरिणया रसपरिणया फासपरिणया संठाणपरिणया।*

वृ. अथ का सा रूप्यजीवप्रज्ञापना?, सूरिराह–रूप्यजीवप्रज्ञापना चतुर्विधा प्रज्ञप्ता, तद्यथा–'स्कन्धाः' स्कन्दन्ति शुकन्ति धीयन्तेच–पुष्यन्ते पुद्गलानां विचटनेन चटनेन चेति स्कन्धाः, 'पृषोदरादय' इति रूपनिष्पत्तिः, अत्र बहुवदनं पुद्गलस्कन्धानामानन्त्यक्यापनार्थम्, न चानन्त्यमनुपपन्नम्, आगमेऽभधानात्, तथा च वक्ष्यति–

'दव्वओ णं पुग्गलत्थिकाए' इत्यादि, 'स्कन्धदेशाः' स्कन्धानामेव स्कन्धत्वपरिणाममजहतो बुद्धिपरिकल्पिता द्व्यादिप्रदेशात्मका दिभागाः, अत्रापि बहुवचनमनन्तानन्तप्रादेशिकेषु तथाविधेषु स्कन्धेषु देशानन्तत्वसम्भावनारअथम्, स्कन्धानां स्कन्धत्वपरिणामपरिणतानां बुद्धिपरिकल्पिताः प्रकृष्टा देशा निर्विभागा भागाः परमाणव इत्यर्थः स्कन्धप्रदेशाः, अत्रापि बहुवचनं प्रदेशानन्तत्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भावनार्थम्, 'परमाणुपुद्गला इति' परमाश्च तेऽणवश्च परमाणवो निर्विभागद्रव्यरूपाः ते च ते पुद्गलाश्च परमाणुपुद्गलाः, स्कन्धत्वपरिणामरहिताः केवलाः परमाणव इत्यर्थः।

'ते समासओ' इत्यादि, ते स्कन्धाध्यो यथासम्भवं 'समासतः' सङ्क्षेपेण पञ्चविधाः प्रज्ञप्ताः, तद्यथा-'वर्णपरिणताः' वर्णतः परिणताः, वर्णपरिणामभाजइत्यर्थः, एवं गन्धपरिणता रसपरिणताः स्पर्शपरिणताः संस्थानपरिणताः, परिणता इत्यतीतकालनिर्देशो वर्त्तमानातगतकालोपलक्षणं, वर्त्तमानानागतत्वमन्तरेणातीतत्वस्यासम्भवात्, तथाहि-यो वर्तमानत्वमतिक्रान्तः सोऽतीतो हवति, वर्त्तमानत्वं च सोऽनुभवति योऽनागतत्वमतिक्रान्तवान्, उक्तं च-

॥१॥ "भवति स नामातीतो यः प्राप्तो नाम वर्त्तमानत्वम्।
एष्यंश्च नाम स भवति यः प्राप्स्यति वर्त्तमानत्वम्॥"

ततो वर्णपरिणता इति वर्णरूपतया परिणताः परिणमन्ति परिणमिष्यन्तीति द्रष्टव्यम्, एवं गन्धरसपरिणता इत्याद्यपि परिभावनीयम्।

मू. (१३-वर्तते) *जे वण्णपरिणया ते पंचविहा पन्नत्ता, तंजहा-कालवण्णपरिणया नीलवण्णप० लोहियवण्णप० हालिद्दवण्णप० सुक्किल्लवण्णपरिणया, जे गंधपरिणता ते दुविहा पं० तं०- सुब्भिगंधपरिणता य दुब्भिगंधपरिणता य, जे रसपरिणता ते पंचविहा पं० तं०-तित्तपरिणता कडुयरसपरिणता कसायरसपरिणया अंबिलरसपरिणता महुरसपरिणया,*

जे फासपरिणता ते अट्ठविहा पं० तं०-कक्खडफासपरिणया मउयफासपरिणया गुरुयफासपरिणता लहुयफासपरिणया सीयफासपरिणया उसिणफासपरिणया निद्धफासपरिणया लुक्खफासपरिणया,

जे सण्ठाणपरिणया ते पंचविहा पं० तं०-परिमंडलसंठाणपरिणया वट्टसंठाणपरि० तंससंठाणप० चउरंससं० प० आयतसंठाणपरिणया।

वृ. ये वर्णपरिणतास्ते पञ्चविधाः प्रज्ञप्ताः, तद्यथा-कृष्णवर्णपरिणताः कज्जलादिवत्, नीलवर्णपरिणता नील्यादिवत्, लोहितवर्णपरिणता हिङ्गुलकादिवत्, हारिद्रवर्णपरिणता हरिद्रादिवत्, शुक्लवर्णपरिणताः शङ्खादिवत्।

ये गन्धपरिणतास्ते द्विविधाः प्रज्ञप्ताः, तद्यथा-सुरभिगन्धपरिणताश्च दुरभिगन्धपरिणताश्च, चशब्दौ परिणामभवनं प्रति विशेषाभावख्यापनार्थौ, तथाहि-यथा कथञ्चिदवस्थिताः सामग्रीवशतः सुरभिगन्धपरिणामं भजन्ते तथा कथञ्चिदवस्थिता एव सामग्रीवशतो दुरभिगन्धपरिणाममपीति, सुरभिगन्धपरिणताश्च यथा श्रीखण्डादयः, दुरभिगन्धपरिणता लसुनादिवत्। ये रसपरिणतास्ते पञ्चविधाः प्रज्ञप्ताः, तद्यथा-तिक्तरसपरिणताः कोशातक्यादिवत्, कटुकरसपरिणताः सुण्ठ्यादिवत्, कषायरसपरिणता अपक्ककपित्थादिवत्, अम्लरसपरिणता अम्लवेतसादिवत्, मधुररसपरिणताः शर्करादिवत्। ये स्पर्शपरिणतास्तेऽष्टविधाः प्रज्ञप्ताः, तद्यथा- कर्कशस्पर्शपरिणताः पाषाणादिवत्, मृदुस्पर्शपरिणता हंसरुतादिवत्, गुरुकस्पर्शपरिणताः वज्रादिवत्, लघुकस्पर्श० अर्कतूला- दिवत्, शीतस्पर्शपरिणता मृणालादिवत्, उष्णस्पर्श० वह्नयादिवत्, स्निग्धस्पर्शपरिणता घृतादिवत्, रूक्षस्पर्शपरिणता भस्मादिवत्।

ये संस्थानपरिणतास्ते पञ्चविधाः प्रज्ञप्ताः, तद्यथा-परिमण्डलसंस्थानपरिणता वलयवत्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृत्तसंस्थानपरिणताः कुलालचक्रादिवत्, त्र्यस्रसंस्थानपरिणताः शृङ्गाटकादिवत्, चतुरस्रसंस्थान-परिणताः कुम्भिकादिवत्, आयतसंस्थानपरिणता दण्दादिवत्, एतानि च परिमण्डलादीनि संस्थानानि धनप्रतरभेदेन द्विविधानि भवन्ति, पुनः परिमण्डलमपहाय शेषाणि ओजःप्रदेशजनितानि युग्मप्रदेशजनितानीति द्विधा, तत्रोत्कृष्टं परिमण्डलादि सर्वमनन्ताणुनिष्पन्नमसङ्ख्येयप्रदेशावगाढं चेति प्रतीतमेव, जघन्यं तु प्रतिनियतसङ्ख्येपरमाण्वात्मकम्, अतो नानिर्दिष्टं ज्ञातुं शक्यते इति विनेयजनानुग्रहाय तदुपदर्श्यते-तत्रौजःप्रदेशप्रतरवृत्तं पञ्चपरमाणुनिष्पन्नं पञ्चाकाशप्रदेशावगाढं च, तद्यथा- एकः परमाणुर्मध्ये स्थाप्यते, चत्वारः क्रमेण पूर्वादिषु चतसृषु दिक्षु, युग्मप्रदेशप्रतरवृत्तं द्वादशपरमाण्वात्मकं द्वादशप्रदेशावगढं च, तत्र निरन्तरं चत्वारः परमाणवश्चतुष्वाकाशप्रदेशेषु रुचकाकारेण व्यवस्थाप्यन्ते, ततस्तत्परिक्षेपेण शेषा अष्टौ ओजःप्रदेशं धनवृत्तं सप्तप्रदेशं सप्तप्रदेशा-वगाढं च, तच्चैवं-तत्रैव पञ्चप्रदेशे प्रतरवृत्ते मध्यस्थितस्य परमाणोरुपरिष्टादधस्ताच्च एकैकोऽणुरवस्थाप्यते, तत एवं सप्तप्रदेशं भवति युग्मप्रदेशं धनवृत्तं द्वात्रिंशत्प्रदेशं द्वात्रिंशत्प्रदेशा-वगाढं च, तच्चैवं-पूर्वोक्तद्वादशप्रदेशात्मकस्य प्रतरवृत्तस्योपरि द्वादश, तत उपरिष्टादधश्चान्ये चत्वारश्चत्वारः परमाणव इति

ओजः प्रदेशं प्रतरत्र्यस्रं त्रिप्रदेशं त्रिप्रदेशावगाढं च, तच्चैवं पूर्वं तिर्यगणुद्वयं न्यस्यते, तत आद्यस्याध एकोऽणुः, स्थापना- युग्मप्रदेशं प्रतरत्र्यस्रं षट्परमाणुनिष्पन्नं षट्प्रदेशावगाढं च, तत्र तिर्यग् निरन्तरं त्रयः परमाणवः स्थाप्यन्ते, तत आद्यस्याद्य उपर्यधोभावेनाणुद्वयं द्वितीयस्याध एकोऽणुः, स्थापना ओजः- प्रदेशं धनत्र्यस्रं पञ्चत्रिंशत्परमाणुनिष्पन्नं पञ्चत्रिंशत्प्रदेशावगाढं च, तच्चैवं-तिर्यग् निरन्तराः पञ्च परमाणवःस्थाप्यन्ते, तेषां चाधोऽधः क्रमेण तिर्यगेव चत्वारस्त्रयो द्वावेकश्चेति पञ्चदशात्मकः प्रतरो जातः, स्थापना-अस्यैव च प्रतरस्योपरि सर्वपङ्क्तिश्वन्त्यान्त्य-परित्यागेन दश १०, तथैव तदुपर्युपरि षट् त्रय एकश्चेति क्रमेणाणवः स्थाप्यन्ते, एते मीलिताः पञ्चत्रिंशद्भवन्ति युग्मप्रदेशं धनत्र्यस्रं चतुष्परमाणवात्मकं चतुष्प्रदेशावगाढं च प्रतरत्र्यस्रस्यैव त्रिप्रदेशात्मकस्य सम्बन्धिन एकस्याणोरुपर्येकोऽणुः स्थाप्यते, ततो मीलिताश्च त्वारो भवन्ति ॥

ओजःप्रदेशं प्रतरचतुरस्रं नवपरमाण्वात्मकं नवप्रदेशावगाढं च, तत्र तिर्यग् निरन्तरं त्रिप्रदेशास्तिस्रः पङ्क्तयः स्थाप्यन्ते, स्थापनायुग्मप्रदेशं प्रतरचतुरस्रं चतुष्परमाण्वात्मकं चतुष्प्रदेशाव-गाढं च, तत्र तिर्यग् द्विप्रदेशे द्वे पङ्क्ति स्थाप्येते, ओजःप्रदेशं धनचतुरस्रं सप्तविंशतिपरमाण्वात्मकं सप्तविंशतिप्रदेशावगाढं च, तत्र नवप्रदेशात्मकस्यैव पूर्वोक्तस्य प्रतरस्याध उपरि च नव नव प्रदेशाः स्थाप्यन्ते, ततः सप्तविंशतिप्रदेशात्मकमोजः प्रदेशं धनचतुरस्रं भवति अस्यैव युग्मप्रदेशं धनचतुरस्रमष्टपरमाण्वात्मकमष्टप्रदेशावगाढंच, तच्चैवं-चतुष्प्रदेशात्मकस्य पूर्वोक्तस्य प्रतरस्योपरि चत्वारोऽन्ये परमाणवः स्थाप्यन्ते ३॥ ओजःप्रदेशं श्रेण्यायतं त्रिपरमाणु त्रिप्रदेशावगाढं च, तत्र तिर्यग् निरन्तरं त्रयः स्थाप्यन्ते युग्मप्रदेशं श्रेण्यायतं द्विपरमाणु द्विप्रदेशावगाढं च, तथैवाणुद्वयं स्थाप्यते ओजः-प्रदेशं प्रतरायतं पञ्चदशपरमाण्वात्मकं पञ्चदशप्रदेशावगाढं च, तत्र पञ्चप्रदेशात्मिकास्तिस्रः पङ्क्तयस्तिर्यक् स्थाप्यन्ते, युग्मप्रदेशं प्रतरायतं षट्परमाण्वात्मकं षट्प्रदेशावगाढंच, तत्र त्रिप्रदेशं पङ्क्तिद्वयं स्थाप्यते, स्थापना-ओजःप्रदेशं धनायतं पञ्चचत्वारिंशत् परमाण्वात्मकं तावत्प्रदेशावगाढं च, तत्र पूर्वोक्तस्यैव प्रतरायतस्य पञ्चदशप्रदेशात्मकस्याध उपरि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथैव पञ्चदश परमाणव;–स्थाप्यन्ते युग्मप्रदेशं धनायतं द्वादशपरमाण्वात्मकं द्वादशप्रदेशावगाढं च, तत्र प्रागुक्तस्य षट्प्रदेशस्य प्रतरायतस्योपरि तथैव तावन्तः परमाणवः स्थाप्यन्ते ४।।

प्रतरपरिमण्डलं विंशतिपरमाण्वात्मकं विंशतिप्रदेशावगाढं च, तच्चैवं–प्राच्यादिषु चतसृषु दिक्षु प्रत्येकं चत्वारश्चत्वारोऽणवः स्थाप्यन्ते, विदिक्षु च प्रत्येकमेकैकोऽणुः स्थाप्यते घनपरिमण्डलं चत्वारिंशत्प्रदेशावगाढं चत्वारिंशत्परमाण्वात्मकं च, तत्र तस्या एव विंशतेरुपरि तथैवान्या विंशतिरवस्थाप्यते ५।। इत्थं चैषां प्ररूपणमितोऽपि न्यूनप्रदेशतायां यथोक्तसंस्थानाभावात्, एतत्सङ्गङ्ग्राहिकाश्चेमा उत्तराध्ययननिर्युक्तिगाथाः–

।।१।। "परिमण्डले य वट्टे तंसे चउरंस आयए चेव।
घनपयर पढमवज्जं ओजपएसे य जुम्मे य ।।
।।२।। पंचगबारसगं खलु सत्तगबत्तीसगं च वट्टम्मि।
तिय छक्क पणगतीसा चत्तारि य होंति तसंम्मि ।।
।।३।। नव चेव तहा चउरो सत्तावीसा य अट्ठ चउरंसे।
तिगदुगपन्नरसेव य छच्चेव य आयए होंति।।
।।४।। पणयाला बारसगं तह चेव य आययम्मि संठाणे।
वीसा चत्तालीसा परिमंडलए य संठाणे ।।" इत्यादि ।।

–सम्प्रत्येतेषामेव वर्णादीनां परस्परं संवेधमाह–

मू. (१३-वर्तते) *जे वण्णओ कालवण्णपरिणता ते गंधओ सुब्भिगंधपरिणतावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाण-परिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणायावि २०,*

जे वन्नओ नीलवण्णपरिणता ते गंधओ सुब्भिगंधपरिणायावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ कक्खडफासपरिणतावि मउयफासपरिणतावि गुरुयफासपरिणतावि लहुयफासपरिणतावि सीतफासपरिणतावि उसिणफासपरिणतावि निद्धफासपरिणतावि लुक्खफासपरिणतावि संठाणओ परिमंडलसण्ठाणपरिणतावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणयावि २०,

जे वण्णओ लोहियवण्णपरिणया ते गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणयावि महुररसपरिणतावि फासओ कक्खडफासपरिणतावि मउयफासपरिणातावि गुरुयफासपरिणयावि लहुयफासपरिणतावि सीतफासपरिणतावि उसिणफासपरिणतावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संढाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणतावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणतावि २०,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जे वण्णओ हालिद्दवण्णपरिणया ते गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणतावि आयतसंठाणपरिणतावि २०,

जे वन्नओ सुक्किल्लवण्णपरिणता ते गंधओ सुब्भिगंधपरिणतावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ कक्खडाफासपरिणतावि गुरुयफासपरिणतावि लहुयफासपरिणतावि सीयफासपरिणतावि उसिणफासपरिणतावि निद्धफासपरिणतावि लुक्खफासपरिणतावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २०, १०० ।

जे गंधओ सुब्भिगंधपरिणया ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयाविलोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणयावि फासओ कक्खडफासपरिणतावि मउयफासपरिणतावि गरुयफासपरिणतावि लहुयफासपरिणतावि सीतफासपरणतावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि सणंठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २३, जे गंधओ दुब्भिगंधपरिणया ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हारिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफासप० निद्धफासप० लुक्खफासपरिणयावि संठाणओ परिमंडल- संठाणपरिणयावि वट्टसंठाण० तंससंठाणप० चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २६, ४६ ।

जे रसओ तित्तरसपरिणया ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणतावि गुरुयफासपरिणतावि लहुयफासपरिणतावि सीतफासपरिणतावि उसिणफासपरिणतावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाण- परिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २०,

जेरसओ कडुयरसपरिणता ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगन्धपरिणयावि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुब्भिगंधपरिणयावि फासओ कक्खडफासपरिणयावि मउफासयपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीतफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणयावि२०,

जे रसओ कसायरसपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणतावि लोहियवण्णपरिणतावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीतफासपरिणतावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयाविर२०,

जे रसओ अंबिलरसपरिणया ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २०,

जे रसओ महुररसपरिणया ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणतावि लहुयफासपरिणतावि सीतफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासरिणतावि संठाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणतावि तंससंठाणपरिणतावि चउरंससंठाणपरिणतावि आययसंठाणपरिणयावि २०, १०० ।

जे फासतो कक्खडफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणतावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणतावि सुक्किल्लवण्णपरिणतावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ गुरुयफासपरिणतावि लहुयफासपरिणतावि सीतफासपरिणतावि उसिणफासपरिणतावि निद्धफासपरिणतावि लुक्खफासपरिणतावि संठाणतो परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणतावि तंससंठाणपरिण- तावि चउरंससंठाणपरिणतावि आयतसंठाणपरिणयावि २३,

जे फासओ मउयफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणतावि लोहियवण्णपरिणतावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणतावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ गुरुयफासपरिणयावि लहुयफासपरिणयावि सीतफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणतावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि

चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २३,

जे फासओ गुरुयफासपरिणता ते वण्णओ कालवण्णपरिणातावि नीलवण्णपरिणतावि लोहियवण्णपरिणतावि हालिद्दवण्णपरिणतावि सुक्किल्लवण्णपरिणतावि गन्धओ सुब्भिगंधपरिणतावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायपसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ कक्खडफासपरिणतावि मउयासपरिणतावि सीयफासपरिणतावि उसिणफासपरिणतावि निद्धफासपपरिणतावि लुक्खफासपरिणतावि संठाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २३,

जे फासओ लहुयफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणतावि सुक्किल्लवण्णपरिणतावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलपसपरिणतावि महुररसपरिणतावि फासओ कक्खडफासपरिणतावि मउयफासपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणतावि लुक्खफासपरिणतावि संठाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २३,

जे फासओ सीयफासपरिणता ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरियावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणतावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणतावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणतावि लहुयफासपरिणयावि निद्धफासपरिणतावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणयावि २३,

जे फासओ उसिणफासपरिणता ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणतावि २३,

जे फासओ निद्धफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणतावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधनपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीतफासपरिणतावि उसिणफासपरिणयावि संठा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंस-संठाणपरिणयावि आययसंठाणपरिणयावि २३,

जे फासओ लुक्खफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिण-यावि दुब्भिगंधपरिणयावि तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीतफासपरिणयावि उसिणफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयतावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणप० आययसंठाणप० २३, १८४।

जे संठाणओ परिमंडलसंठाणपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्ण-परिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि २०,

जे संठाणओ वट्टसंठाणपरिणता ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिण- यावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिरसपरिणयावि महुररसपरिणतावि फासओ कक्खडफासपरिणतावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफसपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि २०,

जे संठाणओ तंससंठाणपरिणता ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंध-परिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरस-परिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउय-फासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफास-परिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि २०,

जे संठाणओ चउरंससंठाणपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्ण-परिणतावि लोहियवण्णपरिणतावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावमहुररसपरिणयावि फासओ कक्खडफासपरिणतावि मउयफासपरिणतावि गुरुयफासपरिणतावि लहुयफासपरिणतावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावी २०,

जे संठाणओ आयतसंठाणपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गन्धओ सुब्भिगंध-परिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिण-तावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरणयावि मउयफासपरिण-यावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणतावि २०, १०० ।

सेत्तं रूविअजीवपन्नवणा, सेत्तं अजीवपन्नवणा ।

वृ. ये स्कन्धा दयो 'वर्णतो' वर्णमाश्रित्य कालवर्णपरिणता अपि भवन्ति ते 'गंधतो' गन्धमाश्रित्य सुरभिगन्धपरिणता अपि भवन्ति, दुरभिगन्धपरिणता अपि, किमुक्तं भवति ? - गन्धमधिकृत्य ते भाज्याः,केचित् सुरभिगन्धपरिणता भवन्ति केचिद्दुरभिगन्धपरिणताः, न तु प्रतिनियतैकगन्धपरिणामपरिणता एवेति, एवं च रसतः स्पर्शतः संस्थानतश्च वाच्याः, तत्र द्वौ गन्धौ पञ्च रसा अष्टौ स्पर्शाः पञ्च संस्थानानीति, एते च मीलिता विंशतिरिति कृष्णवर्णपरिणता एतावतो भङ्गांल्लभन्ते २०, एवं नीलवर्णपरिणता अपि २०, लोहितवर्णपरिणता अपि २०, हारिद्रवर्णपरिणता अपि २०, शुक्लवर्णपरिणता अपि २०, एवं पञ्चभिर्वर्णैर्लब्धं शतम् १०० ।

गन्धमधिकृत्याह-'ये गंधतो' इत्यादि, ये 'गन्धतो' गन्धमधिकृत्य सुरभिगनधपरिणाम-परिणतास्ते वर्णतः कालवर्णपरिणता अपि नीलवर्णपरिणता अपि लोहितवर्णपरिणता अपि हारिद्रवर्णपरिणता अपि शुक्लवर्णपरिणता अपि ५, एवं रसतः ५ स्पर्शतः ८ संस्थानतः ५, एते च मीलितास्त्रयोविंशतिः २३ इति सुरभिगन्धपरिणतास्त्रयोविंशतिभङ्गांलभन्ते, एवं दुरभिगन्धपरिणता अपि २३, ततो गन्धपदेन लब्धा भङ्गानां षट्चत्वारिंशत् ४६ ।

रसमधिकृत्याह-ये 'रसतो' रसमधिकृत्य तिक्तरसपरिणतास्ते वर्णतः ५ गन्धतः २ स्पर्शतः ८ संस्थानतः ५ एते सर्वेऽप्येकत्र मीलिता विंशतिः इति तिक्तरसपरिणता विंशतिभङ्गाल्लभन्ते, एवंकटुकरसपरिणताः २० कषायरसपरिणताः २० अम्लरपसरिणताः २० मधुररसपरिणताश्च २०, एवं रसपञ्चटकसंयोगे लब्धं भङ्गकानां शतम् १०० इत्यादि ।

स्पर्शमधिकृत्याह-'जे फासतो कक्खडफासपरिणया' इत्यादि, ये स्पर्शतः कर्कस्पर्श-परिणतास्ते वर्णतः ५ गन्धतः २ रसतः ५ स्पर्शतः ६ प्रतिपक्षस्पर्शयोगाभावात् संस्थानतः ५, एते सर्वेऽप्येकत्र मीलितास्त्रयोविंशतिः २३, एतावतो भङ्गान् कर्कशस्पर्शपरिणता लभन्ते २३, एतावत एव मृदुस्पर्शपरिणताः २३ गुरुस्पर्शपरिणताः २३ लघुस्पर्शपरिणताः २३ शीतस्पर्श-परिणताः २३ उष्णस्पर्शपरिणताः २३ स्निग्धस्पर्शपरिणताः २३ रूक्षस्पर्शपरिणताः २३, एतैषा-मेकत्र मीलने जातं भङ्गकानां चतुरशीत्यधिकं शतं १८४ इत्यादि ।

संस्थानमधिकृत्याह-'जे सण्ठाणओ परिमण्डलसण्ठाणपरिणया' इत्यादि, ये संस्थानतछः परिमण्डलसंस्थानपरिणतास्ते वर्णतः ५ गन्धतः २ रसतः ५ स्पर्शतः ८ एते सर्वेऽप्येकत्र मीलिताः विंशतिः २० एतावतो भङ्गान् परिमण्डलसंस्थानपरिणता लभन्ते, एवं वृत्तसंस्थानपरिणताः २० त्र्यस्त्रसंस्थानपरिणताः २० चतुरस्रसंस्थानपरिणताः २० आयतसंस्थानपरिणताः २०, अमीषां चैकत्र मीलने लब्धं भङ्गाकानां शतम्, एतेषां च वर्णगन्धरसस्पर्शसंस्थानानां सकलभङ्गसङ्कलने जातानि पञ्च शतानि त्रिंशदधिकानि ४३० । इह यद्यपि बादरेषु स्कन्धेषु पञ्चापि वर्णा द्वावपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गन्धौ पञ्चापि रसाः प्राप्यन्ते, ततोऽ-वधिकृतवर्णादिव्यतिरेकेण शेषवर्णादिभिरपि भङ्गाः सम्भवन्ति, तथापि तेष्वेव बादरेसु स्कन्धेषु ये व्यवहारतः केवलकृष्णवर्णाद्युपेता अपान्तरालस्कन्धा यथा देहस्कन्ध एव लोचनस्कन्धः कृष्णस्तदन्तर्गत एव कश्चिल्लोहितोऽन्यस्तदन्तर्गत एव शुक्ल इत्यादि ते इह विवक्ष्यन्ते, तेषां चान्यद्वर्णान्तरादि न सम्भवति,

स्पर्शचिन्तायां त्ववधिकृतस्पर्शं प्रति प्रतिपक्षव्यतिरेकेणान्ये स्पर्शा लोकेऽप्यविरोधिनो दृश्यन्ते ततो यथोक्तैव भङ्गसङ्ख्या, साऽपि च परिस्थूरन्यायमङ्गीकृत्याभिहिता, अन्यथा प्रत्येकमप्येषां तारतम्येनानन्तत्वादनन्ता भङ्गाः संभवन्ति, एतेषां च वर्णादिपरिणामानां जघन्यतोऽवस्थानमेकं समयमुत्कर्षतोऽसङ्ख्येयं कालम्, सम्प्रत्युपसंहारमाह 'सेत्तं रूविअजीवपन्नवणा, सेत्तं अजीवपन्नवणा' सैषा रूप्यजीवप्रज्ञापना, सैषाऽजीवप्रज्ञापना ॥

साम्प्रतं जीवप्रज्ञापनामभिधित्सुस्तद्विषयं प्रश्नसूत्रं चा(त्रमा)ह–

मू. (१४) *से किं तं जीवपन्नवणा ?, २ दुविहा पन्नत्ता, तंजहा–संसारमावण्णजीवपन्नवणा य असंसारसमावण्णजीवपन्नवणा य*

वृ. अथ का सा जीवप्रज्ञापना ?, सूरिराह–जीवप्रज्ञापना द्विविधा प्रज्ञप्ता, तद्यथा–संसारसमापन्नजीवप्रज्ञापना चासंसारसमापन्नजीवप्रज्ञापना च, तत्र संसरणं संसारो–नारकतिर्यगनरामरभवानुभवलक्षणस्तं सम्यग्–एकीभावेनापन्नाः संसारसमापन्नाः, संसारवर्त्तिन इत्यर्थः, ते च ते जीवाश्च तेषां प्रज्ञापना संसारसमापन्नजीवप्रज्ञापना,

न संसारोऽसंसारो–मोक्षस्तं समापन्ना असंसारसमापन्ना मुक्ता इत्यर्थः, ते च ते जीवाश्च तेषां प्रज्ञापनाऽसंसारसमापन्नदजीवप्रज्ञापना, चशब्दौ प्राग्वत् । तत्राल्पवक्तव्यत्वात्प्रथमतोऽसंसारसमापन्नजीवप्रज्ञापनाभिधित्सुस्तद्विषय प्रश्नसूत्रमाह–

मू. (१५) *से किं तं असंसारसमावणअणजीवपन्नवणा ?, असंसारसमावण्णजीवपन्नवणा दुविहा पन्नत्ता, तंजहा–अनन्तरसिद्धअसंसारसमावन्नजीवपन्नवणा य परम्परसिद्धअसंसारसमावन्नजीवपन्नवणा य ।*

वृ. अथ का सा असंसारसमापन्नजीवप्रज्ञापना ?, सूरिराह–असंसारसमापन्नजीवप्रज्ञापना द्विविधा प्रज्ञप्ता, तद्यथा–अनन्तरसिद्धासंसारसमापन्नजीवप्रज्ञापना च परम्परसिद्धासंसारसमापन्नजीवप्रज्ञापना च, तत्र न विद्यतेऽन्तरं–व्यवधानमर्थात्समयेन येषां तेऽनन्तरास्ते च ते सिद्धाश्चानन्तरसिद्धाः, सिद्धत्वप्रथमसमये वर्त्तमाना इत्यर्थः, ते च तेऽसंसारसमापन्नजीवाश्चानन्तरसिद्धासंसारसमापन्नजीवास्तेषां प्रज्ञापनाऽनन्तरसिद्धाऽसंसारसमापन्नजीवप्रज्ञापना, चशब्दः स्वगतानेकभेदसूचकः, तथा विवक्षिते प्रथमे समये यःसिद्धस्तस्य यो द्वितीयसमयसिद्धः स परस्तस्यापि यस्तृतीय- समयसिद्धः स परः, एवमन्येऽपि वाच्याः, परे च परे चेति वीप्सायां 'पृषोदरादय' इति परम्परशब्द-निष्पत्तिः, परम्पराश्च ते सिद्धाश्च परम्परसिद्धाः विवक्षितसिद्धस्य प्रथमसमयात् प्राग् द्वितीयादिषु समयेष्वनन्तामतीताद्धां यावद्वर्त्तमाना इति भावः, ते च तेऽसंसारसमापन्नाश्च परम्परसिद्धा- संसारसमापन्नास्ते च ते जीवाश्च तेषां प्रज्ञापना परम्परसिद्धासंसारसमापन्नजीवप्रज्ञापना, अत्रापि चशब्दः स्वगतानेकभेदसूचकः ॥

मू. (१६) *से किं तं अनन्तरसिद्धअसंसारसमावण्णजीवपन्नवणा ?, अनन्तरसिद्धअ-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसारसमावन्नजीवपन्नवणा पन्नरसविहा पन्नत्ता, तंजहा–

तित्थिसिद्धा अतित्थिसिद्धा तित्थगरसिद्धा अतित्थगरसिद्धा सयंबुद्धसिद्धा पत्तेयबुद्धसिद्धा बुद्धबोहियसिद्धा इत्थीलिङ्गसिद्धा पुरिसलिङ्गसिद्धा नपुंसकलिङ्गसिद्धा सलिङ्गसिद्धा अन्नलिङ्गसिद्धा गिहिलिङ्गसिद्धा एगसिद्धा अनेगसिद्धा ।

वृ. 'से किंत'मित्यादि, अथ का सा अनन्तरसिद्धासंसारसमापन्नजीवप्रज्ञत्रापना ?, सूरिराह–अनन्तरसिद्धासंसारसमापन्नजीवप्रज्ञापना पञ्चदशविधा प्रज्ञप्ता, अनन्तरसिद्धानामुपाधिभेदतः पञ्चदशविधत्वात्, तदेव पञ्चदशविधत्वं तेषामाह– 'तंजहे'त्यादि, 'तद्यथे'ति पञ्चदशभेदोपदर्शनसूचकं, तीर्थसिद्धाः तीर्यते संसारसागरोऽनेनेति तीर्थं–यथावस्थितसकलजीवाजीवादिपदार्थसार्थप्ररूपकं परमगुरुप्रणीतं प्रवचनम्, तच्च निराधारं न भवति इति सङ्घः प्रथमगणधरो वा वेदितव्यः,उक्तं च –"तित्थं भंते ! तित्थं तित्थकरे तित्थं ? गो० अरिहा ताव नियम तित्थकरे, तित्थं पुन चाउव्वण्णो समणसङ्घो पढमगणहरो वे'ति, तस्मिन्नुत्पन्ने ये सिद्धास्ते तीर्थसिद्धाः, तथा तीर्थस्याभावोऽतीर्थं, तीर्थस्याभावश्चानुत्पादोऽपान्तराले व्यवच्छेदो वा तस्मिन् ये सिद्धास्तेऽतीर्थसिद्धाः, तत्र तीर्थस्यानुत्पादे सिद्धा मरुदेवीप्रभृतयः, न हि मरुदेव्यादिसिद्धिगमनकाले तीर्थमुत्पन्नमासीत्, तथा तीर्थस्य व्यवच्छेदः सुविधिस्वाम्याद्यपान्तरेलेषु तत्र ये जातिस्मरणादिनाऽपवर्गमार्गमवाप्य सिद्धास्ते तीर्थव्यवच्छेदसिद्धाः २,

तथा तीर्थकराः सन्तो ये सिद्धास्ते तीर्थकरसिद्धाः ३ सामान्यकेवलिनःसन्तो ये सिद्धास्तेऽतीर्थकरसिद्धाः ४ तथा स्वयंबुद्धाः सन्तो ये सिद्धास्ते स्वयम्बुद्धसिद्धाः ५, प्रत्येकबुद्धाः सन्तो ये सिद्धास्ते प्रत्येकबुद्धिसिद्धाः ६, अथ स्वयम्बुद्धप्रत्येकबुद्धानां कः प्रतिविशेषः ?, उच्यते, बोध्युपधिश्रुतलिङ्गकृतो विशेषः, तथाहि–स्वयम्बुद्धा बाह्यप्रत्ययमन्तरेणैव बुध्यन्ते, स्वयमेव–बाह्यप्रत्ययमन्तरेणैव निजजातिस्मर- णादिना बुद्धाः स्वयम्बुद्धा इति व्युत्पत्तेः, ते च द्विधा–तीर्थंकरास्तीर्थकरव्यतिरिक्ताश्च, इह तीर्थकर- व्यतिरिक्तैरधिकारः, आह च नन्द्यध्ययनचूर्णिकृत्–'ते दुविहा संयबुद्धा–तित्थयरा तित्थयरवइरित्ता य, इह वइरित्तेहिं अहिगारो' इति ।

प्रत्येकबुद्धास्तु बाह्यप्रत्ययमपेक्ष्य, प्रत्येकं–बाह्यं वृषभादिकं कारणमभिसमीक्ष्य बुद्धाः प्रत्येकबुद्धा इति व्युत्पत्तेः, तथा च श्रूयते–बाह्यप्रत्ययसापेक्षा करकण्ड्वादीनां बोधिः, बहिःप्रत्ययमपेक्ष्य च ते बुद्धाः सन्तो नियमतः प्रत्येकमेव विहरन्ति, न गच्छवासिन इव संहताः, आह च नन्द्यध्ययनचूर्णिकृत्–पत्तेयं–बाह्यं वृषभादिकं कारणभिसमीक्ष्य बुद्धाः, बहिष्प्रत्ययं प्रति बुद्धानां च पत्तेयं नियमा विहारो जम्हा तम्हा य ते पत्तेयबुद्धा' इति, स्वयम्बुद्धानामुपधिर्द्वादशविध एव पात्रादिकः, प्रत्येकबुद्धानां तु द्विधा–जघन्यतस्तथोत्कर्षतश्च, तत्र जघन्यतो द्विविधः, उत्कर्षतो नवविधः प्रावरणवर्जः, उक्तं च–

"पत्तेयबुद्धाणं जहन्नेणं दुविहो उक्कोसेणं नवविहो नियमा पाउरणवज्जो भवइ" इति, तथा स्वयम्बुद्धानां पूर्वाधीतं श्रुतं भवति वा न वा, यदि भवति ततो लिङ्ग देवता वा प्रयच्छति गुरुसन्निधौ वा गत्वा प्रतिपद्यते, यदि च एकाकिविचरणसमर्थः इच्छा वा तस्य तथारूपा जायते तत एकाकी विहरति, अन्यथा गच्छवासेऽवतिष्ठते, अथ पूर्वाधीतं श्रुतं तस्य न भवति तर्हि नियमाद्गुरुसन्निधौ गत्वा लिङ्गं प्रतिपद्यते गच्छं चावश्यं न मुञ्चति, तथा चोक्तम्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पुव्वाहीयं सुयं से हवइ वा न वा, जइ से नत्थि तो लिङ्गं नियमा गुरुसन्निहे पडिवज्जइ गच्छे य विहरइत्ति, अह पुव्वाधीयसमयसम्भवोऽत्थि तो से लिङ्गं देवया पडियच्छइ गुरुसन्निहे वा पडिवज्जइ, जइ य एगविहारविहरणसमत्थो इच्छा वा से तो एक्को चेव विहरइ, अन्यथा गच्छे विहरइ" त्ति प्रत्येकबुद्धानां तु पूर्वाधीतं श्रुतं नियमतो भवति, तच्च जघन्यत एकादशाङ्गानि, उत्कर्षतः किञ्चिन्न्यूनानि दश पूर्वाणि, तथा लिङ्गं तस्मै देवता प्रयच्छति लिङ्गरहितो वा कदाचिद्भवति, तथा चोक्तम्-"पत्तेयबुद्धाणं पुव्वाहीयं सुयं नियमा हवइ, जहन्नेणं इक्कारस अङ्गा, उक्कोसेणं भिन्नदसपुव्वा, लिङ्गं च से देवया पयच्छइ, लिङ्गवज्जिओ वा भवइ, जओ भणियं-रुप्पं पत्तेयबुद्धा" इति।

तथा बुद्धा-आचार्यास्तैर्बोधिताःसन्तो ये सिद्धास्ते बुद्धबोधितसिद्धाः। एते च सर्वेऽपि केचित्स्त्रीलिङ्गसिद्धाः, स्त्रिया लिङ्गं स्त्रीलिङ्गं, स्त्रीत्वस्योपलक्षणमित्यर्थः, तच्चत्रिधा, तद्यथा-वेदः-शरीरनिर्वृत्तिर्नेपथ्यं च, तत्रेह शरीरनिर्वृत्त्या प्रयोजनम्, न वेदनेपथ्याभ्यां, वेदे सति सिद्धत्वाभावात्, नेपथ्यस्य चाप्रमाणत्वात्, आह च नन्ध्यध्ययनचूर्णिकृत्-"इत्थीए लिङ्गं इत्थिलिङ्गं, इत्थीए उवलक्खणंति वुत्तं भवइ, तं च तिविहं-वेदो सरीरनिव्वित्ती नेवत्थं च, इह ससीरनिव्वत्तीए अहिगारो, न वेयनेवत्थेहिं"ति। ततस्तस्मिन् स्त्रीलिङ्गे वर्त्तमानाः सन्तो ये सिद्धास्ते स्त्रीलिङ्गसिद्धाः, एतेन यदाहुरा- शाम्बराः-'न स्त्रीणां निर्वाण'मिति, तदपास्तं द्रष्टव्यं, स्त्रीनिर्वाणस्य साक्षादनेन सूत्रेणाभिधानात्, तत्प्रतिषेधस्य युत्तया अनुपपन्नत्वात्, तथाहि-मुक्तिपथो ज्ञानदर्शनचारित्राणि 'सम्यग्दर्शन- ज्ञानचारित्राणि मोक्षमार्ग' इति वचनात्, सम्यग्दर्शनादीनि च पुरुषाणामिव स्त्रीणामप्यविकलानि, तथाहि-दृश्यन्ते स्त्रियोऽपि सकलमपि प्रवचनार्थमभिरोचयमानाः,

जानते च षडावश्यककालिकोत्कालिकादिभेदभिन्नं श्रुतं, परिपालयन्ति सप्तदशप्रकारमकलङ्कं संयमं, धारयन्ति च देवासुराणामपि दुर्धरं ब्रह्मचर्यं, तप्यन्ते च तपांसि मासक्षपणादीनि, ततः कथमिव न तासां मोक्षसम्भवनः?, स्यादेतत्-अस्ति स्त्रीणां सम्यग्दर्शनं ज्ञानं वा, न पुनश्चारित्रं, संयमाभावात्, तथाहि-स्त्रीणामवश्यं वस्त्रपरिनभोगेन भवितव्यमन्यथा विवृताङ्गयस्तास्तिर्यक्स्त्रिय इव पुरुषाणामभिभवनीया भवेयुः, लोके च गर्होपजायते, ततोऽवश्यं ताभिर्वस्त्रं परिभोक्तव्यं, वस्त्रपरिभोगे च सपरिग्रहता, सपरिग्रहत्वे च संयमाभाव इति, तदसमीचीनम्, सम्यक् सिद्धान्तापरिज्ञानात्, परिग्रहो हि परमार्थतो मूर्छाऽभिधीयते, 'मुच्छा परिग्गहो वुत्तो' इतिवचनात्, तथाहि-मूर्छारहितो भरतश्चक्रवर्ती सान्तःपुरोऽप्यादर्शकगृहेऽवतिष्ठमानो निष्परिग्रहो गीयते, अन्यथा केवलोत्पादासम्भवात्, अपि च-यदि मूर्छाया अभावेऽपि वस्त्रसंसर्गमात्रं परिग्रहो भवेत् ततो जिनकल्पं प्रतिपन्नस्य कस्यचित्साधोस्तुषारकणानुषक्ते प्रपतति शीते केनाप्यविषह्योपनिपातमद्य शीतमिति विभाव्य धर्मार्थिना शिरसि वस्त्रे प्रक्षिप्ते तस्य सपरिग्रहता भवेत्,

न चैतदिष्टं, तस्मान्न वस्त्रसंसर्गमात्रं परिग्रहः, किन्तु मूर्छा, सा च स्त्रीणां वस्त्रादिषु न विद्यते, धर्मोपकरणमात्रतया तस्योपादानात्, न खलु ता वस्त्रमन्तरेणात्मानं रक्षयितुमीशते, नापि शीतकालादिषु व्यग्रदशायां स्वाध्यायादिकं कर्तुं, ततो दीर्घतरसंयमपरिपालनाय यतनया वस्त्रं परिभुञ्जाना न ताः परिग्रहवत्यः, अथोच्येत-सम्भवति नाम स्त्रीणामपि सम्यग्दर्शनादिकं रत्नत्रयं, परं न तत् सम्भवमात्रेण मुक्तिपदप्रापकं भवति, किन्तु प्रकर्षप्राप्तम्, अन्यथा दीक्षानन्तरमेव सर्वेषामप्यविशेषेण मुक्तिपदप्राप्तिप्रसक्तिः, सम्यग्दर्शनादिरत्नत्रयप्रकर्षश्च स्त्रीणामसम्भवी, ततो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न निर्वाणमिति, तदप्ययुक्तम्, स्त्रीषु रत्नत्रयप्रकर्षासम्भवे ग्राहकप्रमाणस्याभावात्, न खलु सकलदेशकालव्याप्तया स्त्रीषु रत्नत्रयप्रकर्षासम्भवग्राहकं प्रमाणं विजम्भते, देशकालविप्रकृष्टेषु प्रत्यक्षस्याप्रवृत्तेः, तदप्रवृत्तौ चानुमानस्याप्यसम्भवात्, नापि तासु रत्नत्रयप्रकर्षासम्भवप्रतिपादकः कोऽप्यागमो विद्यते, प्रत्युत सम्भवप्रतिपादकः स्थाने स्थानेऽस्ति, यथेदमेव प्रस्तुतं सूत्रं, ततो न तासां रत्नत्रयप्रकर्षासम्भवः, अथमन्येथाः-स्वभावत एवातपेनेव छाया विरुध्यते स्त्रीत्वेन सह रत्नत्रयप्रकर्षः, ततस्तदसम्भवोऽ- नुभीयते, तदयुक्तमुक्तं, युक्तिविरोधात्,-

तथाहि-रत्नत्रयप्रकर्षः स उच्यते यतोऽनन्तरं मुक्तिपदप्राप्तिः, स चायोग्यवस्थाचरमसमयभावी, अयोग्यवस्था चास्मादशामप्रत्यक्षा, ततः कथं विरोधगतिः ?, न हि अदृष्टेन सह विरोधः प्रतिपत्तुं शक्यते, मा प्राप्तयुरुषेष्वपि प्रसङ्गः, ननु जगति सर्वोत्कृष्टपदप्राप्तिः सर्वोत्कृष्टेनाध्यवसायेनावाप्यते, नान्यथा, एतच्चोभयोरप्यावयोरागमप्रामाण्यबलतः सिद्धं,

सर्वोत्कृष्टे च द्वे पदे-सर्वोत्कृष्टदुःख स्थानं सर्वोत्कृष्टसुखस्थानं च, तत्र सर्वोत्कृष्टदुःखस्थानं सप्तमनरकपृथ्वी, अतः परं परमदुःखस्थानस्याभावात्, सर्वोत्कृष्टसुखस्थानं तु निःश्रेयसं, तत्र स्त्रीणां सप्तमनरकपृथिवीगमनमागमे निषिद्धं, निषेधस्य च कारणं तद्गमनयोग्यतथाविधसर्वोत्कृष्टमनोवीर्यपरिणत्यभावः, ततः सप्तमपृथिवीगमनवत्त्वाभावात्, सम्मूर्छिमादिवत्, अपि च-यासां वादलब्धविकुर्वणत्वादिलब्धौ पूर्वगतश्रुताधिगतौ च न सामर्थ्यमस्ति तासां मोक्षगमनसामर्थ्यमित्यतिदुःश्रद्धेयं,

तदेतदयुक्तं, यतो यदि नाम स्त्रीणां सप्तमनरकपृथिवीगमनं प्रति सर्वोत्कृष्टमनोवीर्यपरिणत्यभावः, तत एतावता कथमवसीयते-निःश्रेयसमपिप्रति तासां सर्वोत्कृष्टमनोवीर्यपरिणत्यभावोन हि यो भूमिकर्षणादिकं कर्मकर्तुं न शक्नोति स शास्त्राण्यप्यवगाढुं न शक्नोतीति प्रत्येतुं शक्यम्, प्रत्यक्षविरोधात्, अथ सम्मूर्छिमादिषूभयत्रापि सर्वोत्कृष्टमनोवीर्यपरिणत्यभावो दृष्टः ततोऽत्राप्यवसीयते, ननु यदि तत्र दृष्टस्तर्हि कथमत्रावसीयते ?

न खलु बहिर्व्याप्तिमात्रेण हेतुर्गमको भवति, किन्त्वन्तर्व्याप्तया, अन्तर्व्याप्तिश्च प्रतिबन्धबलेन, न चात्र प्रतिबन्धो विद्यते, न खलु सप्तमपृथिवीगमनं निर्वाणगमनस्य कारणं, नापि सप्तमपृथिवीगमनाविनाभावि निर्वाणगमनं, चरमशरीरिणां सप्तमपृथिवीगमनमन्तरेणैव निर्वाणगमनभावात्, न च प्रतिबन्धमन्तरेणैकस्याभावेऽन्यस्यावश्यमभावः, मा प्रापत् यस्य तस्य वा कस्यचिदभावे सर्वस्याभावप्रसङ्गः, यद्येवं तर्हि कथं सम्मूर्छिमादिषु निर्वाणगमनाभाव इति ?, उच्यते, तथाभवस्वाभाव्यात्, तथाहि-

ते सम्मूर्छिमादयो भवस्वभावत एव न सम्यग्दर्शनादिकं यथावत्प्रतिपत्तुं शक्यन्ते, ततो न तेषां निर्वाणसम्भवः, स्त्रियस्तु प्रागुक्तप्रकारेण यथावत्सम्यग्दर्शनादिरत्नत्रयसम्पद्योग्याः, ततस्तासां न निर्वाणगमनाभावः, अपि च-भुजपरिसर्प्पा द्वितीयामेव पृथिवीं यावद्गच्छन्ति न परतः, परपृथिवीगमनहेतुतथारूपमनोवीर्यपरिणत्यभावात्, तृतीयां यावत्पक्षिणश्चतुर्थीं चतुष्पदाः पञ्चमीमुरगाः, अथ च सर्वेऽप्यूर्ध्वमुत्कर्षतः सहस्रारं यावद्गच्छन्ति, तन्नाधोगतिविषये मनोवीर्यपरिणतिवैषम्यदर्शनादूर्ध्वगतावपि च तद्वैषम्यम्, आह च-

॥१॥ "विषयमगतयोऽप्यधस्तादुपरिष्टात्तुल्यमासहस्रारम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गच्छन्ति च तिर्यञ्चस्तदधोगत्यूनताऽहेतुः ॥"

तथा च सति सिद्धं स्त्रीपुंसनामधोगतिवैषम्येऽपि निर्वाणं समं, यदप्युक्तम्–'अपि च यासां वादलब्धावित्यादि' तदप्यश्लीलं, वादविकुर्वणत्वादिलब्धिविरहेऽपि विशिष्टपूर्वगतश्रुताभावेऽपि माषतुषादीनां निःश्रेयससम्पदधिगमश्रवणात्, आह च–

॥ १ ॥ "वादविकुर्वणत्वादिलब्धिविरहे श्रुते कनीयसि च।
जिनकल्पमनः पर्यवविरहेऽपि न सिद्धिविरहोऽस्ति ॥"

अपि च–यदि वादादिलब्ध्यभाववन्निःश्रेयसाभावोऽपि स्त्रीणामभविष्यत् ततस्तथैव सिद्धान्ते प्रत्यपादयिष्यत्, यथा जम्बूयुगादारात् केवलज्ञानाभावो, न च प्रतिपाद्यते क्वापि स्त्रीणां निर्वाणाभाव इति, तस्मादुपपद्यते स्त्रीणां निर्वाणमिति कृतं प्रसङ्गेन। तथा पुंलिङ्गे–शरीर-निर्वृत्तिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते पुंल्लिङ्गसिद्धाः, एवं नपुंसकलिङ्गसिद्धाः, तथा स्वलिङ्गे–रजोहरणादिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते स्वलिङ्गसिद्धाः, तथाऽन्यलिङ्गे–परिव्राजकादिसम्बन्धिनि वल्कलकाषायादिरूपे द्रव्यलिङ्गे व्यवस्थिताः सन्तो ये सिद्धास्तेऽन्यलिङ्गसिद्धाः, गृहिलिङ्गे सिद्धा गृहिलिङ्गसिद्धाः मरुदेवीप्रभृतयः, तथैकसिद्धा एकस्मिन् २ समये एक्का एव सन्तः सिद्धा एकसिद्धाः, 'अनेगसिद्धा' इति एकस्मिन् समयेऽनेके सिद्धा अनेकसिद्धाः, अनेके चैकस्मिन्समये सिध्यन्त उत्कर्षतोऽष्टोत्तरशतसङ्ख्या वेदितव्याः, यस्मादुक्तम्–

॥ १ ॥ "बत्तीसा अडयाला सट्ठी बावत्तरी य बोद्धव्वा।
चुलसीई छन्नउइ उ दुरहियमट्ठुत्तरसयं च ॥"

अस्या विनेयजनानुग्रहाय व्याख्या–अष्टौ समयान् यावन्निरन्तरमेकादयो द्वात्रिंशत्पर्यन्ताः सिध्यन्तः प्राप्यन्ते, किमुक्तं भवति? –प्रथमे समये जघन्यत एको द्वौ वोत्कर्षतो द्वात्रिंशत्सिध्यन्तः प्राप्यन्ते, द्वितीयेऽपि समये जघन्यत एको द्वौ वोत्कर्षतो द्वात्रिंशत्, एवं यावदष्टमेऽपि समये जघन्यत एको द्वौ वोत्कर्षतो द्वात्रिंशत्, ततः परमवश्यमन्तरं, तथा त्रयस्त्रिंशदादयोऽष्टचत्वारिंशत्पर्यन्ता निरन्तरं सिध्यन्तः सप्त समयान् यावत्प्राप्यन्ते, परतो नियमादन्तरं, तथा एकोनपञ्चाशदादयः षष्टिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतः षट् समयान् यावदवाप्यन्ते परतोऽवश्यमन्तरं, तथैकषष्ट्यादयो द्विसप्ततिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षत; पञ्च समयान् यावदवाप्यन्ते ततः परमन्तरं, त्रिसप्तत्यादयश्चतुरशीतिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतश्चतुरः समयान् यावत्तत ऊर्ध्वमन्तरं, तथा पञ्चाशीत्यादयः षन्नवतिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतस्त्रीन् समयान् यावत्परतो नियमादन्तरं, तथा सप्तनवत्यादयो द्व्युत्तरशतपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतो द्वौ समयौ परतोऽवश्यमन्तरं, तथा त्र्युत्तरशतादयोऽष्टोत्तरशतपर्यन्ताः सिध्यन्तो नियमादेकमेव समयं यावदवाप्यन्ते, न द्वित्रादिसमयान्, तदेवमेकस्मिन् समये उत्कर्षतोऽष्टोत्तरशतसङ्ख्याः सिध्यन्तः प्राप्यन्ते इत्यनेकसिद्धा उत्कर्षतोऽष्टोत्तरशतप्रमाणा वेदितव्याः।

आह–तीर्थसिद्धातीर्थसिद्धरूपभेदद्वय एव शेषभेदा अन्तर्भवन्ति तत्किमर्थं शेषभेदोपादानम्?, उच्यते, सत्यमन्तर्भवन्ति परं न तीर्थसिद्धातीर्थसिद्धभेदद्वयोपादानमात्राच्छेषभेदपरिज्ञानं भवति, विशेषपरिज्ञानार्थं च एष शास्त्रारम्भप्रयास इति शेषभेदो पादानम्,

उपसंहारमाह–'सेत्तमि'त्यादि, सैषा अनन्तरसिद्धासंसारसमापन्नजीवप्रज्ञापना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१७) से किं तं परम्परसिद्धअसंसारसमावण्णजीवपन्नवणा?, २ अनेगविहा पन्नत्ता, तंजहा-अपढमसमयसिद्धा दुसमयसिद्धा तिसमयसिद्धा चउसमयसिद्धा जाव सङ्खिज्जसमयसिद्धा असङ्खिज्जसमयसिद्धा अनन्तसमयसिद्धा, सेत्तं परम्परसिद्धासंसारसमावण्णजीवपन्नवणा, सेत्तं असंसारसमावण्णजीवपन्नवणा।

वृ. अथ का सा परम्परसिद्धासंसारसमापन्नजीवप्रज्ञापना?, सूरिराह-परम्परसिद्धासंसारसमापन्नजीवप्रज्ञापनाऽनकेविधा प्रज्ञप्ता, परम्परसिद्धानामनेकविधत्वात्, तदेवानेकविधत्वमाह-'तंजहे'त्यादि, 'तद्यथे'त्यनेकविधत्वोपदर्शने, 'अप्रथमसमयसिद्धा' इति, न प्रथमसमयसिद्धा अप्रथमसमयसिद्धाः-परम्परसिद्धविशेषणप्रथमसमयवर्त्तिनः, सिद्धत्वसमयाद्धितीयसमवर्त्तिन इत्यर्थः, त्र्यादिषु तु समयेषु द्वितीयसमयसिद्धादय उच्यन्ते, यद्वा सामान्यतः प्रथममप्रथमसमयसिद्धा इत्युक्तं, तत एतद्विशेषतो व्याचष्टे-

द्विसमयसिद्धास्त्रिसमयसिद्धाश्चतुःसमयसिद्धा इत्यादि यावच्छब्दकरणात् पञ्चमसमयसिद्धादयः परिगृह्यन्ते। 'सेत्त' मित्यादि निगमनद्वयं सुगमं, तदेवमुक्ता असंसारसमापन्नजीवप्रज्ञापना॥ सम्प्रतिसंसारसमापन्नजीवप्रज्ञापनामभिधित्सुस्तद्विषयं प्रश्नसूत्रमाह-

मू. (१८) से किं तं संसारसमावण्णजीवपन्नवणा?, संसारसमावण्णजीवपन्नवणा पंचविहा पन्नत्ता, तंजहा-एगेंदियसंसारसमावण्णजीवपन्नवणा बेइंदियसंसारसमावण्णजीवपन्नवणा तेइंदियसंसारसमावण्णजीवपन्नवणा चउरिंदियसंसारसमावण्णजीवपन्नवणा पंचिंदियसंसारसमावण्णजीवपन्नवणा।

वृ. अथ का सा संसारसमापन्नजीवप्रज्ञाना?, सूरिराह-संसारसमापन्नजीवप्रज्ञापना पञ्चविधा प्रज्ञप्ता, तद्यथा-एकेन्द्रियसंसारसमापन्नजीवप्रज्ञापनेत्यादि, तत्रैकं स्पर्शनलक्षणमिन्द्रियं येषां ते एकेन्द्रियाः-पृथिव्यम्बुतेजोवायुवनस्पतयो वक्ष्यमाणस्वरूपास्ते च ते संसारसमापन्नजीवाश्च तेषां प्रज्ञापना एकेन्द्रियसंसारसमापन्नजीवप्रज्ञापना, एवं सर्वपदेष्वक्षरघटना कार्या, नवरं द्वे स्पर्शनरसनालक्षणे इन्द्रिये येषां ते द्वीन्द्रियाः शङ्खशुक्तिकादयः, त्रीणि-स्पर्शनरसनाघ्राणलक्षणानीन्द्रियाणि येषां ते त्रीन्द्रियाः-यूकामत्कुणादयः, चत्वारि स्पर्शनरसनाघ्राणचक्षुर्लक्षणानीन्द्रियाणि येषां ते चतुरिन्द्रियाः-दंशमशकादयः, पञ्च स्पर्शनरसनाघ्राणचक्षुःश्रोत्रलक्षणानीन्द्रियाणि येषां ते पञ्चेन्द्रियाः-मत्स्यमकरमनुजादयः।

अमीषां चैकादिसङ्ख्यानामिन्द्रियाणां स्पर्शनादीनामसंव्यवहारराशेरारभ्य प्रायोऽनेनैव क्रमेण लाभ इति सम्प्रत्ययार्थमित्थं क्रमेणैकेन्द्रियाद्युपन्यासः।

इन्द्रियाणि च द्विधा, तद्यथा-द्रव्येन्द्रियाणि भावेन्द्रियाणि च, तत्र द्रव्येन्द्रियाणि निर्वृत्त्युपकरणरूपाणि, तानि च सविस्तरं नन्ध्यध्यनटीकायां व्याख्यातानीति न भूयो व्याख्यायन्ते, भावेन्द्रियाणि क्षयोपशमोपयोगरूपाणि, तानि चानियतानि, एकेन्द्रियाणामपि क्षयोपशमोपयोगरूपभावेन्द्रियपञ्चकसम्भवात्, केषाञ्चितत्तत्फलदर्शनात्, तथाहि-बकुलादयो मत्तकामिनीगीतध्वनिश्रवणसविलासकटाक्षनिरीक्षणमुखक्षिप्तसुरागण्डूषगन्धाघ्राणरसास्वादस्तनाद्यवयवस्पर्शनतः प्रमोदभावेनाकालक्षेपमुपलभ्यन्ते पुष्पफलानि प्रयच्छन्तः, उक्तं च-

॥१॥ "जं किर बउलाईणं दीसइ सेसिंदिओवलम्भोऽवि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेणऽत्थि तदावरणक्खओवसमसम्भवो तेसिं ।।''

ततो न भावेन्द्रियाणि लौकिकव्यवहारपथावतीर्णैकेन्द्रियादिव्यपदेशनिबन्धनं, किन्तु द्रव्येन्द्रियाणि, तथाहि–येषामेकं बाह्यं द्रव्येन्द्रियं स्पर्शनलक्षणमस्ति ते एकेन्द्रियाः येषां द्वे ते द्वीन्द्रियाः एवं यावद्येषां पञ्च ते पञ्चेन्द्रियाः, आह च–

॥१॥ "पंचिंदिओवि बउलो नरोव्व सव्वविसयोवलम्भाओ ।
तहवि न भन्नइ पंचंदिओत्ति बज्झिंदियाभावा ।।''

मू. (१९) *से किंतं एगेंदियसंसारसमावण्णजीवपन्नवणा ?, एगेंदियसंसारसमावण्णजीवपन्नवणा पंचविहा पन्नत्ता, तंजहा–पुढविकाइया आउक्काइया तेउक्काइया वाउक्काइया वणस्सइकाइया ।*

वृ. अथ का सा एकेन्द्रियसंसारसमापन्नजीवप्रज्ञापना ?, सूरिराह–एकेन्द्रियसंसारसमापन्नजीवप्रज्ञापना पञ्चविधा प्रज्ञप्ता, एकेन्द्रियाणां पञ्चविधत्वात्, तदेव पञ्चविधत्वमाह– 'तंजहे'त्यादि, पृथिवी–काठिन्यादिलक्षणा प्रतीता सैव कायः–शरीरं येषां ते पृथिवीकायाः पृथिवीकाया एव पृथिवीकायिकाः, स्वार्थे इकप्रत्ययः, आपो–द्रवास्ताश्च प्रतीता एव ताःकायः–शरीरं येषां तेऽप्कायाः अप्काया एवाप्कायिकाः, तेजो–वह्निः तदेव कायः–शरीरं येषां ते तेजस्काया तेजस्काया एव तेजस्कायिकाः, वायुः–पवनः स एव कायो येषां ते वायुकायाः वायुकाया एव वायुकायिकाः, वनस्पतिः–लतादिरूपः स एव कायःशरीरं येषां ते वनस्पतिकायाः वनस्पतिकाया एव वनस्पतिकायिकाः । इह सर्वभूताधारत्वात् पृथिव्याः पृथिवीकायिकानां प्रथममुपादानं, तदनन्तरं तत्प्रतिष्ठित- त्वादप्कायिकानां, अप्कायिकाश्च तेजः प्रतिपक्षभूतास्ततदनन्तरं तेजस्कायिकानामुपादानं, तेजश्च वायुसम्पर्कतः प्रवृद्धिमुपयाति तत एतदनन्तरं वायुकायिकग्रहणं, वायुश्च दूरस्थितो वृक्षशाखादि- कम्पनतो लक्ष्यते ततस्तदनन्तरं वनस्पतिकायिकोपादानं ।।

सम्प्रति पृथिवीकायिकमनवबुध्यमानस्तद्विषयं शिष्यः प्रश्नं करोति–

मू. (२०) *से किं तं पुढविकाइया ?, पुढविकाइया दुविहा पन्नत्ता, तंजहा–सुहुमपुढविकाइया य बादरपुढविकाइया य ।*

वृ. अथ के ते पृथिवीकायिकाः ?, सूरिराह – पृथिवीकायिकाः द्विविधाः प्रज्ञप्ताः, तद्यथा–सूक्ष्मपृथिवीकायिकाश्च बादरपृथिवीकायिकाश्च, सूक्ष्मनामकर्मोदयात्सूक्ष्माः बादरनामकर्मोदयद्बादराः, कर्मोदयजनिते खल्वेते सूक्ष्मबादरत्वे नापेक्षिके बदरामलकयोरिव, सूक्ष्माश्च ते पृथिवीकायिकाश्च सूक्ष्मपृथिवीकायिकाः, चशब्दः स्वगतपर्याप्तापर्याप्तभेदसूचकः,

बादराश्च ते पृथिवीकायिकाश्च बादरपृथिवीकायिकाः, अत्रापि चशब्दः शर्करावालुकादिभेदसूचकः, तत्र सूक्ष्मपृथिवीकायिकाः समुद्गकपर्याप्तप्रक्षिप्तगन्धावयववत्सकललोकव्यापिनो, बादराः प्रतिनियतदेशचारिणः, तच्च प्रतिनियतदेशचारित्वं द्वितीयपदे प्रकटयिष्यते ।।

तत्र सूक्ष्मपृथिवीकायिकानां स्वरूपं जिज्ञासुरिदमाह–

मू. (२१) *से किंतं सुहुमपुढविकाइया ?, २ दुविहा पन्नत्त., तंजहा–पज्जत्तसुहुमपुढविकाइया य अपज्जत्तसुहुमपुढविकाइया य, से त्तं सुहुमपुढविकाइया ।*

वृ. अथ के ते सूक्ष्मपृथिवीकायिकाः ?, सूरिराह–सूक्ष्मपृथिवीकायिका द्विविधाः प्रज्ञप्ताः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथा-पर्याप्तसूक्ष्मपृथिवीकायिकाश्चापर्याप्तसूक्ष्मपृथिवीकायिकाश्च, तत्र पर्याप्तिर्नाम आहारादि-पुद्गलग्रहणपरिणमनहेतुरात्मनः शक्तिविशेषः, स च पुद्गलोपचयादुपजायते, किमुक्तं भवति उत्पत्तिदेशमागतेन प्रथमं ये गृहीताः पुद्गलास्तेषां तथाऽन्येषामपि प्रतिसमयं गृह्यमाणानां तत्सम्पर्कतः तद्रूपतया जातानां यः शक्तिविशेषः आहारादिपुद्गलखलरसरूपताऽऽ-पादानहेतुर्यथोदरान्तर्गतानां पुद्गलविशेषाणामाहारपुद्गलखलरसरूपतापरिणमनहेतुः,

सा च पर्याप्तिः षोढा-आहारपर्याप्तिः शरीरपर्याप्तिरिन्द्रियपर्याप्तिःप्राणापानपर्याप्तिर्भाषा-पर्याप्तिर्मनः पर्याप्तिश्च, तत्र यया बाह्यमाहारमादाय खलरसरूपतया परिणमयति सा आहार-पर्याप्तिः, यया रसीभूतमाहारं रसासृगमांसंभेदोऽस्थिमज्जाशुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः, यया धातुरूपतया परिणमितमाहारमिन्द्रियरूपतया परिणमयतसा इन्द्रियपर्याप्तिः, तथा चायमर्थोऽन्यत्रापि भङ्ग्यन्तरेणोक्तः, पञ्चानामिन्द्रियाणां प्रायोग्यान् पुद्गलान् गृहीत्वाऽनाभोगनिर्वर्त्तितेन वीर्येण तद्भावनयनशक्तिरिन्द्रियपर्याप्तिरिति, यया पुनरुच्छ्वास-प्रायोग्यान् पुद्गलानादायोच्छ्वासरूपतया परिणमय्यालम्ब्य च मुञ्चति सा उच्छ्वासपर्याप्तिः,

यया तु भषाप्रयायोग्यान् पुद्गलानादाय भाषात्वेन परिणमय्यालम्ब्य च मुञ्चति सा भाषापर्याप्तिः, यया पुनर्मनःप्रायोग्यान् पुद्गलानादाय मनस्त्वेन परिणमय्यालम्ब्य च मुञ्चति सा मनःपर्याप्तिः, एताश्च यथाक्रममेकेन्द्रियामां संज्ञिवर्जानां द्वीन्द्रियादीनां संज्ञिनां चतुः "पञ्चषट्संख्या भवन्ति, उक्तं च प्रज्ञापनामूलटीकाकृता-

"एकेन्द्रियाणां चतस्र विकलेन्द्रियाणां पञ्च सञ्जिजनां षट्" इति, उत्पत्तिप्रथमसमय एव एता यथायथं सर्वा अपि युगपन्निष्पादयितुमारभ्यन्ते, क्रमेण च निष्ठामुपयान्ति, तद्यथा-प्रथम-माहारपर्याप्तिस्ततः" शरीरपर्याप्तिस्तत इन्द्रियपर्याप्तिरित्यादि, आहारपर्याप्तिश्च प्रथमसमय एव निष्पत्तिमुपपद्यते, शेषास्तु प्रत्येकमन्तर्मुहूर्त्तेन कालेन, अथाहारपर्याप्तिः प्रथमसमय एव निष्पद्यते इति कथमवसीयते ?, उच्यते, यत आहारपदे द्वितीयोद्देशके सूत्रमिदम्-'आहारपज्जत्तिए अपज्जत्तए णं भंते ! किं आहारए अनाहारए ?, गोयमा ! नो आहारए अनाहारए' इति, तत आहारपर्याप्तयाऽ-पर्याप्तो विग्रहगतावे-वोपपद्यते, नोपपातक्षेत्रमागतोऽपि, उपपातक्षेत्रमागतस्य प्रथमसमयएवाहार-कत्वात्, तत एकसाम यिकी आहारपर्याप्तिनिर्वृत्तिः, यदि पुनरुपपातक्षेत्रमागतोऽप्याहारपर्याप्त-याऽपर्याप्तः स्यात् तत एवं सति व्याकरणसूत्रमित्थं भवेत्-"सिय आहारए सिय अनाहारए' यथा शरीरादिपर्याप्तिषु 'सिय आहारए सिय अनाहारए" इति,

सर्वासामपि च पर्याप्तीनां परिसमाप्तिकालोऽन्तर्मुहूर्तप्रमाणः, पर्याप्तयो विद्यन्ते येषां ते पर्याप्ता "अभ्रादिभ्य' इति भत्वर्थीयोऽप्रत्ययः, पर्याप्तकाश्च ते सूक्ष्मपृथिवीकायिकाश्च पर्याप्तसूक्ष्म-पृथिवीकायिकाः, चशब्दो लब्धिपर्याप्तकरणपर्याप्तरूपस्वगतभेदद्वयसूचकः, ये पुनः स्वयोग्यपर्याप्ति-परिसमाप्तिविकलास्तेऽपर्याप्ताः अपर्याप्ताश्च ते सूक्ष्मपृथिवीकायिकाश्चापर्याप्तसूक्ष्मपृथिवीकायिकाः, चशब्दः करणलब्धिनिबन्धनस्वगतभेदद्वयसूचकः, तथाहि-द्विविधाः सूक्ष्मपथिवीकायिका अपर्याप्तास्तद्यथा-लब्ध्या कारणैश्च, तत्र येऽपर्याप्तका एव सन्तो म्रियन्ते ते लब्ध्यपर्याप्तकाः, ये पुनः करणानि-शरीरेन्दिज्रयादीनि न तावन्निर्वर्त्तयन्ति अथाचावश्यं निर्वर्त्तयिष्यन्ति ते करणाप-र्याप्ताः, उपसंहारमाह-'सेत्त' मित्यादि, त एते सूक्ष्मपृथिवीकायिकाः ॥ तदे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूक्ष्मपृथिवीकायिकानभिधाय सम्प्रति बादरपृथिवीकायिकानभिधित्सुस्तद्विषयं प्रश्नसूत्रमाह–

मू. (२२) *से किं तं बादरपुढविकाइया ?, बादरपुढविकाइया दुविहा पन्नत्ता, तंजहा– सण्हबादरपुढविकाइया य खरबादरपुढविकाइया य।*

वृ. अथ के ते बादर पृथ्वीकायिकाः ? सूरिरहि–बादर० द्विविधा प्रज्ञप्ताः, तद्यथा– श्लक्ष्णबादरपृथिवीकायिकाश्च बादरपृथिवीकायिकाश्च, तत्र श्लक्ष्णा नाम चूर्णितलोष्ठकल्पा मृदुपृथिवी तदात्मका जीवा अप्युपचा रतः श्लक्ष्णास्ते च ते बादरपृथिवीकायिकाश्च श्लक्ष्णबादरपृथिवी- कायिकाः, अथवा श्लक्ष्णा च सा बादरपृथिवी च २ सा कायः–शरीरं येषां ते श्लक्ष्णबादरपृथिवीकायाः त एव स्वार्थिकेकप्रत्ययविधानात् श्लक्ष्णबादरपृथिवीकायिकाः,

चशब्दो वक्ष्यमाणस्वगतानेकभेदसूचकः, खरा नाम पृथिवीसङ्घातविशेषं काठिन्यविशेषं चापन्नवा तदात्मका जीवा अपि खरास्ते च ते बादरपृथिवीकायिकाश्च खरबादरपृथिवीकायिकाः, अथवा पूर्ववत्प्रकारान्तरेण समासः, चशब्द स्वगतवक्ष्यमाणचत्वारिंशद्भेदसूचकः ॥

मू. (२३) *से किं तं सण्हबायरपुढविकाइया ?, सण्हबायरपुढविकाइया सत्तविहा पन्नता, तंजहा–किण्हमत्तिया नीलमत्तिया लोहियमत्तिया हालिद्दमत्तिया सुक्किल्लमत्तिया पाण्डुमत्तिया पनगमत्तिया, सेत्तं सण्हबादरपुढविकाइया।*

वृ. अथ के ते श्लक्ष्णबादरपृथिवीकायिकाः, सूरिराह–श्लक्ष्णबादरपृथिवीकायिकाः सप्तविधाः प्रज्ञप्ताः, तदेव सप्तविधत्वं तद्यथेत्यादिनोपदर्शयति, कृष्णमृत्तिकाः–कृष्णमृत्तिकारूपा एवं नीलमृत्तिका लोहितमृत्तिका हारिद्रमृत्तिका शुक्लमृत्तिकाः, इत्थं वर्णभेदेन पञ्चविधत्वमुक्तं, पाण्डुमृत्तिका नाम देशविशेषे या धूलीरूपा सती पाण्डू इति प्रसिद्धा,

तदात्मका जीवा अप्यभेदोपचारात् पाण्डुमृत्तिकेत्युक्ताः, 'पनगमट्टियत्ति' नद्यादिपूरप्लाविते देशे नद्यादिपूरेऽपगते यो भूमौ श्लक्ष्णमृदुरूपो जलमलापरपर्यायः पङ्कः स पनकमृत्तिका तदात्मका जीवा अप्यभेदोपचारात्पनकमृत्तिकाः, निगमनमाह–सेत्तं सण्हबायरपुढविकायइ, सुगमम् ॥

मू. (२४) *से किं तं खरबायरपुढविकाया ?, खरबायरपुढविकाइया अनेगविहा प० तं०*

वृ. अथ के ते खरबादरपृथिवीकायिकाः ?, सूरिराह–खरबादरपृथिवीकायिका अनेकविधाः प्रज्ञप्ताः, चत्वारिंशद्भेदा मुख्यतया प्रज्ञप्ता इत्यर्थः, तानेव चत्वारिंशद्भेदानाह–'तंजहा पुढवी य' इत्यादि गाथाचतुष्टयं।

मू. (२५) *पुढवी य सक्करा वालुया य उवले सिला य लोणूसे।*
अय तंब तउय सीसय रूप्प सुवन्ने य वइरे य १४ ॥

वृ. पृथिवीति भामा सत्यावामावत् शुद्धपृथिवी च नदीतटभित्त्यादिरूपा, चशब्द उत्तरभेदा-पक्षया समुच्चये १ शर्करा–लघूपलशकलरूपा २ वालुका–सिकताः ३ उपलः–टङ्काद्युपकरण-परिकर्मणायोग्यः पाषाणः ४ शिला–घटनयोग्या देवकुलपीठाद्युपयोगी महान् पाषाण विशेषः ५ लवणं–सामुद्रादि ६ ऊषो–यद्वशादूषरं क्षेत्रम् ७ अयस्ताम्रत्रपुसीसकरूप्यसुवर्णानि प्रतीतानि १३ वज्रो–हीरकाः १४।

मू. (२६) *हरियाले हिंगुलए मनोसिला सासगंजणपवाले।*
अब्भपडलब्भवालुय बायरकाए मणिविहाणा ८ ॥

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वृ. हरितालहिङ्गुलकमनःशिलाः प्रतीताः १७ सासगं-पारदः १८ अञ्जनं-सौवीराञ्जनादि १९ प्रवालं-विद्रुमः २० अभ्रपटलं-प्रसिद्धम् २१ अभ्रवालुका-अभ्रपटलमिश्रा वालुका २२ 'बायरकाये' इति बादरपृथिवीकायेऽमी भेदा इति शेषः, 'मणिविहाणा' इति चशब्दस्य गम्यमानत्वान्मणिविधानानि च-मणिभेदाश्च बादरपृथिवीकायभेदत्वेन ज्ञातव्याः । तान्येव मणिविधानानमि दर्शयति-

मू. (२७) *गोमेज्जए य रूयए अंके फलिहे य लोहियक्खे य ।*
मरगय मसारगल्ले भुयमोयगइंदनीले य ९ ॥

वृ. 'गोमिज्जए' इद्याति, गोमेज्जकः २३ चः समुच्चये रूचकः २४ अङ्कः २५ स्फटिकः २६ चःपूर्ववत् लोहिताक्षः २७ मरकतः २८ मसारगल्लः २९ भुजमोचकः ३० इन्द्रनीलश्च ३१ ।

मू. (२८) *चंदन गेरुय हंसगब्भ पुलए सोगंधिए य बोद्धव्वे ।*
चंदप्पभवेरुलिए जलकंते सूरकंते य ९ ॥

वृ. चन्दनो ३२ गैरिको ३३ हंसगर्भः ३४ पुलकः ३५ सौगन्धिकश्च ३६ चन्द्रप्रभो ३७ वैडूर्यो ३८ जलकान्तः ३९ सूर्यकान्तश्च ४०, तदेवमाद्यगाथया पृथिव्यादयश्चतुर्दश भेदा उक्ताः, द्वितायगाथयाऽष्टौ हरितालादयः, तृतीयगाथया गोमेज्जकादयो नव, तुर्यया गाथया नवेति सङ्ख्यया चत्वारिंशत् ४० ।

मू. (२९) *जेयावन्ने तहप्पगारा ते समासओ दुविहा पन्नत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, तत्थणं जे ते अपज्जत्तगा ते णं असंपत्ता तत्थ णं जे ते पज्जत्तगा एतेसिं वन्नादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं, सङ्खेज्जाइं जोणिप्पमुहसतसहस्साइं, पज्जत्तगणिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असङ्खेज्जा, से त्तं खरबायरपुढविकाइया, सेत्तं बायरपुढविकाइया, सेत्तं पुढविकाइया ।*

वृ. 'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये तथाप्रकारा मणिभेदाः-पद्मरागादयस्तेऽपि खरबादरपृथिवीकायत्वेन वेदितव्याः 'ते समासओ' इत्यादि, 'ते' सामान्यतो बादरपृथ्वीकायिकाः 'समासतः' सङ्क्षेपेण द्विविधाः प्रज्ञप्ताः, तद्यथा-पर्याप्तका अपर्याप्तकाश्च, तत्र येऽपर्याप्तकास्ते खयोग्याः पर्याप्तीः साकल्येनासंप्राप्ता अथवाऽसंप्राप्ता इति-विशिष्टान् वर्णादीननुपगताः,

तथाहि-वर्णादिभेदविवक्षायमाते न शक्यन्ते कृष्णादिना वर्णभेदेन व्यपदेष्टुं, किं कारणमिति चेद्, उच्यते, इह शरीरादिपर्याप्तिषु परिपूर्णासु सतीषु बादराणां वर्णादिविभागः प्रकटो भवति नापरिपूर्णासु, ते चापर्याप्ता उच्छ्वासपर्याप्तयाऽपर्याप्ता एव म्रियन्ते, ततो न स्पष्टतरवर्णादिविभाग इत्यसंप्राप्ता इत्युक्तं, ननु कस्मादुच्छ्वासपर्याप्तयैवापर्याप्ता म्रियन्ते नार्वाक् शरीरेन्द्रियपर्याप्तिभ्यासमपर्याप्ता अपि ?, उच्यते, यस्मादागामिभवायुर्बध्ध्वा म्रियन्ते सर्व एव देहिनो नावध्ध्वा, तच्च शरीरेन्द्रियपर्याप्तिभ्यां पर्याप्तानां बन्धमायाति नान्यथेति, अन्ये तु व्याचक्षते-सामान्यतो वर्णदीनसंप्राप्ता इति, तच्च न युक्तं, यतः शरीरमात्रभाविनो वर्णादयः, शरीरं च शरीरपर्याप्तया सञ्जातामिति ।

'तत्थ णं जे ते पज्जत्तगा' इत्यादि, तत्र ये ते पर्याप्तकाः-परिसमाप्तस्वयोग्यसमस्तपर्याप्तयः, एतेषां 'वणदिशेन' वर्णभेदविवक्षया एवं गन्धादेशेन रसादेशेन स्पशदिशेन 'सहस्रग्रशः' सहस्रसङ्ख्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

या विधानानि—भेदाः, तद्यथा—वर्णाः कृष्णादिभेदात्पञ्च गन्धौ सुरभीतरभेदाद्वौ रसाः तिक्तादयः पञ्च स्पर्शा मृदुकर्कशादयोऽष्टौ, एकैकस्मिंश्च वर्णादौ तारतम्यभेदेनानेकेऽवान्तरभेदाः,

तथाहि—भ्रमरकोकिलकज्जलादिषु तरतमभावात् कृषणकृष्णतरकृष्णतमेत्यादिरूपतया अनेके कृष्णभेदाः, एवं नीलादिष्वप्यायोज्यं, तथा गन्धरसस्पर्शेष्वपि, तथा परस्परं वर्णानां संयोगतो घूसरकर्बुरत्वादयोऽनेकसङ्ख्या भेदाः, एवं गन्धादीनामपि परस्परं गन्धादिभिः समायोगाद्, अतो भवन्ति वर्माद्यादेशैः सहस्राग्रशो भेदाः, 'सङ्खेज्जाइं जोणिप्पमुहसयसहस्साइं'ति सङ्ख्येयानि योनिप्रमुखाणि—योनिद्वाराणि शतसहस्राणि,

तथाहि—एकैकस्मिन् वर्णे गन्धे रसे स्पर्शे च संवृता योनिः पृथिवीकायिकानां, सा पुनस्त्रधा—सचित्ता अचित्ता मिश्रा च, पुनरेकैका त्रिधा—शीता उष्णा शीताष्णा, शीतादीनामपि प्रत्येकं तारतम्यभेदादनेकभेदत्वं, केवलमेवं विशिष्टवर्णादियुक्ताः सङ्ख्यातीता अपि स्वस्थाने व्यक्तिभेदेन योनयो जातिमधिकृत्यैकैव योनिर्गण्यते, ततः सङ्ख्येयानि पृथिवीकायिकानां योनिशतसहस्राणि भवन्ति, तानि च सूक्ष्मबादरगतसर्वसङ्ख्यया सप्त, 'पज्जत्तगनिस्साए' इत्यादि, पर्याप्तकनिश्रयाऽपर्याप्तका व्युत्क्रामन्ति—उत्पद्यन्ते, क्रियन्त इत्याह—यत्रैकः पर्याप्तकस्तत्र नियमात्तन्निश्रयाऽसङ्ख्येयाः—सङ्ख्यातीता अपर्याप्तकाः, उपसंहारमाह—'सेत्त'मित्यादि निगमनत्रयं सुगमम् ॥ तदेवमुक्ताः पृथिवीकायिकाः, सम्प्रत्यप्कायिकप्रतिपादनार्थमाह—

मू. (३०) *से किं तं आउक्काइया ?, आउक्काइया दुविहा पन्नत्ता, तंजहा—सुहुमआउक्काइया य बादरआउक्काइया य। से किं तं सुहुमआउक्काइया ?, सुहुमाउका० दुविहा पन्नत्ता, तंजहा—पज्जत्त-सुहुमआउकाइया य अपज्जत्तसुहुमआउकाइया य, सेत्तं सुहुमआउकाइया।*

से किं तं बादरआउकाइया ?, २ अनेगविहा पन्नत्ता, तंजहा—उस्सा हिमए महिया करए हरतणुए सुद्धोदए सीतोदए उसिणोदए खारोदए खट्टोदए अम्बिलोदए लवणोदए वारुणोदए खीरोदए घओदए खोतोदए रसोदए,—

—जे यावन्ने तहप्पगारा ते समासओ दुविहा पन्नत्ता तं०—पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एतेसिं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं संखेज्जाइं जोणिप्पमुहसयसहसाइं, पज्जत्तगनिस्साएअपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखिज्जा, से तं बादरआउक्कायिया, सेतं आउकाइया।

वृ. सुगमम्, 'उस्सा' इत्यवश्यायः त्रेहः 'हिमं' स्त्यानोदकं 'महिका' गर्भमासेषु सूक्ष्मवर्षः करको—घनोपलः हरतनुर्यो भुवमुद्भिद्य गोधूमाङ्कुरतृणाग्रादिषु बद्धो बिन्दुरुपजायते 'शुद्धोदकं' अन्तरिक्षसमुद्भवं नद्यादिगतं च, तच्च स्पर्शरसादि भेदादनेकभेदं, तदेवानेकभेदत्वं दर्शयति—'शीतोदकं' नदीतडागावटवापीपष्करिण्यादिषु शीतपरिणामं 'उष्णोदकं' स्वभावत एव क्वचिन्निर्झरा- दावुष्णपरिणामं 'क्षारोदकं' ईषल्लवणस्वभावं यथा लाटदेशादौ केषुचिदवटेषु 'खट्टोदकम्' ईषदम्लपरिणामं 'अम्लोदकं' स्वभावत् एवाम्लपरिणामं काञ्जिकवत्

लवणोदकं लवणसमुद्रे वारुणं वारुणसमुद्रे क्षीरोदकं क्षीरसमुद्रे क्षोदोदकं इक्षुसमुद्रे रसोदकं पुष्करवरसमुद्रादिषु, येऽपि चान्ये तथाप्रकाराः—रसस्पर्शादिभेदभिन्ना घृतोदकादयो बादरा अप्कायिकाः ते सर्वे बादराप्कायिकतया प्रतिपत्तव्याः, ते समासओ इत्यादि प्राग्वत्, नवरं सङ्ख्येयानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योनिप्रमुखाणि शतसहस्राणि इत्यत्रापि सप्त वेदितव्यानि ॥

उक्ता अप्कायिकाः, समप्रति तेजस्कायिकान् प्रतिपिपादयिषुराह–

मू. (३१) *से किं तं तेऊकाइया ?, २ दुविहा पन्नत्ता, तंजहा–सुहुमतेऊकाइया य बादरतेऊकाइया य। से किन्तं सुहुमतेऊकाइया ?, २ दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य, सेत्तं सुहुमतेऊकाइया से किं तं बादरतेऊकाइया ?, २ अनगविहा पन्नत्ता, तंजहा–इङ्गाले जाला मुम्मुरे अच्ची अलाए सुद्धागनी उक्का विज्जू असणी निग्धाए संघरिससमुट्ठिए सूरकंतमणिणिस्सिए,*

–जे यावन्ने तहप्पगारा ते समासओ दुविहा पन्नत्ता, तं०–पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एएसिणं वन्नादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं सङ्खेज्ञाइं जोणिप्पमुहसयसहस्साइं, पज्जत्तगणिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखिज्ञा, सेत्तं बादरतेऊकाइया, से त्तं तेऊकाइया

वृ. सुगमं, नवरमङ्गारो–विगतधूमः 'ज्वाला' जाज्वल्यमानखादिरादिज्वाला अनलसम्बद्धा दीपशिखेत्यन्ये 'मुर्मुरः' फुम्फकादौ भस्ममिश्रिताग्निकणरूपः 'अर्चिः' अनलाप्रतिबद्धा ज्वाला 'अलातं' उल्मुकं 'शुद्धाग्निः' अयःपिण्डादौ 'उल्का' चुड्डली विद्युत् प्रतीता 'अशनिः' आकाशे पतन् अग्निमयः कणः निर्घातो–वैक्रियाशनिप्रपातः सङ्घर्षसमुत्थितः–अरण्यादिकाष्ठनिर्म्मथनसमुद्भुतः सूर्यकान्तमणिनिसृतः–सूर्यखरकिरणसम्पर्के सूर्यकान्तमणेर्यः समुपजायते,

'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये तथाप्रकाराः–एवेप्रकारास्तेजस्कायिकास्तेऽपि बादरतेजस्कायिकतया वेदितव्याः, 'ते समासओ' इत्यादि प्राग्वत्, नवरमत्रापि सङ्ख्येयानि योनिप्रमुखाणि शतसहस्राणि सप्त वेदितव्यानि ॥ उक्ताः तेजस्कायिकाः, वायुकायिकप्रतिपादनार्थमाह–

मू. (३२) *से किं तं वाउकाइया ?, २ दुविहा पन्नत्ता, तंजहा–सुहुमवाउकाइया य बादरवाउकाइया य। से किन्तं सुहुमवाउकाइया ?, २ दुविहा पन्नत्ता, तंजहा–पज्जत्तगसुहुमवाउकाइया य अपज्जत्तगसुहुमवाउकाइया य, सेत्तं सुहुमवाउकाइया। से किं तं बादरवाउकाइया ?, २ अनेगविहा पन्नत्ता, तंजहा–पाइणवाए पडीणवाए दाहिणवाए उदीणवाए उड्ढवाए अहोवाए तिरियवाए विदिसीवाए वाउब्भामे वाउक्कलिया वायमंडलिया उक्कलियावाए मंडलियावाए गुंजावाए झंझावाए संवट्टवाए घणवाए तणुवाए सुद्धवाए–*

–जे यावण्णे तहप्पगारा ते समासओ दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एतेसिणं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं संखेज्ञाइं जोणिप्पमुहसयसहस्साइं, पज्जत्तगनिस्साए अपज्जत्तया वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्ञा, से त्तं बादरवाउका०, से तं वाउक्काइया

वृ. प्रतीतं, नवरं 'पाईणवाए' इति यः प्राच्या दिशः समागच्छति वातः स प्राचीनवातः एवमपाचीनवातः दक्षिणवातः उदीचीनवातश्च वक्तव्यः, ऊर्ध्वमुद्गच्छन् यो वाति वातः स ऊर्ध्ववातः, एवमधोवाततिर्यग्वातवपि परिभावनीयौ, 'विदिग्वातो' यो विदिग्भ्यो वाति 'वातोद्भ्रामः' अनवस्थितवातः वातोत्कलिका–समुद्रस्येव वातोत्कलिका 'वातमण्डली' वातोली 'उत्कलिकावात' उत्कलिकाभिः प्रचुरतराभिः सम्मिश्रितो यो वातो–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

–'मण्डलीकावातो' मण्डलिकाभिर्मूलत आरभ्य प्रचुरतराभिः समुत्थो यो वातः 'गुञ्जावातो' यो गुञ्जन्–शब्दं कुर्वन् वाति 'झञ्झावातः' सवृष्टिरशुभनिष्ठुर इत्यन्ये, 'संवर्त्तकवातः' तृणादि-संवर्त्तनखंभावः 'धनवातो;' धनपरिणामो रत्नप्रभापृथिव्याद्यधोवर्त्ती 'तनुवातो' विरलपरिणामो धनवातस्याधःस्थायी 'शुद्धवातो' मन्दस्तिमितो बस्तिदृत्यादिगत इत्यन्ये, 'ते समासओ' इत्यादि प्राग्वत्, अत्रापि सङ्ख्येयानि योनिप्रमुखाणि शतसहस्राणि सप्तावसेयानि ॥

उक्ता वायुकायिकाः, सम्प्रतिवनस्पतिकायिकप्रतिपादनार्थमाह–

मू. (३३) *से किं तं वणस्सइकाइया ?, वणस्सइकाइया दुविहा पन्नत्ता, तंजहा–सुहुम-वणस्सइकाइया य बायरवणस्सइकाइया य ।*

मू. (३४) *से किं तं सुहुमवणस्सइकाइया ?, २ दुविहा पन्नत्ता, तंजहा–पज्जत्तग-सुहुमवणस्सइकाइया य अपज्जत्तगसुहुमवणस्सइकाइया य, सेत्तं सुहुमवणस्सइकाइया ।*

मू. (३५) *से किंतं बादरवणस्सइ० ?, २ दुविहा पन्नत्ता, तंजहा–पत्तेयसरीरबादर-वणस्सइ० साहारणस० बादरवणस्सइ० ।*

वृ. सुगमं यावत् 'सेत्तं सुहुमवणस्सइकाइया,' 'से किंत'मित्यादि, अथ के ते बादरवनस्पति-कायिकाः ?, २ द्विविधाः प्रज्ञप्ताः, तद्यथा–प्रत्येकशरीरबादरवनस्पतिकायिकाश्च साधारणशरीर-बादरवनस्पतिकायिकाश्च, तत्रैकमेकं जीवं प्रति गतं प्रत्येकं शरीरं येषां ते प्रत्येकशरीराः ते च ते बादरवनस्पतिकायिकाश्च प्रत्येकशरीरबादरवनस्पतिकायिकाः, चशब्दः स्वगतानेकभेदसूचकः, समानं–तुल्यं प्राणापानाद्युपभोगं यथा भवति एवमा–समन्तादकीभावनानन्तानां जन्तूनां धारणं–सङ्ग्रणं येन तत्साधारणं साधारणं शरीरं येषां ते शाधारणशरीराः ते च ते बादरवनस्पतिकायिकाश्च साधारणबादरवनस्पतिकायिकाः, चशब्दोऽत्रापि स्वगतानेकभेदसूचकः ।

मू. (३६) *से किं तं पत्तेयसरीरबादरवणस्सइकाइया ?, २ दुवालसविहा प०, तंजहा–*

वृ. 'से किं त' मित्यादि, अथ के ते प्रत्येकशरीरबादरवनस्पतिकायिकाः ?, सूरिराह–प्रत्येकशरीरबादरवनस्पतिकायिकाः द्वादशविधाः प्रज्ञप्ताः, तद्यथा–

मू. (३७) *रुक्खा गुच्छा गुम्मा लता य वल्ली य पव्वगा चेव ।*
तणवलयहरियओसहि- जलरुहकुहणा य बोद्धव्वा ॥

वृ. 'रुक्खे'त्यादि, 'वृक्षाः' चूतादयः 'गुच्छा' वृन्ताकीप्रभृतयः 'गुल्मानि' नवमालिका-प्रभृतीनि 'लताः' चम्पकलतादयः, इह येषां स्कन्धप्रदेशे विवक्षितोध्वगतैकशाखाव्यति-रेकेणाऽन्यच्छाखान्तरं परिस्थूरं न निर्गच्छति ते लता विज्ञेयास्ते च चम्पकादय इति, 'वल्लयः' कूष्माण्डीत्रपुषीप्रभृतयः, 'पर्वगा' इक्ष्वादयः, 'तृणानि' कुशजंजुकाऽर्जुनादीनि 'वलयानि' केतकी-कदल्यादीनि तेषां हि त्वचा वलयाकारेण व्यवस्थितेति, 'हरितानि' तण्डुलीयकवास्तुलप्रभृतीनि 'औषध्यः' फलपाकान्ताः ते च शाल्यादयः, जले रुहन्तीति जलरुहाः–उदकावकपनकादयः 'कुहणा' भूमिस्फोटाभिधानाः ते चाप्कायप्रभृतयः ।

मू. (३८) *से किंतं रुक्खा ?, २ दुविहा पन्नत्ता, तंजहा–एगट्ठिया य बहुबीयगा य । से किं तं एगट्ठिया ?, २ अनेगविहा पन्नत्ता, तंजहा–*

वृ. तत्र 'यथोद्देशं निर्देश' इतिन्यायात् प्रथमतो वृक्षप्रतिपादनार्थमाह– 'से किं तमि'त्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ के ते वृक्षाः ?, सूरिराह-वृक्षा द्विविधाः प्रज्ञप्ताः, तद्यथा-एकास्थिकाश्च बहुबीजकाश्च, तत्र फलं फलं प्रति एकमस्थि येषां ते एकास्थिकाः, चशब्दो वक्ष्यमाणस्वगतानेकभेदसूचकः, तथा प्रायोऽस्थिबन्धमन्तरेणैवमेव फलान्तर्वर्त्तीनि बहूनि बीजानि येषां ते बहुबीजकाः, 'शेषाद्वे' ति कप्रत्ययः, अत्रापि चशब्दो वक्ष्यमाणस्वगतानेकभेदसूचकः ॥ तत्रैकास्थिकप्रतिपादनार्थमाह-अथ के ते एकास्थिकाः ?, २ अनेकविधाः प्रज्ञप्ताः, तद्यथा-'निंबंबे' त्यादि गाथात्रयं,

मू. (३९) *निबंबजंबुकोसंबसालअंकुल्ल पीलु सेलू य।*
सल्लइमोइमालुय बउल पलासे करंजे य ॥

मू. (४०) *पुत्तंजीवयऽरिट्ठे बिहेलए हरिडए य भिल्लाए।*
उंबेभरिया खीरिणि बोद्धव्वे धायइ पियाले ॥

मू. (४१) *पूइनिंबकरंञ्जे सुण्हा तह सीसवा य असने य।*
पुन्नागनागरुक्खे सीवण्णि तहा असोगे य ॥

वृ. तत्र निम्बाम्रजम्बुकोशम्बाः प्रतीताः शालः-सर्ज्जः 'अङ्कोल्ल' त्ति अङ्कोठः प्राकृतत्वात्सूत्रे ठकारस्य लादेशः, 'अङ्कोल्ल' इति वचनात्, पीलुः-प्रतीतः शेलुः-स्लेष्मातकः सल्लकी-गजप्रिया मोचकीमालुकौ देशविशेषप्रतीतौ बकुलः-केसरः पलाशः-किंशुकःकरञ्जो-नक्तमालः पुत्रजीवको-देशविशषप्रसिद्धः अरिष्टः-पिचुमन्दःबिभीतकः-अक्षः हरीतकः-कोङ्कणदेशप्रसिद्धः कषायबहुलः भल्लातको यस्य भल्लातकाभिधानानि फलानि लोकप्रसिद्धानि उम्बेभरिकाक्षीरणी-घातकीप्रियालपूति (निम्ब) करञ्जश्लक्ष्णाशिंशपाऽशनपुन्नागनागश्रीपण्यशोका लोकप्रतीताः।

मू. (४२) *जे यावन्ने तहप्पगारा, एएसि णं मूलावि असंखेज्जजीविया कंदावि खंधावि तयावि सालावि पवालावि पत्ता पत्तेयजीविया पुप्फा अनेगजीविया फला एगट्ठिया, से त्तं एगट्ठिया*

वृ. 'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये तथाप्रकाराः-एवंप्रकारास्तत्तद्देश-विशेषभाविनः ते सर्वेऽप्येकास्थिका वेदितव्याः, एतेषाम्-एकास्थिकानां मूलन्यप्यसङ्ख्येय-जीवकानि-असङ्ख्येयप्रत्येकशरीरजीवात्मकानि, एवं खन्दा अपि स्कन्धा अपि त्वचोऽपि शाखा अपि प्रवाला अपि प्रत्येकमसङ्ख्येयप्रत्येकशरीरजीवकाः,

तत्र मूलानि यानि कन्दस्याघस्ताद् भूमेरन्तः प्रसरन्ति, तेषामुपरि कन्दास्ते च लोक-प्रतीताः,स्कन्धाः स्थुडाः, त्वचः-छल्लयः शालाः-शाखाः प्रवालाः-पल्लवङ्कुराः, 'पत्ता पत्तेय-जीवय' त्ति पत्राणि प्रत्येकजीविकानि-एकैकं पत्रमे (कै)केन जीवेनाधिष्ठितमिति भावः, 'पुप्फा अनेगजीविय' त्ति पुष्पानयनेकजीवानि, प्रायः प्रतिपुष्पपत्रं जीवभावात्, फलान्येकास्थिकानि, उपसंहारमाह-'से त्तं एगट्ठिया' सुगमं ॥ बहुबीजकप्रतिपादनार्थमाह-

मू. (४२/१) *से कं तं बहुबीयगा ?, बहुबीयगा अनेगविहा पं० तं०-*

वृ. अथ के ते बहुबीजकाः ?, सूरिराह-बहुबीजका अनेकविधाः प्रज्ञप्ताः,तद्यथा-

मू. (४३) *अत्थिय तेंदु कविट्ठे अंबाडमाउलिंग बिल्ले या।*
आमलग फणिस दालिम आसोठे उंबर वडे य ॥

मू. (४४) *नग्गोह नंदिरुक्खे पिप्परी सयरी पिलुक्खरुक्खे य।*
काउंबरि कुत्थुंभरि बोद्धव्वा देवदाली य ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४५) तिलए लउए छत्तोह सिरीस सत्तवन्न दहिवन्ने ।
लोद्धद्धवचंदनज्जुणनीमे कुडए कयंबे या ॥

वृ. 'अत्थिये'त्यादि गाथात्रयं, एते च अस्थिक तिन्दुक कपित्थ अम्बाडक मातुलिङ्ग बिल्वा मलक पनस दाडिम अश्वत्थ उदुम्बर वटन्यग्रोधनन्दिवृक्ष पिप्पली शतरी प्लक्षका दुम्बरिकुस्तुम्भरि देवदालि तिलक लवकच्छत्रोपग शिरीष सप्तपर्णदधिपर्ण लोद्र धवचन्द नार्जुननी पकुट जकदम्बकानां मध्ये केचिदतिप्रसिद्धाः केचिद्देशविशेषतो वेदितव्याः, नवरमिहामलकादयो न लोकप्रसिद्धाः प्रतिपत्तव्याः, तेषामेकास्थिकत्वात्, किन्तु देशविशेषप्रसिद्धा बहुबीजका एव केचन ।

मू. (४६) जे यावन्ने तहप्पगारा, एतेसि णं मूलावि असंखेज्जजीविया कंदावि खंधावि सालावि पत्ता पत्तेयजीविया पुप्फा अनेगजीविया फला बहुबीयगा । से त्तं बहुबीयगा, से त्तं रुक्खा ।

वृ. 'जे यावन्ने तहप्पगार' त्ति, येऽपि चान्ये तथा–प्रकाराः–एवंप्रकारास्तेऽपि च बहुबीजका मन्तव्याः, एतेषामपि मूलकन्दस्कन्धत्वक्शाखाप्रवालाः प्रत्येकमसङ्ख्येयप्रत्येकशरीरजीवाकः, पत्राणि प्रत्येकजीवकानि, पुष्पाण्यनेकजीवकानि, फलानि बहुबीजकानि, उपसंहारमाह–सेत्तमित्यादि निगमनद्वयं सुगमं ॥ सम्प्रति गुच्छप्रतिपादनार्थमाह–

मू. (४६/१) से किं तं गुच्छा ?, गुच्छा अनेगविहा पन्नत्ता, तं०–

मू. (४७) वाइंगणिसल्लइथुण्डई य तह कत्थुरी य जीभुमणा ।
रुवी आढइ नीली तुलसी तह माउलिंगी य ॥

मू. (४८) कच्छुंभरि पिप्पलिया अतसी बिल्ली य काइमाईया ।
वुच्चू पडोलकंदे विउव्वा वत्थलंदेरे ॥

मू. (४९) पत्तरउर सीयउरए हवति तहा जवसए य बोद्धव्वे ।
निग्गुमिअंकतबरि अत्थई तेव तलउदाडा ॥

मू. (५०) सणपाणकासमुद्दग उग्घाडग साम सिंदुवारे साम य ।
करमद्दअद्दडूसग करीर एरावणमहित्थे ॥

मू. (५१) जाउलगमीलपरिली गयमारिणि कुव्वारिया भंडा ।
जीवइ केयइ तह गंज पाडलादासिअंकोले ॥

मू. (५२) जे यावन्ना तहप्पगारा, सेत्तं गुच्छा । से किं तं गुम्मा ? गुम्मा अनेगविहा प० तं०

मू. (५३) सेणयए नोमालिय कोरंटय बंधुजीवगमणोज्जे ।
पिइअयं पाणं कणयर कुज्जय तह सिंदुवारे य ॥

मू. (५४) जाई मोग्गर तह जूहिया य तह मल्लिया य वासंती ।
वत्थुल कत्थुल सेवाल गंठी मगदंतिया चेव ॥

मू. (५५) चंपगजीइ नीइया कुंदो (कंदो) तहा महाजाई ।
एवमनेगागारा हवंति गुम्मा मुणेयव्वा० ॥

मू. (५६) से त्तं गुम्मा ॥ से किं तं लयाओ ?, लयाओ अनेगविहाओ पन्नत्ताओ, तं०–

मू. (५७) पउमलया नागलया असोग चंपगलया य चूतलता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वनलय वासंतिलया अइमुत्तय कुंदसामलया ॥

मू. (५८) जे यावन्ने तहप्पगारा, से त्तं लयाओ ॥ से किं तं वल्लीओ ?, अनेगविहाओ प० तं०-

मू. (५९) पूसफली कालिंगी तुंबी तउसी य एलवालुंकी ।
घोसाडइ पंडोला पंचंगुलि आयनीलीं या ॥

मू. (६०) कंगूया कंडुइया कक्कोडई कारियल्लई सुभगा ।
कुयवाय वागली पाव वल्ली तह देवदाली य ॥

मू. (६१) अप्फेया अइमुत्तगणागलया कण्हसूरवल्ली य ।
संघट्टसुमणसावि य जासुवन कुविंदवल्ली य ॥

मू. (६२) मुद्दिय अंबावल्ली किण्हछीरालि जयंति गोवाली ।
पाणी मासावल्ली गुंजीवल्ली य विच्छाणी ॥

मू. (६३) ससिवी दुगोत्तफुसिया गिरिकण्णइ मालुया य अंजनई ।
दहिफोल्लइ कागलि मोगली य तह अक्कबोंदी या ॥

मू. (६४) जे यावन्ने तहप्पगारा, से त्तं वल्लीओ । से किं तं पव्वगा ? अनेगविहा प०, तं०-

मू. (६५) इक्खू य इक्खुवाडी वीरुणी तह एक्कडे य मासे य ।
सुंठे सरे य वेत्ते तिमिरे सतोरग णले य ॥

मू. (६६) वंसे वेच्छू कणए कंकावंसे य चाववंसे य ।
उदए कुडए विसए कंडा वेल्ले य कल्लाणे ॥

मू. (६७) जे यावन्ना तहप्पगारा, से त्तं पव्वगा ॥ से किं तं तणा ?, तणा अनेगविवा पन्नत्ता, तं-

मू. (६८) संडिय मंतिय होत्तिय दब्भकुसे पव्वए य पोडइला ।
अज्जुण असाढए रोहियंसे सुयवेखीरबुसे ॥

मू. (६९) एरंडे कुरुविंदे करजर सुंठे तहा विभंगू य ।
महुरतण छुरय सिप्पिय बोद्धव्वे सुंकलितणे य ॥

मू. (७०) जे यावन्ने तहप्पगारा, से त्तं तणा ॥ से किं तं वलया ? अनेगवनिहा प०, तं०-

मू. (७१) ताल तमाले तक्कलि तोयली साली य सारकत्ताणे ।
सरले जावति केतइ कदली तह धम्मरुक्खे य ॥

मू. (७२) मुयरुक्ख हिंगुरुक्खे लवंगुरुक्खे य होइ बोद्धव्वे ।
पूयफली खज्जुरी बोद्धव्वा णालिएरी य ॥

मू. (७३) जे यावन्ना तहप्पगारा, से त्तं वलया । से किं तं हरिया ? अनेगविहा प० तं०-

मू. (७४) अज्ञोरुह वोडाणे हरितग तह तंदुलेज्जगतणे य ।
वत्थुल पोरग मज्ञारयाइ बिल्ली य पालक्का ॥

मू. (७५) दगपिप्पली य दव्वी सोत्तिय साए तहेव मंडुक्की ।
मूलग सरिसव अंबिल साएय जियंतए चेव ॥

मू. (७६) तुलस कण्ड उराले फणिज्जए अज्जए य भूयणए ।
वारग दमणग मखरुयग सतपुप्फींदीवरे य तहा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (७७) जे यावन्ना तहप्पगारा, से त्तं हरिया ।। से किं तं ओसिहिओ ?, ओसिहिओ अनेगविहाओ पन्नत्ताओ, तं०– साली वीही गोहुम जव जवजवा कलमसूरतिलमुग्गमासणिप्फावकुलत्थआलिसंदसतीणपलिमंथा अयसीकुसुंभकोद्दव कंगूरालगमासकोद्दंसा सणसरिसवमूलिगबीया, जे यावन्ना तहप्पगारा, से त्तं ओसहीओ ।।

से किं तं जलरुहा ?, जलरुहा अनेगविहा पन्नत्ता, तं०–उदए अवए पनए सेवाले कलंबुया हढे कसेरुया कच्छभाणी उप्पले पउमे कुमुदे णलिणे सुभए सुगंधिए पोण्डरीयए महापुंडरी- यए सयपत्ते सहस्सपत्ते कल्हारे कोकनदे अरविंदे तामरसे भिसे भिसमुणाले पोक्खले पोक्खलत्थिमुए, जे यावन्ना तहप्पागारा, से त्तं जलरुहा ।।

से किं तं कुहुणा ?, कुहुणा अनेगविहा पन्नत्ता, तं–आह काए कुहणे कुणक्के दव्वहलिया सफाए सज्झाए छत्तोए वंसीण हिताकुरए, जे यावन्ना तहप्पगारा, से त्तं कुहुणा ।।

मू. (७८) नानाविह संठाणा रुक्खाणं एगजीविया पत्ता ।
खंधावि एगजीवा तालसरणालिएरीणं ।।

मू. (७९) जह सगलसरिसवाणं सिलेसमिस्साण वट्टिया विट्टी ।
पत्तेयसरीराणं तहेति सरीरसंघाया ।।

मू. (८०) जह वा तिलपप्पडिया बहुएहिं तिलेहि संहता संती ।
पत्तेयसरीराणं तह होंति सरीरसंघाया ।।

मू. (८१) से त्तं पत्तेयसरीरबादरवणप्फइकाइया ।।

वृ. एते गुच्छादिभेदाः स्वरूपत एव प्रतीताः, केचिद्देशविशेषादवगन्तव्याः, अत्र वृक्षादिषु यस्यैकस्य नाम गृहीत्वाऽपरत्रापि तन्नाम गृहीतं तत्रान्यो भिन्नजातीयः सद्ग्नामा प्रतिपत्तव्यः, अथवा एकोऽपि कश्चिदनेकजातीयको भवति, यथा–नालिकेरीतरुरेकास्थिकत्वादेकास्थिकः, त्वचो वलयाकारत्वाच्च वलयः, ततोऽनेकजातीयत्वादपि तन्नाम निर्दिश्यमानं न विरुध्यते ।

साम्प्रतमुक्तानुक्तार्थसंग्रहार्थमिदमाह– 'नानाविदेहेत्यादि' नानाविधं–नानाप्रकारं संस्थानं–आकृतिर्येषां तानि नानाविधसंस्थानानि, 'वृक्षाणा'मिति वृक्षग्रहणमुपलक्षणं, तेन गुच्छगुल्मादीनामपि द्रष्टव्यं, पत्राणि एकजीवकानि–एकजीवाधिष्ठितानि वेजितव्यानि, स्कन्धोऽपि एकजीवाधिष्ठितः, किं सर्वेषामपि ?, नेत्याह–तालसरलनालिकेरीणां, तालसरलनालिकेरीग्रहणमुपलक्षणं, तेनान्येषामपि यथाऽऽगममेकजीवाधिष्ठितत्वं स्कन्धस्य प्रतिपत्तव्यं, अन्येषां तु स्कन्धाः प्रत्येकमनेकप्रत्येकशरीरजीवात्मका इति सामर्थ्यादवसेयं, 'खंधावि अणेगजीविया' इति पूर्वमभिधानात् । अथ अयदि प्रत्येकमनेकशरीरजीवाधिष्ठितास्ततः कमथमेकखण्डशरीराकारा उपलभ्यन्ते इति ?, तदवस्थानस्वरूपमाह–'जह सगले'त्यादि, यथा सकलसर्षपाणां 'श्लेष्मिश्राणां' श्लेष्म- द्रव्यविमिश्रितानां वलिता वत्तिरिकरूपा भवति, अथ ते सकलसर्षपाः परिपूर्णशरीराः सन्तः पृथक्स्वस्वावगाहनयाऽवतिष्ठन्ते 'तथा' अनवैवोपमया प्रत्येकशरीराणां जीवानां शरीरसङ्घाताः पृथक्पृथक्स्वस्वागाहना भवन्ति, इह श्लेषद्रव्यस्थानीयं रागद्वेषोपचितं तथाविधं कर्म सकल- सर्षपस्थानीयाः प्रत्येकशरीराः, सकलसर्षग्रहणं सर्षपवैविक्त्यप्रतिपत्त्या पृथक्स्वस्वावगाहकप्रत्येक- शरीरवैविक्त्यप्रतिपत्त्यर्थं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रैव दृष्टान्तान्तरमाह-'जह वे'त्यादि, वाशब्दो दृष्टान्तान्तरसूचने, यथा तिलशष्कुलिका-तिलप्रधाना पिष्टमयी अपूपिका बहुभिस्तिलैर्मिश्रिता सती यथा पृथक् २ स्वस्वावगाहतिलात्मिका भवति कथञ्चिदेकरूपा च 'तथा' अनयैवोपमया प्रत्येकशरीरिणां जीवानां शरीरसङ्घाताः कथञ्चिदेक-रूपाः पृथक्स्वस्वावगाहनाश्च भवन्ति । उपसंहारमाह-सेत्तमित्यादि सुगमं ।। 'से त्त'मित्यादि सुगमं । सम्प्रति साधारणवनस्पतिकायिकप्रतिपादनार्थमाह-

मू. (८२) से किं तं साहारणसरीरबादरवणस्सइकाइया ?, अनेगविहा प० तं०-

मू. (८३) *अवए पनए सेवाले लोहिणी मिहुत्थु हुत्थिभागा(य) ।*
अस्सकन्नि सीहकन्नी सिंउढि तत्तो मुसुंढी य ।।

मू. (८४) *रुरु कुण्डरिया जीरु छीर विराली तहेव किट्टीया ।*
हालिद्दा सिंगबेरे य आतूलुगा भूलए इय ।।

मू. (८५) *कंबूयं कन्नुक्कड सुमत्तओ वलइ तहेव महुसिंगी ।*
नीरुह सप्पसुयंधा छिन्नरुहा चेव बीयरुहा ।।

मू. (८६) *पाढामियवालुंकी महुररसा चेव रायवत्ती य ।*
पउमा माढरि दंतीति चंडी किट्टीत्ति यावरा ।।

मू. (८७) *मासपन्नि मुग्गपन्नी जीवियरसहे य रेणुया चेव ।*
काओली खीरकाओली तहा भंगी नही इय ।।

मू. (८८) *किमिरासि भद्द मुच्छा नंगलई पेलुगा इय ।*
किण्ह पउले य हढे हरतणुया चेव लोयाणी ।।

मू. (८९) *कण्हे कंदे वज्जे सूरणकंदे तहेव खल्लूरे ।*
एए अनंतजीवा जे यावन्ने तहाविहा ।।

मू. (९०) *तणमूल कंदमूले, वंसीमूलेत्ति आवरे ।*
संखिज्जमसंखिज्जा, बोद्धव्वणंतजीवा य ।।

मू. (९१) *सिंघाडगस्स गुच्छो अनेगजीवो उ होइ नायव्वो ।*
पत्ता पत्तेयजीवा दोन्नि य जीवा फले भणिया ।।

मू. (९२) *जस्स मूलस्स भग्गस्स, समो भंगो पदीसइ ।*
अनंतजीवे उ से मूले, जे यावन्ने तहाविहा ।।

मू. (९३) *जस्स कंदस्स भग्गस्स, समो भंगो पदीसइ ।*
अनंतजीवे उ से कंदे, स जे यावन्ने तहाविहा ।।

मू. (९४) *जस्स खंधस्स भग्गस्स, समो भंगो पदीसइ ।*
अनंतजीवे उ से खंधे, जे यावन्ने तहाविहा ।।

मू. (९५) *जीसे तयाए भग्गाए, समो भंगो पदीसए ।*
अनंतजीवा तया सा उ, जे यावन्ने तहाविहा ।।

मू. (९६) *जस्स सालस्स भग्गस्स, समो भंगो पदीसए ।*
अनंतजीवे य से साले, जे यावन्ने तहाविहा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (९७) जस्स पवालस्स भग्गस्स, समो भंगो पदीसए ।
अनंतजीवे पवाले से, जे यावन्ने तहाविहा ॥

मू. (९८) जस्स पत्तस्स भग्गस्स, समो भंगो पदीसए ।
अनंतजीवे उ से पत्ते, जे यावन्ने तहाविहा ॥

मू. (९९) जस्स पुप्फस्स भग्गस्स, समो भंगो पदीसए ।
अनंतजीवे उ से पुप्फे, जे यावन्ने तहाविहा ॥

मू. (१००) जस्स फलस्स भग्गस्स, समो भंगो पदीसए ।
अनंतजीवे फले से उ, जे यावन्ने तहाविहा ॥

मू. (१०१) जस्स बीयस्स भग्गस्स, समो भंगो पदीसए ।
अनंतजीवे उ से बीए, जे यावन्ने तहाविहा ॥

मू. (१०२) जस्स मूलस्स भग्गस्स, हीरो भंगोपदीसए ।
परित्तजीवे उ से मूले, जे यावन्ने तहाविहा ॥

मू. (१०३) जस्स कंदस्स भग्गस्स, हीरो भंगो पदीसए ।
परित्तजीवे उ से कंदे, जे यावन्ने तहाविहा ॥

मू. (१०४) जस्स खंधस्स भग्गस्स, हीरो भंगो पदीसए ।
परित्तजीवे उ से खंधो, जे यावन्ने तहाविहा ॥

मू. (१०५) जीसे तयाए भग्गाए, हीरो भंगो पदीसए ।
परित्तजीवा तया सा उ, जे यावन्ने तहाविहा ॥

मू. (१०६) जस्स सालस्स भग्गस्स, हीरो भंतो पदीसए ।
परित्तजीवे उ से साले, जे यावन्ने तहाविहा ॥

मू. (१०७) जस्स पवालस्स भग्गस्स, हीरो भंगो पदीसए ।
परित्तजीवे पवाले उ, जे यावन्ने तहाविहा ॥

मू. (१०८) जस्स पत्तस्स भग्गस्स, हीरो भंगो पदीसए ।
परित्तजीवे उ से पत्ते, जे यावन्ने तहाविहा ॥

मू. (१०९) उस्स पुप्फस्स भग्गस्स, हीरो भंगो पदीसए ।
परित्तजीवे उ से पुप्फे, जे यावन्ने तहाविहा ॥

मू. (११०) जस्स फलस्स भग्गस्स, हीरो भंगो पदीसए ।
परित्तजीवे फले से उ, जे यावन्ने तहाविहा ॥

मू. (१११) जस्स बीयस्स भग्गस्स, हीरो भंगो पदीसए ।
परित्तजीवे उ से बीए, जे यावन्ने तहाविहा ॥

मू. (११२) जस्स मूलस्स कट्ठाओ, छल्ली बहुलतरी भवे ।
अनंतजीवा उ सा छल्ली, जे यावन्ने, तहाविहा ॥

मू. (११३) जस्स कंदस्स कट्ठाओ, छल्ली बहलतरी भवे ।
अनंतजीवा उ सा छल्ली, जे यावन्ने तहाविहा ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

मू. (११४) *जस्स संघस्स कट्ठाओ, छल्ली बहलतरी भवे।*
अनंतजीवा उ सा छल्ली, जे यावन्ना तहाविहा॥

मू. (११५) *जीसे सालाए कट्ठाओ, ठल्ली बहलतरी भवे।*
अनंतजीवा उ सा छल्ली, जे यावन्ना तहाविहा॥

मू. (११६) *जस्स मूलस्स कट्ठाओ, छल्ली तनुयरी भवे।*
परित्तजीवा उ सा छल्ली, जे यावन्ना तहाविहा॥

मू. (११७) *जस्स कंदस्स कट्ठाओ, छल्ली तनुययरी भवे।*
परित्तजीवा उ सा छल्ली, जे यावन्ना तहाविहा॥

मू. (११८) *जस्स खंधस्स कट्ठाओ, छल्ली तनुययरी भवे।*
परित्तजीवा उ सा छल्ली, जे यावन्ना तहाविहा॥

मू. (११९) *जीसे सालाए कट्ठाओ, छल्ली तनुययरी भवे।*
परित्तजीवा उ सा छल्ली, जे यावन्ना तहाविहा॥

वृ. 'से किं त'मित्यादि, अथ के ते साधारणशरीरबादरवनस्पतिकायिकाः?, सूरिराह-साधारणशरीरबादरवनस्पतिकायिका अनेकविधाः प्रज्ञप्ताः, तद्यथा-'अवए'इत्यादि, एते च केचिदतिप्रसिद्धत्वात्केचिद्देशविशेषतः स्वयमवगन्तव्याः। 'जे यावन्ने तहाविहा' इति, येऽपि चान्ये-उक्तव्यतरिक्तास्तथाप्रकारा उक्तप्रकारास्तेऽपि अनन्तजीवा ज्ञातव्याः

'तणे'त्यादि, तृणमूलं कन्दमूलं यच्चापरकं वंशीमूलं, एतेषां मध्ये क्वचिज्ञातिभेदतो देशभेदतो वा सङ्ख्याता जीवाः क्वचिदसङ्ख्याता अनन्ताश्च ज्ञातव्याः 'सिंघाडगस्से'त्यादि, शृङ्गाटकस्य यो गुच्छः सोऽनेकजीवो भवति ज्ञातव्यः, त्वक्शाखादीनामनेकजीवात्मकत्वात्, केवलं तत्रापि यानि पत्राणि तानि प्रत्येकजीवानि, फले पुनः प्रत्येकमेकैकस्मिन् द्वौ द्वौ जीवौ भणितौ।

'जस्स मूलस्से'त्यादि, यस्य मूलस्य भग्नस्य सतः-समः-एकान्तसदशरूपः चक्राकारो भङ्गः प्रकर्षेण दश्यते तन्मूलमनन्तजीवमवसेयं। 'जे यावन्ने तहाविहा' इति, यान्यपि चान्यानि अभग्नानि तथाप्रकाराणि अधिकृतमूलभग्नसमप्रकाराणि तान्यप्यनन्तजीवानि ज्ञातव्यानि एवं कन्दस्कन्धत्वक्शाखाप्रवालपत्रपुष्पफलबीजविषया अपि नव गाथा व्याख्येयाः

सम्प्रति प्रत्येकशरीरलक्षणाभिधानार्थं गाथादशकमाह- 'जस्से'त्यादि, यस्य मूलस्य भग्नस्य सतो भङ्गे-भङ्गप्रदेशे तु हीरो-विषमच्छेदमुद्दन्तुरं वा प्रदृश्यते-प्रकर्षेण स्पष्टरूपतया लक्ष्यते ततो मूलं 'परित्तजीवं' प्रत्येकशरीरजीवात्मकं ज्ञातव्यं, 'जे यावन्ने तहाविहा' इति, यान्यपि चान्यानि भग्नानि तथाप्रकाराणि अधिकृतसहीरभग्नमूलसदशानि मूलानि तान्यपि प्रत्येकशरीरजीवात्मकानि मन्तव्यानि, एवं कन्दादिविषया अपि नव गाथा भावनीयाः, यत्र कुत्रापि लिङ्गव्यत्ययः स प्राकृतलक्षणा- दवसेयः। अधुना मूलादिगतानां वल्कलरूपाणामनन्तजीवत्वपरिज्ञानार्थं लक्षणमाह-यस्य मूलस्य काष्ठात्-मध्यसारात् छल्लीवल्कलरूपा बहुलतरा भवति सा अनन्तजीवा ज्ञातव्या, 'जे यावन्ना तहाविह'त्ति याऽपि चान्या अधिकृतया अनन्तजीवत्वेन निश्चितया छल्लया समानरूपा छल्ली सापि तथाविधा-अनन्तजीवात्मिका ज्ञातव्या,

एवं कन्दस्कन्धशाखाविषया अपि तिस्र:गाथाः परिभावनीयाः अधुना तासामेव छल्लीनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्येकजीवत्वपरिज्ञानाय लक्षणमाह–'जस्स मूलस्से' त्यादि गाथाचतुष्टयं, यस्य मूलस्य काष्ठात्–मध्यसारात् छल्ली–वल्कलरूपा तनुतरा भवति सा 'परित्तजीवा' प्रत्येकशरीरजीवात्मिका द्रष्टव्या, 'जे यावन्ना तहाविहा' इति यापि चान्या अधिकृतया प्रत्येकशरीर-जीवात्मकत्वेन निश्चितया छल्लया समानरूपा छल्ली सापि तथाविधा–प्रत्येकशरीरजीवात्मिका अवगन्तव्या,

एवं कन्दादिविषया अपि तिस्रः गाथा भावनीयाः ॥ यदुक्तम्–'जस्स मूलस्स भग्गस्स समो भङ्गो पदीसइ' इत्यादि, तदेव लक्षणं स्पष्टं प्रतिपिपादयिषुरिदमाह–

मू. (१२०) *चक्कागं भज्जमाणस्स, गंठी चुन्नघनो भवे।*
पुढविसरिसेण भेएण, अनंतजीवं वियाणाहि ॥

वृ. 'चक्काग'मित्यादि, चक्रकं–चक्राकारं एकान्तेन समं भङ्गस्थानं यस्य भज्यमानस्य मूलकन्दस्कन्धत्वक्शाखापत्रपुष्पादेर्भवति तन्मूलादिकमनन्तजीवं विजानीहि इति सम्बन्धः, तथा 'गंठी चुन्नघनो भवे' इति ग्रन्थिः पर्व सामान्यतो भङ्गस्थानं वा स यस्य भज्यमानस्य चूराणेन–रजसा धनो–व्याप्तो भवति ॥ अथवा यस्य पत्रादेर्भज्यमानस्य चक्राकारं भङ्गं ग्रन्थिस्थाने रजसा व्याप्तिं च विना पृथिवीसद्दशेन भेदेन भङ्गस्थानं भवति, सूर्यकरनिकरप्रतप्तकेदारतरिकाप्रतरखण्डस्येव समो भङ्गो भवतीतिभावः तमनन्तकायं विजानीहि ॥

मू. (१२१) *गूढसिरागं पत्तं सच्छीरं जं च होइ निच्छीरं।*
जंपिय पणट्ठसंधिं अनंतजीवं वियाणाहि ॥

वृ. पुनरपि लक्षणान्तरमाह–यत्पत्रं सक्षीरं निःक्षीरं वा गूढशिराकं–अलक्ष्यमाणशिराविशेषं यदपि च प्रनष्टसन्धि–सर्वथाऽनुपलक्ष्यमाणपत्रार्द्धद्वयसन्धि तदनन्तजीवं विजानीहि।

मू. (१२२) *पुप्फा जलया थलया य बिंटबद्धा य नालबद्धा य।*
संखिज्जमसंखिज्ज्रा बोद्धव्वाऽनंतजीवा य ॥

वृ. सम्प्रति पुष्पादीगतं विशेषमभिधित्सुराह–पुष्पाणि चतुर्विधानि, तद्यथा–जलजानि–सहस्रपत्रादीनि स्थलजानि–कोरण्टकादीनि, एतान्यपि च प्रत्येकं द्विधा, तद्यथा–कानिचिद्वृन्त-बद्धानि अतिमुक्तकप्रभृतीनि कानिचिन्नालबद्धानि जातिपुष्पप्रभृतीनि, अत्र एताषां मध्ये कानिचित्पत्रादिगतजीवापेक्षया सङ्ख्येयजीवानि कानिचिदसङ्ख्येयजीवानि कानिचिदनन्तजीवानि यथाऽऽगमं बोद्धव्यानि।

मू. (१२३) *जे केइ नालियाबद्धा पुप्फा संखिज्जजीविया भणिया।*
निहुया अनंतजीवा जे यावन्ने तहाविहा ॥

वृ. अत्रैव कश्चिद्विशेषमाह–यानि कानिचित् नालिकाबद्धानि पुष्पाणि जात्यादिगतानि तानि सर्वाण्यपि सङ्ख्यातजीवकानि भणितानि तीर्थकरगणधरैः, स्निहुः–स्निहूपुष्पं (थोहरपुष्पं) पुनरनन्तजीवं, यान्तपि चान्यनि स्निहूपुष्पकल्पानि तान्यपि तथाविधानि–अनन्तजीवात्मकानि ज्ञातव्यानि ॥

मू. (१२४) *पउमुप्पलिनीकंदे अंतरकंदे तहेव झिल्ली य।*
एए अनंतजीवा एगो जीवो बिसमुणाले ॥

वृ. पद्मिनीकन्दः–उत्पलिनीकन्दः, अन्तरकन्दो–जलजवनस्पतिविशेषकन्दः, झिल्लिका–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वनस्पतिविशेषरूपा, एते सर्वेऽप्यनन्तजीवाः, नवरं पद्मिन्यादीनां बिसे मृणाले च किमिति ? (एको जीवः) एकजीवात्मके बिसमृणाले इति भावः

मू. (१२५) *पलंडूल्हसुणकंदे य, कंदली य कुसुंबए।*
एए परित्तजीवा, जे यावन्ने तहाविहा ॥

वृ. पलण्डुकन्दो लसुनकन्दः कन्दलीकन्दको वनस्पतिविशेषः, कुस्तुम्बकोऽप्येवमेव, एते सर्वेऽपि 'परित्तजीवा' प्रत्येकशरीरजीवात्मकाः प्रतिपत्तव्याः, येऽपि चान्ये एवंप्रकारा अनन्तजीवात्मकलक्षणविरहितास्तेऽपि तथाविधाः-प्रत्येकशरीरजीवात्मका वेदितव्याः।

मू. (१२६) *पउमुप्पलनलिणाणं, सुभगसोगंधियाण य।*
अरविंदकुंकणाणं, सयवत्तसहस्सपत्ताणं ॥

मू. (१२७) *बिंटं बाहिरपत्ता य, कन्निया चेव एगजीवस्स।*
अब्भिंतरगा पत्ता पत्तेयं केसरा भिंजा ॥

वृ. पद्मानाम् उत्परलानां नलिनानां सुभगानां सौगन्धिकानां अरविन्दानां कोकनदाना शतपत्राणां सहस्रपत्राणां प्रत्येकं यत् वृन्तं-प्रसवबन्धनं यानि च बाह्यपत्राणि प्रायो हरितरूपाणि या च कर्णिका-पत्राधारभूता एतानि त्रीण्यपि एकजीवात्मकानि, यानि पुनरभ्यन्तराणि पत्राणि यानि च केसराणि याश्च भिञ्जाः-फलानि एतानि प्रत्येकमेकैकजीवाधिष्ठितानि ॥

मू. (१२८) *वेणुनल इक्खुवाडिय समासइक्खू य इक्कडे रंडे।*
करकर सुंठि विहंगू तणाण तह पव्वगाणं च ॥

मू. (१२९) *अच्छिं पव्वं बलिमोडओ य एगस्स होंति जीवस्स।*
पत्तेयं पत्ताइं पुप्फाइं अनेगजीवाइं ॥

वृ. वेणुः-वंशो नडः-तृणविशेषः इक्षुबाटिकादयो लोकतः प्रत्येतव्याः, तृणानि दूर्वादीनि यानि च पर्वगानि-पर्वोपेतानि एतेषां यदक्षि यच्च पर्व यच्च 'बलिमोडउ'त्ति पर्वपरिवेष्टनं चक्रकारं, एतानि एकजीवस्य सम्भन्धीनि भवन्ति, एकजीवात्मकानि भवन्तीति भावः, पत्राणि एतेषां प्रत्येकमेकजीवाधिष्ठितानि पुष्पाण्यनेकजीवात्मकानि ॥

मू. (१३०) *पूसफलं कालिंगं तुंबं तउसेल एलवालुंकं।*
घोसाडय पंडोलं तिंदूयं चेव तेंदूसं ॥

मू. (१३१) *बिंटसमं सकडाहं एयाइं हवंति एगजीवस्स।*
पत्तेयं पत्ताइं सकेसरं केसरं मिंजा ॥

वृ. पुष्पफलं एवं कालिङ्गं तुम्बं त्रपुषं 'एलावालु'त्ति चिर्भटविशेषरूपं, वालुकं-चिर्भटं, तथा घोषातकं पटोलं तेन्दुकं तिन्दुसं च यत्फलं, एतेषु प्रत्येकं वृन्तसमं 'सकडाहं'ति समांसं सगिरं तथा कटाह एतानि त्रीण्येकस्य जीवस्य भवन्ति, एकजीवात्मकान्येतानि त्रीणि भवन्तीत्यर्थः तथा एतेषामेव पुष्पफलादीनां तिन्दुकपर्यन्तानां पत्राणि पृथक् 'प्रत्येक' मिति प्रत्येकशरीराधिष्ठितानि, एकैकजीवाधिष्ठ तानीत्यर्थछः। तथा सकेसरा अकेसरा वा मिञ्जा-बीजानि प्रत्येकमेकैकजीवाधिष्ठितानि।

मू. (१३२) *सप्फाए सज्झाए उव्वेहलिया य कुहणकंदुक्के।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एए अनंतजीवा कंदुक्के होइ भयणा उ ॥

वृ. एते कुहनादिवनस्पतिविशेषा लोकतः प्रत्येतव्याः, एते चानन्तजीवात्मकाः, नवरं कंदुक्के भजना, स हि कोऽपि देशविशेषादनन्तः--अनन्तजीवात्मको भवति, कोऽप्य सङ्ख्येयजीवात्मक इति ॥ आह--किं बीजजीव एव मूलादिजीवो भवति उतान्यस्तस्मिन्नपक्रान्ते उत्पद्यते इति परप्रश्नमाशङ्क्याह--

मू. (१३३) *बीए जोणिब्भूए जीवो वक्कमइ सो व अन्नो वा ।*
जोऽवियं मूले जीवो सोऽविय पत्ते पढमयाए ॥

वृ. बीजे योनिभूते--योन्यवस्थां प्राप्ते, योनिपरिणाममजहतीति भावः, बीजस्य हि द्विविधाऽवस्था, तद्यथा--योन्यवस्था अयोन्यवस्था च, तत्र यदा बीजं योन्यवस्थां न जहाति अथ च उज्झितं जन्तुना तदा तत् योनिभूतमित्यभिधीयते, उज्झितं च जन्तुना निश्चयतो नावगन्तुं शक्यते ततोऽनतिशायिना सम्प्रति सचेतनमचेतनं वा अविध्वस्तयोनि योनिभूतमिति व्यवह्रियते, विध्वस्तयोनि तु नियमादचेतनत्वादयोनिभूतमिति, अथ योनिरिति किमभिधीयते ?,

उच्यते, जन्तोरुत्पत्तिस्थानं अविध्वस्तशक्तिकं--तत्रस्थजीवपरिणमनशक्तिसम्पन्नमिति भावः, तस्मिन् बीजे योनिभूते जीवो 'व्युत्क्रामति' उत्पद्यते 'स एव' पूर्वको बीजजीवः अन्यो वा आगत्य तत्रोत्पद्यते, किमुक्तं भवति ? --यदा बीजजीवनिर्वर्त्तकेन जीवेन स्वायुषः क्षयात् बीजपरित्यागः कृतो भवति, तस्य च बीजस्य पुनरम्बुकालावनिसंयोगरूपसामग्रीसंभवस्तदा कदाचित्स एव प्राक्तनो बीजजीवो मूलादिनामगोत्रे उपनिबध्य बीजे उत्पद्यते--तत्रागत्य परिणमति, कदाचिदन्यः पृथिवीकायिकादिबीजः,

'योऽपि च मूले जीव इति' य एव मूलतया परिणमते जीवः सोऽपि च पत्रे प्रथमतयेति--स एव प्रथमपत्रतयाऽपि परिणमते इत्येकजीवकर्त्तके मूलप्रथमपत्रे इति ।

मू. (१३४) *सव्वोऽवि किसलओ खलु उग्गममाणो अनंतओ भणिओ ।*
सो चेव विवड्ढंतो होइ परित्तो अनंतो वा ॥

वृ. आह--यद्येवं 'सव्वोऽवि किसलओ खलु उग्गममाणो अणंतओ भणिओ' इत्यादि वक्ष्यमाणं कथं न विरुध्यते ?, उच्यते, इह बीजजीवोऽन्यो वा बीजमूलत्वेनोत्पद्य तदुत्सूनावस्थां करोति, ततस्तदनन्तरभाविनीं किसलयावस्थां नियमतोऽनन्ता जीवाः कुर्वन्ति, पुनश्च तेषु स्थितिक्षयात्परिणतेषु असावेव मूलजीवोऽनन्तजीवतनुं स्वशरीरतया परिणमय्य तावद्वर्द्धते यावत्प्रथमपत्रमिति न विरोधः, अन्ये तु व्याचक्षते--प्रथमपत्रमिह याऽसौ बीजस्य समुच्छूनावस्था, तेन एकजीवकर्त्तके मूलप्रथमपत्रे इति, किमुक्तं भवति ? -- मूलसमुच्छूनावस्थे एकजीवकर्तृके, एतच्च नियमप्रदर्शनार्थमुक्तं--मूलसमुच्छूनावस्थे एकजीवपरिणामिते एव, शेषं तु किसलयादि नाश्यं मूलजीवपरिणामाविर्भावितमिति, ततः 'सव्वोऽवि किसलओ खलु उग्गममाणो अणंतओ भणिओ' इत्याद्यपि वक्ष्यमाणमविरुद्धं, मूलस- मुच्छूनावस्थानिर्वर्त्तनारम्भकाले किसलयत्वाभावादिति, आह--प्रत्येकशरीरवनस्पतिकायिकानां सर्वकालं शरीरावस्थामधिकृत्य किं प्रत्येकशरीरत्वमुत कस्मिंश्चिदवस्थाविशेषे अनन्तजीवत्वमपि सम्भवति ?,

तथा साधारणवनस्पतिकायिकानामपि किं सर्वकालमनन्तजीवत्वमुत कदाचित्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्येकशरीरत्वमपि भवति ?, तत आह-'सव्वोऽवी'त्यादि, इह सर्वशब्दोऽपरिशेषवाची, सर्वोऽपि वनस्पतिकायः प्रत्येकशरीरः साधारणोवा किसलयावस्थामुपगतः सन् अनन्तकायस्तीर्थकरणधरैर्भणितः, स एव किसलयरूपोऽनन्तकायिकः प्रवृद्धिं गच्छन् अनन्तो वा भवति परीत्तो वा, कथम् ?, उच्यते, यदि साधारणं शरीरं निर्वर्त्यते तदा साधारण एव भवति, अथ प्रत्येकशरीरं ततः प्रत्येक इति, कियतः कालादूर्ध्वं प्रत्येको भवति इति चेत्, उच्यते अन्तर्मुहूर्तात्, तथाहि-निगोदानामुत्कर्षतोऽप्यन्तर्मूहूर्त्त कालं यावत्स्थितिरुक्ता ततोऽन्तर्मुहूर्तात्परतो विवर्द्धमानः प्रत्येको भवतीति ॥ समप्रति साधारणलक्षणमाह-

मू. (१३५) *समयं वक्कंताणं समयं तेसिं सरीरनिव्वत्ती ।*
समयं आणुग्गहणं समयं ऊसासनीसासो ॥

वृ. 'समयं' युगपद् व्युत्क्रान्तानां-उत्पन्नानां सतां 'तेषां' साधारणजीवानां समकम्-एककालं शरीरनिर्वृत्तिर्भवति, समकं च प्राणापानग्रहणं-प्राणापानयोग्यपुद्गलोपादानम् ततः समकम्-एककालं तदुत्तरकालभाविनावुच्छ्वासनिःश्वासौ ।

मू. (१३६) *इक्कस्स उ जं गहणं बहूण साहारणाण तं चेव ।*
जं बहुयाणं गहणं समासओ तंपि इक्कस्स ॥

वृ. तथा एकस्य यत् आहारादिपुद्गलानां ग्रहणं तदेव बहूनामपि साधारणजीवानामवसेयं, किमुक्तं भवति ?-यत् आहारादिकमेको गृह्णति शेषा अपि तच्छरीराश्रिता बहवोऽपि तदेव गृह्णन्तीति, तथा च यद्वहूनां ग्रहणं तत्संक्षेपादेकत्र शरीरे समावेशात् एकस्यापि ग्रहणम् ।

मू. (१३७) *साहारणमाहारो साहारणमानुपानगहणं च ।*
साहारणजीवाणं साहारणलक्खणं एयं ॥

वृ. सम्प्रत्युरक्तार्थोपसंहारमाह-सर्वेषामप्येकशरीराश्रितानां जीवानामुक्तप्रकारेण यत् साधारणं साधारणः, सूत्रे नपुंसकतानिर्देशः आर्षत्वात्, आहारः आहारयोग्यपुद्गलोपादानम् यच्च साधारणं प्राणापानयोग्यपुद्गलोपादानं उपलक्षणमेतत् यौ साधारणावुच्छ्वासनिःश्वासौ या च साधारणा शरीरनिर्वृत्तिः एतत्साधारणजीवानां लक्षणम् ।

मू. (१३८) *जह अयगोलो धंतो जाओ तत्ततवणिज्जसकासो ।*
सव्वो अगनिपरिणओ नमिगोयजीवे तहा जाण ॥

वृ. सम्प्रति यथैकस्मिन् निगोदशरीरे अनन्ता जीवाः परिणताः प्रतीतिपथमवतरन्ति तथा प्रतिपादयन्नाह-यथा अयोगोलो ध्मातः सन् तप्ततपनीयसंकाशः सर्वोऽग्निपरिणतो भवति तथा निगोदजीवान् जानीहि, निगोदरूपेऽप्येकैकस्मिन् शरीरे तच्छरीरात्मकतया अनन्तान् जीवान् परिणतान् जानीहि ।

मू. (१३९) *एगस्स दोण्ह तिण्ह व संखिज्जाण व न पासिउं सक्का ।*
दीसंति सरीराइं निगोयजीवाणऽनंताणं ॥

वृ. एवं च सति-एकस्य द्वयोस्त्रयाणां यावत्संख्येयानां वाशब्दादसंख्येयानां वा निगोदजीवानां शरीराणि द्रष्टुं न शक्यानि, कुत इति चेत् ?, उच्यते-अभावात्, न हि एकरादिजीवगृहीतानि अनन्तवनस्पतिशरीराणि सन्ति, अनन्तजीवपिण्डात्मकत्वात्तोषाम्, कथं तर्हि उपलभ्यानि ?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यत आह–'दीसंती'त्यादि, दृश्यन्ते शरीराणि निगोदजीवानांबादरनिगोदजीवानां अनन्तानां न तु सूक्ष्मनिगोदजीवानां, तेषां शरीराणमनन्तजीवसङ्घातात्मकत्वेऽप्यनुपलभ्य-स्वभावत्वात्, तथासूक्ष्मपरिणामपरिणतत्वात्, अथ कथमेतदवसीयते–निगोदरूपशरीरं नियमादनन्त जीवपरिणामाविर्भावितं भवति ?, उच्यते–जिनवचनात्, तच्चेदम्

॥१॥ "गोला य असंखेज्ञा होंति निगोया असंखया गोले।
एक्केक्को य निगोओ अनंतजीवो मुणेयव्वो ॥"

मू. (१४०) *लोगागासपएसे निगोयजीवं ठवेहि इक्किक्कं।*
एवं मविज्ञमाणा हवंति लोगा अनंता उ ॥

वृ. सम्प्रति एतेषामेव निगोदजीवानां प्रमाणमभिधित्सुराह–एकैकस्मिन् लोकाकाशप्रदेशे एकैकं निगोदजीवं स्थापय, एवमेकैकस्मिन् आकाशप्रदेशे एकैकजीवरचनया मीयमानः 'अनन्तलोका' अनन्तलोकाकाशप्रमाणा निगोदजीवा भवन्ति ॥

मू. (१४१) *लोगागासपएसे परित्तजीवं ठवेहि इक्किक्कं।*
एवं मविज्ञमाणा हवंति लोगा असंखिज्ञा ॥

वृ. सम्प्रति प्रत्येकवनस्पतिजीवप्रमाणमाह–एकैकस्मिन् लोकाकाशप्रदेशे एकैकं प्रत्येकवनस्पतिजीवं स्थापय, एवमुक्तप्रकारेण मीयमानाः प्रत्येकतरुजीवा असङ्खयेयलोकाकाश-प्रदेशप्रमाणा भवन्ति।

मू. (१४२) *पत्तेया पज्ञत्ता पयरस्स असंखभागमित्ता उ।*
लोगाऽसंखा पज्ञत्तयाण साहारणमनंता ॥

वृ. सम्प्रति पर्याप्तापर्याप्तभेदेन प्रत्येकसाधारणवनस्पतिजीवानां प्रमाणमाह–पर्याप्ताः प्रत्येकवनस्पतिजीवाः घनीकृतस्य सम्बन्धिनः प्रतरस्य असङ्ख्येयतमे भागे यावन्त आकाशप्रदेशा-स्तावत्प्रमाणा भवन्ति, अपर्याप्तानां पुनःप्रत्येकरुजीवानामसङ्ख्येया लोकाः परिमाणं, पर्याप्तानां अपर्याप्तानां च साधारणजीवानां अनन्तलोकाः, किमुक्तं भवति ?–असङ्ख्येयलोकाकाश-प्रदेशप्रमाणा अपर्याप्ताः प्रत्येकतरवः, अनन्तलोकाकाशप्रदेशप्रमाणाः पर्याप्ता अपर्याप्ताश्च साधार-णजीवा इति ॥

मू. (१४३) *एएहिं सरीरेहिं पच्चक्खं ते परूविया जीवा।*
सुहुमा आणागिज्झा चक्खुप्फासां न ते इति ॥

मू. (१४४) *जे यावन्ने तहप्पगारा, ते समासओ दुविहा पन्नत्ता, तं०–पज्ञत्तगा य अपज्ञत्तगा य, तत्थ णं असंपत्ता, तत्थ णं जे ते पज्ञत्तगा तेसिणं वन्नाएसेणं गंधाएसेणं रसाएसेणं फासाएसेणं सहस्सग्गसो विहाणाइं, संखिज्ञाइं जोणिप्पमुहसयसहस्साइं, पज्ञत्तगनीसाए अपज्ञत्तगा वक्कमंति, जत्थ एगो तत्थ सिय संखिज्ञा सिय असंखिज्ञा सिय अनंता ॥ एएसिणं इमाओ गाहाओ अनुगंतव्वाओ, तंजहा–*

वृ. 'जे यावन्ने तहप्पगारा' इति, येऽपि चान्ये–अनुक्तरूपास्तथाप्रकाराः–प्रत्येकतरुरूपा साधारणरूपाश्च, तेऽपि वनस्पतिकायत्वेन प्रतिपत्तव्याः, 'ते समासओ'इत्यादि प्राग्वत्, नवरं यत्रैको बादरपर्याप्तस्तत्र तन्निश्रया अपर्याप्ताः कदाचित् सङ्ख्येयाः, कदाचितदसङ्ख्येया कदाचिद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्ताः, प्रत्येकतरवः सङ्ख्येया असङ्ख्येया वा, साधारणास्तु नियमादनन्ता इति भावः ।

'एतेषां' साधारणप्रत्येकतरुरूपाणां वनस्पतिविशेषाणां वक्ष्यमाणानामिमाः-विशेषप्रतिपादिका वक्ष्यमाणा गाथा अनुगन्तव्याः-प्रतिपत्तव्याः, ता एवाह- 'तंजहा' तद्यथा-

मू. (१४५) *कंदा य कंदमूला य, रुक्खमूला इयावरे ।*
गुच्छा य गुम्मवल्ली य, वेणुयाणि तणाणि य ।।

वृ. 'कंदा ये'त्यादि गाथात्रयं 'कन्दाः' सूरणकन्दादयः कन्दमूलानि वृक्षमूलानि च साधारणवनस्पतिविशेषाः 'गुच्छा' गुल्मा, वल्लयश्च प्रतीताः 'वेणुका' वंशास्तृणानिअर्जुनादीनि ।

मू. (१४६) *पउमुप्पल संघाडे हढे य सेवाल किन्नए पनए ।*
अवए य कच्छभाणी कंदुक्के गूणवीसइमे ।।

वृ. पद्मोत्पलश्रृङ्गाटकानि प्रतीतानि 'हढो' जलजवनस्पतिविशेषः सेवालः-प्रसिद्धः कृष्णकपनकावककच्छभाणिकन्दुकाः-साधारणवनस्पतिविशेषाः ।

मू. (१४७) *तय छल्लि पवालेसु य पत्तपुप्फफलेसु य ।*
मूलग्गमज्झबीएसु, जोणी कस्सवि कित्तिया ।।

वृ. एतेषामेकोनविंशतिसभङ्ख्यानां त्वगादिषु मध्ये कस्यापि कापि योनिः, किमुक्तं भवति कस्यापि त्वक् योनिः कस्यापि छल्ली यावत्कस्यापि मूलं कस्याप्यग्रं कस्यापि मध्यं कस्यापि बीजमिति

मू. (१४८) *से त्तं साहरणसरीरवणस्सइकाइया से त्तं बायरवणस्सइकाइया, से त्तं वणस्सइकाइया, से त्तं एगिंदिया ।।*

वृ. 'सेत्त' मित्यादि निगमनचतुष्टयं सुगमं ।। तदेनमुक्ता एकेन्द्रिययाः,

सम्प्रति द्वीन्द्रियप्रतिपादनार्थमाह-

मू. (१४९) *से किं तं बेइंदिया ?, बेइंदिया अनेगविहा पन्नत्ता, तंजहा-पुलाकिमिया कुच्छिकिमिया गंडूयलगा गोलोमा णेउरा सोमंगलगा वंसीमुहा सूइमुहा गोजलोया जलोया जालाउया संखा संखणगा धुल्ला खुल्ला गुलया खंधा वराडा सोत्तिया मुत्तिया कलुयावासा एगओवत्ता दुहओवत्ता नंदियावत्ता संबुक्का माइवाहा सिप्पिसंपुडा चंदना समुद्दलिक्खा,*

-जे यावन्ने तहप्पगारा, सव्वे ते संमुच्छिमा नपुंसगा, ते समासओ दुविहा पन्नत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, एएसिणं एवमाइयाणं बेइंदियाणं पज्जत्तापज्जत्ताणं सत्त जाइकुलकोडिजोणीपमुहसयसहस्सा भवंतीति मक्खायं । से त्तं बेइंदियसंसारसमावन्नजीवप० ।

वृ. अथ के ते द्विन्द्रियाः ?, सूरिराह-द्विन्द्रिया अनेकविधाः प्रज्ञप्ताः, तद्यथा- 'पुलाकिमिया' इत्यादि, पुलाकिमिया नाम पायुप्रदेशोत्पन्नाः कृमयः कुक्षिकृमयः-कुक्षिप्रदेशोत्पन्नाः शङ्खाः-समुद्रोद्भवाः प्रतीताः शङ्खनकाः त एव लघवः धुल्लाः-धुल्लिकाः खुल्ला-लघवः शङ्खाः-सामुद्रशङ्खाकाराः वराटाः-कपर्दकाः 'सिप्पिसंपुड'त्ति संपुटरूपाः शुक्तयः चन्दनका-अक्षाः, शेषास्तु यथासम्प्रदायं वाच्याः, 'जे यावन्ने तहप्पगारा' इति येऽपिचान्ये तथाप्रकारा-एवंप्रकारा मृतककडेवर- सम्भूतकृम्यादयस्ते सर्वे द्वीन्द्रिया ज्ञातव्याः, ते संमुर्छिमत्वादेव च नपुंसकाः, संमुर्छिमानामवश्यं नपुंसकत्वात् 'नारकसंमुर्च्छिमा नपुंसका' इतिवचनात्,

'ते समासओ'इत्यादि, ते द्वीन्द्रियाः समासतः-संक्षेपेण द्विविधाः प्रज्ञप्ताः, तद्यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्याप्तकाश्च अपर्याप्तकाश्च, चशब्दौ योनिकुलभेदेन स्वगतानेकभेदसूचकौ, एतेषां द्वीन्द्रियाणामेवमादीनां पुलाकृम्यादीनां द्वीन्द्रियाणां पर्याप्तपर्याप्तादीनां सर्वसङ्ख्यया सर्वजातिकुलकोटीनां योनिप्रमुखाणि–योनिप्रवहाणि योनिशतसहस्राणि भवन्ति, सप्त जातिकुलकोटिलक्षा भवन्तिति भावः, इत्याख्यातं तीर्थकृद्भिः, मकारोऽलाक्षणिकः, इयमत्र भावना–इह जातिकुलयोनीनां परिज्ञानार्थमिदं परिस्थूरमुदाहरणं पूर्वाचर्यैरुपदर्शितम्, तद्यथा–जातिरिति किल तिर्यग्गतिः तस्याः कुलानि–कृमिकीटवृश्चिकादीनि, इमानि च कुलानि योनिप्रमुखाणि, तथाहि–

एकस्यामेव योनौ अनेकानि कुलानि भवन्ति, यथा छगणयोनौ कृमिकुलं कीटकुलं वृश्चिककुलमित्यादि, अथवा जातिकुलमित्येकं पदम्, जातिकुलयोन्योश्च परस्परं विशेषः, एकस्यामपि योनौ अनेकजातिकुलसम्भवात्, यथा एकस्यामेव योनौ कृमिजातिकुलं कीटकजातिकुलं वृश्चिकजातिकुलमित्यादि, एवं च एकसल्यामेव योनाववान्तरजातिभेदभावादनेकानि योनिप्रवहाणि जातिकुलानि सम्भवन्तीत्युपपद्यन्ते, द्वीन्द्रियाणां सप्त जातिकुलकोटीनां शतसहस्राणाम्, उपसंहारमाह–'सेत्त' मित्यादि, सैषा द्वीन्द्रियसंसारसमापन्नजीवप्रज्ञापना ॥

सम्प्रति त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञापनार्थमाह–

मू. (१५०) से किं तं तेइंदियसंसारसमावन्नजीवपन्नवणा ?, तेइंदियसंसारसमावन्नजीवपन्नवणा अनेगविहा पन्नत्ता, तं–ओवइया रोहिणिया कुंथू पिपीलिया उददंसगा उद्देहिया उक्कलिया उप्पाया उप्पडा तणहारा कट्ठहारा मालुया पत्ताहारा तणबेंटिया पत्तबेंटिया पुप्फबेंटिया फलबेंटिया बीयबेंटिया तेबुरणमिंजिया तओसिमिंजिया कप्पासट्ठिमिंजिया हिल्लिया झिल्लिया झिंगिरा किंगिरिडा बाहुया लहुया सुभगा सोवत्थिया सुयबेंटा इंदकाइया इंदगोवया तुरुतुंबगा कुच्छलवाहगा जूया हालाहला पिसुया सयवाइया गोम्ही हत्थिसोंडा,

जे यावन्ने तहप्पगारा, सव्वे ते संमुच्छिमा नपुंसगा ते समासओ दुविहा पन्नत्ता, तं०–पज्जत्तगा य अपज्जत्तगा य, एएसिणं एवमाइयाणं तेइंदियाणं पज्जत्तापज्जत्ताणं अट्ठ जाइकुललोडिजोणिप्पमुहसयसहस्सा भवंतीतिमक्खायं, सेत्तं तेइंदियसंसारसमावन्नजीवपन्नवणा।

'अथ का सा त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञाना ?, भगवानाह–त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञाना अनेकविधा प्रज्ञप्ता, तामेव तद्यथेत्यादिनोपदर्शयति, एते च औपयिकप्रभृतयस्त्रीन्द्रिया देशविशेषतो लोकतश्चावगन्तव्याः, नवरं गोम्ही–कर्णसियालिया 'जे यावन्ने तहप्पगारा' येऽपि चान्ये तथाप्रकारास्ते सर्वे त्रीन्द्रिया ज्ञातव्या इति शेषः, सव्वे 'ते संमुच्छिमानपुंसका' इत्यादि पूर्ववत्, 'एतेसिण'मित्यादि, एतेषां–त्रीन्द्रियाणामेवमादिकानाम्–औपयिकप्रभृतीनां पर्याप्तापर्याप्तानां सर्वसङ्ख्यया अष्टौ जातिकुलकोटीनां योनिप्रमुखाणि–योनिप्रवाहाणि शतसहस्राणि भवन्ति, अष्टौ कुलकोटिलक्षा भवन्तीति भावः,इत्याख्यातं तीर्थकृद्भिः, उपसंहारमाह–'सेत्त'मित्यादि ॥ तदेवमुक्ता त्रीन्द्रिय संसारसमापन्नजीवप्रज्ञापना, सम्प्रति चतुरिन्द्रियसंसारसमापन्न- जीवप्रज्ञापनामाह–

मू. (१५१) से किं तं चउरिंदियसंसारसमावन्नजीवपन्नवणा ?, २ अनेगविहा पं०, तं०–

मू. (१५२) अंथिय पत्तिय मच्छिय मसगा कीडे तहा पयंगे य।
ढंकुण कुक्कड कुक्कुह नंदावत्ते य सिंगिरडे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१५३) किण्हपत्ता नीलपत्ता लोहियपत्ता हालिद्दपत्ता सुक्किल्लपत्ता चित्तपक्खा विचित्तपक्खा ओहंजलिया जलचारिया गंभीरा णीणिया तंतवा अच्छिरोडा अच्छिवेहा सारंगा नेउरा दोला भमरा भरिली जरुला तोट्टा विंछुया पत्तविच्छुया छाणविच्छुया जलविच्छुया पियंगाला कणगा गोमयकीडा, जे यावन्ने तहप्पगारा, सव्वे ते संमुच्छिमा नपुंसगा,

ते समासओ दुविहा पन्नत्ता, तं०-पज्जत्तगा य अपज्जत्तगा य, एएसिणं एवमाइयाणं चउरिंदियाणं पज्जत्तापज्जत्ताणं नव जाइकुलकोडिजोणिप्पमुहसयसहस्साइं भवंतीतिमक्खायं, से त्तं चउरिंदियसंसारसमावन्नजीवपन्नवणा ।।

वृ. एतेऽपि चतुरिन्द्रिया लोकतः प्रत्येतव्याः, एतेषां च पर्याप्तापर्याप्तानां सर्वसङ्ख्यया जातिकुलकोटीनां नव लक्षा भवन्ति, शेषा अक्षरगमनिका प्राग्वत्, उपसंहारमाह-'सेत्त' मित्यादि

उक्ता चतुरिन्द्रियसंसारसमापन्नजीवप्रज्ञापना, सम्प्रति पञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापनामाह-

मू. (१५४) से किं तं पंचेदियसंसारसमावन्नजीवपन्नवणा?, २ चउव्विहा पं०, तं०-नेरइयपंचिंदियसंसारसमावन्नजीवपन्नवणा, तिरिक्खजोणियपंचिंदियसंरसमावन्नजीवपन्नवणा मणुस्सपंचिंदियसंसारसमावन्नदजीवपन्नवणा देवपंचिंदियसंसारसमावन्नजीवपन्नवणा ।

वृ. अथ का सा पञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापना ?, सूरिराह-पञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापना चतुर्विधा प्रज्ञप्ता, तद्यथा-'नैरयिके' त्यादि, अयम्-इष्टफलं कर्म निर्गतमयं येभ्यस्ते निरया-नरकावासास्तेषु भवा नैरयिकास्ते च ते पञ्चेन्द्रियसंसारसमापन्नजीवाश्च नैरयिकपञ्चेन्द्रियसंसारसमापन्नजीवास्तेषां प्रज्ञापना, तथा 'अञ्च गतौ' तिरोऽञ्चन्तीति तिर्यञ्चः, 'तिरसस्तिर्यतीति' तिरसस्तिर्यादिशः, तेषां योनिः-उत्पत्तिस्थानं तिर्यग्योनिस्तत्र भवास्तैर्य्योर्निकास्ते च ते पञ्चेन्द्रियसंसासरसमापन्नजीवाश्च तेषां प्रज्ञापना तैर्यग्योनिकपञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापना,

तथा मनुशब्दो मनुष्यवाची यथा राजशब्दो राज्यन्याभिधायक;, मनोरपत्यानि मनुष्याः, 'मनोर्यङ्णौ यश्चेति' यः प्रत्ययः षकारश्चागमः, अयं च यः प्रत्ययो जाताविति मनुष्यशब्दो जातिवाची राजन्यशब्दवत्, ते च ते पञ्चेन्द्रियसंसारसमापन्नजीवाश्च तेषां प्रज्ञापना मनुष्यपञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापना, तथा दीव्यन्ति-स्वेच्छया क्रीडन्तीति देवाः भवनपत्यादयः ते च ते पञ्चेन्द्रियसंसारसमापन्नजीवाश्च तेषां प्रज्ञापना देवपञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापना ।।

तत्र नैरयिकप्रतिपादनार्थं प्रश्ननिर्वचनसूत्रे आह-

मू. (१५५) से किं तं नेरइया?, नेरइया सत्तविहा पन्नत्ता तं०-रयणप्पभापुढविनेरइया १ सक्करप्पभापुढविनेरइया २ वालुयप्पभापुढविनेरइया ३ पंकप्पभापुढविनेरइया ४ धूमप्पभापुढविनेरइया ५ तमप्पभापुढविनेरइया ६ तमतमप्पभापुढविनेरइया ७,

ते समासओ दुविहा पन्नत्ता, तं०-पज्जत्तगा य अपज्जत्तगा य, से त्तं नेरइया ।।

वृ. सप्तविधत्वं नैरयिकाणां पृथिवीभेदेन अन्यथा प्रभूतभेदत्वमपि घटते, ततः पृथिवीभेदत एव सप्तविधत्वं तद्यथेत्यादिनोपदर्शयति-रत्नानि-वज्रवैडूर्यादीनि, प्रभाशब्दोऽत्र सर्वत्रापि स्वभाववाची रत्नानि प्रभा-स्वरूपं यस्याः सा रत्नप्रभा-रत्नबहुला रत्नमयीति भावार्थः, सा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चासौ पृथिवी च २ तस्यां नैरयिका रत्नप्रभापृथिवीनैरयिकाः, एवं 'सक्करप्पहापुढविनेरइया' इत्यादि भावनीयम्, उपसंहारमाह-'सेत्तं नेरइया' ॥

अधुनोद्देशक्रमप्रामाण्यानुसरणतस्तिर्यक्पञ्चेन्द्रियान् प्रतिपिपादयिषुराह-

मू. (१५६) *से किं तं पंचिंदियतिरिक्खजोणिया ?, पंचिंदियतिरिक्खजोणिया तिविहा पन्नत्ता, तं०-१ जलयरपंचिंदियतिरिक्खजोणिया य १ थलयपंचिंदियतिरिक्खजोणिया य २ खहयरपंचदियतिरिक्खजोणिया य ३ ।*

वृ. अथ के ते पञ्चेन्द्रियतिर्यग्योनिकाः ?, सूरिराह-पञ्चेन्द्रियतिर्यग्योनिकास्त्रिविधाः प्रज्ञप्ताः, तद्यथेत्यादि, 'जलयरे-' त्यादि, जले चरन्ति-पर्यटन्तीति जलचराः, 'आधारादिति' टप्रत्ययः, ते च ते पञ्चेन्द्रियतिर्यग्योनिकाश्च जलचरपञ्चेन्द्रियतिर्यग्योनिकाः, स्थले चरन्तीति स्थलचराः, खे-आकाशे चरन्तीति खचराः, प्राकृतत्वादार्षत्वाच्च 'खहचरा' इति सूत्रे पाठः, तत उभयत्रापि पञ्चेन्द्रियतिर्यग्योनिकशब्देन सह विशेषणसमासः ।

मू. (१५७) *से किं तं जलयरपंचिंदियतिरिक्खजोणिया ?, जलयरपंचिंदियतिरक्खजोणिया पंचविहा पन्नत्ता, तं०- १ मच्छा २ कच्छभा ३ गाहा ४ मगरा ५ सुसुमारा ॥*

सें किं तं मच्छा ?, मच्छा अनेगविहा पन्नत्ता, तं०-सण्हमच्छा खवल्लमच्छा जुंगमच्छा विज्झडियमच्छा हलिमच्छा मगरिमच्छा रोहियमच्छा हलीसागरा गागरा वडा वडगरा गब्भया उसगारा तिमितिमिंगिला नक्का तंदुलमच्छा कणिक्कामच्छा सालिसतअथियामच्छा लंभणमच्छा पडागा पडागाइपडागा जे यावन्नेतहप्पगारा, सेत्तं मच्छा ॥

वृ. अथ के ते जलचरपञ्चेन्द्रियतिर्यग्योनिकाः ?, सूरिराह-जलचरपञ्चेन्द्रियतिर्यग्योनिकाः पञ्चविधाः प्रज्ञप्ताः, तदेव पञ्चविधत्वं तद्यथेत्यादिनोपदर्शयति १ मत्स्याः २ कच्छपाः, सूत्रे पकारस्य भकारः प्राकृतत्वात् ३ ग्राहा ४ मकराः ५ शिशुमाराः, प्राकृतत्वात्सूत्रे 'सुसुमारा' इति पाठः । मत्स्यादीनां च विशेषा लोकतो वेदितव्याः,

मू. (१५८) *से किं तं कच्छभा ?, कच्छभा दुविहा पन्नत्ता, तं०-अट्ठिकच्छभा य मंसकच्छभा य, से त्तं कच्छभा ॥*

वृ. नवरमस्थिकच्छपा मांसकच्छपा इति-ये अस्थिबहुलाः कच्छपास्ते अस्थिकच्छपाः ये मांसबहुलास्ते मांसकच्छपाः ।

मू. (१५९) *से किं तं गाहा ?, गाहा पंचविहा पन्नत्ता, तं०-१ दिली २ वेढगा ३ मुद्धया ४ पुलया ५ सीमागारा, से त्तं गाहा ॥*

मू. (१६०) *से किं तं मगरा ?, मगरा दुविहा पन्नत्ता, तं-१ सोंडमगरा य २ मट्ठमगरा य, से त्तं मगरा ॥ से किं तं सुसुमारा ?, सुसुमारा एगागारा पन्नत्ता, से त्तं सुसुमारा । जे यावन्ने तहप्पगारा । ते समासओ दुविहा प० तं०-संमुच्छिमा य गब्भवक्कंतिया य, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा, तत्थ णं जे ते गब्भवक्कंतिया ते तिविहा, प०, तं०-इत्थी पुरिसा नपुंसगा ।*

एएसिणं एवमाइयाणं जलयरपचिंदियतिरिक्खजोणियाणं पज्जत्तापज्जत्ताणं अद्धतेरसजाइकुलकोडिजोणिप्पमुहसयसहस्सा भवन्तीति मक्खायं । सेत्तं जलयरपंचिंदियतिरिक्खजोणिया

वृ. 'ते समासओ' इत्यादि, ते जलचरपञ्चेन्द्रियतैर्यग्योनिकाः समासतः-संक्षेपेण द्विविधाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रज्ञप्ताः, तद्यथा-संमूर्च्छिमाश्च गर्भव्युत्क्रान्तिकाश्च, "मूर्च्छा मोहसमुच्छ्राययोः" अस्मात् संपूर्वात् संमूर्च्छनं संमूर्च्छः, "अकर्तरि" इति भावे धञ्प्रत्ययः, गर्भोपपातव्यतिरेकेण एवमेव प्राणिनामुत्पाद इति भावः, तेन निर्वृत्ताः संमूर्च्छिमाः "भावादिम" इति इमप्रत्ययः।

गर्भे व्युत्क्रान्तिः-उत्पत्तिर्येषां ते, व्युत्क्रान्तिशब्दोऽत्रोत्पत्तिवाची, तथा पूर्वाचार्यप्रसिद्धेः, यदिवा 'गर्भात्' गर्भावासाद् व्युत्क्रान्तिः-निष्क्रमणं येषां ते गर्भव्युत्क्रान्तिकाः 'शेषाद् वा" इति कचसमासान्तः। चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ।

तत्र ये ते संमूर्च्छिमास्ते सर्वे नपुंसकाः संमूर्च्छिमभावस्य नपुंसकत्वाविनाभावित्वात्। ये तु गर्भव्युत्क्रान्तिकास्ते त्रिविधाः प्रज्ञप्ताः, तद्यथा-स्त्रियः पुरुषा नपुंसकाः। एतेषां चोभयेषामपि शरीरावगाहनादिषु द्वारेषु यच्चन्तनं यच्च गर्भव्युत्क्रानतिकानां स्त्रीपुंसनपुंसकानां परस्परमल्पबहुत्वतचिन्तनं तज्जीवाभिगमटीकायां कृतमिति ततोऽवधार्यम्।

'एएसिणं' इत्यादि, एतेषामेवमादिकानामुपदर्शितप्रकारादीनां जलचरपञ्चेन्द्रियतैर्यग्योनिकानां पर्याप्तापर्याप्तानां सर्वसंख्ययाऽर्धत्रयोदशजातिकुलकोटीनां योनिप्रमुखानि-योनिप्रवहाणि शतसहस्राणि भवन्तीत्याख्यातं भगवद्भिस्तीर्थकरैः।

उपसंहारमाह-'सेत्तं' इत्यादि, तदेवमुक्ता जलचरपञ्चेन्द्रियतैर्यग्योनिकाः॥

सम्प्रति स्थलचरपञ्चेन्द्रियतैर्यग्योनिकानभिधित्सुराह-

मू. *(१६१) से किं तं थलयरपंचिंदियतिरिक्खजोणिया?, थलयरपंचिं० दुविहा पं०, तं०-चउप्पयथलयरपंचिं दियतिरिक्खजोया य परिसप्पथलयरपंचिंदियतिरिक्खजोणिया य।*

से किं तं चउप्पयथलयरपंचिंदियतिरिक्खजोणिया?, चउप्पयथलयरपंचिंदियतिरिक्खजोणिया चउव्विहा पं०, तं०-एगखुरा बिखुरा गंडीपदा सणप्फदा। से किं तं एगखुरा?, एगखुरा अनेगविहा पं०, तं०-अस्सा अस्सतरा घोडगा गद्दभा गोरक्खरा कंदलगा सिरिकंदलगा आवत्तगा जे यावन्ने तहप्पगारा, सेत्तं एगखुरा। से किं तं दुखुरा?, दुखुरा अणेगविहा पं०, तं०-उट्टा गोणा गवया रोज्झा पसुया महिसा मिया संबरा वराहा आया एलगरुरुसरभचमरकुरंगगोकन्नमादि जे यावन्ने तहप्पगारा, सेत्तं दुखुरा।

से किं तं गंडीपया?, गंडीपया अनेगविहा पं०, तं०-इत्थी हत्थीपूयणया मंकुणहत्थी खगा (ग्गा) गंडा जे यावन्ने०, सेत्तं गंडीपया! से किं तं सणप्फया?, अनेगविहा पं०, तं०-सीहा वग्घा दीविया अच्छा मरच्छा परस्सरा सियाला बिडाला सुणगा कोलसुणगा कोकंतिया ससगा चित्तगा चिल्लगा जे यावन्ने०, सेत्तं सणप्फया।

ते समासओ दुविहा पं०, तं०-संमुच्छिमा य गब्भवक्कन्तिया य, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा, तत्थ णं जे ते गब्भवक्कंतिया ते तिविहा पं०, तं०-इत्थी पुरिसगा नपुंसगा। एएसिणं एवमाइयाणं थलयरपंचिंदियतिरिक्खजोणियाणं पज्जत्तापज्जत्ताणं दस जाइकुलकोडि-जोणिप्पमुहसयसहस्सा भवन्तीतिमक्खायं। सेत्तं चउप्पयथलयरपंचिंदियतिरिक्खजोणिया।

वृ. चत्वारि पदानि येषां ते चतुष्पदाः-अश्वादयः ते च ते स्थलचरपञ्चेन्द्रियतैर्यग्योनिकाश्च चतुष्पदस्थलचरपञ्चेन्द्रियतैर्यग्योनिकाः, उरसा भुजाभ्यां वा परिसर्प्पन्तीति परिसर्प्पाः-अहिनकुलादयः, ततः पूर्ववत् स्थलचरपञ्चेन्द्रियतैर्यग्योनिकपदेन सह विशेषणसमासः, चशब्दौ प्रत्येकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वगतानेकभेदसूचकौ, तदेवानेकभेदत्वं क्रमेण प्रतिपिपादयिषुरिदमाह–'से किं तं' इत्यादि, अथ के ते चतुष्पदस्थलचरपञ्चेन्द्रियतैर्यग्योनिकाः ?, सूरिराह–चतुष्पदस्थलचरपञ्चेन्द्रियतैर्यग्योनिकाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा–'एगखुरा' इत्यादि, तत्र प्रतिपदमेकः खुरः–शफो येषां ते एकखुराः–अश्वादयः, द्वौ द्वौ खुरौ प्रतिपदं येषां ते द्विखुराः–उष्ट्रादयः, तथा चैकैकस्मिकन् पदे द्वौ द्वौ शफौ दृश्येते, गण्डीव–सुवर्णकाराधिकरणीस्थानमिव पदं येषां ते गण्डीपादाः–हस्त्यादयः, तथा सनखानि–दीर्धनस्वपरिकलितानि पदानि येषां ते सनखपदाः–श्वादयः, प्राकृतत्वाच्च सणप्फया इति सूत्रे निर्देशः । अधुना एतानेव एकशखुरादीन् भेदतः क्रमेण प्रतिपिपादयिषुरिदमाह–

'से किं तं' इत्यादि, सुगमम्, नवरं ये केचिज्जीवभेदाः प्रतीतास्ते लोकतो वेदितव्याः । 'ते समासओ दुविहा पन्नत्ता' इत्यादि सूत्रं प्रागवद् भावनीयम्, नवरमत्र जातिकुलकोटीनां योनिप्रमुखानि शतसहस्राणि दश भवन्तीति वेदितव्यम् । अत्रापि च संमूर्च्छिमानां गर्भव्युत्क्रान्तिकानां च प्रत्येकं यत् शरीरादिद्वारेषु चिन्तनं यच्च स्त्रीपुंनपुंसकानां परस्परमल्पबहुत्वं तज्जीवाभिगमटीकातो वेदितव्यम्, 'सेत्तं चउप्पया' इत्यादि ।

मू. (१६२) से किं तं परिसप्पथलयरपंचिंदियतिरिक्खजोणिया ?, परिसप्पथलयर- ० दुविहा पं०, तं०–उरपरिसप्पथलयरपंचिंदियतिरिक्खजोणिया य भुयपरिसप्पथलयरपंचिंदियतिरिक्खजोणिया य । से किं तं उरपरिसप्पथलयरपंचिंदियति- रिक्खजोणिया ?, उरपरिसप्पथलयरपंचिंदिय० ।उव्विहा पं०, तं०–अही अयगरा आसालिया महोरगा ॥

से किं तं अही ?, अही दुविहा पं०, तं०–दव्वीकरा य मउलिणो य, से किं तं दव्वीकरा दव्वीकरा अनेगविहा पं०, तं०–आसीविसा दिट्ठीविसा उग्गविसा भोगविसा तयाविसा लालाविसा उस्सासविसा नीसासविसा कण्हसप्पा सेदसप्पा काओदरा दज्झपुप्फा कोलाहा मेलिमिंदा सेसिंदा जे यावन्ने तहप्पगारा, सेत्तं दव्वीकरा । से किं तं मउलिणो ?, मउलिणो अनेगविहा पं०, तं०–दिव्वागा गोणसा कसाहीया वइउला चित्तलिणो मंडलिणनो मालिणो अही अहिसलागा वासपडागा जे यावन्ने तहप्पगारा, सेत्तं मउलिणो, सेत्तं अही ।

से किं तं अयगरा ?, अयगरा एगागारा प०, सेत्तं अयगरा ।

से किं तं आसालिया ?, कहि णं भंते ! आसालिया संमुच्छति ?, गोयमा ! अंतो मणुस्सखितते अड्डाइज्जेसु दीवेसु निव्वाधाएणं पन्नरससु कम्मभूमिसु वाघायं पडुचच पंचसु महाविदेहेसु चक्कवट्टिखंधावारेसु वासुदेवखंधवरेसु लदेवखंधावारेसु मंडलियखंधावारेसु महामंडलियखंधावारेसु गामनिवेसेसु नगरनिवेसेसु निगमनिवेसेसु खेडनिवेसेसु कब्बडनिवेसेसु मडंबनिवेसेसु दोणमुहनिवेसेसु पट्टणनिवेसेसु आगरनिवेसेसु आसमनिवेसेसु संवाहनिवेसेसु रायहाणीनिवेसेसु एएसिणं चेव विनासेसु एत्थ णं आसालिया संमुच्छति । जहन्नेणं अंगुलस्स असंखेज्जइभागमित्ताए ओगाहणाए उक्कोसेणं बारसजोयणाइं तयणुरूवं च णं विक्खंभबाहल्लेणं भूमीं दालित्ता णं समुट्ठेइ, असन्नी मिच्छदिट्ठी अन्नाणी अंतोमुहुत्तऽद्धाउया चेव कालं करेइ, सेत्तं आसालिया ।

से किं तं महोरगा ?, महोरगा अनेगविहा पं०, तं०–अत्थेगइआ अंगुलंपि अंगुलपुहुत्तियावि वियत्थिंपि वियत्थिपुंहुत्तियावि रयणिंपि रयणिपुहुत्तियावि कुच्छंपि कुच्छिपुहुत्तियावि घणुंपि घणुपुहुत्तयावि गाउयंपि गाउयपुहुत्तयावि जोयणंपि जोयणपुहुत्तयावि जोयणसयंपि जोयणस-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यपुहुत्तयावि जोयणसहस्संपि, ते णं थले जाता जलेऽवि चरंति थलेऽवि चरन्ति, ते नत्थि इहं, बाहिरएसु दीवेसु समुद्दएसु हवंति, जे यावन्ने तहप्पगारा, सेत्तं महोरगा।

-ते समासओ दुविहा पं० तं०-संमुच्छिमा य गब्भवक्कंतिया य, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा, तत्थ णं जे ते गब्भवक्कंतिया ते णं तिविहा पं०, तं०-इत्थी पुरिसगा नपुंसगा एएसिणं एवमाइयाणं पज्ञत्तापज्ञत्ताणं उरपरिसप्पाणं दस जाइकुलकोडिजोणिप्पमुहसयसहस्सा भवंतीतिमक्खायं, सेत्तं उरपरिसप्पा।

से किं तं भुयपरिसप्पा?, भुयपरिसप्पा अणेगविहा पं० तं०-नउला सेहा सरडा सल्ला सरंठा सारा खोरा घरोइला विस्संभरा मूसा मंगुसा पयलाइया छीरविरालिया जहा चउप्पाइया, जे यावन्ने तहप्पगारा, ते समासओ दुविहा पं० तं९-संमुच्छिमा य गब्भवक्कंतिया य, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा, तत्थ णं जे ते गब्भवक्कंतिया ते णं तिविहा पं० तं०-इत्थी पुरिसा नपुंसगा। एएसिणं एवमाइयाणं पज्ञत्तापज्ञत्ताणं भुयपरिसप्पाणं नव जाइकुलकोडिजोणिय-पमुहसयसहस्सा भवन्तीति मक्खायं, सेत्तं भुयपरिसप्पथलयरपंचिंदियतिरिक्खजोणिया, सेत्तं परिसप्पथलयरपंचिदियतिरिक्खजोणिया।

वृ. अथ के ते परिसर्प्पस्थलचरपञ्चेन्द्रियतैर्यग्योनिकाः?, सूरिराह-परिसर्पस्थलचर-पञ्चेन्द्रियतैर्यग्योनिका द्विविधाः-द्विप्रकाराः प्रज्ञप्ताः, तद्यथा-'उरपरिसप्प' इत्यादि, उरसा परिसर्पन्तीति उरःपरिसर्पाः ते च ते स्थलचरपञ्चेन्द्रियतैर्यग्योनिकाः उरःपरिसर्पस्थलचलर-पञ्चेन्द्रियतैर्यग्योनिकाः, भुजाभ्यां परिसर्पन्तीति भुजपरिसर्पाः ते च ते स्थलचरपञ्चेन्द्रियतैर्यग्यो-निकाश्च भुजपरिसर्पस्थलचरपञ्चेन्द्रियतिर्यग्योनिकाः, चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ, तत्रोरः परिसर्पस्थलचरपञ्चेन्द्रियतैर्यग्योनिकभेदानुपदिदर्शयिषुरिदमाह- 'से किं तं उरपरिसप्प' इत्यादि, अथ के ते उरः परिसर्पस्थलचरपञ्चेन्द्रियतैर्यग्योनिकाः सूरिराह-उरःपरिसर्पस्थलचरपञ्चेन्द्रिय-तैर्यग्योनिकाश्चतुर्विधाः प्रज्ञप्ताः-अहयोऽजगरा आसालिगा महोरगाः।

एतेषामेव भेदानामवगमाय प्रश्ननिर्वचनसूत्राण्याह- 'से किं तं' इत्यादि, अथ के तेऽहयः गुरुराह-अहयो द्विविधाः प्रज्ञप्ताः, तद्यथा-दर्वीकराश्च मुकुलिनश्च, तत्र दर्वीव दर्वी-फणा तत्करण-शीला दर्वीकराः, मुकुलं-फणाविरहयोग्या शरीरावयवविशेषाकृतिः सा विद्यते येषां ते मुकुलिनः, फणाकरणशक्तिविकला इत्यर्थः, अत्रापि चशब्दौ स्वगतानेकभेदसूचकौ।

तत्र दर्वीकरभेदानभिधित्सुराह- 'से किं तं' इत्यादि, आश्यो-दंष्ट्राः तासु विषंय येषां ते आशीविषाः, उक्तं च- "आसी दाढा तग्गयविसा य आसीविसा मुणेयव्वा" इति, दृष्टौ विषं येषां ते दृष्टिविषाः उग्रं विषं येषां ते उग्रविषाः भोगः-शरीरं तत्र विषं येशां ते भोगविषाः त्वचि विषं येषां ते त्वग्विषाः लाला-मुखात् स्रवः तत्र विषं येषां ते लालाविषाः निःश्वासे विषं येषां ते निःश्वासविषाः कृष्णसर्पादयो जातिभेदा लोकतः प्रतिपत्तव्याः, उपसंहारमाह- 'सेत्तं दव्वीकरा' मुकुलिनः प्रतिपिपादयिषुरिदमाह- 'से किंतं' इत्यादि, एतेऽपि लोकतोऽवसेयाः।

अजगराणामवान्तरजातिभेदा न विद्यन्ते तत उक्तम्-एकाकार अजगराः प्रज्ञप्ताः। आसालिगामभिधित्सुराह- 'से किं तं आसालिया' अथ का सा आसालिगा?, एवं शिष्येण प्रश्ने कृते सति भगवान् आर्यश्यामो यदेव ग्रन्थान्तरेषु आसालिगाप्रतिपादकं गौतमप्रश्नभगवन्निर्वचनरूपं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रमस्ति तदेवागमबहुमानतः पठति–'कहि णं भंते!' इत्यादि, क्व 'णं' इति वाक्यालङ्कारे भदन्त!– परमकल्याणयोगिन्! आसालिगा संमूर्च्छति ?, एषा हि गर्भजा न भवति किन्तु संमूर्च्छिमैव तत उक्तं संमूर्च्छति, भगवानाह–गौतम ! अन्तः–मध्ये मनुष्य- क्षेत्रे–मनुष्यक्षेत्रस्य न बहिः,

एतावता मनुष्यक्षेत्राद् बहिरस्या उत्पादो न भवतीति प्रतिपादितं, तत्रापि मनुष्यक्षेत्रे सर्वत्र न भवति किन्त्वर्द्धतृतीयेषु द्वीपेषु अर्द्ध तृतीयं येषां तेऽर्द्धतृतीयाः, अवयवेन विग्रहः, समुदायःसमासार्थः, तेषु, एतावता लवणसमुद्रे कालोदसमुद्रे वा न भवतीत्यावेदितमित्यर्थः 'निव्वाधाएणं' इत्यादि, निर्व्याधातेन–व्याघातस्याभावो निव्याघातं तेन यदि पञ्चसु भरतेषु पञ्चसु ऐरवतेषु सुषमसुषमादिरूपो दुष्षमदुष्षमादिरूपश्च कालो व्याघाततहेतुत्वाद् व्याघातो न भवति तदा पञ्चदशसु कर्मभूमिषु संमूर्चछति, व्याघातं प्रतीत्य, किमुक्तं भवति ?–

यदि पञ्चसु भरतेषु पञ्चस्वैरवतेषु यथोक्तरूपो व्याघातो भवति ततः पञ्चसु महाविदेहेषु संमूर्च्छति, एतावता त्रिंशत्यप्यकर्मभूमिषु नोपजायते इति प्रतिपादितम्, पञ्चदशसु कर्मभूमिषु पञ्चसु वा महाविदेहेषु न सर्वत्र संमूर्च्छति, किन्तु चक्रवर्तिस्कन्धावारेषु, वाशब्दःसर्वत्रापि विकल्पार्थो द्रष्टव्यः, बलदेवस्कन्धावारेषु वासुदेवस्कन्धावारेषु, माण्डलिकः–सामान्यराजाऽल्पर्द्धिकः, महामाण्डलिकः स एवानेकदेशाधिपतिः तत्स्कन्धावारेषु, 'गामनिवेसेसु' इत्यादि,

ग्रसति बुद्धयादीन् गुणानिति ग्रामः, यदिवा गम्यः शास्त्रप्रसिद्धानामष्टादशकराणामिति ग्रामः, निगमः–प्रभूततरवणिग्वर्गावासः, पांसुप्राकारविबद्धं खेटं, क्षुल्लकप्राकारवेष्टितं कर्बटम्, अर्द्धतृतीयगव्यूतान्तर्ग्रामान्तररहितं मडम्बम्, 'पट्टणत्ति' पट्टनं पत्तनं वा, उभयत्रापि प्राकृतत्वेन निर्देशस्य समानत्वात्, तत्र यन्नौभिरेव गम्यं तत् पट्टनं, यत्पुनर्शकटैर्घोटकैर्नौभिर्वा गम्यं तत् पत्तनं, यथा भृगुकच्छं, उक्तं च–

॥१॥ "पत्तनं शकटैर्गम्यं, घोटकैर्नौभिरेव च।
नौभिरेव तु यद् गम्यं, पट्टनं तत्प्रचक्षते ॥"

द्रोणमुखं–बाहुल्येन जलनिर्गमप्रवेशम्, आकरो हिरण्याकरादिः, आश्रमः–तापसावसथोपलक्षित आश्रयः, संबाधोयात्रासमागतप्रभूतजननिवेशः, राजधानी–राजाधिष्ठानं नगरं।

'एएसिणं' इत्यादि, एतेषां चक्रवर्तिस्कन्धावारादीनामेव विनाशेषूपस्थितेषु 'एत्थ णंति' एतेषु चक्रवर्तिस्कन्धावारादिषु स्थानेषु आसालिका संमूर्च्छति, सा च जघन्यतोऽङ्गुलासंख्येयभागमात्रयाऽवगाहनया समुत्तिष्ठतीति योगः, एतच्चोत्पादप्रथमसमये वेदितव्यं, उत्कर्षतो द्वादश योजनानि, तदनुरूपं–द्वादशयोजनप्रमाणदैध्यानुरूपं 'विक्खंभबाहल्लेणं' ति विष्कम्भश्च बाहल्यं च विष्कम्भबाहल्यं समाहारो द्वन्द्वः तेन, विष्कम्भो–विस्तारः बाहल्यं--स्थूलता, भूमीं 'दालित्ता णं' विदार्य समुपतिष्ठति, चक्रवर्तिस्कन्धावारादीनामधस्ताद् भूमेरन्तरुत्पद्यते इति भावः, सा चासंज्ञिनी–अमनस्का, संमूर्च्छिमत्वात्, मिथ्यादृष्टिः,सास्वादनसम्यकत्वस्यापि तस्या (अ)संभवात्, अत एवाज्ञानिनी अन्तर्मुहूर्तायुरेव कालं करोति, तदेवं ग्रन्थान्तर्गतं सूत्रं पठित्वा सूत्रकृत् सम्प्रति उपसंहारमाह–'सेत्तं आसालिया' ॥

लसम्प्रति महोरगानभिधित्सुराह– 'से किं तं' इत्यादि सुगमं, नवरं वितस्तिर्द्वादशाङ्गुलप्रमाणा, रत्निर्हस्तः, कुक्षिर्द्विहस्तमानः, धनुश्चतुर्हस्तं, गव्यूतं द्विधनुःसहस्रप्रमाणं, चत्वारि गव्यूतानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योजनं, इदं च वितस्त्यादि उच्छ्रायङ्गुलापेक्षया द्रष्टव्यं, शरीरप्रमाणस्य परिचिन्त्यमानत्वात्, तथा अस्तीति निपातोऽत्र बहुत्वाभिधायी प्रतिपदं च संबध्यते, ततोऽयमर्थः-सन्त्येके केचन महोरगा अङ्गुलमपि शरीरावगाहनया भवन्ति, तथा सन्त्येके केचन येऽङ्गुलपृथक्त्विका अपि, अङ्गुलपृथकत्वं विद्यते येषां ते अङ्गुलपृथक्त्विकाः, "अतोऽनेकस्वरात्" इति इकप्रत्ययः, तेऽपि शरीरावगाहनया भवन्ति, अङ्गुलपृथकत्वमानशरीरावगाहना अपि भवन्तीति भावः, एवं शेषसूत्राण्यपि भावनीयानि

'ते णं' इत्यादि, ते अनन्तरोदितस्वरूपा महोरगाः स्थलचरविशेषत्वात् स्थले जायन्ते, स्थले च जाताः सन्तो जलेऽपि स्थल इव चरन्ति स्थलेऽपि चरन्ति, तथाभवस्वाभाव्यात्, यद्येवं ते कस्मादिह न दृश्यन्ते इत्याशङ्कायामाह-'ते नत्थि इहं' इत्यादि, 'ते' यथोक्तस्वरूपा महोरगा 'इह' मानुषे क्षेत्रे 'नत्थित्ति' न सन्ति, किन्तु बाह्येष। द्वीपसमुद्रेषु भवन्ति, समुद्रेष्वपि च पर्वतदेवन-गर्यादिषु स्थलेषूत्पद्यन्ते न जलेषु, स्थूलतरत्वात्, तत इह न दृश्यन्ते। 'जे यावन्ने तहप्पगारा' इति, येऽपि चान्ये अङ्गुलदशकादिशरीरावगाहनमानास्तथाप्रकाराः सन्ति तेऽपि महोरगा ज्ञातव्याः

उपसंहारमाह-'सेत्तं' इत्यादि, 'ते समासओ' इत्यादि प्राग्वद् भावनीयम्। एतेषामपि दश जातिकुलकोटीनां योनिप्रमुखाणि शतसहस्राणि। एतेषामपि च यत् शरीरादिषु द्वारेषु चिन्तनं यच्च स्त्रीपुंनपुंसकानामल्पबहुत्वं तज्जीवाभिगमटीकातो भावनीयम्। उरःपरिसर्पवक्तव्यतो-पसंहारमाह-'से त्तं उरपरिसप्पा'।

अधुना भुजपरिसर्पानभिधित्सुराह-सुगमं, नवरं ये भुजपरिसर्पविशेषा अप्रतीतास्ते लोकतोऽवसेयाः। अमीषां च नव जातिकुलकोटीनां योनिप्रमुखानि शतसहस्राणि भवन्ति, यत्पुनः शरीरादिषु द्वारेषु चिन्तनं यच्च स्त्रीपुंनपुंसकानामल्पबहुत्वं तज्जीवाभिगमटीकातो वेदितव्यं 'सेत्तं' इत्यादि। सम्प्रति खचरपञ्चेन्द्रियतिर्यग्योनिकानभिधित्सुराह-

मू. (१६३) से किं तं खहयरपंचिंदियतिरिक्खजोणिया?, खहयरपंचिंदियतिरक्ख-जोणिया चउव्विहा पं०, तं०-चम्मपक्खी लोमपक्खी समुग्गपक्खी विययपक्खी, से किं तं चम्मपक्खी?, चम्मपक्खी अनेगविहा पं०, तं०-वग्गुली जलोया अडिल्ला भारंडपक्खी जीवंजीवा समुद्दवायसा कण्णत्तिया पक्खिविरालिया, जे यावन्ने तहप्पगारा, सेत्तं चम्मपक्खी।

से किं तं लोमपक्खी?, लोमपक्खी अनेगविहा पं०, तं-ढंका कंका कुरला वायसा चक्कागा हंसा कलहंसा रायहंसा पायहंसा आडा सेडी बगा बलागा पारिप्पवा कोंचा सारसा मेसरा मसूरा मयूरा सत्तहत्था गहरा पोंडरिया कागा कामिंजुया वंजुलगा तित्तिरा वट्टगा लावगा कवोया कविंजला पारेवया चिडगा चासा कुक्कुडा सुगा बरहिणा मयणसलागा कोइला सेहा वरिल्लगमाइ, सेत्तं लोमपक्खी।

से किं तं समुग्गपक्खी?, समुग्गपक्खी एगागारा पन्नत्ता, ते णं नत्थी इहं, बाहिरएसु दीवसमुद्देसु भवंति, सेत्तं समुग्गपक्खी। से किं तं विययपक्खी?, विययपक्खी एगागारा पन्नत्ता, ते णं नत्थि इहं, बाहिरएसु दीवसमुद्देसु भवन्ति, सेत्तं विययपक्खी।

ते समासओ दुविहा पं०, तं०-संमुच्छिमा य गब्भवक्कंतिया य, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा, तत्थ णं जे ते गब्भवक्कंतिया ते णं तिविहा पं०, तं०-इत्थी पुरिसा नपुंसगा। एएसिणं एवमाइयाणं खहयरपंचिंदियतिरिक्खजोणियाणं पज्जतापज्जत्ताणं बारस जाइकुलकोडि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जोणिपमुहसयसहस्सा भवन्तीति मक्खायं ।

वृ. अथ के ते खचरपञ्चेन्द्रियतैर्यग्योनिकाः ?, सूरिराह—चतुर्विधाः प्रज्ञप्ताः, —'चम्मपक्खी' इत्यादि, चर्मात्मकौ पक्षौ चर्मपक्षौ तौ विद्येते येषां ते चर्मपक्षिणः, लोमात्मकौ पक्षौ लोमपक्षौ तद्वन्तो लोमपक्षिणः, तथा गच्छतामपि समुद्गकवत् स्थितौ पक्षौ समुद्गकपक्षौ तद्वन्तः समुद्गकपक्षिणः, विततौ नित्यमनाकुञ्चितौ पक्षौ येषां विततपक्षौ तद्वन्तो विततपक्षिणः ।

'से किं तं' इत्यादि, अथ के ते चर्मपक्षिणः ?, चर्मपक्षिणोऽनेकविधाः प्रज्ञप्ताः, तद्यथा—वल्गुली इत्यादि, एते च भेदा लोकतोऽवसेयाः, 'जे यावन्ने तहप्पगारा' इति, येऽपि चान्ये तथाप्रकाराः—एवंरूपास्ते चर्मपक्षिणो द्रष्टव्याः, उपसंहारमाह— 'सेत्तं चम्मपक्खी' । लोमपक्षिप्रतिपादनार्थमाह— 'से किं तं' इत्यादि, एते च लोमपक्षिभेदा लोकतो वेदितव्याः । समुद्गकपक्षिप्रतिपादनार्थमाह— 'से किं तं' इत्यादि पाठसिद्धं, एवं विततपक्षिसूत्रमपि ।

'ते समासओ' इत्यादि प्रागवद् भावनीयं, एतेषां द्वादश जातिकुलकोटीनां योनिप्रमुखानि शतसहस्राणि अमीषामपि शरीरादिषु द्वारेषु चिन्तनं स्त्रीपुनंपुंसकानामल्पबहुत्वं च जीवाभिगमटीकातः प्रतिपत्तव्यं, इह तु ग्रन्थगौरवभयान्न लिख्यते । अधुना विनेयजनानुग्रहाय द्वीन्द्रियप्रभृतिजातिकुलकोटिशतसहस्रसंख्याप्रपितादिका संग्रहिणीगाथामाह –

मू. (१६४) *सत्तट्ठजाइकुलकोडिलक्ख नव अद्धतेरसाइं च ।*
दस दस य होंति नवगा तह बारस चेव बोद्धव्वा ॥

वृ. अत्र द्वीन्द्रियेभ्य आरभ्य यथासंख्येन संख्यापदयोजना, सा चैवं—द्वीन्द्रियाणां सप्त जातिकुलकोटिलक्षाणि, त्रीन्द्रियाणामष्टौ, चतुरिन्द्रियाणां नव, जलचरपञ्चेन्द्रियाणामर्द्धत्रयोदशानि, चतुष्पदस्थलचरपञ्चेन्द्रियाणां दश, उरःपरिसर्पस्थलचरपञ्चेन्द्रियाणां दश, भुजपरिसर्पस्थलचरपञ्चेन्द्रियाणां नव, खचरपञ्चेन्द्रियाणां द्वादशेति ।

मू. (१६५) *सेत्तं खहयरपंचिंदियतिरिक्खजोणिया, सेत्तं पंचिंदियतिरिक्खजोणिया ।*

वृ. उपसंहारमाह—'सेत्तं' इत्यादि । तदेवमुक्ताः पञ्चेन्द्रियतैर्यग्योनिकाः । सम्प्रति मनुष्यानभिधित्सुराह—

मू. (१६६) *से किं तं मणुस्सा ?, मणुस्सा दुविहा पं०, तं०—संमुच्छिममणुस्सा य गब्भवक्कंतियमणुस्सा य, से किं तं संमुच्छिममणुस्सा ?, कहि णं भंते ! संमुच्छिममणुस्सा संमुच्छंति ?,*

गोयमा अंतो मणुस्साखित्ते पणयालीसाए जोयणसयसहस्सेसु अड्ढाइज्जेसु दीवसमुद्देसु पन्नरससु कम्मभूमीसु तीसाए अकम्मभूमीसु छपन्नाए अंतरदीवएसु गब्भवक्कंतियमणुस्साणं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणएसु वा वंतेसु वा पित्तेसु वा पूएसु वा सोणिएसु वा सुक्केसु वा सुक्कपुग्गलपरिसाडेसु वा विगयजीवकलेवरेसु वा थीपुरिससंजोएसु वा नगरनिद्धमणेसु वा सव्वेसु चेव असुइट्ठाणेसु, एत्थ णं संमुच्छिममणुस्सा संमुच्छंति,

अंगुलस्स असंखेज्जइभागमेत्ताए ओगाहणाए असन्नी मिच्छद्दिट्ठी अन्नाणी सव्वाहिं पज्जत्तीहिं अपज्जत्तगा अंतोमुहुत्ताउया चेव कालं करेंति । से त्तं संमुच्छिममणुस्सा ॥

से किं तं गब्भवक्कंतियमणुस्सा ?, गब्भवक्कंतियमणुस्सा तिविहा पं०, तं०—कम्मभूमगा अकम्मभूमगा अंतरदीवगा, से किं तं अंतरदीवगा ?, अंतरदीवगा अट्ठावीसविहा पं०, तं—एगेरुया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहासिया वेसाणिया नंगोला हयकन्ना गयकन्ना गोकन्ना सक्कुलिकन्ना आयंसमुहा मेंढमुहा अयोमुहा गोमुहा आसमुहा हत्थिमुहा सीहमुहा वग्घमुहा आसकन्ना हरिकन्ना अकन्ना कण्णपाउरणा उक्कामुहा मेहमुहा विज्जुमुहा विज्जुदंता घणदंता लट्ठदंता गूढदंता सुद्धदंता । सेत्तं अंतरदीवगा ।

से किं तं अकम्मभूमगा ?, तीसविहा पं०, पंचहिं हेमवएहिं पंचहिं हिरण्णवएहिं पंचहिं हरिवासेहिं पंचहिं रम्मगवासेहिं पंचहिं देवकुरूहिं पंचहिं उत्तरकुरूहिं । सेत्तं अकम्मभूमगा ॥

वृ. अत्रापि संमूर्च्छिममनुष्यविषये प्रवचनबहुमानतः शिष्याणामपि च साक्षाद् भगवतेदमुक्तमिति बहुमानोत्पादनार्थमङ्गान्तर्गतमालापकं पठति- 'कहि णं भन्ते' इत्यादि, सुगमं, नवरं 'सव्वेसु चेव असुइट्ठाणेसुत्ति' अन्यान्यपि यानि कानिचिद् मनुष्यसंसर्गवशादशुचिभूतनि स्थानानि तेषु सर्वेष्विति । उक्ताः संमूर्च्छिममनुष्याः, अघुना गर्भव्युत्क्रान्तिकमनुष्यप्रतिपादनार्थमाह- 'कम्मभूमगा' इति कर्म-कृषिवाणियादि मोक्षानुष्ठानं वा कर्मप्रधाना भूमिर्येषां ते कर्मभूमाः आर्षत्वात् समासान्तोऽप्रत्ययः कर्मभूमा एव कर्मभूमकाः, एवमकर्मा-यथोक्तकर्मविकला भूमिर्येषां ते अकर्मभूमाः ते एव अकर्मभूमकाः, अन्तरशब्दो मध्यवाची, अन्तरे-लवणसमुद्रस्य मध्ये द्वीपा अन्तरद्वीपाः तद्गता अन्तरद्वीपगाः, "अस्ति पश्चानुपूर्वी" इति न्यायख्यापनार्थं प्रथमतोऽन्तरद्वीपगान् प्रतिपादयति- 'से किं तं' इत्यादि सुगमं, नवरमष्टाविंशतिविधा इति यादृशा एव यावत्प्रमाणा यावदपान्तराला यन्नामानो हिमवत्पर्वतपूर्वापरदिग्व्यवस्तिताः अष्टाविंशतिविधा अन्तरद्वीपास्तादशा एव तावत्प्रमाणा तावदपान्तरालास्तन्नामान एव शिखरिपर्वतपूर्वापरदिग्व्यवस्थिता अपि, ततोऽत्यन्तसदृशतया व्यक्तिभेदमनपेक्ष्यान्तरद्वीपा अष्टाविंशतिविधा एव विवक्षिता इति तज्जातमनुष्या अप्यष्टाविंश- तिविधा उक्ताः ।

तानेव नामग्राहमुपदर्शयति- 'तंजहा एगोरुया' इत्यादि, एते सप्त चतुष्काः, अष्टाविंशतिसंख्यत्वात्, एते च प्रत्येकं हिमवति शिखरिणि च, तत्र हिमवद्गतास्तावद् भाव्यन्ते-इह जम्बूद्वीपे भरतस्य हैमवतस्य च क्षेत्रस्य सीमाकारी भूमिनिमग्नपञ्चविंशतियोजनो योजनशतोच्छ्रयपरिमाणो भरतक्षेत्रापेक्षया द्विगुणविष्कम्भो हेममयश्चीनपट्टवर्णो नानावर्णविशिष्टद्युतिमणिनिकरपरिमण्डितोभयपार्श्वः सर्वत्र तुल्यविस्तारो गगनमण्डलोल्लेखिरत्नमयैकादशकूटोपशोभितो वज्रमयतलविविधमणिकनकमण्डिततटभागदशयोजनावगाढपूर्वपश्चिमयोजनसहस्रायामदक्षिणोत्तरपञ्चयोजनशतविस्तारः पद्मह्रदशोभितशिरोमध्यभागः सर्वतः कल्पपादपश्रेणिरमणीयः पूर्वापरपर्यन्ताभ्यां लवणोदार्णवजलसंस्पर्शी हिमवन्नामा पर्वतः,

तस्य लवणोदार्णवजलसंस्पर्शादारभ्य पूर्वस्यां पश्चिमायाश्च दिशि प्रत्येकं द्वे द्वे गजदन्ताकारे दंष्ट्रेविनिर्गते, तत्र ऐशान्यां दिशि या विनिर्गता दंष्ट्रा तस्यां हिमवतः पर्यन्तादारभ्य त्रीणि योजनशतानि लवणसमुद्रमवगाह्यात्रान्तरे योजनशतत्रयायामविष्मकम्भः किञ्चिन्न्यूनैकोनपञ्चाशदधिकनवयोजनशतपरिरय एकोरुकनामा द्वीपो वर्तते, अयं च पञ्चधनुःशतप्रमाणविष्कम्भया द्विगव्यूतोच्छ्रितया पद्मवरवेदिकया सर्वतः परिमण्डितः,

तस्याश्च पद्मवरवेदिकाया वर्णको जीवाभिगमटीकायामिव वेदितव्यः, साऽपि च पद्मवरवेदिका सर्वतः सामस्त्येन वनखण्डपरिक्षिप्ता, वनाच्च वनखण्डस्यायं विशेषः-प्रायो बहूनां समानजातीयानामुत्तमानां महीरुहाणां समुदायो वनं, यथा असोकवनं चम्पकवनमिति, अनेकजाती

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यानामुत्तमानां महीरुहाणां समूहो वनखण्डः, उक्तं च जीवाभिगममूलटीकायाम्–

"एगजाइएहिं खंडेहिं वणं, अनेगजाइएहिं उत्तमेहिं वनसंडे" इति, तस्य च वनखण्डस्य चक्रवालतया विष्कम्भो देशोने द्वे योजने, परिक्षेपः पद्मवरवेदिकाप्रमाणः, अस्य च वनखण्डस्य वर्णकः प्रतिपादितोऽस्ति, स चातीव गरीयानिति नोपदर्शितः, केवलं जीवाभिगमटीकातोऽवसेयः, तस्यैव हिमवतः पर्यन्तादारभ्य दक्षिणपूर्वस्यां दिशि त्रीणि योजनशतानि लसवणसमुद्रमवगाह्य द्वितीयदंष्ट्राया उपरि एकोरुकद्वीपप्रमाण आभासिकनामा द्वीपो वर्त्तते, तथा तस्यैव हिमवतः पश्चिमायां दिशि पर्यन्तादारभ्य दक्षिणपश्चिमायां–नैर्ऋतकोण इत्यर्थः, त्रीणि योजनशतानि लवणसमुद्रमवगाह्य दंष्ट्राया उपरि यथोक्तप्रमाणो वैषाणिकनामा द्वीपः, तथा तस्यैव हिमवतः पश्चिमायां दिशि पर्यन्तादारभ्य पश्चिमोत्तरस्यां दिशि–वायव्यकोणे इत्यर्थः, त्रीणि योजनशतानि लवणसमुद्रमध्ये दंष्ट्रामतिक्रम्यात्रान्तरे पूर्वोक्तप्रमाणो नाङ्गोलिकनामा द्वीपः,

एवमेते चत्वारो द्वीपा हिमवतश्चतसृष्वपि विदिक्षु तुल्यप्रमाणा अवतिष्ठन्ते, उक्तं च–

॥१॥ "चुल्लहिमवंतपुव्वावरेण विदिसासु सागरं तिसए।
गंतूनंतरदीवा तिन्नि सए हुंति विच्छिन्ना ॥

॥२॥ अउणापन्ननवसए किंचूणं परिहि तेसिमे नामा।
एगोरुयगाभासिय वेसाणिय चेव नंगूली ॥"

तत एषामेकोरुकादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं चत्वारि चत्वारि योजनशतान्यतिक्रम्य चतुर्योजनशतायामविष्कम्भाः किञ्चिन्न्यूनपञ्चषष्टिसहित-द्वादशयोजनशतपरिक्षेपाः यथोक्तपद्मवरवेदिकानवखण्डमण्डितपरिसराः जम्बूद्वीपवेदिकात-श्चतुर्योजनशतप्रमाणान्तरा हयकर्णगजकर्णगोकर्णशष्कुलीकर्णनामानश्चत्वारो द्वीपाः, तद्यथा–एकोरुकस्य परतो हयकर्णः आभासिकस्य परतो गजकर्णः वैषाणिकस्य परतो गोकर्णः नाङ्गोलिकस्य परतो शष्कुलीकर्ण इति। तत एतेषामपि हयकर्णादीनां चतुर्णां द्वीपानां परतः पुनरपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं पञ्च पञ्च योजनशतानि व्यतिक्रम्य पञ्चयोजनशतायामविष्कम्भा एकाशीत्यधिक-पञ्चदशयोजनशतपरिक्षेपाः पूर्वोक्तप्रमाणपद्मवरवेदिकावनखण्डमण्डितबाह्य-प्रदेशा जम्बूद्वीपवेदिकातः पञ्चयोजनशतप्रमाणान्तरा आदर्शमुख १ मेण्ढमुख २ अयोमुख ३ गोमुख ४ नामानश्चत्वारो द्वीपाः, तद्यथा–हयकर्णस्य परत आदर्शमुखः गजकर्णस्य परतो मेण्ढमुखः गोकर्णस्य परतोऽयोमुखः शष्कुलीकर्णस्य परतो गोमुख इति।

एवमग्रेऽपि भावना कार्या, एतेषामप्यादर्शमुखादीनां चतुर्णां द्वीपानां परतो भूयोऽपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं षट् षट् योजनशतान्यतिक्रम्य षड्योजनशतायामविष्कम्भाः सप्तनवत्यधिकाष्टादशयोजनशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकावनखण्डमण्डितपरिसरा जम्बूद्वीपवेदिकातः षड्योजनशतप्रमाणान्तरा अश्वमुखहस्तिमुखसिंहमुखव्याघ्रमुखनामानश्चत्वारो द्वीपाः। एतेषामप्यश्वमुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं सप्त २ योजनशतान्यतिक्रम्य सप्तयोजनशतायामविष्कम्भावस्रयोदशाधिकद्वाविंशतियोजनशतपरिरयाः पूर्वोक्तप्रमाणपद्मवरवेदिकावनखण्डसमवगूढा जम्बूद्वीपवेदिकातः सप्तयोजनशतप्रमाणान्तरा अश्वकर्णहरिकर्णाकर्णकर्णप्रावरणनामानश्चत्वारो द्वीपाः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत एतेषामश्वकर्णादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविधिक्षु प्रत्येकमष्टावष्टौ योजनशतान्यतिक्रम्याष्टयोजनशतायामविष्कम्भा एकोनत्रिंशदधिकपञ्चविंशतियोजनशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकावनखण्डमण्डितपरिसरा जम्बूद्वीपवेदिकातोऽष्टयोजनशतप्रमाणान्तरा उल्कामुखमेघमुखविद्युन्मुखविद्युद्दन्ताभिधानाश्चत्वारो द्वीपाः ।

ततोऽमीषामपि उल्कामुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं नवनव योजनशतान्यतिक्रम्य नवयोजनशतायामविष्कम्भाः पञ्चचत्वारिंशदधिकाष्टाविंशतियोजनशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकावनखण्डसमवगूढा जम्बूद्वीपवेदिकातो नवयोजनशतप्रामाणान्तरा धनदन्तलष्टदन्तगूढदन्तशुद्धदन्तनामानश्चत्वारो द्वीपाः ।

एवमेते हिमवति पर्वते चतसृषु विदिक्षु व्यवस्थिताः सर्वसंख्ययाऽष्टाविंशतिः, एवं हिमवत्तुल्यवर्णप्रमाणे पद्महृदप्रमाणायामविष्कम्भावगाहपुण्डरीकहृदोपशोभिते शिखरिण्यपि पर्वते लवणोदार्णवजलसंस्पर्शादारभ्य यथोक्तप्रमाणान्तरासु चतसृषु विदिक्षु व्यवस्थिता एकोरुकादिनामानोऽक्षूणापान्तरालायमविष्कम्भा अष्टाविंशतिसंख्या द्वीपा वक्तव्याः, सर्वसंख्यया षट्पञ्चाशदन्तरद्वीपाः, एतद्गता मनुष्या अप्येतन्नामानः उपचारात्, भवति च तात्स्थ्यात् तद्व्यपदेशः, यथा पञ्चालदेशनिवासिनः पुरुषाः पञ्चाला इति, ते च मनुष्या वज्रर्षभनाराचसंहननिनः कङ्कपक्षिपरिणामा अनुलोमवायुवेगा समचतुरस्रसंस्थानाः,

तद्यथा-सुप्रतिष्ठितकूर्मचारुचरणाः सुकुमारश्लक्ष्णप्रविरलोरमकुरुविन्दवृत्तडङ्घायुगला निगूढसुबद्धसंधिजानुप्रदेशाः करिकरसमवृत्तोरवः कण्ठीरवसदशकटीप्रदेशाः शक्रायुधसममध्यभागाः प्रदक्षिणावर्तनाभिमण्डलाः श्रीवत्सलाञ्छितविशालमांसलक्षःस्थलाः पुरपरिघाऽनुकारिदीर्घबाहवः सुश्लिष्टमणिबन्धा रक्तोत्पलपत्रानुकारिशोणपाणिपादतलाः चतुरङ्गुलप्रमाणसमवृत्तकम्बुग्रीवाः शारदाशशाङ्कसौम्यवदनाः छत्राकारशिरसोऽस्फुटितस्निग्धकान्तिश्लक्ष्णमूर्द्धजाः

कमण्डलु कलश यूपस्तूप वापी ध्वज पताका सौवस्तिक यव मत्स्य मकर कूर्म रथवर स्थालांशुकाष्टापदाङ्कुश सुप्रतिष्ठक मयूर श्रीदामाभिषेक तोरण मेदिनी जलधि वरभवनादर्शपर्वतगजवृषभसिंहच्छत्रचामररूपरशस्तोत्तमद्वात्रिंशल्लक्षणधराः ।

स्त्रियोऽपि सुजातसर्वाङ्गसुन्दर्यः समस्तमहेलागुणसमन्विताः संहताङ्गुलिपद्मदलवत्सुकुमारकूर्मसंस्थानमनोहारिचरणा रोमरहितप्रशस्तलक्षणोपेतजङ्घायुगला निगूढमांसलजानुप्रदेशाः कदलीस्तम्भनिभसंहतसुकुमारपीवरोरुका वदनायामप्रमाणत्रिगुणमांसलविशालजघनधारिण्यः स्निग्धकान्तिसुविभक्तश्लक्ष्णरोमराजयः प्रदक्षिणावर्ततरङ्गभङ्गुरनाभिमण्डलाः प्रशस्तलक्षणोपेतकुक्षयः संगतपार्श्वाः कनककलशोपमसंहितात्युन्नतवृत्ताकृतिपीवरपयोधराः सुकुमारबाहुलतिकाः सौवस्तिकशङ्खचक्राद्याकृतिलेखालङ्कृतपाणिपादतलाः वदनत्रिभागोच्छ्रितमांसलकम्बुग्रीवाः प्रशस्तलक्षणोपेतमांसलहनुविभागा दाडिमपुष्पानुकारिशोणिमाधरौष्ठा रक्तोत्पलतालुजिह्वा विकसितकुवलयपत्रायतकान्तलोचना आरोपितचापपृष्ठाकृतिसुसंगतभ्रूलतिकाः प्रमाणोपपन्नललाटफलकाः सुस्निग्धकान्तश्लक्ष्णशिरोरुहाः पुरुषेभ्यः किञ्चिदूनोच्छ्रायाः स्वभावत उदारशृङ्गारचारुवेषाः प्रकृत्यैव हसितभणितविलासविषयपरमनैपुण्योपेताः ।

तथा मनुष्या मानुष्यश्च स्वभावत एव सुरभिवदनाः प्रतनुक्रोधमानमायालोभाः संतोषिणो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरौत्सुक्या मार्दवार्जवसंपन्नाः सत्यपि मनोहारिणि मणिकनकमौक्तिकादौ ममत्वकारणे ममत्वाभिनिवेशरहिताः सर्वथाऽपगतवैरानुवन्धा हस्त्यश्वकरभगोमहिशष्यादिसद्भावेऽपि तत्परिभोगपराङ्मुखाः पादविहारिणोज्वरादिरोगयक्षभूतपिशाचादिग्रहमारिव्यसनोपनिपातविकलाः परस्परप्रेष्यप्रेषकभावरहितत्वादहमिन्द्राः, तेषां पृष्ठकरण्डकानि चतुःषष्टिसंख्याकानि चतुर्थातिक्रमे चाहारग्रहणं, आहारोऽपि च न शाल्यादिधान्यनिष्पन्नः किन्तु पृथ्वीमृत्तिका कल्पद्रुमाणां पुष्पफलानि च,

तथाहि–जायन्ते खलु तत्रापि विस्रसात एव शालिगोधूममाषमुद्गादीनि धान्यानि, परं न तानि मनुष्याणामुपभोगं गच्छन्ति, या तु पृथ्वी सा शर्करातोऽप्यनन्तगुणमाधुर्या, यश्च कल्पद्रुमपुष्पफलानामास्वादः स चक्रवर्तिभोजनादप्यधिकगुणः, तथा चोक्तम्–"तेसिणं भंते ! पुप्फफलाणं केरिसए आसाए पन्नते ?, गोयमा! से जहानामए रन्नो चाउरंतस्स चक्कवट्टिस्स कल्लाणे भोयणजाए सयसहस्सनिप्फन्ने वन्नोवए रसोवए फासोवए आसायणिज्जे दप्पणिज्जे मयणिज्जे बिंहणिज्जे सव्वेंदियगायपल्हायणिज्जे आसाएणं पन्नत्ते, एत्तोवि इट्ठतराए चेव पन्नत्ते" ।

ततः पृथ्वी कल्पद्रुमपुष्पफलानि च तेषामाहारः, तथाभूतं चाहारमाहार्य प्रासादादिसंस्थाना ये गृहाकाराः कल्पवृक्षास्तेषु यथासुखमवतिष्ठन्ते, न च तत्र क्षेत्रे दंशमशकयूकामत्कुणमक्षिकादयः शरीरोपद्रवकारिणो जन्तव उपजायन्ते, येऽपि च जायन्ते भुजगव्याघ्रसिंहादयस्तेऽपि मनुष्याणां न बाधायै प्रभवन्ति, नापि ते परस्परं हिंस्यहिंसकभावे वर्तन्ते, क्षेत्रानुभावतो रौद्रानुभावरहितत्वात्, मनुष्ययुगलानि च पर्यवसानसमये युगलं प्रसुवते, तच्च युगलमेकोनाशीतिदिनानि पालयन्ति, तेषां शरीरोच्छ्रयोऽष्टौ धनुःशतानि, पल्योपमासंख्येयभागप्रमाणमायुः, उक्तं च–

॥१॥ "अन्तरदीवेसु नरा धणुसयमट्ठुसिया सया मुइया ।
पालंति मिहुणधम्मं पल्लस्स असंखभागाऊ ॥
॥२॥ चउसट्ठि पिट्ठकरंडयाणि मणुयाणा तेसिमाहारो ।
भत्तस्स चउत्थस्स य गुणसीइदिणाणि पालणया ॥"

स्तोककषायतया स्तोकप्रेमानुबन्धतया च ते मृत्वा दिवमुपसर्पन्ति, मरणं च तेषां जृम्भिकाकासक्षुतादिमात्रव्यापारपुरस्सरं भवति, न शरीरपीडारम्भपुरस्सरमिति । तदेवमुक्ता अन्तरद्वीपगाः ॥ साम्प्रतमकर्मभूमकप्रतिपादनार्थमाह– अथ के तेऽकर्मभूमकाः ?, सूरिराह–अकर्मभूम-कास्त्रिंशद्विधाः प्रज्ञप्ताः, तच्च त्रिंशद्विधत्वं क्षेत्रभेदात्, तथा चाह–'तंजहा– पंचहिं हेमवएहिं' इत्यादि, पञ्चभिर्हैमवतैः पञ्चभिर्हैरण्यवतैः पञ्चभिर्हरिवर्षैः पञ्चमी रम्यकवर्षैः पञ्चभिर्देवकुरुभिः पञ्चभिरुत्तरकुरुभिर्भिद्यमाना त्रिंशद्विधा भवन्ति, षण्णां पञ्चानां त्रिंशत्संख्यात्मकत्वात् ।

तत्र पञ्चसु हैमवतेषु पंचसु हैरण्यवतेषु मनुष्या गव्यूतप्रमाणशरीरोच्छ्र्याः पल्योपमायुषो वज्रर्षभनाराचसंहननाः समचतुरस्रसंस्थानाः चतुःषष्टिपृष्ठकरण्डकाश्चतुर्थातिक्रमभोजिन एकोनाशीतिदिनान्यपत्यपालकाः, उक्तं च–

॥१॥ "गाउयमुच्चा पलिओवमाउणो वज्जरिसहसंघयणा ।
हेमवएरन्नवए अहमिंदनरा मिहुणवासी ॥
॥२॥ चउसट्ठी पिट्ठकरंडयाण मणुयाण तेसिमाहारो ।
भत्तस्स चउत्थस्स य गुणसीदिणऽवच्चपालणया ॥"

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

पञ्चसु हरिवर्षेषु पञ्चसु रम्यकेषु द्विपल्योपमायुषो द्विगव्यूतप्रमाणशरीरोच्छ्रया वज्रर्षभनाराचसंहननाः समचतुरस्रसंस्थानाः षष्ठभक्तातिक्रमे आहारग्राहिणो अष्टावंशत्यधिकशत-संख्यपृष्ठकरण्डकाश्चतुः षष्टिदिनान्यपत्यपालकाः, आह च-

॥१॥ "हरिवासरम्मएसुं आउपमाणं सरीरमुस्सेहो ।
पलिओवमाणि दोन्नि उ दोन्नि उ कोसुस्सिया भणिया ॥
॥२॥ छट्ठस्स य आहारो चउसट्ठिदिणाणि पालणा तेसिं ।
पिट्ठकरंडाण सयं अट्ठावीसं मुणेयव्वं ॥"

पञ्चसु देवकुरुषु पञ्चसूत्तरकुरुषु त्रिपल्योपमायुषो गव्यूतत्रयप्रमाणशरीरोच्छ्रयाः समचतुरस्रसंस्थाना वज्रर्षभनाराचसंहननिनः षट्पञ्चाशदधिकशतद्वयप्रमाणपृष्ठकरण्डका अष्टमभक्तातिक्रमाहारिण एकोनपञ्चाशद्दिनान्यपत्यपालकाः, तथा चोक्तम्-

॥१॥ "दोसुवि कुरूसु मणुया तिपल्लपरमाउणो तिकोसुच्चा ।
पिट्ठिकिरंडसयाइं दो छप्पन्नाइं मणुयाणं ॥
॥२॥ सुसमसुसमानुभावं अणुभवमाणाणऽवच्चगोवणया ।
अउणापन्नदिणाइं अट्ठमभत्तस्समाहारो ॥"

एतेषु सर्वेष्वपि क्षेत्रेष्वन्तरद्वीपेष्विव मनुष्याणामुपभोगाः कल्पद्रुमसंपादिताः, नवर-मन्तरद्वीपापेक्षया पञ्चसु हैमवतेषु पञ्चसु हैरण्यवतेषु मनुष्याणामुत्थानबलवीर्यादिकं कल्पपाद-पफलानामास्वादो भूमेर्माधुर्यमित्येवमादिका भावाः पर्यायानधिकृत्यानन्तगुणा द्रष्टव्याः, तेभ्योऽपि पञ्चसु हरिवर्षेषु पञ्चसु रम्यकवर्षेषु अनन्तगुणाः, तेभ्योऽपि पञ्चसु देवकुरुषु पञ्चसूत्तरकुरुषु अनन्तगुणाः, तदेवमुक्ता अकर्मभूमकाः । संप्रतिकर्मभूमकप्रतिपादनार्थमाह-

मू. (१६६) *से किं तं कम्मभूमगा ?, कम्मभूमगा पन्नरसविहा पं०, तं०-पंचहिं भरहेहिं पंचहिं एरवएहिं पंचहिं महाविदेहेहिं, ते समासओ दुविहा पं०, तं०- आ रिया य मिलिक्खू य, से किं तं मिलिक्खू ?, मिलिक्खू अनेगविहा पं०, तं०-*

-सगा जवणा चिलाया सबरबब्बरमुरंडोड्डभडगनिण्णगपक्कणिया कुलक्खगोंडसिहल-पारसगोधा कोंचअंबडइदमिलचिल्ललपुलिंदहारोसदोबवोक्काणगन्धा हारवा पहलियअज्झलरोम-पासपउसा मलया य बंधुया य सूयलिकोंकणगमेयपल्हवमालव मग्गर आभासिआ कणवीर ल्हसिय खसा खासिय णेदूर मोंढ डोंबिल गलओस पओस कक्केय अक्खाग हणरोमग हूणरोमग भरु मरुय चिलाय वियवासी य एवमाइ, सेत्तं मिलिक्खू ।

वृ. अथ के ते कर्मभूमकाः ?, सूरिराह कर्मभूमकाः पञ्चदशविधाः प्रज्ञप्ताः, तच्च पञ्चदश-विधत्वं क्षेत्रभेदात्, तथा चाह-'पञ्चहिं भरहेहिं' इत्यादि, पञ्चभिर्भरतैः पञ्चभिरैरवतैः पञ्चभिर्महा-विदेहैर्भिद्यमानाः पञ्चदशविधा भवन्ति, ते च पञ्चदशविधा अपि समासतो द्विविधाः प्रज्ञप्ताः, -आर्या म्लेच्छाश्च, तत्र आराद् हेयधर्मेभ्यो याताः- प्राप्ता उपादेयधर्मैरित्यार्याः, "पृषोदरादयः" इति रूपनि-ष्पत्तिः, म्लेच्छाः-अव्यक्तभाषासमाचाराः, "म्लेच्छ अव्यक्तायां वाचि" इति वचनात्, भाषाग्रहणं चोपलक्षणं, तेन शिष्टाऽसंमतसकलव्यवहारा म्लेच्छा इति प्रतिपत्तव्यं ।

तत्राल्पवक्तव्यत्वात् प्रथमतो म्लेच्छवक्तव्यातामाह-'से किं तं' इत्यादित, अथ के ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

म्लेच्छाः ?, 'मिलिक्खू' इति निर्देशः प्राकृतत्वाद् आरअषत्वाच्च, सूरिराह–म्लेच्छा अनेकविधाः प्रज्ञप्ताः, तच्चानेकविधत्वं शक–यवन–चिलात–शबर–बर्बरादिदेशभेदात्, तथा चाह–'तंजहा सगा' इत्यादि, शकदेशनिवासिनः शकाः, यवनदेशनिवासिनो यवनाः, एवं सर्वत्र, नवरममी नानादेशा लोकतो विज्ञेयाः ।। आर्यप्रतिपादनार्थमाह–

मू. (१६६) *से किं तं आरिया ?, आरिया दुविहा पं०, तं०–इड्ढिपत्तारिया य अणिड्ढिपत्तारिया य, से किं तं इड्ढिपत्तारिया ?, इड्ढिपत्तारिया छव्विहा पं०, तं०–अरहंता चक्कवट्टी बलदेवा वासुदेवा चारणा विज्ञाहरा, सेत्तं इड्ढिपत्तारिया ।*

से किं तं अणिड्ढिपत्तारिया ?, अणिड्ढिपत्तारिया नवविहा प०, तं०–खेत्तारिया जातिआरिया कुलारिआ कम्मारिया सिप्पारिओ भासारिया नाणारिया दंसणारिया चारित्तारिया ।

से किं तं खेत्तारिया ?, खेत्तारिया अद्धछव्वीसतिविहाणा पं०, तं०–र

मू. (१६७) *रायगिह मगह चंपा अंगा तह तामालित्ति वंगा य ।*
कंचणपुरं कलिंगा वाणारसी चेव कासी य ।

मू. (१६८) *साएय कोसला गयपुरं च कुरु सोरियं कुसट्टा य ।*
कंपिल्लं पंचाला अहिछत्ता जंगला चेव ।।

मू. (१६९) *बारवई सोरट्ठा मिहिल विदेहा य वच्छ कोसंबी ।*
नंदिपुरं संडिल्ला भद्दिलपुरमेव मलया य ।।

मू. (१७०) *वइराड वच्छ वरणा अच्छा तह मत्तियावइ दसण्णा ।*
सोत्तियवई य चेदी वीयभयं सिंधुसोवीरा ।।

मू. (१७१) *महुरा य सूरसेना पावा भंगी य मास पुरिवट्टा ।*
सावत्थी य कुणाला कोडीवरिसं च लाटा य ।।

मू. (१७२) *सेयवियाविय नयरी केकयअद्धं च आरियं भणियं ।*
इत्थुप्पत्ती जिणाणं चक्कीणं रामकण्हाणं ।।

वृ. सुगमं, नवरं 'रायगिहमगह' इत्यादि, राजगृहं नगरम्, मगधो जनपदः, एवं सर्वत्रापि अक्षरसंस्कारो विधेयः, भावार्थस्त्वयम्–१ भगधेषु जनपदेषु राजगृहं नगरम्, २ अङ्गेषु चम्पा ३ वङ्गेषु तामलिप्ती ४ कलिङ्गेषु काञ्चनपुरं ५ काशिषु वाराणसी ६ कोसलासु साकेतं ७ कुरुषु गजपुरं ८ कुशावर्तेषु सौरिकं ९ पाञ्चालेषु काम्पिल्यं, १० जङ्गलेषु अहिच्छत्रा ११ सुराष्ट्रेषु द्वारावती १२ विदेहेषु मिथिला १३ वत्सेषुकौशाम्बी १४ शाण्डिल्येषु नन्दिपुरं, १५ मलयेषु भद्दिलपुरं १६ वत्सेषु वैराटपुरं १७ वरणेषु अच्छापुरी १८ दशार्णेषु मृत्तिकावती १९ चेदिषु शौक्तिकावती २० वीतभयं सिन्धुषु सौवीरेषु २१ मथुरा शूरसेनेषु २२ पापा भङ्गेषु २३ मास पुरिवट्टा २४ कुणालेषु श्रावस्ती २५ लाटासु कोटिवर्षं २६ श्वेताम्बिकानगरी केकयजनपदार्द्धे एतावदर्द्धषड्विंशतिजनपदात्मकं क्षेत्रमार्यं भणितं, कुतः ? इत्याह–

'इत्थुप्पत्ती' इत्यादि, यस्मादत्र–एषु अर्द्धषड्विंशतिसंख्येषु जनपदेषु उत्पतक्तिर्जिनानं–तीर्थकराणां चक्रवर्तिना रामाणां–बलदेवानां कृष्णानां–वासुदेवानां तत आर्यं, एतेन क्षेत्रार्यानार्यव्यवस्था दर्शिता–यत्र तीर्थकरादीनामुत्पत्तिस्तदार्यं शेषमनार्यमिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१७३) *से त्तं खेत्तारिया ।। से किं तं जाइआरिया ?, जाइआरिया छव्विहा पं०, तंजहा–*

वृ. उक्ताः क्षेत्रार्याः, सम्प्रति जात्यार्यप्रतिपादनार्थमाह–सुगमं, नवरं यद्यपि शास्त्रान्तरेष्वनेका जातय उपवर्णयन्ते तथाऽपि लोके एता एव ।

मू. (१७४) *अंबट्ठा य कलिंदा य, विदेहा वेंदगाइया ।*
हरिया चुंचुणा चेव, छ एया इब्भजाईओत

वृ. अम्बष्ठ–कलिन्द–वैदेह–वेदंग–हरित–चुंचुणरूपा इभ्यजातयोऽभ्यर्चनीया जातयः प्रसिद्धाः, तत एताभिर्जातिभिरुपेता जात्यार्या न शेषजातिभिः ।

मू. (१७५) *सेत्तं जाइआरिया । से किं तं कुलारिया ?, कुलारिया छव्विहा पं०, तं०–उग्गा भोगा राइन्ना इक्खागा नाया कौरव्वा, सेत्तं कुलारिया ।*

से किं तं कम्मारिया ?, कम्मारिया अनेगविहा पं०, तं०–दोसिया सुत्तिया कप्पासिया सुत्तवेयालिया भंडवेयालिया कोलालिया नरवाहणिया जे यावन्ने तहप्पगारा, से त्तं कम्मारिया ।

से किं तं सिप्पारिया ?, सिप्पारिया अनेगविहा पं०, तं०–तुण्णागा तंतुवाया पट्टागा देयडा वरुट्टा छव्विया कट्ठपाउयारा मुंजपाउयारा छत्तारा वज्झारा पुच्छरा लेप्पारा चित्तारा संखारा दंतारा भंडारा जिज्झगारा सेल्लारा कोडिगारा, जे यावन्ने तहप्पगारा, से त्तं सिप्पारया ।।

से किं तं भासारिया ?, भासारिया जे णं अद्धमागहाए भासाए भासेंति, तत्थऽवि य णं जत्थ बंभी लिवी पवत्तइ, बंभीए णं लिवीए अट्ठारसविहे लेक्खविहाणे पं०, तं०–बंभी जवणाणिया दोसापुरिया खरोट्ठी पुक्खरसारिया भोगवइया पहराइया अंतक्खरिया अक्खरपुट्ठिया वेणइया निण्हइया अंकलिवी गणियलिवी गंधव्वलिवी आयंसवलिवी माहेसरी दोमिलिवी पोलिन्दी, से त्तं भासारिया । से किं तं नाणारिया ?, नाणारिया पंचविहा पं०, तं०–आभिनिबोहियनाणारिया सुयना- णारिया ओहिनाणारिया मनपज्जवनाणारिया केवलनाणारिया, सेत्तं नाणारिया ।

से किं तं दंसणारिया ?, दंसणारिया दुविहा पं०, तं०–सरागदंसणारिया य वीयरायदं सणारिया य, से किं तं सरागदंसणारिया ?, सरागदंसणारिया दसविहा पं०, तं–

वृ. 'तुण्णागा' इत्यादि, तुन्नाकाः–सूच्याजीविनःतन्तुवायाः– कुविन्दाः पट्टकाराः–पट्टकूलकुविन्दाः, देयडा–दृतिकाराः वरुट्टाः–पिच्छिकाः छर्विकाः–कटादिकाराः कट्ठपाउरा–काष्ठापादुकाकाराः, एवं मुंजपाउयारा, 'छत्तारा' छत्रकाराः, एवं शेषाण्यपि पदानि भावनीयानि ब्राह्मी यवनानीत्यादयो लिपिभेदास्तु संप्रदायादवसेयाः । उक्ता भाषार्याः, सम्प्रति ज्ञानार्यानाह–'से किं तं' इत्यादि सुगमम् । दर्शनार्यानाह– अथ के ते दर्शनार्याः ?, सूरिराह–दर्शनार्या द्विविधाः प्रज्ञप्ताः, तद्यथा–सरागदर्शनार्या वीतरागदर्शनार्याश्च, तत्र सरागं–सकषायं यद्दर्शनं तेनार्याः सरागदर्शनार्याः वीतरागं– उपशान्तकषायं क्षीणकषायं वा यद्दर्शनं तेनार्या वीतरागदर्शनार्याः । तत्र सरागदर्शनार्यप्रतिपादनापर्थमाह–'से किं तं' इत्यादि, अथ के ते सरागदर्शनार्याः ?, सूरिराह–सरागदर्शनार्या दशविधाः प्रज्ञप्ताः, तद्यथा–

मू. (१७६) *निसग्गुवएसरुई आणरुई सुत्तबीयरुइमेव ।*
अभिगमवित्थररुई किरियासंखेवधम्मरुई ।।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वृ. 'निसग्गुवएस' इत्यादि, अत्र रुचिशब्दः प्रत्येकमभिसंबध्यते, ततो निसर्गरुचिरिति द्रष्टव्यं, तत्र निसर्गः—स्वभावः तेन रुचिः—जिनप्रणीततत्त्वाभिलाषरूपा यस्य स निसर्गरुचिः,

उपदेशो—गुर्वादिना वस्तुतत्त्वकथनं तेन रुचिः—उक्तस्वरूपा यस्य स उपदेशरुचिः,

आज्ञा—सर्वज्ञवचनात्मिका तस्यां रुचिः—अभिलाषो यस्य स आज्ञारुचिः, जिनाज्ञैव मे तत्त्वं न शेषं युक्तिजातमिति योऽभिमन्यते स आज्ञारुचिरिति भावार्थः,

'सुत्तबीयरुइमेवत्ति' अत्रापि रुचिशब्दः प्रत्येकमभिसंबध्यते, सूत्रम्—आचारङ्गाद्यङ्गप्रविष्टं अङ्गबाह्यम्—आवश्यकदशवैकालिकादि तेन रुचिर्यस्य स तथा, सूत्रमाचारादिकमङ्गप्रविष्य-मङ्गबाह्यावश्यकादिकमधीयानो यः सम्यकत्वमवगाहते प्रसन्नप्रसन्नतराध्यवसायश्च भवति स सूत्ररुचिरिति भावार्थः, बीजमिव बीजं—यदेकमप्यनेकार्थप्रबोधोत्पादकं वचः तेन रुचिर्यस्य स बीजरुचिः, अनयोश्च पदयोः समाहारद्वन्द्वः तेन नपुंसकनिर्देशः, एवेति समुच्चये,

'अहिगमवित्थाररुइत्ति' अत्रापि रुचिशब्दस्य प्रत्येकमभिसंबन्धः, अधिगमरुचिर्विस्तार-रुचिश्च, तत्राधिगमो— विशिष्टं परिज्ञानं तेन रुचिर्यस्यासावधिगमरुचिः, विस्तारोव्यासः सकलद्वादशाङ्गस्य नयैः पर्यालोचनमिति भावः, तेनोपबृंहिता रुचिर्यस्य स विस्ताररुचिः,

'किरियासंखेव धम्मरुइत्ति' रुचिशब्दस्यात्रापि प्रत्येकं संबन्धात् क्रियारुचिः संक्षेपरुचिर्ध-र्मरुचिरिति द्रष्टव्यं, तत्र क्रिया—सम्यक्संयमानुष्ठानं तत्र रुचिर्यस्य स क्रियारुचिः,

संक्षेपः—संग्रहः तत्र रुचिर्यस्य विस्तरार्थापरिज्ञानात् स संक्षेपरुचिः

धर्मेअस्तिकायधर्मे श्रुतधर्मादौ वा रुचिर्यस्य स धर्मरुचिरिति गाथासंक्षेपार्थः ॥

मू. (१७७) *भूयत्थेणाहिगया जीवाजीवे य पुन्नापावं च ।*
सहसंमुइया आसवसंवरे य रोएइ उ निसग्गो ॥

वृ. व्यासार्थं तु सूत्रकृदेव स्वत आह—'भूयत्थेण' इत्यादि, 'भूयत्थेण' इति भावप्रधानो निर्देशः, ततोऽयमर्थः—भूतार्थत्वेन—सद्भूता अमी पदार्था इत्येवंरूपेण यस्याधिगताः—परिज्ञाता जीवाजीवाः पुण्यं पापमाश्रवं संवरः चशब्दद् बन्धादयश्च, कथमधिगताः ? इत्याह—'सहसम्मुइआ' इति आर्षत्वाद् विभक्तिलोपाच्च सहसंमत्या सह—आत्मना या संगता मतिः सा सहसंमतिः तया, किमुक्तं भवति ?—परोपदेशनिरपेक्षया जातिस्मरणप्रतिभादिरूपया मत्या, न केवलमधिगताः, किन्तु तान् जीवादीन् पदार्थान् वेदयतेऽनुरोचयति च तत्त्वरूपतयाऽऽत्मसात्परिणामयति चेति भावः, एष निसर्गरुचिर्विज्ञेय इति शेषः । अमुमेवार्थं स्पष्टतरमभिधत्सुराह—

मू. (१७८) *जो जिनदिट्ठे भावे चउव्विहे सद्दहाइ सयमेव ।*
एमेव नन्नहत्तिय निसग्गरुइत्ति नायव्वो ॥

वृ. 'जो जिनदिट्ठे भावे' इत्यादि, यो जिनदृष्टान् भावान् द्रव्यक्षेत्रकालभावभेदतो नामादि-भेदतो वा चतुर्विधान् स्वयमेव—उपदेशनिरपेक्षश्रः श्रद्दधाति, केनोल्लेखेन श्रद्दधाति ?, तत आह—'एवमेव एतत्—जीवादि यथा जिनैर्दष्टं नान्यथा इति, चः समुच्चये, एष। निषर्गरुचिरिति ज्ञातव्यः ॥

मू. (१७९) *एए चेव उ भावे उवदिट्ठे जो परेण सद्दहइ ।*
छउमत्थेण जिनेन व उवएसरुइत्ति नायव्वो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. उपदेशरुचिमाह-'एए चेव' इत्यादि, एतानेव जीवादिभावान् परेण छद्मस्थेन जिनेन वोपदिष्टान् श्रद्दधाति एष उपदेशरुचिरिति ज्ञातव्यः।

मू. (१८०) *जो हेउमयाणंतो आणाए रोयए पवयणं तु।*
एमेव नन्नहत्ति य एसो आणारुई नाम ॥

वृ. आज्ञारुचिमाह-'जो हेउमयानंतो' इत्यादि, यो हेतुं-विवक्षितार्थगमकमजानानः प्रवचनमाज्ञयैव तुशब्द एवकारार्थः केवलया रोचते, कथम्? इत्याह-एवमेतत् प्रवचनोक्तमर्थजातं नान्यथेति एष आज्ञारुचिर्नाम।

मू. (१८१) *जो सुत्तमहिज्जंतो सुएण ओगाहई उ सम्मत्तं।*
अंगेण बाहिरेण व सो सुत्तरुइत्ति नायव्वो ॥

वृ. सूत्ररुचिमाह-'जो सुत्तं' इत्यादि, यः सूत्रम्-अङ्गप्रविष्टमङ्गबाह्यं वा अधीयानस्तेन श्रुतेना- ङ्गप्रविष्टेनाङ्गबाह्येन वा सम्यकत्वमवगाहते स सूत्ररुचिरिति ज्ञातव्यः।

मू. (१८२) *एगपएनेगाइं पदाइं जो पसरई उ सम्मत्तं।*
उदएव्व तिल्लबिंदू सो बीयरुइत्ति नायव्वो ॥

वृ. बीजरुचिमाह-'एगपएनेगाइं' इत्यादि, एकेन पदेन प्रक्रमाज्जीवादीनामनेकानि पदानि प्राकृतत्वेन विभक्तिव्यत्ययादनेकेषु जीवादिषु पदेषु यः सम्यकत्वमिति धर्मधर्मिणोरभेदोपचारात् सम्यकत्ववान् आत्मा प्रसरति तुशब्दोऽवधारणारअथः प्रसरत्येव, कथम्? इत्याह-उदक इव तैलबिन्दुः, किमुक्तं भवति?-यथा उदकैकदेशगतोऽपि तैलबिन्दुः समस्तमुदकमाक्रमति तथैकदेशोत्पन्नरुचिप्यात्मा तथाविधक्षयोपशमभावादशेषेषु तत्त्वेषु रुचिमान् भवति स एवंविधो बीजरुचिरिति ज्ञातव्यः।

मू. (१८३) *सो होइ अभिगमरुई सुयनाणं जस्स अत्थओ दिट्ठं।*
इक्कारस अंगाइं पइन्नगा दिट्ठिवाओ य ॥

वृ. अधिगमरुचिमाह-'सो होइ' इत्यादि, यस्य श्रुतज्ञानमर्थतो दृष्टमेकादशाङ्गन, प्रकीर्णकमित्यत्र जातावेकवचनं, ततोऽयमर्थः-प्रकीर्णकानि उत्तराध्ययनादीनि दृष्टिवादः चशब्दागुपाङ्गानि च स भवत्यधिगमरुचिः।

मू. (१८४) *दव्वाण सव्वभावा सव्वपमाणेहिं जस्स उवलद्धा।*
सव्वाहिं नयविहीहिं वित्थाररुइत्ति नायव्वो ॥

वृ. विस्ताररुचिमाह-'दव्वाण' इत्यादि, द्रव्याणां-धर्मास्तिकायादीनामशेषाणामपि सर्वे भावाः-पर्याया यथायोगंसर्वप्रमाणैः-प्रत्यक्षादिभिः सर्वैश्च नयनिधिभिः-नैगमादिनयप्रकारैः उपलब्धाः स विस्ताररुचिरिति ज्ञातव्यः, सर्ववस्तुपर्यायप्रपञ्चावगमेन तस्या रुचेरतिनिर्मलरूपतया भावात्।

मू. (१८५) *दंसणनाणचरित्ते तवविनए सव्वसमिइगुत्तीसु।*
जो किरियाभावरुई सो खलु किरियारुई नाम ॥

वृ. क्रियारुचिमाह-'दंसण' इत्यादि, दर्शनं च ज्ञानं च चारित्रं च दर्शनज्ञानचारित्रंसमाहारो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वन्द्वः तस्मिन् तथा तपसि विनये च तथा सर्वासु समितिषु–ईर्यासमित्यादिषु सर्वासु च गुप्तिषु–मनोगुप्तिप्रभृतिषु यः क्रियाभावः स क्रियारुचिः, किमुक्तं भवति ?–यस्य भावतो दर्शनाद्याचारानुष्ठाने रुचिरस्ति स खलु क्रियारुचिर्नाम ।

मू. (१८६) *अनभिगहियकुदिट्ठी संखेवरुइत्ति होइ नायव्वो ।*
अविसारओ पवयणे अनभिग्गहिओ य सेसेसु ॥

वृ. संक्षेपरुचिमाह– 'अनभिग्गहिय' इत्यादि, नाभिगृहीता कुत्सिता ष्टिरय्येनासावनभिगृहीतकुष्टिः, अविशारदः प्रवचने जिनप्रणीते शेषेषु च कपिलादिप्रणीतेषु प्रवचनेषु अनभिगृहीतो – न विद्यते आभिमुख्येनोपादेयतया गृहीतं–ग्रहणमस्य इत्यनभिगृहीतः, पूर्वमनभिगृहीतकुष्टिरित्यनेन दर्शनान्तरपरिग्रहः प्रतिषिद्धः अनेन परदर्शनपरिज्ञानमात्रमपि निषिद्धमिति विशेषः, स इत्थंभूतः संक्षेपरुचिरिति ज्ञातव्यः ॥

मू. (१८७) *जो अत्थिकायधम्मं सुयधम्मं खलु चरित्तधम्मं च ।*
सद्दहइ जिनाभिहियं सो धम्मरुइत्ति नायव्वो ॥

वृ. धर्मरुचिमाह–'जो अत्थिकाय' इत्यादि, यः खलु जीवोऽस्तिकायानांधर्मास्ति-कायादीनां धर्मं-गत्युपष्टम्भकत्वादिरूपं स्वभावं श्रुतधर्मं चारित्रधर्मं च जिनाभिहितं श्रद्दधाति स धर्मरुचिरिति ज्ञातव्यः ॥

मू. (१८८) *परमत्थसंथवो वा सुदिट्ठपरमत्थसेवणा वावि ।*
वावन्नकुदंसणवज्जणा य सम्मत्तसद्दहणा ॥

वृ. तदेवं निसर्गाद्युपादिभेदाद् दशधा रुचिरूपं दर्शनमुक्तं, सम्प्रति यैर्लिङ्गैरिदमुत्पन्नमस्ति इति निश्चीयते तानि लिङ्गान्युपदर्शयन्नाह–'परमत्थसंथवो वा' इत्यादि, परमाश्च–तात्त्विकाश्च तेऽर्थाश्च–जीवादयस्ते परमार्थः तेषु संस्तवः–परिचयः, तात्पर्येण बहुमानपुरस्सरं जीवादिपदा- र्थावगमायाभ्यास इतियावत्, वाशब्दः समुच्चये, सुष्ठु–सम्यग्रीत्या ध्ष्टाः परमार्थाः–जीवादयो यैस्ते सुध्ष्टपरमार्थाः तेषां सेवना–पर्युपास्तिः सुध्ष्टपरमार्थसेवनं, स्त्रीत्वं प्राकृतत्वात्, वाशब्दोऽ- नुक्तसमुच्चये, यथाशक्ति तद्वैयावृत्यप्रवृत्तिश्च, अपिः समुच्चये, तथा 'वावन्नकुदंसणत्ति' दर्शनशब्दः- प्रत्येकमभिसंबध्यते, व्यापन्नं–विनष्टं दर्शनं येषां त व्यापन्नदर्शनाः–निह्नवादयः तथा कुत्सितं दर्शनं येषां ते कुदर्शनाः–शाक्यादयस्तेषां वर्जनं व्यापन्नकुदर्शनवर्जनम्, 'सम्मत्त सद्दहणा' इति सम्यकत्वश्रद्धानं, एतैः परमार्थसंस्तवादिभिः सम्यकत्वमस्तीति श्रद्धीयते इत्यर्थः ।

मू. (१८९) *निस्संकिय निक्कंखिय निव्वितिगिच्छा अमूढदिट्ठी य ।*
उववूहथिरीकरणे वच्छल्लपभावणे अट्ठ ॥

वृ. अस्य च दर्शनस्याचारा अष्टौ, ते च सम्यक् परिपालनीयाः, तदतिक्रमेण दर्शनस्याप्यतिक्रमभावात्, अतस्तानुपदर्शयितुमाह–'निस्संकिय' इत्यादि शङ्कनं शङ्कितं, देशशङ्का सर्वशङ्का चेत्यर्थः, निर्गतं शङ्कितं यस्मादसौ निःशङ्कितः, देशर्वसङ्कारहित इति भावार्थः, तत्र देशशङ्का–समाने जीवत्वे कथमेको भव्यः अपरस्त्वभव्य इति ?, सर्वशङ्का–प्राकृतनिबन्धत्वात्सकलमेवेदं प्रवचनं परिकल्पितं भविष्यतीति, न चेयं देशशङ्का सर्वशङ्का वा युक्ता, यत इह द्विविधा भावाः, तद्यथा–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेतुग्राह्या अहेतुग्राह्याश्च, तत्र हेतुग्राहाय जीवास्तित्वादयः, तत्साधकप्रमाणसद्भावात्, अहेतुग्राह्या अभव्यत्वादयः, अस्मदाद्यपेक्षया तत्साधकहेतूनामसंभवात्, प्रकृष्टज्ञानगोचरत्वात् तद्धेतूनमिति, प्राकृतोऽपि च निबन्धः प्रवचन्सय् बालाद्यनुग्रहार्थः, उक्तं च-

॥१॥ बालस्त्रीमूढमूर्खाणां, नृणां चारित्रकाङ्क्षिणाम्,
अनुग्रहार्थंतत्वज्ञैः सिद्धान्तः प्राकृतः स्मृतः ॥

"अपि च-प्राकृतोऽपि निबन्धः प्रवचनस्य दृष्टेष्टाविरोधी अतः
कथमवान्तरपरिकल्पनाशङ्का ?, सर्वज्ञमन्तरेणान्यस्य दृष्टेष्टाविरोधिवचनासंभवात्,

निःशङ्कित इति जीव एवार्हच्छासनप्रतिपन्नो दर्शनाचरणात् तत्प्राधान्यविवक्षायां दर्शनाचार उच्यते, एतेन दर्शनदर्शनिनोः कथंचिदभेदमाह, एकान्तभेदे तु अदर्शनिन इव तत्फलायोगतो मोक्षाभावप्रसङ्गः, एवमुत्तरेष्वपि त्रिषु पदेषु भावना कार्या,

तथा 'निष्काङ्क्षित' इति, काङ्क्षणं काङ्क्षितं निर्गतं काङ्क्षितं यस्मादसौ निष्काङ्क्षितः, देशसर्वकाङ्क्षरहित इत्यर्थः, तत्र देशकाङ्क्ष-एकं दिगम्बरादिदर्शनमभिकाङ्क्षते सर्वकाङ्क्ष-सर्वाण्येव दर्शनानि शोभनानीत्येवमनुचिन्तनं, इयं च द्विधाऽप्ययुक्ता, शेषदर्सनेषु षड्जीवनिकायपीडाया असत्प्ररूपणायाश्च भावात् ।

तथा विचिकित्सा-मतिविभ्रमः फलं प्रति संशय इतियावत् निर्गता विचिकित्सा यस्मादसौ निर्विचिकित्सः, 'साध्वेवं जिनशासनं, किन्तु प्रवृत्तस्य सतो ममास्मात् फलं भविष्यति न वा ?, क्रियायाः कृषिबलादिषु उभयथाऽप्युपलब्धेः' इतिविकल्परहितः, न ह्यविकल उपाय उपेयवस्तुप्रापको न भवतीति संजातनिश्चयो निर्विचिकित्स इति भावः, एतावताऽशेन निःशङ्कितात् भिन्नः, यद्वा 'निव्विदुगुंछो' इति निर्विद्वज्जुगुप्सः साधुजुगुप्सारहित इत्यर्थः, उदाहरणं च विद्वज्जुगुप्सायां श्रावकदुहिता । तथा 'अमूढदिट्ठी यत्ति' बालतपस्वितपोविद्यातिशयदर्शनैर्न मूढा-स्वभावाच्चलिता दृष्टिः-सम्यग्दर्शनरूपा यस्यासावमूढदृष्टिः, अत्रोदाहरणं सुलसाश्राविका, सा ह्यम्बडपरिव्राजकसमृद्धीरुपलभ्यापि न संभोहं गता ।

तदेवं गुणिप्रधान आचार उक्तः, सम्प्रति गुणप्रधानमाह-'उववूह' इत्यादिउपबृंहणं च स्थिरीकरणं च उपबृंहणस्थिरीकरणे, तत्रोपबृंहणं नाम समानधानर्मिकाणां सद्गुणप्रशंसनेन तद्वृद्धिकरणं, स्थिरीकरणं धर्माद् विषीदतां तत्रैव स्थापनं । वात्सल्यं च प्रभावना च वात्सल्यप्रभावने, तत्र वात्सल्यं समानधार्मिकाणां प्रीत्योपकारकरणं, प्रभावना धर्मकथादिभिस्तीर्थप्रख्यापना ।

अयं च गुणप्रधाननिर्देशो गुणगुणिनोः कथञ्चिदभेदख्यापनार्थः अन्यथा एकान्ताभेदे गुणनिवृत्तौ गुणिनोऽपि निवृत्तेः शून्यतापत्तिः । एतेऽष्टौ दर्शनाचाराः ॥

मू. (११०) *से त्तं सरागदंसणाररिया । से किं तं वीयरायदंसणा रिया ?, विहा पं०, तं०-उवसंतकसायवीय- रायदंसणा रिया य खीणकसायवीयरायदंसणा रिया य । से कं तं उवसंतकसायवीयरायदंसणा रिया ?, उवसंत० रिया दुविहा पं०, तं०-पढमसमयउवसंतकसाय- वीयरायदंसणा रियाय अपढमसमयउवसंतकसायवीयरायदंसणा रिया य, अहवा चरिमसम- यउवसंतकसायवीयरायदंसणा रियाय अचरिमसमयउवसंतकसाय- वीयरादंसणा रिया य ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं खीणकसायवीयरायदंसणा रिया ?, खीणकसायवीयरायदंसणा रिया दुविहा पं०, तं०—छउमत्थखीणकसायवीयरायदंसणा रिया ये केवलिखीणकसायवीयरायदंसणा रिया य।

से किं तं छउमत्थखीणकसायवीयरायदंसणा रिया ?, छउमत्थखीणकसायवीयरायदंसणायरिया दुविहा पं०, तं०—सयंबुद्धछउमत्थखीणकसायवीयरायदंसणारिया य बुद्धबोहियछउमत्थखीणकसायवीयरायदंसणा रिया य,

से किं तं सयंबुद्धछउमत्थखीणकसायवीयरायदंसणा रिया ?, सयंबुद्धछउमत्थखीणकसायवीयरायदंसणा रिया दुविहा पं०, तं०—पढमसमयसयंबुद्धछउमत्थखीणकसायवीयरायदंसणा रिया य अपढमसमयसयंबुद्धछउमत्थखीणकसायवीयरायदंसणारिया य, अहवा चरिमसमयसयंबुद्धछउमत्थखीणकसायवीयरायदंसणारिया य अचरिमसमयसयंबुद्धछउमत्थखीणकसायवीयरायदंसणा रियाय, से त्तं सयंबुद्धछउमत्थखीणकसायवीयरायदंसणारिया।

से किं तं बुद्धबोहियछउमत्थखीणकसायवीयरायदंसणारिया ?, बुद्धबोहियछउमत्थखीणकसायवीयरायदंसणा रिया दुविहा पं०, तं—पढमसमयुद्धबोहियखीणकसायवीयरायदंसणारिया य अपढमसमयबुद्धबोहियछउमत्थखीणंकसायवीयरायदंसणारिया य, अहवा चरिमसमयबुद्धबोहियछउमत्थखीणकसायवीयरायदंसणारिया य अचरिमसमयबुद्धबोहियछउमत्थखीणकसायवीयरायदंसणारिया य, सेत्तं बुद्धबोहियछउमत्थखीणकसायवीयरायदंसणा रिया, सेत्तं छउमत्थखीणकसायवीयरायदंसणा रिया।

से किं तं केवलिखीणकसायवीयरायदंसणा रिया ?, दुविहा पं०, तं०—सजोगिकेवलिखीणकसायवीयरायदंसणा रिया य अजोगिकेवलिखीण- कसायवीयरायदंसणा रिया य।

से किं तं सजोगिकेवलिखीणकसायवीयरायदंसणा रिया ?, सजोगिकेवलसिखीणकसायवीयरादंसणा रिया दुविहा पं०, तं०—पढमसमयजोगिकेवलिखीणकसायवीययरायदंसणा रिया य अपढमसमयजोगिकेवलिखीणकसायवीयरायदंसणारिया य, अहवा चरिमसमयजोगिकेवलिखीणकसायवीयरायदंसणारिया य अचरिमसमयजोगिकेवलिखीणकसायवीयरायदंसणारिया य। सेत्तं सजोगिकेवलिखीणकसायवीयरायदंसणारिया।

से किं तं अजोगिकेवलिखीणकसायवीयरायदंसणारिया ?, अजोगिकेवलिखीणकसायवीयरायदंसणा रिया दुविहा पं०, तं०—पढमसमयअजोगिकेवलिखीणकसायवीयरायदंसणा रिया य अपढमसमयअजोगिकेवलिखीणकसायवीयरायदंसणा रिया य, अहवा चरिमसमयजोगिकेवलिखीणकसायवीयरायदंसणारिया य अचरिमसमयअजोगिकेवलिखीणकसायवीयरायदंसणा रिया य, सेत्तं अजोगिकेवलिखीणकसायवीयरायदंसणा रिया, सेत्तं केवलिखीणकसायवीयरायदंसणारिया, सेत्तं खीणकसायवीयरायदंसणारिया, सेत्तं दंसणारिया ॥

• **वृ.** तदेवमुक्ताः सरागदर्शनभेदाः, तदभिधानाच्चाभिहिताः सरागदर्सनार्यभेदाः ॥ सम्प्रति वीतरागदर्शनार्यादिभेदानाह— (से किं तमित्यादि, तदेवं दर्शनार्यभेदानुक्त्वा चारित्रार्यभेदानाह—)

मू. (१९१) से किं तं चरित्तारिया ?, चरित्तारिया दुविहा पं०, तं०—सरागचरित्तारिया य वीयरागचरित्तारिया य, से किं तं रागचरित्तारिया ?, सरागचरित्तारिया दुविहा पं०, तं०—सुहुमसंपरायसरागचरित्ता- रिया य बायरसंपरायसरागचरित्तारिया य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं सुहुमसंपरायसरागचरित्तारिया ?, सुहुमसंपरायसरागचरित्तारिया दुविहा पं०, तं०-पढमसमयसुहुमसंपरायसरागचरित्तारिया य अपढमसमयसुहुमसंपरायसरागचरित्तारियाय, अहवा चरिमसमयसुहुमसंपरायसरागचरित्तारिया य अचरिमसमयसुहुमसंपरायसरागचरित्तारिया य, अहवा सुहुमसंपरायसरागचरित्तारिया दुविहा पं०, तं०-संकिलिस्समाणा य विसुज्झमाणा य, सेत्तं सुहुसंपरायसरागचरित्तारिया ।

से किं तं बादरसंपरायसरागचरित्तारिया ?, बादर० दुविहा पं०, तं०-पढमसमयबादर-संपरायसरागचरित्तारिया अपढमसमयबादरसंपरायसरागचरित्तारिया य, अहवा चरिमसमयबादर-संपरायसरागचरित्तारिया य अचरिमसमयबादरसंपरायसरागचरित्तारिया य, अहवा बादरसंपरायसरागचरित्तारिया दिविहा पं०, तं०-पडिवाई य अपडिवाई य, सेत्तं बादरसंपरायस-राग-गरित्तारिया, सेत्तं सरागचरित्तारिया ।

से किं तं वीयरायचरित्तारिया ?, वीयरायचरित्तारिया दुविहा पं०, तं०-उवसंतकसायवीय-रायचरित्तारिया य खीणकसायवीयरायचरित्तारिया य ।

से किं तं उवसंतकसायवीयरायचरित्तारिया ?, उवसंतकसायवीयरायचरित्तारिया दुविहा पं०, तं०-पढमसमयउवसंतकसायवीयरायचरित्तारिया य अपढमसमयउवसंतकसायवीय-रायचरित्तारिया य, अहवा चरिमसमयउवसंतकसायवीयरायचरित्तारिया य अचरिमसमयउवसंत-कसायवीयरायचरित्तारिया य, सेत्तं उवसंतकसायवीयरायचरित्तारिया ।

से किं तं खीणकसायवीयरायचरित्तारिया ?, खीणकसायवीयरायचरित्तारिया दुविहा पं०, छउमत्थखीणकसायवीयरायचरित्तारिया य केवलिखीणकसायवीयरायचरित्तारिया य ।

से किं तं छउमत्थखीणकसायवीयरायचरित्तारिया ?, छउमत्थखीणकसायवीयराय-चरित्तारिया दुविहा पं०, तं०-सयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया य बुद्धबोहिय-छउमत्थखीणकसायवीयरायचरित्तारिया य ।

से किं तं सयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया ?, सयंबुद्धछउमत्थखीण-कसायवीयरायचरित्तारिया दुविहा पं०, तं०-पढमसमयसयंबुद्धछउमत्थखीणकसायवीयराय-चरित्तारिया य अपढमसमयसयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया य, अहवा चरिमसमयसयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया य अचरिमसमयसयंबुद्धछ-उमत्थखीणकसायवीयरायचरित्तारिया य । सेत्तं सयंबुद्धखीणकसायवीयरायचरित्तारिया ।

से किं तं बुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया ?, बुद्धबोहियछउमत्थ-खीणकसायवीयरायचरित्तारिया दुविहा पं०, तं०-पढमसमयबुद्धबोहियछउमत्थखीणकसाय-वीयरायचरित्तारिया य अपढमसमयबुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया य, अहवा चरिमसमयबुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया य अचरिमसमयबुद्ध-बोहियछउमत्थखीणकसायवीयरायचरित्तारिया य, सेत्तं बुद्धबोहियछउमत्थखीणकसायवीयराय-चरित्तारिया, सेत्तं छउमत्थखीणकसायवीयरायचरित्तारिया ।

से किं तं केवलिखीणकसायवीयरायचरित्तारिया ?, दुविहा पं०, तं० सजोगिकेवलि-खीणकसायवीयरायचरित्तारिया य अजोगिकेवलिखीण- कसायवीयरायचरित्तारिया य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं सजोगकेवलिखीणकसायवीयराचरित्तारिया ?, सजोगिकेवलिखीणकसायवीयरायचरित्तारिया दुविहा पं०, तं०—पढमसमयसजोगिकेवलिखीणकसायवीयरायचरित्तारिया य अपढमसमयजोगिकेवलिखीणकसायवीयरायचरित्तारिया य, अहवा चरिमसमयसजोगिकेवलिखीणकसायवीयरायचरित्तारिया य अचरिमसमयजोगिकेवलिखीणकसायवीयरायचरित्तारिया य, सेत्तं सजोगिकेवलिखीणकसायवीयरायचरित्तारिया।

से किं तं अजोगिकेवलिखीणकसायवीयरायचरित्तारिया ?,दुविहा पं०, तं०—पढमसमयअजोगिकेवलिखीणकसायवीयराय- चरित्तारिया य अपढमसमयअजोगिकेवलिखीणकसायवीयरायचरित्तारिया य, अहवा चरिमसमय- अजोगिकेवलिखीणकसायवीयरायचरित्तारिया य अचरिमसमयअजोगिकेवलिखीण- कसायवीयरायचरित्तारिया य, सेत्तं अजोगिकेवलिखीणकसायवीयरायचरित्तारिया, सेत्तं केवलिखीणकसायवीयरायचरित्तारिया, सेत्तं खीणकसायवीयरायचरित्तारिया सेत्तं वीयरायचरित्तारिया।

अहवा चरित्तारियापंचविहा पं०, तं०—सामाइयअचरित्तारिया छेदोवट्ठावणीयचरित्तारिया परिहारविसुद्धिचरित्तारिया सुहुमसंपरायचरित्तारिया अहक्खायचरित्तारिया य।

से किं तं सामाइयचरित्तारिया ?, सामाइयचरित्तारिया दुविहा पं०, तं०— इत्तरियसामाइयचरित्तारिया य आवकहियसामाइयचरित्तारिया य, सेत्तं सामाइयचरित्तारिया।

से किं तं छेदोवट्ठावणियचरित्तारिया ?, छेदोवट्ठावणियचरित्तारिया दुविहा पं०, तं०—साइयारछेदोवट्ठावणियचरित्तारिया य निरइयारछेदोवट्ठावणियचरित्तारिया य, सेत्तं छेदोवट्ठावणियचरित्तारिया। से किं तं परिहारविसुद्धियचरित्तारिया ?, परिहारविसुद्धियचरित्तारिया दुविहा पं०, तं०—निव्विस्समाणपरिहारविसुद्धियचरित्तारिया य निव्विट्ठकाइयपरिहारविसुद्धियचरित्तारिया य, से त्तं परिहारविसुद्धियचरित्तारिया।

से किं तं सुहुमसंपरायचरित्तारिया ?, दुविहा पं०, संकिलिस्समाणसुहुमसंपरायचरित्तारिया विसुज्झमाणसुहुमसंपरायचरित्तारिया य, सेत्तं सुहुमसंपरायचरित्तारिया।

से किं तं अहक्खायचरित्तारिया ?, अहक्खायचरित्तारिया दुविहा पं०, तं०—छउत्थअहक्खायचरित्तारिया य केवलिअहक्खायचरित्तारिया य, सेत्तं अहक्खायचरित्तारिया, सेत्तं चरित्तारियं, सेत्तं अणिड्ढिपत्तारिया, सेत्तं कम्मभूमगा, सेत्तं गब्भवक्कंतिया, सेत्तं मणुस्सा।

वृ. 'से किं तं' इत्यादि सुगमं, यावद् 'अहवा चरित्तारिया पंचविहा पन्नत्ता तंजहा—सामाइयअचरित्तारिया' इत्यादि, नवरं पढमसमय० अपढमसमय०इति, ये तेषामेवोशपशान्तकषायत्वादीनां विशेषाणां प्रथमे समये वर्तन्ते ते प्रथमसमयाः ततो द्वितायादिषु समयेषु वर्तमाना अप्रथमसमयाः, तथा 'चरिमसमय० अचरिमसमय०' इति ये तेषामेवोपशान्तकषायत्वादीनां विशेषाणामन्त्यसमये वर्तन्ते ते चरमसमयः, ये ततोऽर्वागू द्विचरमत्रिचरमादिषु समयेषु वर्तन्ते ते अचरमाः।

सामायिकादिचारित्राणां स्वरूपमिदम्—समो रागद्वेषरहितत्वाद् आयो गमनं समायः एष चान्यासामपि साधुक्रियाणामुपलक्षणं, सर्वासामपि साधुक्रियाणां रागद्वेषरहितत्वात्, समायेन निर्वृत्तं समाये भवं वा सामायिकं, यद्वा समानां—ज्ञानदर्सनचारित्राणामायो—लाभः समायः समाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव सामायिकं विनयादेराकृतिगणतया "विनयादिभ्यः" इत्यनेन स्वार्थिक इकण्, तच्च सर्वसावद्यविरतिरूपं, यद्यपि च सर्वमपि चारित्रमविशेषतः सामायिकं तथाऽपि छेदादिविशेषैर्विशेष्यमाणमर्थःतशब्दान्तरतश्च नानात्वं भजते, प्रथमं पुनरविशेषणात् सामान्यशब्दएवावतिष्ठते सामायिकमिति, तच्च द्विधा-इत्वरं यावत्कथिकं च, तत्रेत्वरं भरतैरावतेषु प्कथमपश्चिमतीर्थकरतीर्थथेष्वनारोपितमहाव्रतस्य शैक्षकस्य विज्ञेयं, यावत्कथिकं प्रव्रज्याप्रत्तिपत्तिकालादारभ्याप्राणोपरमात्, तच्च भरतैरावतभाविमध्यद्वाविंशतितीर्थकरतीर्थान्तरगतानां विदेहतीर्थकरतीर्थान्तरगतानां च साधूनवामवसेयं, तेषामुपस्थापनाया अभावात्, उक्तं च-

॥१॥ "सव्वमिणं सामाइय छेयाइविसेसियं पुन विभिन्नं।
अविसेसं सामाइय चियमिह सामन्नसन्नाए॥
॥२॥ "सावज्जजोगविरइत्ति तत्थ सामाइयं दुहा तं च।
इत्तरमावकहंति य पढमं पढमंतिमजिणाणं॥
॥३॥ तित्थेसु अणारोवियवयस्स सेहस्स थोवकालीयं।
सेसाणमावकहियं तित्थेसु विदेहयाणं च॥"

ननु च इत्वरमपि सामायिकं करोमि भदन्त! सामायिकं यावज्जीवमित्येवं यादवदायुरागृहीतं, तत उपस्थापनाकाले तत्परित्यजतः कथं न प्रतिज्ञाभङ्गः?, उच्यते, ननुप्रागेवोक्तं-सर्वमेवेदं चारित्रमविशेषतः सामायिकं, सर्वत्रापि सावद्ययोगविरतिसद्भावात्, केवलं छेदादिविशुद्धिविशेषैर्विशेष्यमणमर्थतः शब्दान्तरतश्च नानात्वं भजते, ततो यथा यावत्कथिकं सामायिकं छेदोपस्थापनं च परमविशुद्धिवेशेषरूपसूक्ष्मसंपरायादिचारित्रावाप्तौ न भङ्गमास्कन्दति तथेत्वरमपि सामायिकं विशुद्धिविशेषरूपच्छेदोपस्थापनावाप्तौ, यदि हि प्रव्रज्या परित्यज्यते तर्हि तद् भङ्गमापद्यते, न तस्यैव विशुद्धिविशेषावाप्तौ, उक्तं च-

॥१॥ "उन्निक्खमओ भंगो जो पुन तं चिय करेइ सुद्धयरं।
सन्नमेत्तविसिट्ठं सुहुमंपिव तस्स को भंगो?॥

तथा छेदः पूर्वपर्यायस्य उपस्थापना च महाव्रतेषु यस्मिन् चारित्रे तच्छेदोपस्थापनं, तच्च द्विधा-सातिचारं निरतिचारं च, तत्र निरतिचारं यदित्वसामायिकतवः शैक्षकस्यारोप्यते तीर्थान्तरसंक्रान्तौ वा, यथा पारअश्वनाथतीर्थाद् वर्द्धमानतीर्थं संक्रामतः पञ्चयामप्रतिपत्तौ, सातिचारं यन्मूलगुणाधातिनः पुनर्व्रतोच्चारणं, उक्तं च-

॥१॥ "सेहस्स निरइयारं तित्थन्तरसंकमे व तं होज्जा।
मूलगुणघाइणो साइयारमुभयं च ठियकप्पे॥"

'उभयं चेति' सातिचारं निरतिचारं च 'स्थितकल्पे' इति प्रथमपश्चिमतीर्थकरतीर्थकाले।

तथा परिहरणं परिहारः-तपोविशेषः तेन विशुद्धिर्यस्मिन् चारित्रे तत्परिहारविशुद्धिकं, तच्च द्विधा-निर्विशमानकं निर्विष्टकायिकं च, तत्र निर्विशमानका विवक्षितचारित्रासेवकाः, निर्विष्टकायिका आसेवितविवक्षितचारित्रकायाः, तदव्यतिरेकाच्चारित्रमप्येवमुच्यते। इह नवको गणः-चत्वारो निर्विशमानकाश्चत्वारश्चानुचारिणः एकः कल्पस्थितो वाचनाचार्यः, यद्यपि च सर्वेऽपि श्रुतातिशयसंपन्नाः तथाऽपि कल्पत्वात् तेषामेकः कश्चित् कल्पस्थितोऽवस्थाप्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्विशमानकानां चायं परिहारः –

॥ १ ॥ "परिहारियाण उ तवो जहन्न मज्झो तहेव उक्कोसो ।
सीउण्हवासकाले भणिओ धीरेहि पत्तेयं ॥

॥ २ ॥ तत्थ जहन्नो गिम्हे चउत्थ छट्ठं तु होइ मज्झिमओ ।
अट्ठमिह उक्कोसो एत्तो सिसिरे पवक्खामि ॥

॥ ३ ॥ सिसिरे उ जहन्नाई छट्ठाई दसमचरिमगो होइ ।
वासासु अट्ठमाई बारसपज्जंतगो नेओ ॥

॥ ४ ॥ पारणगे आयामं पंचसु अगहो दोसुऽभिग्गहो भिक्खे ।
कप्पट्ठिया पइदिणं करेंति एमेव आयामं ॥

॥ ५ ॥ एवं छम्मासतवं चरिउं परिहारगा अनुचरंति ।
अनुचरगे परिहारियपयट्ठिए जाव छम्मासा ॥

॥ ६ ॥ कप्पट्ठिएवि एवं छम्मसतवं करेइ सेसा उ ।
अनुपरिहारिगभावं वयंति कप्पट्ठियत्तं च ॥

॥ ७ ॥ एवेसो अट्ठारसमासपमाणो उ वण्णिओ कप्पो ।
संखेवओ विसेसो विसेससुत्ताउ नायव्वो ॥

॥ ८ ॥ कप्पसमत्तीए तयं जिनकप्पं वा उविंति गच्छं वा ।
पडिवज्जमाणगा पुन जिनस्सगासे पवज्जंति ॥

॥ ९ ॥ तित्थयरसमीवासेवगस्स पासे व नो उअन्नस्स ।
एएसिं जं चरणं परिहारविसुद्धियं तं तु ॥

अथ एते परिहारविशुद्धिकाः कस्मिन् क्षेत्रे काले वा भवन्ति ?, उच्यते, इह क्षेत्रादिनिरूपणार्थं विंशतिद्वाराणि, तद्यथा–१ क्षेत्रद्वारं २ कलद्वारं ३ चारित्रद्वारं ४ तीर्थद्वारं ५ पर्यायद्वारं ६ आगमद्वारं ७ वेदद्वारं ८ कल्पद्वारं ९ लिङ्गद्वारं १० लेश्याद्वारं ११ ध्यानद्वारं १२ गणद्वारं १३ अभिग्रहद्वारं १४ प्रव्रज्याद्वारं १५ मुण्डापनद्वारं १६ प्रायश्चित्तविधिद्वारं १७ कारणद्वारं १८ निष्प्रतिकर्मताद्वारं १९ भिक्षाध्वारं २० बन्धद्वारम् । तत्र क्षेत्रे द्विधा मार्गणा–जन्मतः सद्भावतश्च, यत्र क्षेत्रे जातस्तत्र जन्मतः मार्गणा, यत्र च कल्पे स्थितो वर्तते तत्र सद्भावतः, उक्तं च–

॥ १ ॥ "खेत्ते दुहेह मग्गण जम्मणओ चेव संतिभावे य ।
जम्मणओ जहिं जात संतीभावो य जहि कप्पो ॥"

तत्र जन्मतः सद्भावतश्च पञ्चसु भरतेषु पञ्चस्वैरावतेषु, न तु महाविदेहेषु, न चैतेषां संहरणमस्ति, येन जिनकल्पिक इव संहरणतः सर्वासु कर्मभूमिषु वा प्राप्येरन्, उक्तं च–

"खेत्ते भरहेरवएसु होंति संहरणवज्जिया नियमा" १ ।

कालद्वारे–अवसर्पिण्यां तृतीये चतुर्थे वाऽरके जन्म, सद्भावः पञ्चमेऽपि, उत्सर्पिण्यां द्वितीये तृतीये चतुर्थे वा जन्म, सद्भावः पुनः तृतीये चतुर्थे वा, उक्तं च–

॥ १ ॥ "ओसप्पिणीए दोसुं जम्मणओ तीसु संतीभावेण ।
उस्सप्पिणि विवरीओ जम्मणओ संतिभावेण ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नोत्सर्पिण्यवसर्पिणीरूपे तु चतुर्थारकप्रतिभागकाले न संभवन्ति, महाविदेहक्षेत्रे तेषामसंभवात् २। चारित्रद्वारे-संयमस्थानद्वारेण मार्गणा, तत्र सामायिकस्य छेदोपस्थापनस्य च चारित्रस्य यानि जघन्यानि संयमस्थानानि तानि परस्परं तुल्यानि, समापरिणामत्वात्, ततोऽसंख्येयलोका- काशप्रदेशप्रमाणनि संयमस्थानान्यतिक्रम्योर्ध्वं यानि संयमस्थानानि तानि परिहारविशुद्धिक- योग्यानि, तान्यपि च केवलिप्रज्ञया परिभाव्यमानानि असंख्येयलोकाकाशप्रदेशप्रमाणानि, तानि प्रथमद्वितीयचारित्राविरोधीनि, तेष्वपि संभवात्, तत ऊध्वं यानि संख्यातीतानि संयमस्थानानि तानि सूक्ष्मसंपराययथाख्यतचारित्रयोग्यानि, उक्तं च-

॥१॥ "तुल्ला जहन्नठाणे संजमठाणाणि पढमबिइयाणं।
तत्तो असंखलोए गंतुं परिहारियट्ठाण॥
॥२॥ तेऽवि असंखा लोगा अविरुद्धा चेव पढमबिइयाणं।
उपरिंपि तउ असंखा संजमठाणा उ दोण्हंपि॥"

तत्र परिहारविशुद्धिककल्पप्रतिपत्तिः स्वकीयेष्वेव संयमस्थानेषु दर्तमानस्य भवति न शेषेषु, यदा त्वतीतनयमधिकृत्य पूर्वप्रतिपन्नो विवक्ष्यते तदा शेषेष्वपि संयमस्थानेषु भवति, परिहारविशुद्धिकल्पसमाप्तयनन्तरमन्येष्वपि चारित्रेषु संभवात्, तेष्वपि च वर्तमानस्यातीतनयमपेक्ष्य पूर्वप्रतिपन्नत्वाविरोधात्, उक्तं च-

॥१॥ "सट्ठाणे पडिवत्ती अन्नेसुवि होज्ज पुव्वपडिवन्नो।
तेसुवि वट्टंतो सो तीतनयं पप्प वुच्चति उ॥ ३।

तीर्थद्वारे परिहारविशुद्धिको नियमतस्तीर्थे प्रवर्तमाने एव सति भवति, न तच्छेदे नानुत्पत्त्यां वा तदभावे जातिस्मरणादिना, उक्तं च-

॥१॥ "तित्थत्ति नियमतोच्चतिय होइ स तित्थंमि न उण तदभावे।
विगएऽणुप्पन्ने वा जाइसरणाइएहिंतो॥ ४।

पर्यायद्वारे-पर्यायो द्विधा-गृहस्थपर्यायो यतिपर्यायश्च, एकैकोऽपि द्विधा-जघन्यत उत्कृष्टश्च, तत्र गृहस्थपर्यायो जघन्यत एकोनत्रिंशद् वर्षाणि, यतिपर्यायो विंशतिः, द्वावपि च उत्कर्षतो देशोनपूर्वकोटिप्रमाणौ, उक्तं च-

॥१॥ "एयस्स एस नेओ गिहिपज्जओ जहन्निगुणतीसा।
जइपज्जाओ वीसा दोसुवि उक्कोस देसूणा॥ ५।

आगमद्वारे-अपूर्वमागमं स नाधीते, यस्मात् तं कल्पमधिकृत्य प्रगृहीतोचितयोगाराधनत एव स कृतकृत्यतां भजते, पर्वाधीतं तु विस्रतसिकाक्षयनिमित्तं नित्यमेवैकाग्रमनाः सम्यक् प्रायेणानुस्मरति, आह च-

॥१॥ "अप्पुववं नाहिज्जइ आगममेसो पडुच्च तं कप्पं।
जमुचियपगहिअजोगाराहणओ चेव कयकिच्चो॥
॥२॥ पुव्वाहीयं तु तयं पायमनुसरइ निच्चमेवेस।
एगग्गमणो सम्मं विस्सोयसिगाइखयहेऊ॥ ६।

वेदद्वारे-प्रवृत्तिकाले वेदतः पुरुष वेदो वा भवेत् नपुंसकवेदो वा, न स्त्रीवेदः, स्त्रियाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिहारविशुद्धिकल्पप्रतिपत्त्यसंभवात्, अतीतनयमधिकृत्य पुनः पूर्वप्रतिपन्नश्चिन्त्यमानः सवेदो वा भवेत् अवेदो वा, तत्र सवेदः श्रेणिप्रतिपत्त्यभावे उपशमश्रेणिप्रतिपत्तौ वा, क्षपकश्रेणिप्रतिपत्तौ त्ववेद इति, उक्तं च–

॥१॥ "वेदो पवित्तिकाले इत्थीवज्जो उ होइ एगयरो।
पुव्वपडिववन्नगो पुण होज्ज सवेदो अवेदो वा ॥ ७।"

कल्पद्वारे–स्थितकल्पे एवायं नास्थितकल्पे, "ठियकप्पंमि य नियमा" इति वचनात्, तत्राचेलक्यादिषु दशस्वपि स्थानेषु ये स्थिताः साधवः तत्कल्पः स्थितकल्प उच्यते, ये पुनश्चतुर्षु शय्यातरपिण्डादिष्वस्थितेषु कल्पेषु स्थिताः शेषेषु चाचेलक्यादिषु षट्स्वस्तिताः तत्कल्पोऽस्थितकल्पः, उक्तं च–

॥१॥ "ठियाठियओ य कप्पो आचेलक्काइएसु ठाणेसु।
सव्वेसु ठिया पठमो चउ ठिय छसु अट्ठिया बीओ ॥"

–आचेलक्यादीनि च दश स्थानान्यमूनि–

॥१॥ "आचेलक्कुद्देसियसेज्जायररायपिंडकिइकम्मे।
वयजेट्ठपडिक्कमणे मासं पज्जोसवणकप्पो ॥"

–चत्वारश्चावस्थिताः कल्पा इमे–

॥१॥ "सेज्जायरपिडम्मी चाउज्जामे य पुरिसजेट्ठे य।
किइकम्मस्स य करणे चत्तारि अवट्ठिया कप्पा ॥ ८।"

लिङ्गद्वारे–नियमतो द्विविधेऽपि लिङ्गे भवति, तद्यथा–द्रव्यलिङ्गे भावलिङ्गे च, एकेनापि विना विवक्षितकल्पोचितसामाचार्ययोगात् ९।

लेश्याद्वारे–तेजःप्रभृतिकासूत्तरासु तिसृषु विशुद्धासु लेश्यासु परिहारविशुद्धिकं कल्पं प्रतिपद्यते, पूर्वप्रतिपन्नः पुनः सर्वास्वपि कथञ्चिद् भवति, तत्रापीतरास्वविशुद्धलेश्यासु नात्यन्तसंक्लिष्टासु वर्तते, तथाभूतासु वर्तमानो (ऽपि) न प्रभूतकालमवतिष्ठते, किंतु स्तोकं, यतः स्ववीर्यवशात् झटित्येव ताभ्यो व्यावर्तते, अथ प्रथमत एव कस्मात् प्रवर्तते ?, उच्यते, कर्मवशात्, उक्तं च–

॥१॥ "लेसासु विसुद्धासुं पडिवज्जइ तीसु न उण सेसासु।
पुव्वपडिवन्नओ पुन होज्ज सव्वासुवि कहंचि ॥

॥२॥ नऽच्चंतसंकिलिट्ठासु थेवं कालं च हंदि इयरासु।
चित्ता कम्माण गई तहा विवरीयं फलं देइ ॥" १०।

ध्यानद्वारे–धर्मध्यानेन प्रवर्धमानेन परिहारविशुद्धिकं कल्पं प्रतिपद्यते, पूर्वप्रतिपन्नः पुनरार्त्तरौद्रयोरपि भवति, केवलं प्रायेण निरनुबन्धः, आह च–

॥१॥ "झाणंमिवि धम्मेणं पडिवज्झइ सो पवड्ढमाणेणं।
इयरेसुवि झाणेसुं पुव्वपवन्नो न पडिसिद्धो ॥

॥२॥ एवं च झाणजोगे उद्दामे तिव्वकम्मपरिणामा।
रोहऽट्टेसुवि भावो इमस्स पायं निरनुबन्धो ॥" ११।

गणनाद्वारे–जघन्यतः त्रयो गणाः प्रतिपद्यन्ते, उत्कर्षतस्तु शतसंख्याः, पूर्वप्रतिपन्ना जघन्यत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्कृष्टतो वा शतशः, पुरुषगणनया जघन्यतः प्रपितद्यमानाः सप्तविंशतिः उत्कर्षतः सहस्र, पूर्वप्रतिपन्नकाः पुनर्जघन्यतः शतशः उत्कर्षतः सहस्रशः, आह च–

॥१॥ "गणओ तिन्नेव गणा जहन्न पडिवत्ति सहस उक्कोसा।
उक्कोस जहन्नेणं सयसोच्चिय पुव्वपडिवन्ना॥

॥२॥ सत्तावीस जहन्ना सहस्समुक्कोसओ य पडिवत्ती।
सयसो सहस्ससो वा पडिवन्न जहन्नउक्कोसा॥"

अन्यच्च यदा पूर्वप्रतिपन्नः कल्पमध्यादेको निर्गच्छति अन्यः प्रविशति तदोनप्रक्षेपे प्रतिपत्तौ कदाचिदेकोऽपि भवति पृथकत्वं वा पूर्वप्रतिपन्नोऽप्येवं भजनया कदाचिदेकः प्राप्यते पृथकत्वं वा, उक्तं च–

॥१॥ "पडिवज्जमाणा भयणाए होज्ज एक्कोऽवि ऊणपक्खेवे।
पुव्वपडिवन्नयावि य भइआ एक्को पुहुत्तं वा॥" १२।

अभिग्रहद्वारे–अभिग्रहाश्चतुर्विधाः, तद्यथा–द्रव्याभिग्रहः क्षेत्राभिग्रहः कालाभिग्रहः भावाभिग्रहाश्च, एते चान्यत्र चर्चिता इति न भूयश्चच्यन्ते, तत्र परिहानविशुद्धिकस्यैतेऽभिग्रहा न भवन्ति, यस्मादेतस्य कल्प एव यथोदितरूपोऽभिग्रहो वर्तते, उक्तं च –

॥१॥ "दव्वाईअभिग्गह विचित्तरूवा न होंति पुण केइ।
एअस्स जीअकप्पो कप्पोच्चियऽभिग्गहो जेणं॥

॥२॥ एयंमि गोयराई निन्या नियमेण निरववादा य।
तप्पालणं चिय परं एअस्स विसुद्धिठाणं तु॥" १३।

प्रव्रज्याद्वारे–नासावन्यं प्रव्रजयति, कल्पस्थितिरेषेतिकृत्वा, आह च– "पव्वावेइ न एसो अन्नं कप्पट्ठिइत्ति काउणं" इति, उपदेशं पुनर्यथवक्ति प्रयच्छति १४। मुण्डापनद्वारेऽपि नासावन्यं मुण्डयति, अथ प्रव्रज्यानन्तरं नियमतो मुण्डनमिति प्रव्रज्या- ग्रहणेनैव तद् गृहीतमिति किमर्थं पृथग्द्वारं ?, तयुक्तं, प्रव्रज्याद्वारे नियमतो मुण्डनस्यासंभवात्, अयोग्यस्य कथञ्चिद्दत्तायामपि प्रव्रज्यायां पुनरयोग्यतापरिज्ञाने मुण्डनायोगात्, अतः पृथगिदं द्वारमिति १५।

प्रायश्चित्तविधिदृष्टं– मनसाऽपि सूक्ष्ममप्यतिचारमापन्नस्य नियमतश्चतुर्गुरुकं प्रायश्चित्तमस्य, यत एष कल्प एकाग्रताप्रधानः, ततस्तदूभङ्गे गुरुतरो दोष इति १६।

कारणद्वारे–तथा कारणं नामालम्बनं तत्पुनः सुपरिशुद्धं ज्ञानादिकं तच्चास्य न विद्यते येन तदाश्रित्यापवादसेविता स्यात्, एष हि सर्वत्र निरपेक्षश्रः क्लिष्टकर्मक्षयनिमित्तं प्रारब्धमेव स्वं कल्पं यथाक्तविधिना समापयन् महात्मा वर्तते, उक्तं च–

॥१॥ "कारणमलंबणमो तं पुण नाणाइअं सुपरिसुद्धं।
एअस्स तं न विज्जइ उचियं तवसाहणो पायं॥

॥२॥ सव्वकत्थ निरवयक्खो आढत्तं चिय दढं समाणंतो।
वट्टइ एस महप्पाविलिचट्ठकम्मक्खयनिमित्तं॥" १७।

निष्प्रतिकर्मताद्वारे–एष महात्मा निष्प्रतिकर्मशरीरः अक्षिमलादिकमपि सदाचिन्नापनयति, न च प्राणान्तिकेऽपि समापतिते व्यसने द्वितीयं पदं सेवते, उक्तं च–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ "निप्पडिकम्मसरीरो अच्छिमलाईवि नावणेइ सया।
पाणंतिएऽविय महावसणंमि न वट्टए बीए॥
॥२॥ अप्पबहुत्तालोयणविसयातीओ उदढ एसत्ति।
अहवा सुहभावाओ बहुगं एयं चिय इमस्स॥" १८।

भिक्षाद्वारे–भिक्षा विहारक्रमश्च तृतीयस्यां पौरुष्यां भवति, शेषासु च पौरुषीषु कायोत्सर्गः, निद्राऽपि चास्याल्पा द्रष्टव्या, यदि पुनः कथमपि जङ्घाबलमस्य पक्षीणं भवति तथाऽप्येषोऽविहरन्नपि महाभागोन द्वितीयपदमापद्यते, किन्तु तत्रैव यथाकल्पमात्मीयं योगं विदधतीति, उक्तं च–

॥१॥ "तइयाए पोरसीए भिक्खाकालो विहारकालो उ।
सेसासुं उस्सग्गो पायं अप्पा य निद्दत्ति॥
॥२॥ जंघाबलंमि खीणे अविहरमाणोऽवि न परमावज्जे।
तत्थेव अहाकप्पं कुणइ उ जोगं महाभागो॥" १९।

(बन्धेऽष्टसप्त वा २०) एते च परिहारविशुद्धिका द्विविधाः, तद्यथा–इत्वरा यावत्कथिकाश्च, तत्र ये कल्पसमाप्तयनन्तरं कल्पं गच्छं वा समुपयास्यन्ति ते इत्वराः, ये पुनः कल्पसमाप्तयनन्तरमव्यवधानेन जिनकल्पं प्रतिपत्स्यन्ते ते यावत्कथिका;, उक्तं च–"इत्तरिय थेरकप्पे जिनकप्पे आवकियत्ति" अत्र स्थविरकल्पग्रहणमुपलक्षणं, स्वकल्पे चेति द्रष्टव्यं, तत्रेत्वाराणां कल्पप्रभावाद् देवमनुष्यतैर्यग्योनिकृता उपसर्गाः सद्योघातिन आतङ्का अतीवाविषह्याश्च वेदना न प्रादुष्षन्ति, यावत्कथिकानां संभवेयुरपि, ते हि जिनकल्पं प्रतिपत्यस्यमाना जिनकल्पभावमनुविदधति, जिनकल्पिकानां चोपसर्गादयः संभवन्तीति, उक्तं च– "इत्तरियाणुवसग्गा आतंका वेयणा य न हवन्ति। आवकहियाण भइआ०" इति।

तथा सूक्ष्मो लोभाशावशेषाःसंपरायः– कषायोदयो यत्र तत् सूक्ष्मसंपरायं, तच्च द्विधा-विशुध्यमानकं संक्लिश्यमानकं च, तत्र विशुध्यमानकं क्षपकश्रेणिमिपशमश्रेणिं वा समारोहतः, संक्लिश्यमानकं तूपशमश्रेणितः प्रच्यवमानस्य।

'अथाख्यत'मंति अथसब्दो यथार्थे आङ् अभिविधौ याथातथ्येनाभिविधिना वा यत्ख्यातं–कथितं अकषायं चारित्रमिति तदथाख्यातं, उक्तं च–

॥१॥ "अहसद्दो (उ) जहत्थे आङोऽभिविहीए कहियमक्खायं।
चरणमकसायमुइयं तमहक्खायं जहक्खायं॥"

'यथाख्यात'मिति द्वितीयं नाम, तस्यायमन्वर्थः–यथा सर्वस्मिन् लोके ख्यातं–प्रसिद्धं अकषायं भवति चारित्रमिति तथैव यद् तद् यथाख्यातं, तच्च द्विधा–छाद्मस्थिकं कैवलिकं च, तत्र छाद्मस्थिकमुपशान्तमोहगुणस्थानके क्षीणमोहगुणस्थानके वा कैवलिकं सयोगिकेवलिभव-मयोगिकेवलिभवं च। 'सेत्तं'इत्यादि उपसंहारकदम्बसूत्रं सुगमं।

तदेवमुक्ता मनुष्याः, सम्प्रति देवप्रतिपादनार्थमाह–

मू. (१९१) से किं तं देवा?, देवा चउव्विहा पं०, तं०–भवनवासी वाणमंतरा जोइसिआ वेमाणिआ। से किं तं भवनवासी?, भवनवासी दसविहा पं०, तं०–असुरकुमारा नागकुमारा सुवन्न- कुमारा विज्जुकुमारा अग्गिकुमारा दीवकुमारा उदहिकुमारा दिसाकुमारा वाउकुमारा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थणियकुमारा, ते समासओ दुविहा पं०, तं०—पज्ञत्तगा य अपज्ञत्तगा य, सेत्तं भवनवासी।

से किं तं वाणमंतरा?, वाणमंतरा अट्ठविहा पं०, तं०—किन्नरा किंपुरिसा महोरगा गंधव्वा जक्खा रक्खसा भूया पिसा चा, ते समासओ दुविहा पं०, तं०—पज्ञत्तगा य अपज्ञत्तया य, सेत्तं वाणमंतरा। से किं तं जोइसिया?, जोइसिया पंचविहा पं०, तं०—चंदा सूरा गहा नक्खत्ता तारा, ते समासओ दुविहा पं०, तं०—पज्ञत्तगा य अपज्ञत्तगा य, सेत्तं जोइसिया॥

से किं तं वेमाणिया?, वेमाणिआ दुविहा पं०, तं०—कप्पोवगा य कप्पाईया य, से किं तं कप्पोवगा?, कप्पोवगा बारसविहा पं०, तं०—सोहम्मा ईसाणा सणंकुमारा माहिंदा बंभलोया लंतया महासुक्का सहस्सारा आणया पाणया आरणा अच्चुया, ते समासओ दुविहा प० तं०-पज्जत्तगा य अपज्जत्तगा य, से तं कप्पोवग्गा। से किं तं कप्पाईया? दुविहा पं०, तं०—गेविज्ञगा य अनुत्तरोववाइया य, से किं तं गेविज्ञगा?, गेविज्ञगा नवविहा पं०, तं०—हिट्ठिमहिट्ठिमगेविज्ञगा हिट्ठिममज्झिमगेविज्ञगा हिट्ठिमउवरिमगेविज्ञगा मज्झिमहेट्ठिमगेविज्ञगा मज्झिममज्झिमगेविज्ञगा मज्झिमउवरिमगेविज्ञगा उवरिमहेट्ठिमगेविज्ञगा उवरिममज्झिमगेविज्ञगा उवरिमउवरिमगेविज्ञगा, ते समासओ दुविहा पं०, तं०—पज्ञत्तगा य अपज्ञत्तगा य, सेत्तं गेविज्ञगा,।

से किं तं अनुत्तरोववाइया?, अनुत्तरोववाइया पंचविहा पं०, तं०—विजया वेजयंता जयंता अपराजिता सव्वट्ठसिद्धा, ते समासओ दुविहा पं०, तं०—पज्ञत्तगा य अपज्ञत्तगा य, सेत्तं अनुत्तरोववाइआ, सेत्तं कप्पाईया, सेत्तं वेमाणिआ, सेत्तं देवा, सेत्तं पंचिंदिया, सेत्तं संसारसमावन्नजीवपन्नवणा, से त्तं जीवपन्नवणा, सेत्तं पन्न०॥ पन्नवणाए भगवईए पढमपयं सम्मत्तं।

वृ. 'से किं तं' इत्यादि, अथ के ते देवाः?, सूरिराह—देवाश्चतुर्विधाः प्रज्ञप्ताः तद्यथा—भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिकाः, तत्र भवनेषु वसन्तीत्येवंशीला भवनवासिनः, एतद् बाहुल्यतो नागकुमाराद्यपेक्षया द्रष्टव्यं, ते हि प्रायो भवनेषु वसन्ति कदाचिदावासेषु, असुरकुमारास्तु प्राचुर्येणावासेसु कदाचिद् भवनेषु, अथ भवनानामावासानां च कः प्रतिविशेषः, उच्यते, भवनानि बहिर्वृत्तान्यन्तः समचतुरस्राणि अधः पुष्करकर्णिकासंस्थानानि, आवासाः कायमानस्थानीया महामण्डपा विविधमणिरत्नप्रदीपप्रभासितसकलदिकचक्रवाला इति। अन्तरं नामावकाशः, तच्चेहाश्रयरूपं द्रष्टव्यं, विविधं भवननगरावासरूपमन्तरं येषां ते व्यन्तराः।

तत्र भवनानि रत्नप्रभायाः प्रथमे रत्नकाण्डे उपर्यधश्च प्रत्येकं योजनशतमपहाय शेषे अष्टयोजनशतप्रमाणे मध्यभागे भवन्ति, नगराण्यपि तिर्यग्लोके, तत्र तिर्यग्लोके यथा जम्बूद्वीपद्वाराधिपतेर्विजयदेवस्यान्यस्मिन् जम्बूद्वीपे द्वादशयोजनसहस्रप्रमाणा नगरी, आवासाः त्रिष्वपि लोकेषु, तत्रोद्धवलोके पण्डकवनादाविति।

अथवा विगतमन्तरं मनुष्येभ्यो येषां ते व्यन्तराः तथाहि—मनुष्यानपि चक्रवर्तिवासुदेवप्रभृतीन् भृत्यवदुपचरन्त केचिद् व्यन्तरा इति मनुष्येभ्यो विगतान्तराः, यदि वा विविधमन्तरं—शैलान्तरं कन्दरान्तरं वनान्तरं वा आश्रयरूपं येषां ते व्यन्तराः, प्राकृतत्वाच्च सूत्रे 'वाणमन्तरा' इति पाठः, यदिवा 'वानमन्तराः' इति पदसंस्कारः, तत्रेयं व्युत्पत्तिः—वनानामन्तराणि वनान्तराणि तेषुं भवाः वानमन्तराः, पृषोदरादित्वाद् उभयपदान्तरालवर्तिमकारागमः,

तथा द्योतयन्ति—प्रकाशयन्ति जगदिति ज्योतींषिविमानानि, औणादिकी शब्दव्युत्पत्तिः, तेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवा ज्योतिष्काः "अध्यात्मादिभ्यः" इति इकण्, तत "इवर्णोवर्णदोसिसुसः" इति इकण् आदेरिकारस्य लोपः, अनभिधानाच्च वृध्ध्यभावः, यदिवा द्योतयन्ति–शिरोमुकुटोपगूहिभिः प्रभामण्डलकल्पैः सूर्यादिमण्डलैः प्रकाशयन्तीति ज्योतिषो–देवाः सूर्यादयः, तथाहि–सूर्यस्य सूर्याकारं मुकुटाग्रमागे चिह्नं चन्द्रस्य चन्द्राकारं नक्षत्रस्य नक्षत्राकारं ग्रहस्य ग्रहाकारं तारकस्य तारकाकारं तैः प्रकाशयन्तीति, आह च तत्त्वार्थभाष्यकृत्–"द्योतयन्तीति ज्योतींषि–विमानानि तेषु भवा ज्योतिष्काः, यदिवा ज्योतिषो–देवाः ज्योतिष एव ज्योतिष्काः, मुकुटैः शिरोमुकुटोपगूहिभिः प्रभामण्डलैरुज्वलैः सूर्यचन्द्रग्रहनक्षत्रतारकाणां मण्डलैर्यथास्वं चिह्नैर्विराजमाना द्युतिमन्तो ज्योतिष्का भवन्ती"ति ।

तथा विविधं मान्यन्ते–उपभुज्यन्ते पुण्यवद्भिजीवैरिति विमानानि तेषु भवा वैमानिकाः

सम्प्रति एतेषामेव क्रमेण भेदानभिधित्सुराह–'से किं तं भवणवासी' इत्यादि, असुराश्च ते कुमाराश्च असुरकुमाराः, एवं नागकुमारा इत्याद्यपि भावनीयम्, अथ कस्मादेते कुमारा इति व्यपदिश्यन्ते ?, उच्यते, कुमारवच्चेष्टनात्, तथाहि–कुमारा इवैते सुकुमारा मृदुमधुरललितगतयः श्रृङ्गाराभिप्रायकृतविशिष्टविशिष्टतरोत्तररूपक्रियाः कुमारवच्चोद्धतरूपवेषभाषाभरणप्रहरणावरणयानवाहनाः कुमारवच्चोल्बणरागाः क्रीडनपराश्च ततः कुमारा इव कुमारा इति ॥

'किंनरा' इत्यादि किन्नरा दशविधाः, तद्यथा–किन्नराः किंपुरषाः किंपुरुषोत्तमाः किंनरोत्तमाः हृदयङ्गमा रूपशालिनः अनिन्दिताः मनोरमा रतिप्रिया रतिश्रेष्ठाः । किंपुरुषा दशविधाः, तद्यथा–पुरुषाः सत्पुरुषा महापुरुषाः पुरुषवृषभाः पुरुषोत्तमा अतिपुरुषा महादेवा मरुतः मेरुप्रभाः यशस्वन्तः । महोरगा दशविधाः, तद्यथा–भुजगा भोगसालिनः महाकाया अतिकायाः स्कन्धशालिनो मनोरमा महावेगा महे(हा) यक्षा मेरुकान्ता भास्वन्तः । गन्धर्वा द्वादशविधाः, हाहाः हूहूः तुम्बरवः नारदाः ऋषिवादिका भूतिवादिकाः कादम्बा महाकादम्बा रैवताः विश्वावसवः गीतरतयः गीतयशसः

यक्षास्त्रयोदशविधाः, तद्यथा–पूर्णभद्रा माणिद्रां श्वेतभद्रा हरितभद्राः सुमनोभद्रा व्यतिपातिकभद्राः सुभद्राः सर्वतोभद्रा मनुष्यपक्षा वनाधिपतयः वनाहारा रूपयक्षा यक्षोत्तमाः । राक्षसाः सप्तविधाः, तद्यथा–भीमा महाभीमा विघ्ना विनायका जलराक्षसा राक्षसराक्षसा ब्रह्मराक्षसाः भूता नवविधाः, तद्यथा–सुरूपाः प्रतिरूपा अतिरकूपा भूतोत्तमाः स्कन्दो महास्कन्दा महावेगाः प्रतिच्छन्ना आकाशगाः । पिशाचाः षोडशविधाः, तद्यथा–कूष्माण्डाः पटकाः सुजाषा आह्निकाः काला महा-कालाः चोक्षा अचोक्षाः तालपिशाचा मुखरपिशाचा अधस्तारका देहा विदेहा महादेहाः तूष्णीका वनपिशाचा इति । 'कप्पोवगा कप्पाईय'त्ति कल्पः–आचारः स चेह इन्द्रसामानिकत्रायस्त्रिंशादिव्यवहाररूपः तमुपगाः–प्राप्ताः कल्पोपगाः सौधर्मेशानादिदेवलोकनिवासिनः, यथोक्तरूपं कल्पमतीताः– अतिक्रान्ताः कल्पातीताः–अधस्तनाधस्तनग्रैवेयकादिनिवासिनः, ते हि सर्वेऽप्यहमिन्द्राः, ततो भवन्ति कल्पातीताः । कल्पोपगान् दर्शयति–'सोहम्मा ईसाणा' इत्यादि, सौधर्मदेवलोकनिवासिनः सौधर्माः ईशानदेवलोकनिवासिन ईशानाः एवं सर्वत्रापि भावनीयं, भवति च तात्स्थ्यात् तद्व्यपदेशः, यथा 'पञ्चालदेशनिवासिनः पञ्चाला इति ।'

पदं – १ – समाप्तम्

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता प्रज्ञापना उपाङ्ग सूत्रे प्रथम पदस्य मलयगिरि (आचार्येण) विरचिता टीका परिसमाप्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पदं – २ – "स्थानं"

वृ. तदेवं व्याख्यातंप्रथमपदं, सम्प्रति द्वितीयं पदमारभ्यते, तस्य चायमभिसंबन्धः–प्रथमपदे पृथ्वीकायादयः प्ररूपिताः, इह तु तेषामेव स्थानानि प्ररूप्यन्ते, तत्र चेदमादिसूत्रम्–

मू. (१९२) *कहि णं भंते ! बादरपुढवीकाइयाणं पज्जत्तगणं ठाणा प० ?, गोयमा ! सट्ठाणेणं अट्ठवीसु, तं०–रयणप्पभाए सक्करप्पभाए वालुयप्पभाए पंकप्पभाए धूमप्पभाए तमप्पभाए तमतमप्पभाए ईसीप्पब्भाराए, अहोलोए पायालेसु भवणेसु भवणपत्थडेसु निरएसु निरयावलियासु निरयत्थडेसु, उड्ढलोए कप्पेसु विमाणेसु विमाणवलियासु विमाणपत्थडेसु, तिरियलोए टंकेसु कूडेसु सेलेसु सिहरीसु पब्भारेसु विजएसु वक्खारेसु वासेसु वासहरपव्वएसु वेलासु वेइयासु दारेसु तोरणेसु दीवेसु समुद्देसु, एत्थ णे बायरपुढवीकाइयाणं पज्जत्तगाणं ठाणा प०, उववाएणं लोयस्स असंखेज्जभगे समुग्धायेणं लोयस्स, असंखेज्जभागे सट्ठाणेणं लोगस्स असंखेज्जभागे।*

कहि णं भंते ! बादरपुढवीकाइयाणं अपज्जत्तगाणं ठाणा पं० ?, गोयमा ! जत्थेव बादर-पुढवीकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता तत्थेव बादरपुढवीकाइयाणं अपज्जत्तगाणं ठाणा प०, उववाएणं सव्वलोए समुग्घाएणं सव्वलोए सट्ठाणेणं लोयस्स असंखेज्जइभागे। कहि णं भंते ! सुहुमपुढवीकाइयाणं पज्जत्तगाणं अपज्जत्तगाण य ठाणा प० ?, गोयमा ! सुहुमपुढवीकाइया जे पज्जत्तगा जे अपज्जत्तगा ते सव्वे एगविहा अविसेसा अनाणत्ता सव्वलोयपरियावन्नगा प० समणाउसो

कहि णं भंते ! बादरआउकाइयाणं पज्जत्तगाणं ठाणा प० ?, गोयमा ! सट्ठाणेणं सत्तसु घनोदहीसु सत्तसु घनोदहिवलयेसु अहोलोए पायालेसु भवणेसु भवणपत्थडेसु उड्ढलोए कप्पेसु विमाणेसु विमाणावलियासु विमाणपत्थडेसु तिरियलोए अगडेसु तलायेसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललएसु पल्ललएसु वप्पणेसु दीपेसु समुद्देसु सव्वेसु चेव जलासएसु जलट्ठाणेसु एत्थ णं बादरआउकाइयाणं पज्जत्तगाणं ठाणा पं०, उववाएणं लोयस्स असंखेज्जइभागे समुग्घायेणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे।

कहि णं भंते ! बादरआउकाइयाणं अपज्जत्तगाणं ठाणा पं० ?, गोयमा ! जत्थेव बादरआउकाइयाणं पज्जत्तगाणं ठाणा प० तत्थेव बादरआउकाइयाणं अपज्जत्तगाणं ठाणा प० उववाएणं सव्वलोए समुग्घायेणं सव्वलोए सट्ठाणेणं लोयस्स असंखेज्जइभागे।

कहि णं भंते ! सुहुमआउकाइयाणं पज्जत्तगाणं अपज्जत्तगाणं ठाणा प० ?, गोयमा ! सुहुमआउकाइया जे पज्जत्तगा जे अपज्जत्तगा ते सव्वे एगविहा अविसेसा अनाणत्ता सव्वलोयपरियावन्नगा प० समणाउसो !।

कहि णं भंते ! बायरतेउकाइयाणं पज्जत्तगाणं ठाणा प०, गोयमा ! सट्ठाणेणं अंतोमणुस्सखेत्ते अड्ढाइज्जेसु दीवसमुद्देसु निव्वाघायेणं पन्नरससु कम्मभूमीसु वाघायं पडुच्च पंचसु महाविदेहेसु एत्थ णं बादरतेउकाइयाणं पज्जत्तगाणं ठाणा प० उववाएणं लोयस्स असंखेज्जइभागे समुगघाएणं लोगस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कहि णं भंते ! बायरतेउकाइयाणं अपज्ञत्तगाणं ठाणा पं०, गोयमा ! जत्थेव बायरतेउकाइयाणं पज्ञत्तगाणं ठाणा तत्थेव बायरतेउकाइयाणं अपज्ञत्तगाणं ठाणा पं०, उववाएणं लोयस्स दोसु उड्ढकवाडेसु तिरियलोयतट्टे य समुग्धाएणं सव्वलोए सट्ठाणेणं लोयस्स असंखेज्जइभागे कहि णं भंते ! सुहुमतेउकाइयाणं पज्ञत्तगाण य अपज्ञत्तगाण य ठाणा प० ?, गोयमा ! सुहुमतेउकाइआ जे पज्ञत्तगा जे अपज्ञत्तगा ते सव्वे एगविहा अविसेसा अनाणत्ता सव्वलोयपरियावन्नगा प० समणाउसो ! ।

वृ. 'कहिं'ति कस्मिन्, णंशब्दो वाक्यालङ्कारे, भदन्तेति परमगुर्वामन्त्रणे, बादरपृथ्वीकायिकानां पर्याप्तानां स्थानानि--स्वस्थानादीनि 'प्रज्ञप्तानि ?' प्ररूपितानि, एवं गौतमस्वामिना प्रश्ने कृते भगवानाह वर्धमानस्वामी--'गोयमा ! सट्ठाणेणं' इत्याति,

ननु गौतमोऽपि भगवानुपचितकुशलमूलो गणधरः तीर्थकरभाषितमातृकापदश्रवणमात्रावाप्तप्रकृष्टश्रुतज्ञानावरणक्षयोपशमश्चतुर्दशपूर्ववित् सर्वाक्षरसन्निपातीति विवक्षितार्थप्रतिज्ञानसमन्वित एव ततः किमर्थं पृच्छति ?, न हि चतुर्दशपूर्वविदः सर्वोत्कृष्टश्रुतलब्धिसमन्वितस्य किञ्चित्प्रज्ञापनीयमविदितमस्ति, यत उक्तम्--

॥ १ ॥　　"संखाईए वि भवे साहइ जं वा परो उ पुच्छेज्जा ।
न य णं अणाइसेसी वियाणई एस छउमत्थो ॥"

सत्यमेतत्, केवलं जानन्नेव गौतमस्वामी भगवानन्यत्र विनेयेभ्यः प्रतिपाद्य तत्संप्रत्ययनिमित्तं विवक्षितमर्थं पृच्छति, यदिवा प्रायः सर्वत्र गणधरप्रश्नतीर्थकरनिर्वचनरूपं सूत्रमतो भगवानार्यश्यामोऽपि इत्थमेव सूत्रं रचयति, अथवा संभवति तस्यापि गणभृतो गौतमस्वामिनोऽनाभोगः, छद्मस्थत्वात्, उक्तं च--

॥ १ ॥　　"न हि नामानाभोगश्छद्मस्थस्येह कस्यचिद् नास्ति ।
ज्ञानावरणीयं हि ज्ञानावरणप्रकृति कर्म ॥"

ततो जातसंशयः सन् पृच्छतीति न कश्चिद् दोषः, 'गोयमा' इति लोकप्रथितमहाविशिष्टगोत्राभिधायकोऽयमामन्त्रणध्वनिः, हे गौतमगोत्रेति भावार्थः ।

'सट्ठाणेणं' इति स्वस्थानं यत्रासते बादरपृथ्नवीकायिकाः पर्याप्ताः आसीनाश्च वर्णादिविभागेनादेष्टुं शक्यन्ते तत्स्वस्थानमिति भावः, स्वस्थानग्रहणमुपपातसमुद्घातस्थाननिवृत्त्यर्थं, तेन स्वस्थानेन स्वस्थानमङ्गीकृत्येति भावः । अष्टासु पृथ्वीषु सर्वत्र बादरपृथ्वीकायिकानां पर्याप्तानां स्थानानीति योगः,ता एव अष्टौ पृथ्वीनामग्राहमाह--'तंजहा' इत्यादि रत्नप्रभायां यावदष्टम्यामीषत्प्राग्भारायाम, तथाऽधोलोके पातालेषु पातालकलशेषु--वलयामुखप्रभृतिषु भवनेषु--भवनपतिनिकायावासरूपेषु, भवन- प्रस्तटेषु--भवनभूमिकारूपेषु, इह भवनग्रहणेन भवनानामेव केवलानां ग्रहणं, भवनप्रस्तटग्रहणेन तु भवनानामपान्तरालस्यापि

तथा नरकेपु--प्रकीर्णकरूपेषु नरकावासेषु, नरकावलिकासु--आवलिकाव्यवस्थितेषु नरकावासेषु, नरकप्रस्तटेषु--नरकभूमिरूपेषु, अत्रापि नरकनरकावलिकाग्रहणेन केवला एव नरकावासाः परिगृह्यन्ते, नरकप्रस्तटग्रहणेन तु नरकापान्तरालमपि ।

ऊध्र्ध्वलोके कल्पेषु--सौधर्मिकादिकल्पेषु, अनेन द्वादशदेवलोकपरिग्रहः, विमानेषुप--

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

ग्रैवेयकसंबन्धिषु प्रकीर्णकरूपेषु, विमानावलिकासु-आवलिकाप्रविष्टेषु ग्रैवयकादिविमानेषु, विमानप्रस्तटेषु विमानभूमिकारूपेषु, अत्रापि प्रस्तटग्रहणं विमानापान्तरालभाविनामपि यथासंभवभाविनां बादरपर्याप्तपृथ्वीकायिकानां स्थानपरिग्रहार्थं, तथा तिर्यग्लोके टङ्केषु०-छिन्नटङ्केषु कूटेषु-सिद्धायतनकूटप्रभृतिषु शैलेषु-शिखरहीनपर्वतेषु शिखरिषु-शिखरयुक्तेषु पर्वतेषु प्राग्भारेषु-ईषत्कुनेषु विजयेषु-कच्छादिषु वक्षस्कारेषु-विद्युत्प्रभादिषु पर्वतेषु वर्षेषु-भरतादिषु वर्षधरेषु-हिमवदादिपर्वतेषु वेलासु-समुद्रादिपानीयरमणभूमिषु वेदिकासु-जम्बूद्वीपजगत्यादिसंबन्धिनीषु द्वारेषु-विजयादिषु तोरणेषु-द्वारादिसंबन्धिषु, किं बहुना ?, सामस्त्येन सर्वेषु द्वीपेषसर्वेषु समुद्रेषु, 'एत्थ णं' इत्यादि, अत्रैतेषु स्थानेषु बादरपृथ्वीकायिकानां पर्याप्तानां स्थानानि प्रज्ञप्तानि मया अन्यैश्च तीर्थकृद्भिः, 'उवघाएणं' इत्यादि उपपतनमुपपातः, बादरपृथ्वीकायिकानां पर्याप्तानां यदनन्तरमुक्तं स्थानं तत्प्राप्तयाभिमुख्यमिति भावः, तेनोपपातेन, उपपातमङ्गीकृत्येति भावः, लोकस्य- चतुर्दशर- ज्वात्मकस्यासंख्येये भागे, अत्रैके व्याचक्षते-ऋजुसूत्रनयो विचित्रः ततो यदा परिस्थूरऋजुसूत्रनय- दर्शनेन बादरपृथ्वीकायिकाः पर्याप्ताश्चिन्त्यन्ते तदा ये स्वस्थानप्राप्ता आहारादिपर्याप्तिपरिसमाप्तया विशिष्टविपाकतो बादरपर्याप्तपृथ्वीकायिकायुर्वेदयन्ते ते एव द्रष्टव्याः, नापान्तरालगतावपि, तदानीं विपाकायुर्वेदनासंभवात्,

स्वस्थानं च तेषां रत्नप्रभादिकं समुदितमपि लोकस्यासंख्येयभागे वर्तते, तत उपपातेनापि लोकस्यासंख्येयभागता वेदितव्या, अन्ये त्वमिदधति-पर्याप्ता हि नाम बादरपृथ्वीकायिकाः सर्वस्तोकाः, ततस्तेऽपान्तरालगतावपि परिगृह्यमाणा लोकस्यासंख्येयभागे एवेति न कश्चिद्दोषः,तथा च समुद्घातेनापि लोकस्यासंख्येयभागे एव वक्ष्यन्ते, अन्यथा समुद्घातावस्थायामपि स्वस्थानातिरेकेण क्षेत्रान्तरवर्तित्वसंभवादसंरख्येयभागवर्तिता नोपपद्यते इति, तत्त्वं पुनः केवलिनो विदन्ति विशिष्टश्रुतविदो वा। तथा 'समुग्धाएणं० इति समुद्घातेन-समुद्घातमधिकृत्य लोकस्यासंख्येयभागे, इयमत्र भावना-यदा बादरपर्याप्ताः पृथ्वीकायिकाः सोपक्रमायुषो निरुपक्रमायुषो वा त्रिभागाद्यवशेषायुषः पारभविकमायुर्बद्धा मारणान्तिकसमुद्घातेन समवहन्यन्ते तदा ते विक्षिप्तात्मप्रदेशदण्डा अपि लोकस्यासंख्येयतमे एव भागे वर्तन्ते, स्तोकत्वाद्, बादरपृथ्वीकायिकपर्याप्तायुश्चाद्याप्यक्षीणमिति पर्याप्तबादरपृथ्वीकायिका अपि लभ्यन्ते।

इह पूर्वं पृथ्व्यादिषु स्वस्थानमात्रमुक्तम्, इदानीं स्वस्थानेनानपि कियति लोकस्य भागे वर्तन्ते इति निरूपयति-'सट्ठाणेणं लोगस्स असंखिज्जे भागे' इति, स्वस्थानं रत्नप्रभादि, तच्च समुदितमपि लोकस्यासंख्येयभागवर्ति, तथाहि-रत्नप्रभा अशीतियोजनसहस्राधिकलक्षणप्रमाणपिण्डभावा, एवं शेषा अपि पृथ्व्यः स्वस्वधनभावेन वक्तव्याः पातालकलशा अपि योजनलक्षावगाहा नरकावासाः त्रिसहस्रयोजनोच्छ्रयाः विमानान्यपि द्वात्रिंशद्योजनशतबाहल्यानि ततः सर्वेषामपि परिमितभावात् समुदितानामप्यसंख्येयभागवर्तितैवेति।

बादरापर्याप्तपृथ्वीकायिकसूत्रे 'उववाएणं सव्वलोए समुग्घाएणं सव्वलोएइति, इहापर्याप्ता बादरपृथ्वीकायिका अपान्तरालगतावपि स्वस्थानेऽपि चापर्याप्तबादरपृथ्वीकायिकायुर्विशिष्टविपाकतो वेदयन्ततथा देवनैरयिकवर्जेभ्यः शेषसर्वकायेभ्यश्चोत्पद्यन्ते, उद्वृत्ता अपि च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवनैरयिकवर्जेषु शेषेषु सर्वेष्वपि स्थानेषु गच्छन्ति, ततोऽपान्तरालगतावपि वर्तमाना अमी गृह्यन्ते, अतिप्रभूताश्च स्वभावतोऽपी (तोऽमी इ) त्युपपातेन समुद्घातेन (च) सर्वलोके वर्तन्ते।

अन्ये त्वभिदधति–स्वभावत एवामी बहव इति उपपातेन समुद्घातेन च सर्वलोकव्यापिनः, तत्रोपपातः केषांचिद् ऋजुगत्या केषांचिद् वक्रगत्या। तत्र ऋजुगतिः सुप्रतीता, वक्रस्थापना चैवम्, अत्र यदैव परथमं वक्रमेके संहरन्ति तदैवापरे तद्वक्रदेशमापूरयन्ति, एवं द्वितीयवक्रदेशसंहरणेऽपि वक्रोत्पत्तावपि प्रवाहतो निरन्तरमापूरणं भावनीयम्।

'सट्ठाणेणं लोगस्स असंखेज्जइभागे' इति यथा पर्याप्तानां भावितं तथाऽपर्याप्तानामपि भावनीयम्, तन्निश्रया तेषामुत्पादभावात्।

सूक्ष्मपृथिवीकायिकपर्याप्तापर्याप्तसूत्रे 'जे पज्जत्ता अपज्जत्ता ते सव्वे एगविहा अविसेसा अनाणत्ता सवलोलयपरियावन्नगा' इति सूक्ष्मपृथिवीकायिका ये पर्याप्ता ये चापर्याप्ताः ते सर्वेप्येकविधाः–एकप्रकाराः, प्राक्कृतं स्वस्थानादिविचारमधिकृत्य भेदाभावात्, अविशेषा–विशेष-रहिताः, यथा पर्याप्तस्तथेतरेऽपीति भावः 'अनानात्वा' नानात्ववर्जिताः, देशभेदेनालक्षितनानात्वा इत्यर्थः, किमुक्तं भवति ?–एष्वाधारभूतेष्वाकाशप्रदेशेषु एके तेष्वेव इतरेऽपीति, सर्वलोकपर्यापन्नाः–सर्वलोकव्यापिनः, उपपातसमुद्घातस्वस्थानैः प्रज्ञप्ताः मया अन्यैश्च ऋषभादिभिस्तीर्थकृद्भिः, अनेन आगमस्य कथंचिद् नित्यत्वमावेदितम्, हे श्रमण! हे आयुष्मन् आमन्त्रणमिदं भगवत्प्रयुक्तं गौतमस्य।

एवमप्कायिकसूत्राण्यपि बादरसूक्ष्मविषयाणि। नवरं–पर्याप्तबादराप्कायिकसूत्रे 'सत्तसु घनोदहिवलएसुत्ति' सप्त धनोदधिवलयानि स्वस्वपृथिवीपर्यन्तवेष्टकानि वलयाकाराणि। 'अहोलोए पायालेसुत्ति' पातालकलएसुत्ति' सप्त धनोदधिवलयानि स्वस्वपृथिवीपर्यन्तवेष्टकानि वलयाकाराणि 'अहोलोए पायालेसुत्ति' पातालकलशेषु वलयामुखभृतिषु, वलयामुखप्रभृतिषु, तेष्वपि द्वितीये त्रिभागे देशतः, तृतीये त्रिभागे सर्वात्ला जलभावात्। भवनेषु कल्पेषु विमानेषु च जलं वाप्यादिषु, विमानादीनि चात्र कल्पगतानि वेदितव्यानि, ग्रैवेयकादिषु वापीनामसंभवतो जला संभवात्। अवटाः कूपाः। तडागानि प्रतीतानि। नद्यो गङ्गासिन्धुप्रभृतयः। ह्रदाः पद्मह्रदादयः। वाप्यश्चतुरस्रकाराः। ता एव वृत्ताकाराः पुष्करिण्यः, यदिवा पुष्कराणि पद्मानि विद्यन्ते यासु ताः पुष्करिण्यः। दीर्धिका ऋजुलधनुद्यः ता एव वक्रा गुंजालिका। बहूनि केवलकेवलानि पुष्पावकीर्णानमि सरांसीत्युच्यन्ते। तथा बहूनि सरांसि एकपङ्क्तया व्यवस्थितानि सरपङ्क्तिस्ता बह्वयः सरःपङ्क्तयः। तथा येषु सरःसु पङ्क्तया व्यवस्तितेषु कूपोदकं प्रणालिकया संचरति सा सरःसरः पङ्क्तः, ता बह्वयः सरःसरःपङ्क्तयः। बिलानीव बिलानि स्वभावनिष्पन्ना जगत्यादिषु कूपिकास्तेषां पङ्क्तयो बिलपङ्क्तयः। उज्झरा गिरिष्वम्भसां प्रस्रवाः। ते एव सदावस्थायिनो निर्झराः। छिल्लराणि–अखाताः स्तोकजलाश्रयभूता भूप्रदेशा गिरिप्रदेशा वा। पल्वलानि अखातानि सरांसि। वप्राः

। किं बहुना ?, सर्वेष्वेव जलाशयेषु, एतदेळ व्याचष्टे–जलस्थानेषु। शेषभावना प्राग्वत्,

अधुना बादरपर्याप्ततेजःकायिकस्थानानि पृच्छति–'कहि णं भंते! बादरतेउकाइयाणं' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–'गोयमा!' इत्यादि, गौतम! 'स्वस्थानेन' स्वस्थानमङ्गीकृत्य अन्तर्मनुष्यक्षेत्रे–मनुष्यक्षेत्रमध्ये इत्यर्थः, अर्द्ध तृतीयं येषां ते अर्द्धतृतीयाः तत्रान्तर्मनुष्यक्षेत्रस्यार्द्ध

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तृतीयं समुद्राणां न विद्यते इतीदं विशेषणं द्वीपानां द्रष्टव्यं, द्वीपाश्च समुद्रौ च द्वीपसमुद्रा स्तेषु 'निर्व्याधातेन' व्याघातस्याभावो निव्याघातं तेन निव्याधातेन ''वा तृतीयायाः'' इति पाक्षिकोऽमादेशाभावः, व्याघाताभावेनेत्यर्थः, 'पञ्चदशसु कर्मभूमिषु' पञ्चभरतपञ्चैरावतपञ्चमहाविदेहरूपासु 'व्याघातं प्रतीत्य' व्याघाते सतीति भावः पञ्चसु महाविदेहेषु, इयमत्र भावना-व्याघातो नाम अतिस्निग्धोऽतिरूक्षो वा कालः, तस्मिन् सत्यग्निव्यवच्छेदात्, ततो यदा पञ्चसु भरतेषु पञ्चस्वैरावतेषु सुषमसुषमासुषमासुषमदुष्षमा वा वर्तते तदाऽतिस्निग्धः कालः दुष्षमदुष्षमायां चातिरूक्ष इत्यस्ति व्यवच्छेदः तस्मिन् सति पञ्चसु महाविदेहेषु, शेषकालं पञ्चदशस्वपिकर्मभूमिषु,

'एत्थ णं' इत्यादि, अत्र-एतेषु स्थानेषु बादरतेजःकायिकानां स्थानानि प्रज्ञप्तानि, 'उववाएणं' इत्यादि, 'उपपातेन' यथोक्तस्थानप्राप्तयाऽऽभिमुख्येन, अपान्तरालगतावपीति भावः, चिन्त्यमाना लोकस्यासंख्येये भागे, स्तोकत्वात्, समुद्घातेनेनापि चिन्त्यमाना लोकस्यासंख्येये भागे, मारणान्तिकसमुद्घातवशतो विक्षिप्तात्मप्रदेशदण्डानामपि स्तोकतया लोकासंख्येयभागमात्रव्यापित्वात्, स्वस्थानेन लोकस्यासंख्येयभागे, मनुष्यक्षेत्रस्य पञ्चत्वारिंशदयोजनलक्षप्रमाणायामविष्कम्भतया लोकासंख्येयभागमात्रत्वात्, ।

अपर्याप्तबादरतेजःकायिकस्थानानि पृच्छति- 'कहि णं भंते !' इत्यादि प्रश्नसूत्रं गतार्थं, भगवानाह-'गोयमा !' इत्यादि, गौतम ! यत्रैव बादरतेजः-कायिकानां पर्याप्तानां स्थानानि तत्रैव बादरतेजःकायिकानामपर्याप्तानामपि स्थानानि प्रज्ञप्तानि, पर्याप्तनिश्रयैवापर्याप्तानामवस्थानात्, 'उववाएणं लोगस्स दोसु उड्ढकवाडेसु तरियलोयतट्टे य' इति, इहार्धतृतीयद्वीपसमुद्रनिः-सृते अर्द्धतृतीयद्वीपसमुद्रप्रमाणबाहल्ये पूर्वापरदिणोत्तरस्वयम्भूरमणपर्यन्ते ये कपाटे केवलिसमुद्घातकपाटवकत् ऊर्ध्वमपि लोकान्तं स्पृष्टे ते अधोऽपि च लोकान्तं स्पृष्टे ते ऊर्ध्वकपाटे तयोः ऊर्द्धकपाटयोः, तथा 'तिरियलोयतट्टे य' इति, तट्टं-स्थालं तिर्यग्लोके तट्टमिव तिर्यग्लोकतट्टं तस्मिंश्च स्वयम्भूरमणसमुद्रवेदिकापर्यन्ते अष्टादशयोजनशतबाहल्ये, समस्ततिर्यग्लोके चेत्यर्थः,

उपपातेन बादरतेजः कायिकानामपर्याप्तानां स्थानानि प्रज्ञप्तानि, केचित् 'तिरियलोयतट्टे य' इत्येवं व्याचक्षते-तयोः-कपाटयोः स्थितः तिर्यग्लोकश्चासौ तत्स्थः, तयोरूर्ध्वकपाटयोरन्तर्वर्तितिर्यग्लोक इत्यर्थः तस्मिंश्च, किमुक्तं भवति ?-द्वयोरूर्ध्वकपाटयोर्यथोक्तस्वरूपयोस्तिर्यग्लोकेऽपि च तयोरेव कपाटयोरन्तर्गते नान्यत्र, शेषतिर्यग्लोकव्यवच्छेदपरमेतद् वाक्यं, न विधानपरं, विधानस्य कपाटग्रहणेनैव सिद्धत्वात्, तत्त्वं पुनः केवलिना विशिष्टश्रुतविदा वा गम्यं,

इयमत्र भावना-इह त्रिविधा बादरपर्याप्ततेजःकायिकाः, तद्यथा एकभविका बद्धायुषोऽभिमुखनामगोत्राश्च, तत्र ये एकस्माद् विवक्षिताद् भवादनन्तरं बादरापर्याप्ततेजःकायिकत्वेनोत्पत्स्यन्ते ते एकभविकाः, ये तु पूर्वभवत्रिभागादिसमयैर्बद्धबादरापर्याप्ततेजःकायिकायुषस्ते बद्धायुषः, ये पुनर्बादरापर्याप्ततेजःकायिकानुर्नामगोत्राणि पूवभव मोचनानन्तरं साक्षाद् वेदयन्ते तेऽभिमुखनामगोत्राः, तत्रैकभविका बद्धायुषश्च द्रव्यतो बादरापर्याप्ततेजःकायिका न भावतः, तदाऽऽयुरनामगोत्रवेदनाभावात्, ततो न तैरिहाधिकारः, किन्तु अभिमुखनामगोत्रैः, तेषामेवोपपातस्य स्वस्थानप्राप्तयाभिमुख्यलक्षणस्य लभ्यमानत्वात्, तत्र यद्यपि ऋजुसूत्रनयदर्शनेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बादरापर्याप्ततेजः कायिकायुर्नामगोत्रवेदनाद् यथोक्तकपाटद्वयतिर्यग्लोकबाह्यव्यवस्थिता अपि बादरापर्याप्ततेजःकायिकव्यपदेशं लभन्ते तथाप्यत्र व्यवहारनयदरअशनाभ्युपगमाद् ये स्वस्थानसमश्रेणिकपाटद्वयव्यवस्थिताः ये च स्वस्थानानुगते तिर्यग्लोके प्रविष्टास्ते एव बादरापर्याप्ततेजः-कायिका व्यपदिश्यन्ते न शेषाः कपाटापान्तरालव्यवस्थिताः, विषमस्थानवर्तित्वात्,

तेन येऽद्यापि कपाटद्वयं न प्रविशन्ति नापि तिर्यग्लोकं ते किल पूर्वभवावस्था एवेति न गण्यन्ते, उक्तं च–

॥१॥ "पणयाललक्खपिहुला दुन्नि कवाडा य छद्दिसिं पुट्ठा।
लोगंते तेसिऽतो जे तेऊ ते उ घिप्पंति॥"

तत उक्तं–'उववाएणं दोसु उड्ढकवाडेसु तिरियलोयतट्ठे य' इति, तदेवमिदं सूत्रं व्यवहारनयप्रदर्शनेन व्याख्यातं, तथासंप्रदायात्, युक्तं चैतत् "विचित्रा सूत्राणां गतिः" इति वचनादिति

'समुग्घाएणं सव्वलोए' इति, इह द्वयोः कपाटयोर्यथोक्तस्वरूपयोर्यान्यपान्तरालानि तेषु ये सूक्ष्मपृथिवीकायिकादयो बादरापर्याप्ततेजःकायिकेषूत्पद्यमाना मारणान्तिकसमुद्घातेन समवहताः ते किलविष्कम्भबाहल्याभ्यां शरीरप्रमाणमात्रानायामत उत्कर्षतो लोकान्तं यावदात्मप्रदेशान् विक्षिपन्ति, तथा चावगाहनासंस्थानपदे वक्ष्यते–

"पुढवीकाइअस्स णं भंते! मारणंतियसमुग्घाएणं समोहयस्स तेयासरीरस्स के महालिया सरीरोगाहणा प० ?, गोयमा! सरीरपमाणमेत्तविक्खंभबाहल्लेलणं आयामेणं जहन्नेणं अंगुलस्स असंखेज्जइभागे उक्कोसेणं लोगंतो" इति, ततस्ते सूक्ष्मपृथिवीकायिकादय उत्पत्तिदेशं यावद् विक्षिप्तात्मप्रदेशदण्डा अपान्तरालगतौ वर्तमाना बादरापर्याप्ततेजःकायिकायुर्वेदनाद् लब्धबादरापर्याप्तेजःकायिकव्यपदेशाः समुद्घातगता एवापान्तराल गतौ वर्तमाना इति, समुद्घातगताश्च सकललोकमापूरयन्ति, उक्तं च–'समुद्घातेन सर्वलोके' इति, अन्ये त्वभिदधति–अतिबहवः खलु बादरा- पर्याप्ततेजःकायिकाः, एकैकपर्याप्तनिश्रया असंख्येयानामपर्याप्तानामुत्पादात्, ते च सूक्ष्मेष्वपि समुत्पद्यन्ते, सूक्ष्माश्च सर्वत्र विद्यन्ते इति, बादरापर्याप्ततेजःकायिकाः स्वस्वभवपर्यन्ते कृतमारणान्ति- कसमुद्घाताः सन्तः सकलमपि लोकमापूरयन्ति इति न कश्चिद्दोषः, अपि तु निरुपचरिततेजः कायिकसमुद्घातप्ररूपणागुणः,। स्वस्थानेन लोकस्यासंख्येये भागे इति, पर्याप्तनिश्रयाऽपर्याप्तानामुत्पादात्, पर्याप्तानां च स्थानं मनुष्यक्षेत्रं, तच्च लोकासंख्येयतमभागमात्रमिति। सूक्ष्मपर्याप्तापर्याप्ततेजःकायिकसूत्रं सूक्ष्मपर्याप्तापर्याप्तपृथिवीकायिकसूत्रवद् भाव०

मू. (१९३) *कहि णं भंते! बादरवाउकाइयाणं ठाणा प० ?, गोयमा! सट्ठाणेणं सत्तसु घनवाएसु सत्तसु घनवायवलएसु सत्तसु तनुवाएसु सत्तसु तनुवायवलयेसु अहोलोए पायालेसु भवणेसु भवणपत्थडेसु भवणछिद्देसु भवणनिक्खुडेसु निरएसु निरयावलियासु निरयपत्थडेसु निरयछिद्देसु निरयनिक्खुडेसु उड्ढलोए कप्पेसु विमाणेसु विमाणावलियासु विमाणपत्थडेसु विमाणछिद्देसु विमणनिक्खुडेसु तिरियलोए पाईणपईणदाहिणउदीण सव्वेसु चेव लोगागासछिद्देसु लोगनिक्खुडेसु य,*

एत्थ णं बादरवाउकाइआणं पज्जत्तगाणं ठाणा प०, उववाएणं लोयस्स असंखेज्जेसु भागेसु, समुग्धाएणं लोयस्स असंखेज्जेसु भागेसु, सट्ठाणेणं लोयस्स असंखेज्जेसु भागेसु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कहि णं भंते! अपज्जत्तबादरवाउकाइयाणं ठाणा प० ?, गोयमा! जत्थेव बादरवाउकाइयाणं पज्जत्तगाणं ठाणा तत्थेव बादरवाउकाइयाणं अपज्जत्तगाणं ठाणा प०, उववाएणं सव्वलोए समुग्घाएणं सव्वलोए, सट्ठाणेणं लोयस्स असंखेज्जेसु भागेसु।

कहि णं भंते ! सुहुमावाउकाइयाणं पज्जत्तगाणं अपज्जत्तगाणं ठाणा प० ?, गोयमा ! सुहुमवाउकाइया जे पज्जत्तगा जे य अपज्जत्तगा ते सव्वे एगविहा अविसेसा अनाणत्ता सव्वलोयपरियावन्नगा प० समणाउसो ! । कहि णं भंते ! बादरवणस्सइकाइयाणं पज्जत्तगाणं ठाणा प० ?, गो० सट्ठाणेणं सत्तसु घनोदहिसु सत्तसु घनोदहिवलयेसु अहोलए पायालेसु भवणेसु भवणपत्थडेसु, उड्ढलोए कप्पेसु विमाणेसु विमाणावलियासु विमाणपत्थडेसु, तिरियलोए अगडेसु तडागेसु नदीसु दहेसु बावीसु पुक्खरिणनीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलठाणेसु, एत्थ णं बादरवणस्सइकाइयाणं पज्जत्तगाणं ठाणा प०, उववाएणं सव्वलोए समुग्घाएणं सव्वलोए सट्ठाणेणं लोयस्स असंखेज्जइभागे।

कहि णं भंते ! बादरवणस्सइकाइयाणं अपज्जत्तगाणं ठाणा प० ?, गोयमा ! जत्थेव बादरणस्सइकाइयाणं पज्जत्तगाणं ठाणा तत्थेव बादरवणस्सइकाइयाणं अपज्जत्तगाणं ठाणा प०, उववाणं सव्वलोए समुग्घाएणं सव्वलोए सट्ठाणेणं लोयस्स असंखेज्जइभागे।

कहि णं भंते! सुहुमवणस्सइकाइयाणं पज्जत्तगाणं अपज्जत्तगाण य ठाणा प० ? गोयमा! सुहुमवणस्सइकाइया जे य पज्जत्तगा जे य अपज्जत्तगा ते सव्वे एगविहा अविसेसा अनाणत्ता सव्वलोयपरियावन्नगा प० समणाउसो! ॥

वृ. एवं बादरवायुकायिकवनस्पतिकायिकसूत्राण्यपि प्रत्येकं त्रीणि त्रीणि भावनीयानि, नवरं बादरपर्याप्तवायुकायिकसूत्रे भवनच्छिद्राणि-भवनानामवकाशान्तराणि भवननिष्कुटा-घवाक्षादिकल्पाः केचन भवनप्रदेशाः नरकच्छिद्राणि नरकनिष्कुटा-गवाक्षादिकल्पा नरकावासप्रदेशाः, एवं विमानच्छिद्राणि विमाननिष्तुटाश्च प्रतिपत्तव्याः, 'उववाएणं लोगस्स असंखेज्जेसु भागेसु' इत्यादि, वायवो हि पर्याप्ता अतिबहवः, यतो यत्र सुषिरं तत्र वायुः, सुषिरबहुलश्च लोक इति त्रिष्वप्युपपातादिषु लोकस्यासंख्येयेषु भागेष्वित्युक्तं।

अपर्याप्तबादरवायुकायिकसूत्रे 'उववाएणं समुग्घाएणं य सव्वलोए' इति, इह देवनारकवर्जेभ्यः शेषकायेभ्यः सर्वेभ्यो बादरापर्याप्तवायुकायेषु समुत्पद्यन्ते, बादरापर्याप्ताश्चा-पान्तरालगतावपि लभ्यन्ते, बहूनि च स्वस्थानानि बादरपर्याप्तापर्याप्तवायुकायिकानां, ततो व्यवहारनयमतेनाप्युपपातमधिकृत्य सकलसलोकव्यापिता घटते इति न काचित् क्षतिः, समुद्घातेन च सकलसलोकव्यापिता सुप्रतीतैव, सर्वेषु सूक्ष्मेषु सर्वत्र च लोके तेषां समुत्पादसंभवात्।

बादरपर्याप्तवनस्पतिकायिकसूत्रे 'उववाएणं सव्वलोए' इह पर्याप्तबादरवनस्पतिकायिकानां स्वस्थानं धनोदध्यादि, तत्र बादरनिगोदानां शैवालादीनां संभवात्, सूक्ष्मनिगोदानां भवस्थितिरन्त-र्मुहूर्तं ततस्ते बादरनिगोदेषु पर्याप्तेषु समुत्पद्यमाना बादरनिगोदपर्याप्तायुरनुभवन्तः सुविशुद्ध-ऋजुसूत्रनय-दर्शनाभ्युपगमेन लब्धबादरपर्याप्तवनस्पतिकायिकव्यपदेशा उपपातेन सकलकालं सर्वलोकं व्याप्नुवन्ति, तत उक्तम्-'उपपातेन सर्वलोके' इति। 'समुग्घाएणं सव्वलोए' इति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदा बादरनिगोदाः सूक्ष्मनिदोगेषु आयुर्द्धा पर्यन्ते मारणान्तिक- समुद्घातेन समवहता आत्मप्रदेशानुत्पत्तिदेशं यावद् विक्षिपन्ति तदा बादरनिगोदपर्याप्तयुरद्याप्य- क्षीणमिति बादरपर्याप्तनिगोदा एव समुद्घातगताश्च सकललोकव्यापिनश्चेति समुद्घातेन सर्ललोके, स्वस्थानेन लोकस्यासंख्येयतमे भागे, धनोदध्यादीनां सर्वेषामपि समुदितानांम लोकस्यासंख्येय-भागमात्रवर्तित्वात्, शेषं सुगमं ॥

मू. (१९४) *कहि णं भंते! बेइंदियाणं पज्जत्तापज्जत्तागाणं ठाणा प० ?, गोयमा! उड्ढलोए तदेक्कदेसभागे अहोलोए तदेक्कदेसभाहे तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जल्सयेसु जलठाणेसु एत्थ णं बेइंदियाणं पज्जतापज्जत्तगाणं ठाणा पं०, उववाएणं लोगस्स असंखेज्जइभागे, समुग्धाएणं लोगस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे। कहि णं भंते! तेइंदियाणं पज्जत्तापज्जत्तगाणं ठाणा प० ?, गोयमा! उड्ढलोए तदेक्कदेसभाए अहोलोए तदेक्कदेसभाए तिरियलोए अगडेसु तलाएसु नदीसु दहेसु बावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलठाणेसु एत्थ णं तेइंदियाणं पज्जत्तापज्जत्तगाणं ठाणा प० उववाएणं लोयस्स असंखेज्जइभागे समुग्धाएणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे ॥*

कहि णं भंते! चउरिंदियाणं पज्जत्ता पज्जत्तगाणं ठाणा प० ?, गोयमा! उड्ढलोए तदेक्कदेसभागे अहोलोए तदेक्कदेसभागे तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वावीसु पुकअखरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलठाणसु एत्थ णं चउरिंदियाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्धाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइबागे ॥

कहि णं भंते! पंचिंदियाणं पज्जत्तापज्जत्तगाणं ठाणा प० ?, गोयमा! उड्ढलोयस्स तदेक्कदेस-भाए अहोलोयस्स तदेक्कदेसभाए तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलठाणेसु एत्थ णं पंचिंदियाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएण लोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे ॥

वृ. एवं द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियसामान्यपञ्चेन्द्रियसूत्राण्वपि भावनीयानि, नवरं द्वीन्द्रियादयो बहवो जलसंभूताः शङ्खप्रभृतय इति सर्वेष्वपि सूत्रेषु स्थानान्यवटादीन्युक्तानि, तथा ऊध्र्ध्वलोके तदेकदेशभागे—मन्दरादिवाप्यादिषु, अधोलोके तदेकदेशे (शभागे)—अधोलौकिक-ग्रामकूपतडागादिषु, शेषमुपरयुज्य स्वयं परिभावनीयम् ॥

अधुना पर्याप्तापर्याप्तनैरयिकस्थानप्ररूपणार्थमाह—

मू. (१९५) *कहि णं भंते! नेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते! नेरइया*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिवसंति?, गोयमा! सट्ठाणेणं सत्तसु पुढवीसु, तं०-रयणप्पभाए सक्करप्पभाए वालुयप्पभाए पंकप्पभाए दूमप्पभाए तमप्पभाए तमतमप्पभाए,-

-एत्थ णं नेरइयाणं चउरासीइ निरयावाससयसहस्सा भवंतीति मक्खायं, ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववगयगहचंदसूरनक्खत्त-जोइसियपहा मेदवसापूयपडलरुहिरमांसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउयअगणिवन्नाभा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ

एत्थ णं नेरइयाणं पज्जत्तापज्जत्तगाणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे, एत्थ णं बहवे नेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकण्हा वन्नेणं प० समणाउसो

ते णं तत्थ निच्चं भीता निच्चं तत्था निच्चं तसिया निच्चं उव्विग्गा निच्चं परममसुहसंबद्धं नरगभयं पच्चनुभवमाणा विहरंति।

वृ. 'कहि णं भंते! नेरइयाणं' इत्यादि, कस्मिन् प्रदेशे भदन्त! नैरयिकानां पर्याप्तपर्याप्तानां स्थानानि प्रज्ञप्तानि?, एतदेव व्यक्तं पृच्छति यथा अन्येऽप्यवबुध्यन्ते-'कहि णं' इति कस्मिन् प्रदेशे 'णं' इति वाक्यालंकृतौ नैरयिकाः परिवसन्ति?, भगवानाह-गौतम! स्वस्थानेन सप्तसु पृथिवीषु, ता एव नामग्राहमाह-रयणप्पभाए' इत्यादि, गतार्थं, 'एत्थ णं' इत्यादि, अत्र-एतासु सप्तसु पृथिवीषु नैरयिकाणां सर्वसंख्यया चतुरशीतिर्नरकावासशतसहस्राणि भवन्ति, तथाहि-

रत्नप्रभायां त्रिंशन्नरकावासशतसहस्राणि भवन्ति, शर्कराप्रभायां पञ्चविंशतिः शतसहस्राणि, वालुकाप्रभायां पञ्चदश लक्षाः, पङ्कप्रभायां दश लक्षाः, धूमप्रभायां त्रीणि लक्षाः, तमः-प्रभायामेकं शतसहस्रं पञ्चोनं, तमस्तमःप्रभायां पञ्चेति, सर्वसंख्यया चतुरशीतिर्लक्षा नरकावासानामित्याख्यातं मया शेषैस्तीर्थकृद्भिः 'ते णं नरकावासा' इत्यादि, ते नरकावासाश्चतुरशीतिर्लक्षणप्रमाणाः

सर्वेऽपि प्रत्येकमन्तः-मध्यभागे (वृत्ता) वृत्ताकारा बहिर्भागे चतुरस्राः-चतुरस्रकाराः, इदं च पीठोपरिवर्तिनं मध्यभागमधिकृत्य प्रोच्यते, सकलपीठाद्यपेक्षया त्वावलिकाप्रविष्टा वृत्तत्र्यस्रचतुरस्रसंस्थानाः, पुष्पावकीर्णास्तु नानासंस्थानाः प्रतिपत्तव्याः, 'अहे खुरप्पसंठाण-संठिया' इति अधो-भूमीतले क्षुरप्रस्येव-प्रहरणविशेषस्य यत्संस्थानम्-आकारविशेषस्तीक्ष्ण-तालक्षणस्तेनसस्थिताः- तथाहि-तेषु नरकावासेषु भूमितले मसृणत्वाभावतः शर्करिले पादेषु न्यस्यमानेषु शर्करामात्रसंस्पर्शेऽपि क्षुरप्रेणेव पादाः कृत्यन्ते, 'निच्चंधयारतमसा' इति तमसा नित्यान्धकाराः- उद्योताभावतो यत्तमः तदिह तम उच्यते तेन तमसा नित्यं-सर्वकालमन्धकाराः, त्रापवर- कादिष्वपि तमोऽन्धकारोऽस्ति केवलं बहिः सूर्यप्रकाशे मन्दतमो भवति, नरकेषु तु तीर्थकरजन्म- दीक्षादिकालव्यतिरेकेणान्यदा सर्वकालमप्युद्योतलेशस्याप्यभावतो जात्यन्धस्येव मेघच्छन्न- कालार्धरात्र इवातीव बहलतरो वर्तते तत उक्तं-

तमसा नित्यान्धकाराः, तमश्च तत्र सदाऽवस्थितं, उद्योतकारिणामसंभवात्, तथा चाह-'ववगयगहचंदसूरनक्खत्तजोइसियपहा' व्यपगतः-परिभ्रष्टो ग्रहचन्द्रसूर्यनश्रत्ररूपाणा उपलक्षणमेतत् तारारूपाणां च ज्योतिष्काणा पन्था-मार्गो येभ्यस्ते व्यपगतग्रहचन्द्रसूर्यनक्षत्र-ज्योतिष्कपथाः, तथा 'मेयवसापूयरुधिरमांसचिक्खिल्ललित्ताणुलेवणतला' इति स्वभावसंपन्नैर्मेदोव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सापूतिरुधिरमांसैर्यश्चिक्खिल्लः–कर्दमः तेन लिप्तं–उपदिग्धमनुलेपनेन–सकृद्लिप्तस्य पुनः पुनरुपलेपनेन तलं–भूमिका येषां ते भेदोवसापूतिरुधिरमांसचिक्खिल्ललिप्तानुलेपनतलाः, अत एवाशुचयः–अपवित्रा बीभत्साः दर्सनेऽप्यतिजुगुप्सोत्पत्तेः, क्वचिद् 'वीसा' इति पाठः, तत्र विस्रा–आमगन्धिकाः परमदुरभिगन्धा मृतगवादिकडेवरेभ्योऽप्यतीवानिष्टदुरभिगन्धाः ।

'काउयअगणिवन्नाभा' इति, लोहे धम्यमाने यादृक् कपोतो बहुकृष्णारूपोऽग्नेर्वर्णः, किमुक्तं भवति ? –यादृशी बहुकृष्णवर्णभूता अग्निज्वाला विनिर्गच्छतीति तादृश्याभा–आकारो येषां ते कपोताग्निवर्णाभाः, धम्यमानलोहाग्निज्वालाकल्पा इति भावः, नारकोत्पत्तिस्थानव्यतिरेकेणान्यत्र सर्वत्राप्युष्णरुपत्वात्, एतच्च षष्ठसप्तमपृथ्वीवर्जमवसेयं, तथा च वक्ष्यति–'नवरं छट्ठसत्तमीसु णं काउअगणिवन्नाभा न भवन्ति' तथा कर्कशः–अतिदुःसहोऽसिपत्रस्येव स्पर्शो येषु ते कर्कशस्पर्शाः, अत एव 'दुरहियासा' इति, दुःखेनाध्यास्यन्ते–सह्यन्ते दुरध्यासा अशुभा दर्शनतो नरकाः, तथा गन्धरसस्पर्श- शब्दैरशुभा–अतीवासातरूपा नरकेषु वेदना,

'एत्थ णं' इत्यादि, यावत् तत्थ णं बहवे निरया परिवसन्ति' 'काला' इत्यादि, कालाः–कृष्णाः, तत्र कोऽपि निष्प्रभतया मन्दकृष्णोऽपि भवति ततस्तदाशङ्काव्यवच्छेदार्थं विशेषणान्तरमाह–कालावभासाः–कालः–कृष्णोऽवभासः–प्रभाविनिर्गमो येभ्यस्ते कालावभासाः, कृष्णप्रभापटलोपचिता इति भावः, अत एव गम्भीरलोकमहर्षाः–गम्भीरः–अतीवोत्कटो लोमहर्षो–लोमोद्धर्षो भयवशाद् येभ्यस्ते गम्भीरलोमहर्षाः, किमुक्तं भवति ? –

एवं नाम कृष्णाः कृष्णावभासायद् दर्शनमात्रेऽपि शेषनारकजन्तूनां भयसंपादनेन मात्रातिगं लोमहर्षमुत्पादयन्तीति, अत एव 'भीमाः' भयानकाः, भीमत्वादेव उत्रासनकाः–उत्रास्यन्ते शेषनारकजन्तव एभिरित्युत्रासना; उत्रासना एवोत्रासनकाः, किं बहुना ? –'वर्णेन' वर्णमधिकृत्य परमकृष्णाः, यत ऊर्ध्वंन किमपि कृष्णमस्ति भयानकं वा, बहूत्कर्षप्राप्तकृष्णवर्णाः प्रज्ञप्ता मया शैषैश्च तीर्थकरैः हे श्रमण ! हे आयुष्मन् !

'ते णं निच्चं भीया' इत्यादि, ते नैरयिकाः 'णं' इति वाक्यालङ्कारे 'नित्यं' सर्वकालं क्षेत्रस्वभावजनितमहानिबिडान्धकारदर्शनतो भीताः 'नित्यं' सर्वकालं त्रस्ताः परमाधार्मिकपरस्परोदीरितदुःखसंपातभयादग्रेऽपि त्रास(स)मुपपन्नाः 'नित्यं' सर्वकालं परमाधार्मिकैः परस्परं वा त्रासिताः–त्रासं ग्राहिताः तथा 'नित्यं' सर्वकालं यथायोगं परमदुःसहशीतोष्णवेदनानुभवतः परमाधार्मिकपरस्परोदीरितदुःखानुभवतश्चोद्विग्नाः–तद्गतवासपराङ्मुखचित्ताःएवं 'नित्यं' सर्वकालं परममशुभं–एकान्तेनाशुभं संबद्धम्–अनुबद्धं न तु जातुचिदपि मनागप्यपान्तराले व्यवच्छिन्नसंतानं 'नरकभयं' नरकदुःखं 'प्रत्यनुभवन्तः' प्रत्येकं वेदयमाना 'विहरन्ति' अवतिष्ठन्ते ।

मू. (१९६) कहि णं भंते ! रयणप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते ! रयणप्पभापुढवीनेरइआ परिवसंति ?,

गोयमा ! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरि एगं जोयणसहस्समोगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं रयणप्पभापुढवीनेरइयाणं तीसं निरयावाससयसहस्सा भवन्तीति मक्खायं,

ते णं नरगा अंतो वट्टा बाहिं चउंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववगयगह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चंदसूरनक्खत्तजोइसप्पहा मेदवसापूयपरडलरुहिरमांसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउअगणिवन्नाभा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ,

एत्थ णं रयणप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे, तत्थ णं बहवे रयणप्पभापुढवीनेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो !,

ते णं निच्चं भीता निच्चं तत्था निच्चं तसिया निच्चं उव्विग्गा निच्चं परममसुहसंबद्धं नरगभयं पच्चणुभवमाणा विहरंति। कहि णं भंते ! सक्करप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०

कहि णं भंते ! सक्करप्पभापुढवीनेरइया परिवसंति ?, गोयमा ! सक्करप्पभापुढवीए बत्तीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे तीसुत्तरे जोयणसहयसहस्से एत्थ णं सक्करप्पभापुढवीनेरइयाणं पणवीसं निरयावाससयसहस्सा हवन्तीति मक्खायं, ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववगयगहचंदसूरनक्खत्तजोइसियप्पहा मेदवसापूयपडलरुहिरमांसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउअगणिवन्नाभा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ,

एत्थ णं सक्करप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं समुग्घाएणं सट्ठाणेणं लोगस्स असंखेज्जइभागे, तत्थ णं बहवे सक्करप्पभापुढवीनेइआ परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो ! ते णं निच्चं भीता निच्चं तत्था जाव नच्चं परममसुहसंबद्धं नरगभयं पच्चनुभवमाणा विहरंति।

कहि णं भंते वालुयप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते ! वालुयप्पभापुढवीनेरइया परिवसंति ?, गोयमा ! वालुयप्पभापुढवीए अट्ठावीसुत्तरजोयणसयसहस्साबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे छव्वीसुत्तरजोयणसयसहस्से एत्थ णं वालुयप्पभापुढवीनेरइयाणं पन्नरसनरयावाससयसहस्सा भवंतीति मक्खायं, ते णं न रगा अंतो वट्टा बाहि चउरंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववग- यगहचंदसूरनक्खत्तजोइसप्पहा मेदवसापूयपडलरुहिरमंसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउअगणिवन्नाभा कक्खडफासा जाव असुभा नरगेसु वेयनओ

एत्थ णं वालुयप्पभापुढवीनेरइयाणं पज्जत्तपज्जत्ताणं ठाणा प०, उववाएणंलोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स अंसखेज्जइभागे, तत्थ णं बहवे वालुयप्पभापुढवीनेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो !, ते णं निच्चं भीता निच्चं तत्था निच्चं तसिआ निच्चं उव्विग्गा निच्चं परममसुहं संबद्धं णरगभयं पच्चणुभवमाणा विहरंति।

कहि णं भंते ! पंकप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते ! पंकप्पभापुढवीनेरइया परिवसंति ?, गो० पंकप्पभापुढवीए वीसुत्तरजोयणसयसहस्साबाहलल्लाए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवरिं एगं जोयणसहस्सं ओगाहित्ता हिट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठारसुत्तरे जोयणसयसहस्से एत्थ णं पंकप्पभापुढवीनेरइयाणं दस निरयावाससयसहस्सा भवन्तीति मक्खायंते णंनरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाण- संठिया निच्चंधयारतमसा जाव मेदवसापूयपडल- रुहिरमंस- चिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउअगणिवन्नाभा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ

एत्थ णं पंकप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा पं०, उववाएणंलोयस्स असंखेज्जइ- भागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे, तत्थ णं बहवे पंकप्पभापुढवीनेरइआ परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो! ते णं निच्चं भीया निच्चं तत्था निच्चं तसिया निच्चं परममसुहसंबद्धं नरगभयं पच्चणुभवमाणा विहरंति। कहि णं भंते! धूमप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते! धूमप्पभापुढवीनेरइआ परिवसंति ?, गोयमा! धूमप्पभापुढवीए अट्ठारसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे सोलसुत्तरजोयणसयसहस्से एत्थ णं धूमप्पभापुढवीनेरइयाणं तिन्नि निरयावा- ससयसहस्सा भवन्तीति मक्खायं,

ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववगयगह- चंदसूरनक्खत्तजोइसियपहामेदवसायपूयपडलरुहिरमंसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउअगणिवन्नाभा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ एत्थ णं धूमप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे समुग्घाएणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे,

तत्थ णं बहवे धूमप्पभापुढवीनेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो!, ते णं नरगा निच्चं भीता निच्चं तत्था निच्चं तसिया निच्चं उव्विग्गा निच्चं परममसुहसंबद्धं नरगभयं पच्चणुभवमाणा विहरंति।

कहि णं भंते! तमापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते! तमापुढवी- नेरइया परिवसंति ?, गोयमा! तमाए पुढवीए सोलसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हिट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे चउदसुत्तरजोयणसयसहस्से एत्थ णं तमप्पभापुढवीनेरइयाणं एगे पंचूणे नरगावाससयसहस्से हवन्तीति मक्खायं, ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववगयगहचंदसूरनक्खत्त- जोइसियपहा मेदवसापूयपडलरुहिरमंसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ, एत्थ णं तमापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे समुग्घाएणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे,

तत्थ णं बहवे तमप्पभापुढवीनेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो!,ते णं निच्चं भीता निच्चं परमसुहसंबद्धं नरगभयं पच्चणुभवमाणा विहरंति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कहि णं भंते ! तमतमा- पुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते ! तमतमापुढवीनेरइया परिवसंति ?, गोयमा ! तमतमाए पुढवीए अट्ठोत्तरजोयणसयसहस्सबाहल्लाए उवरिं अद्धतेवन्नं जोयणसहस्साइं ओगहित्ता हेट्ठावि अद्धतेवन्नं जोगाणसहस्साइं वज्जित्ता मज्झे तीसु जोयणसहस्ससु एत्थ णं तमतमापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं पंचदिसि पंच अनुत्तरा महइमहालया महानिरया प०, तं०-काले महाकाले रोरुए महारोरुए अपइट्ठाणे,

ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिआ निच्चंधयारतमसा ववगयगहचंदसूरनक्खत्तजोइसियपहा मेदवसायपूयपडलरुहिरमंसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ, एत्थ णं तमतमापुढवीनेरइयाणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभगे समुग्घाएणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे तत्थ णं बहवे तमतमापुढवीनेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो !,

ते णं निच्चं भीता निच्चं तत्था निच्चं तसिया निच्चं उव्विग्गा निच्चं परममसुहसंबद्धं नरगभयं पच्चणुभवमाणा विहरंति ॥

वृ. तदेवं सामान्यतो नैरयिकसूत्रं व्याख्यातं, एवं रत्नप्रभादिविषयाण्यपि सूत्राणि यथायोगं परिभावनीयानि, प्राय उक्तव्याख्यानुसारेण सुगमत्वात्, केवलं षष्ठपृथिव्यां सप्तमपृथिव्यां च नरकावासाः कपोताग्निवर्णाभा न वक्तव्याः, नारकोत्पत्तिसअथानव्यतिरेकेणान्यत्र सर्वत्रापि तेषां शीतपरिणामत्वात्, तथा चाह-"नवरं छट्ठसत्तमीसु णं काउअगणिवन्नाभा न भवन्ति"।

सम्प्रति यथोक्तपृथिवीबाहल्यपरिमाणप्रतिपादिकां संग्रहणीगाथामाह-

मू. (१९७) *आसीयं बत्तीसं अट्ठावीसं च हुंति वीसं च ।*
अट्ठारससोलसगं अट्ठुत्तरमेव हिट्ठिमिया ॥

वृ. 'आसीयं बत्तीसं' इत्यादि, आशीतं-अशीतिसहस्राधिकंशतसहस्रं रत्नप्रभाया बाहल्यं द्वात्रिंशं-द्वात्रिंशत्सहस्राधिकं शर्कराप्रभायाः 'अष्टांविंशं' अष्टावंशतिसहस्राधिकं वालुकाप्रभायाः विंशतिसहस्राधिकं पङ्कप्रभायाः अष्टादशसहस्राधिकं धूमप्रभायाः षोडशसहस्राधिकं तमःप्रभायाः अष्टोत्तरम्-अष्टसहस्राधिकं लक्षं 'हेट्टिमिया' सर्वाधस्तन्यास्तमस्तमःप्रभाया इति ।

मू. (१९८) *अट्ठुत्तरं च तीसं छव्वीसं चेव सयसहस्सं तु ।*
अट्ठछारस सोलसगं चउद्दसमहियं तु छट्ठीए ॥

मू. (१९९) *अद्धतिवन्नसहस्सा उवरिमहे वज्जिऊण तो भणियं ।*
मज्झे तिसहस्सेसुं होन्ति उ नरगा तमतमाए ॥

वृ. संप्रति उपर्यधश्चैकैकं योजनसहस्रं मुक्त्वा यावत्प्रमाणं नरकावासयोग्यं पृथिवीबाहल्यं तावत्संग्रहीतुकाम आह- 'अट्ठुत्तरं च' इत्यादिगाथाद्वयं, रत्नप्रभाया हि अशीतिसहस्राधिकं लक्षं बाहल्यपरिमाणं तस्योपरितनमेकं योजनसहस्रमेकं चाधो योजनसहस्रं वर्जयित्वा शेषं नरकावासाधारभूतं, अतो रत्नप्रभाया नरकावासयोग्यं बाहल्यपरिमाणमष्टसप्ततिसहस्राधिकं लक्षं भवति, एवं सर्वत्राप्युपयुज्य भावनीयं ।

मू. (२००) *तीसा य पन्नवीसा पन्नरस दसेव सयसहस्साइं ।*
तिन्नि य पंचूणेगं पंचेव अणुत्तरा नरगा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. साम्प्रतं नरकावाससंख्याप्रतिपादनाय संग्रहणीगाथामाह– 'तीसा य' इत्यादि, गतार्था

मू. (२०१) *कहि णं भंते ! पंचिंदियतिरिक्खजोणियाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, गोयमा ! उड्ढलोए तदेक्कदेसभाए अहोलोए तदेक्कदेसभाए तिरियलोए अगडेसु तलायेसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरे सु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलठाणेसु एत्थ णं पंचिंदियतिरिक्खजोणियाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्घाएणं सव्वलोयस्स असंखे० सट्ठाणेणं सव्वलोयस्स असंखे०*

वृ. तिर्यक्पञ्चेन्द्रियसूत्रं प्राग्वत्, नवरमूर्ध्वलोके तदेकदेशे–तिर्यक्पञ्चेन्द्रिया मत्स्यादयो मन्दराद्रिवाप्यादिषु, अधोलोके तदेकदेशे–अधोलौकिकग्रामादिष्वित्यर्थः ।

मू. (२०२) *कहि णं भंते ! मणुस्साणं पज्जत्तापज्जत्ताणं ठाणा प० ?, गोयमा ! अंतो मणुस्सखेत्ते पणयालीसाए जोयणसयसहस्सेसु अड्ढाइज्जेसु दीवसमुद्देसु पन्नरससु कम्मभूमीसु तीसाए अकम्मभूमीसु छप्पन्नाए अंतरदीवेसु एत्थ णं मणुस्साणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्धाएणं सव्वलोए, सट्ठाणेणं लोयस्स असंखेज्जइभागे ।।*

वृ. मनुष्यसूत्रमपि सुगमं, नवरं 'समुग्घाएणं सव्वलोए' इति केवलिसमुद्घातमधिकृत्य सम्प्रति भवनपतिस्थानप्रतिपादनार्थमाह–

मू. (२०३) *कहि णं भंते ! भवणवासीणं देवाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंतो ! भवणवासी देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयण-सयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं भवणवासीणं देवाणं सत्त भवणकोडीओ बावत्तरि भवणावाससयसहस्सा भवंतीति मक्खायं, ते णं भवणा बाहिं वट्टा अंतो चउरंसा अहे पुक्खरकन्नियासंठाणसंठिया उक्किन्नंतरविउलगंभीरखातफलिहा पागारट्टालयकवाडतोरण-पडिदुवारदेसभागा जंतसयग्घिमुसंढिरियारिया अउज्झा सदाजया सदागुत्ता अडयालकोट्ठगरइया अडयालकयवणमाला खेमा सिवा किंकरामरदंडोवरक्खिया लाउल्लोइयमहिया गोसीससरसर-त्तचंदनदद्दरदिन्नपंचंगुलितला उवचियचंदनकलसा चंदनघडसुकयतोरणपडिदुवारदेसभागा आसत्तोसत्तविउलवट्टवग्धारियमल्लदामकलावा पंचवन्नसरससुरभिमुक्कपुप्फपुंजोवयारकलिया–*

–कालागुरुपवरकुंदुरुक्कतुरुक्कधूवमधमधंतगंधुद्धुयाभिरामा सुगंधवरगंधिया गंधवट्टिभूया अच्छरगणसंघसंविगिन्ना दिव्वतुडियसद्दसंपणातिया सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पहा ससिरिया समिरिया सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा, एत्थ णं भवणवासिदेवाणं पज्जत्तापज्जत्ताणं ठाणा पं०, उववाएणं लोयस्स असंखेज्जइभगे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे, तत्थ णं बहवे भवणवासी देवा परिवसंति, तं०–

वृ. 'कहि णं भंते ! भवणवासीणं देवाणं' इत्यादि, 'असीउत्तरजोयणसयसहस्सबाहल्लाए' इति अशीत्युत्तरं–अशीतिसहस्राधिकयोजनशतसहस्रं बाहल्यं यस्याः सा तथा तस्याः 'सत्त भवण-कोडीओ बावत्तरि भवणावाससयसहस्सा भवन्तीति मक्खायं' इति असुरकुमाराणां हि चतुःषष्टिशत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहस्राणि भवनानां, ततः सर्वसंख्याया यथोक्तं भवनसंख्यानं भवति,

'ते णं भवणा' इत्यादि, तानि 'णं' इति वाक्यालङ्कारे, पुंस्त्वं प्राकृतत्वात्, भवनानि बहिर्वृत्तानि-वृत्ताकाराणि अन्तः समचतुरस्राणि अधस्तनभागे पुष्करकर्णिकासंस्थानसंस्थितानि कर्णिका नाम उन्नतसमचित्रबिन्दुकिनी 'उक्किन्नंतरविउलगंभीरखातफलिहा' इति उत्कीर्णमिवोत्कीर्णमतीव व्यक्तमित्यर्थः, उत्कीर्णमन्तरं यासां खातपरिखाणां ता उत्कीर्णान्तराः, किमुक्तं भवति ? -

खातानां च परिखाणां च स्पष्टवैविक्त्योन्मीलनार्थमपान्तराले महती पाली समस्तीति, खातानि च परिखाश्च खातपरिखाः उत्कीर्णान्तरा विपुला-विस्तीर्णा गम्भीरा-अलब्धमध्यभागा खातपरिखा येषा भवनाना परितस्तानि उत्कीर्णान्तरविपुलगम्भीरखातपरिखानि, खातपरिखानां चायं प्रतिविशेषः-परिखा उपरि विशाला अधः संकुचिता, खातं तु उभयत्रापि सममिति, 'पागारट्टालयकवाडतोरणपडिदुवारादेसभागा' इति, प्रतिभवनं प्राकारेषु-सालेषु अट्टालककपाटतोरणप्रतिद्वाराणि-अट्टालककपाटतोरणप्रतिद्वाररूपा देशभागा-देशविशेषा येषु तानि प्राकाराट्टालककपाटतोरणप्रतिद्वारदेशभागानि, तत्राट्टालकाः-प्राकारस्येपरि भृत्याश्रयविशेषाः कपाटानि-प्रतोलीद्वारसत्कानि, एतेन प्रतोल्यः सर्वत्र सूचिताः, अन्यथा कपाटानामसंभवात्, तोरणानि प्रतोलीद्वारेषु प्रतिद्वाराणि-स्थूलद्वारापान्तरालवर्तीनि लघुद्वाराणि,

तथा 'जंतसयग्घिमुसलमुसंढिपरिवारिया' इति यन्त्राणि-नानाप्रकाराणि शतघ्नयो-महायष्टयो महाशिला वा याः' पातिताः सत्यः पुरुषाणां शतानि घ्नन्ति मुशलानि-प्रतीतानि मुसण्ढयः-प्रहरणविशेषाः तैः परिवारितानि-समन्ततो वेष्टितानि, अत एवायोध्यानि-परैर्योद्धुमशक्यानिअयोध्यत्वादेव च 'सदाजयानि' सदा-सर्वकालं जयो येषु तानि सदाजयानि, सर्वकालं जयवन्तीत्यर्थः, तथा सदा-सर्वकालं गुप्तानि प्रहरणैः पुरुषैश्च योद्ध भिः सर्वतः-समन्ततो निरन्तरं परिवारिततया परेषामसहमानानां मनागपि प्रवेशासंभवात्, 'अडयालकोट्ठगरइया' इति अष्टचत्वारिंशद्भेदभिन्नविच्छित्तिकलिताः कोष्ठका-अपवरका रचिताः-स्वयमेव रचनां प्राप्ता येषु तानि अष्टचत्वारिंशत्कोष्ठकरचितानि, सुखादिदर्शनात् पाक्षिको निष्ठान्तस्य परनिपातः,

तथा अष्टचत्वारिशंद्भेदभिन्नविच्छित्तयः कृता वनमाला येषुतानि अष्टचत्वारिंशत्कृतवनमालानि, अन्ये त्वमिदधति-अडयालशब्दो देशीवचनत्वात् प्रशंसावाची, ततोऽयमर्थः-प्रशस्तकोष्ठकरचितानि प्रशस्तकृतवनमालानीति, तथा क्षेमाणि-परकृतोपद्रवरहितानि, शिवानि-सदामङ्गलोपेतानि, तथा किङ्कराः-किङ्करभूता येऽमरास्तैर्दण्डैः कृत्वोपरक्षितानि सर्वतः-समन्ततो रक्षितानि किङ्करामरदण्डोपरक्षितानि, 'लाउल्लोइयमहिया' इति लाइयं नाम-यद् भूमेर्गोमयादिनोपलेपनं उल्लोइयं-कुड्यानां मालस्य च सेटिकादिभिः संमृष्टीकरणं, लाउल्लोइयाभ्यां महितानि-पूजितानि लाउल्लोइयमहितानि, तथा गोशीर्षेण-गोशीर्षनामकचन्दनेन सरसरक्तचन्दनेन च दर्दरेण-बहलेन चपेटाप्रकारेण वा दत्ताः पञ्चाङ्गुलयस्तला-हस्तका येषु तानि गोशीर्षसरसरक्तचन्दनदर्दरदत्तपञ्चाङ्गुलितलानि, तथा उपचिता-निवेशिताः चन्दनकलशा-माङ्गल्यकलशा येषु तानि उपचितचन्दनकलशानि, 'चन्दनघडसुकयतोरणपडिदुवारदेसभागा' इति चन्दनघटैः-चन्दनकलशैः सुकृतानि सुष्ठुकृतानि शोभितानीति तात्पर्यार्थः यानि तोरणानि तानि चन्दनघटसुकृततोरणानि प्रतिद्वारदेशभागे येषु तानि चन्दनघटसुकृततोरणप्रतिद्वारदशभागानि तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आसत्तोसत्तविउलवट्टवग्धारियमलावा' इति आ—अवाङ्अधोभूमौ सक्त आसक्तो भूमौ लग्न इत्यर्थः ऊर्ध्वं सक्त उत्सक्तः उल्लोचकले उपरि संबद्ध इत्यर्थः विपुला—विस्तीर्णः वृत्तो—वर्तुलः 'वग्घारिय' इति प्रलम्बितो माल्यदामकलापः—पुष्पमालासमूहो येषु तान्यासक्तोत्सक्तविपुलवृत्त-प्रलम्बितमाल्यदामकलापानि, तथा पञ्चवर्णेन सुरभिणा मुक्तेन—क्षिप्तेन पुष्पपुञ्जलक्षणेन उपचारेण—पूजया कलितानिपञ्चवर्णसुरभिमुक्तपुष्पपुञ्जोपचारकलितानि,

'कालागुरुपवरकुन्दुरुक्कतुरुक्कधूवमधमधंतगन्धुद्धूयाभिरामे'इति कालागुरुः प्रसिद्धः प्रवरः—प्रदानः कुन्दुरुक्कः—चीडा तुरुष्कं—सिल्हकं कालागुरुश्च प्रवरकुन्दुरुक्कतुरुष्के च कालागुरु-प्रवरकुन्दुरुक्कतुरुष्काणि तेषां धूपस्य यो मघमघायमानो गन्ध उद्धूत—इतस्ततो विप्रसृतस्तेनाभिरा-माणि—रमणीयानि कालागुरुप्रवरकुनदुरुक्कतुरुष्कधूपमघमघायमानगन्धोद्धूताभिरामाणि, तथा शोभनो गन्धो येषां ते सुगन्धाः ते च ते वरगन्धाश्च—वासाः सुगन्धवरगन्धास्तेषां गन्धः स एष्वस्तीति सुगन्धवरगनधगन्धिकानि, "अतोऽनेकस्वरात्" इति इकप्रत्ययः, अत एव गन्धवर्तिभूतानि—सौरभ्यातिशयाद् गन्धद्रव्यगुटिकाकल्पानीति भावः, तथा अप्सरोगणानां संघः—समुदायः तेन सम्यक्—रमणीयताय विकीर्णानि—व्याप्तानि अप्सरोगणसङ्घविकीर्णानि, तथा दिव्यानां त्रुटितानाम्—आतोद्यानां वेणुवीणामृदङ्गादीनां ये शब्दास्तैः संप्रणदितानि—सम्यक्—श्रोतृमनोहारितया प्रकर्षेण सर्वकालं नदितानि—शब्दवन्ति,

'सर्वरत्नमयानि' सर्वात्मना—सामस्त्येन न त्वकदेशेन रत्नमयानि समस्तरत्नमयानि वा, अच्छानि—आकाशस्फटिकवदतिस्वच्छानि, श्लक्ष्णानि—श्लक्ष्णपुद्गलस्कन्धनिष्पन्नानि श्लक्ष्णद-लनिष्पन्नपटवत्, 'लण्हानि' मसृणानि घुण्टितपटवत्, 'घट्ठा' इति घृष्टानीव घृष्टानि खरशाणया पाषाणप्रतिमावत्, 'मट्ठा' इति, मृष्टानि, सुकुमारशाणया पाषाणप्रतिमेव,

अत एव नीरजांसि स्वाभाविकरजोरहितत्वाद् निर्मलानि आगन्तुकमलाभावात् निष्पङ्कानि—कलङ्कविकलानि कर्दमरहितानि वा 'निक्कंकडच्छाया' इति निष्कङ्कटा—निष्कवचा निरावरणा निरुपघातेति भावार्थः छाया—दीप्तिर्येषां तानि निष्कङ्कटच्छायानि, सप्रभाणि—स्वरूपतः प्रभावन्ति, समरीचीनिबहिर्विनिर्गतकिरणजलानि, सोद्योतानि—बहिव्यवस्थितवस्तुस्तोमप्रकाशनकराणि, 'प्रसादीयानि' प्रसादाय—मनःप्रसत्तये हितानि प्रसादीयानि—मनःप्रसत्तिकारीणीति भावः, तथा दर्शनीयानि—दर्शनयोग्यानि यानि पश्यतः चक्षुषी न श्रमं गच्छत इति ततापत्यार्थः 'अभिरूपा' इति अभि—सर्वेषां द्रष्टृणां मनःप्रसादानुकूलतया अभिमुखं रूपं येषां तानि अभिरूपाणि अत्यन्त-कमनीयानीत्यर्थः,अत एव 'पडिरूवा' इति प्रतिविशिष्टं रूपं येषां तानि प्रतिरूपाणि, अथवा प्रतिक्षणं नवं नवं रूपं येषां तानि प्रतिरापाणि ।

मू. (२०४) *असुरा नाग सुवन्ना विज्जू अग्गी य दीव उदही य ।*
सिपवणथणियनामा दसहा एए भवणवासी ॥

मू. (२०५) *चूडामणिमउडरयणभूसणणागफडगरुलवइरपुन्नकलसंकउप्फेसा सीहमवरगयंक- अस्सवरवद्धमाणनिज्जुत्तचित्तचिंधगता सुरूवा महड्डिया महज्जुइआ महब्बला महायसा महानुभावा महासोक्खा हारविराइअवच्छा कडगतुडियथंभियभुआ अंगदकुंडलमट्टगंड-तलकन्नपीढधारी विचित्तहत्थाभरणा विचित्तमालामउलिमउडा कल्लाणगपवरत्थपरिहिया*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्लाणगपवरमल्लाणुलेवण- धरा भासुरबोंदिपलंबवणमालधरा दिव्वेणं वन्नेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए पभाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेसाए दस दिसाओ उज्जोवेमाणा पभासेमाणा ।

ते णं तत्थ साणं साणं भवणावाससयसहस्साणं साणं साणं सामानियसाहस्सीणं साणं साणं तायत्तीसाणं साणं साणं लोगपालाणं साणं साणं अग्गमहिसीणं साणं साणं परिसाणं साणं साणं अनिआणं साणं साणं अनिआहिवईणं साणं साणं आयरक्खदेवसाहस्सीणं –

–अन्नेसिं च बहूणं भवणवासीणं देवाण य देवीण य आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणाईसरसेणावच्चं कारेमाणा पालेमाणा महताहतनट्टगीयवाइयतंतितलतालतुडिय-घणमुइंगपडुप्पवाइयरवेणं दिव्वाइं बोगबोगाइं भुंजमाणा विहरंति ।

वृ. 'एते भवणवासी' इत्यादि, एते अनन्तरोक्ता असुरकुमारादयो भवनवासिनो यथाक्रमं चूडामणिमुटुकटरत्नभूषणनियुक्तानागस्फाटादिचित्रचिह्नधराश्च, तथाहि–असुरकुमारभवन-वासिनश्च चूडामणिमुकुटरत्नाः, चूडामणिर्नाम मुकुटे रत्नं चिह्नभूतं येषां ते तथा, नागकुमारा भूषणनियुक्तनागस्फटारूपचिह्नधराः, सुवर्णकुमारा भूषणनियुक्तगरुडरूपचिह्नधराः, विद्युत्कुमारा भूषणनियुक्तवज्ररूपचिह्नधराः, वज्रं नाम शक्रस्यायुधं, अग्निकुमारा मुकुटनिक्तपूर्णकलशरूप-चिह्नधराः, द्वीपकुमारा भूषणनियुक्तसिंहरूप (चिह्न) धराः, उदधिकुमारा भूषणनियुक्तहयवररूप-चिह्नधराः दिक्कुमारा भूषणनियुक्तगजरूपचिह्नधराः, वायुकुमारा भूषणनियुक्तमकररूपचिह्नधराः, स्तनितकुमारा भूषणनियुक्तवरवर्द्धमानरूपचिह्नधराः, वर्द्धमानकं–शरावसंपुटं ।

अक्षरगमनिका त्वेवम्–भूषणेषु नागस्फटागरुडवज्राणि येषां ते भूषणनागस्फटागरुड-वज्राः, पूर्णकलशेनाङ्कित उप्फे सो–मुकुटो येषां ते पूर्णकलशाङ्कितोप्फेसाः, तथा सिंहहयवरगजा अङ्का अर्थाद् भूषणेषु येषां ते सिंहहयवरगजाङ्काः, तथा मकरवर्द्धमानके नियुक्ते–भूषणेषु नियोजिते चित्रे–आश्चर्यभूते चिह्ने गते–स्थिते येषां ते मकरवर्द्धमानकनियुक्तचित्रचिह्नगतास्ततः पूर्वपदैर्द्वन्द्वसमासः ।

पुनः सर्वे कथंभूताः ? इत्याह–'सुरूपाः' शोभनं रूपं येषां ते तथा, अत्यन्तकमनीयरूपा इत्यर्थः, तथा 'महिड्ढिया' इति महती ऋद्धिः–भवनपरिवारादिका येषां ते महर्द्धिकाः, तथा महती द्युतिः–शरीरगता आभरणगता च येषामिति महाद्युतयः, तथा महद् वलं–शारीरः प्राणो येषां ते महाबलाः, तथा महद् यशः–ख्यातिर्येषां ते महायशसः तथा महाननुभागः–सामर्थ्ये शापानुग्रहविषयं येषां ते महानुभागाः, तथा 'महेसक्खा' इति महान् ईश–ईश्वर इत्याख्या–प्रसिद्धिर्येषां ते महेशाख्याः, अथवा ईशनमीशो भावे धञ्प्रत्ययः ऐश्वर्यमित्यर्थः 'ईश ऐश्वर्ये' इति वचनात् तमीशम्–ऐश्वर्यमात्मनां ख्यान्ति–अन्तर्भूतण्यर्थतया ख्यापयन्ति प्रथयन्ति इतिईशाख्याः महान्तश्च ते ईशाख्याश्च महेशाख्याः, क्वचिद् 'महासोक्खा' इति पाठः तत्र महत् सौख्यं प्रभूतसद्वेद्योदयवशाद् येषां ते महासौख्याः, अन्ये पठन्ति–'महासक्खा' इति, तत्रायं शब्दासंस्कारो–महाश्वाक्षाः,

इयं चात्र पूर्वसूरिप्रदर्शिता व्युत्पत्तिः–आशुगमनादश्वो–मनः अक्षाणि चेत्यश्वाक्षाणि महान्त्यश्वाक्षाणि येषां ते महाश्वाक्षाः, 'हारविराइयवच्छा' इति हारैर्विराजितं वक्षो येषां ते हारविरा-जितवक्षसः, 'कडगतुडियथंभियभुया' इति कटकानि–कलाचिकाऽऽभरणानि त्रुटितानि–बाहुर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रकास्तैः स्तम्णभितौ इव स्तम्भितौ भुजौ येषां ते कटकत्रुटितस्तम्भितभुजाः, तथा अङ्गदानि-बाहुशीर्षाऽऽभरणविशेषरूपाणि कुण्डले-कर्णाभरणविशेषरूपे तथा मृष्टौ-मष्टीकृ तौ गण्डौ-कपोलौ यैस्तानि मृष्टागण्डानि, कर्णपीठानि-कर्णाभरणविशेषरूपाणि धारयन्तीत्येवंशीला अङ्गदकुण्डलमृष्टण्डकर्णपीठधारिणः, तथा विचित्राणि-नानारूपाणि हस्ताभरणानि येषां ते विचित्रहस्ताभरणाः, तथा 'विचित्तमालामउलिमउडा' विचित्रा माला-कुसुमस्रग् मौलौ-मस्तके मुकुटं च येषां ते विचित्रमालामौलिमुकुटाः,तथा कल्याणकं-कल्याणकारि प्रवरं वस्त्रं परिहितं यैस्ते कल्याकप्रवरवस्त्रपरिहिताः, सुखादिदर्शनाद् निष्ठन्तस्यात्र पाक्षिकः परनिपातः,

तथा कल्याणकं-कल्याणकारि यत् प्रवरं माल्यं-पुष्पदाम यच्चानुलेपनं तद् धरन्तीति कल्याणकप्रकारमाल्यानुलेपनधराः, तथा भास्वरा-देदीप्यमाना बोन्दिः-स्त्रीशरीरं येषां ते भास्वरबोन्दयः, तथा प्रलम्ब इति-प्रलम्बा या वनमाला ता धरन्तीति प्रलम्बवनमालाधराः 'दिव्वेणं संघयणेणं' ति शक्तिविशेषमपेक्ष्यं संहननेनेव संहननेन न तु साक्षात् संहननेन, देवानां संहननासंभवात्, संहननं हि अस्थिरचनात्मकं, न च देवानां अस्थीनि सन्ति, तथा चोक्तं जीवाभिगमे-

"देवा असंघयणी, जम्हा तेसिं नेवट्ठी नेव सिरा" इत्यादि, 'दिव्वाए इड्डीए' दिव्यया-प्रधानया ऋध्द्या-परिवारादिकया दिव्यया द्युत्या-इष्टार्थसंप्रयोगलक्षणया 'द्यु अभिगमने' इति वचनात्, दिव्यय प्रभया-भवनावासगतया, दिव्यय छायया-समुदाय शोभया, दिव्येनार्चिषा-शरीरस्थरत्नादितेजोज्वालया, दिव्येन तेजसा शरीरप्रभवेन, दिव्यया लेश्यया-देहवर्णसुन्दर तया दश दिश उद्योतयन्तः-प्रकाशयन्तः 'पभासेमाणा' शोभमानास्ते भवनवासिनो देवा 'णं' इति वाक्यालङ्कारे, तत्र स्वस्थाने 'साणं साणं' इति स्वेषां स्वेषामात्मीयात्मीयानामित्यर्थः,

'आहेवच्चं पोरेवच्चं' इत्यादि अधिपतेः कर्म आधिपत्यं रक्षा इत्यर्थः, सा च रक्षा सामान्येनाप्यारक्षकेणेव क्रियते तत आह-पुरस्य पतिः पुरपतिः तस्य कर्म पौरपत्यं सर्वेषामात्मीयनामग्रेसरत्वमिति भावः, तच्चाग्रेसरत्वं नायकत्वमन्तरेणापि स्वनायकनियुक्ततथाविधगृहचिन्तकसामान्यपुरुषस्येव भवति ततो नायकत्वप्रतिपत्त्यर्थमाह-स्वामित्वं-स्वमस्यास्तीति स्वामी तद्भावः स्वामित्वं नायकत्वमित्यर्थः, तदपि च नायकत्वं कस्यचित् पोषकत्वमन्तरेणापि भवति यथा हरिणाधिपतेर्हरिणस्य तत आह-भर्त-त्वं-पोषकत्वं, अत एव महत्तरकत्वं, तदपि महत्तरकत्वं कस्यचिदात्राविकलस्यापि भवति यथा कस्यचिद् वणिजः स्वदासवर्गं प्रति तत आह-

'आणाईसरसेणावच्चं' आज्ञाया ईश्वर आज्ञेश्वरः सेनायाः पतिः सेनापतिः आज्ञेश्वरश्चासौ सेनापतिश्च आज्ञेश्वरसेनापतिस्तस्य कर्म आज्ञेश्वरसेनापत्यं स्वस्वसैन्यं प्रत्यद्भुतमाज्ञाप्राधान्यमिति भावः, कारयन्तोऽन्यैर्नियुक्तकैः पुरुषैः पालयन्तः स्वयमेव महता रवेणेति योग;, 'अहयत्ति' आख्यानकप्रतिबद्धानि यदिवा अहतानि-अव्याहतानि नित्यानुबन्धीनीति भावः ये नाट्यगीते-नाट्यं-नृत्यं गीतं-गानं यानि च वादितानि-तन्त्रीतलतालत्रुटितानि तत्र तन्त्री-वीणा तलौ-हस्ततलौ तालः-कंसिका त्रुटुतानि-वादित्राणि तथा यश्ट धनमृदङ्गः पटुना पुरुषेणप्रवादितः, तत्र घनमृदङ्दगो नाम घनसमानध्वनिर्यो मृदङ्गः,

तत एतेषां द्वन्द्वः, तेषां रवेण दिव्यान्-दिवि भवान् प्रधानिति भाव;, भोगार्हाः भोगाः-शब्दादयो भोगभोगास्तान् भुञ्जमाना 'विहरन्ति' आसते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२०५-वर्तते)) कहि णं भंते ! असुरकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते ! असुरकुमारा देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरि एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं असुरकुमाराणं देवाणं चउसट्ठिं भवणावाससयसहस्सा भवंतीति मक्खायं । ते णं भवणा बाहिं वट्टा अंतो चउरंसा अहे पुक्खरकन्नियासंठाणसंठिया उक्किन्नंतरविउलगंभीरखायफलिहा पागारट्टालयकवाडतोरणपडिदुवारदेसभागा जंतयसयग्घिमुसलमुसंढिपरियारिया अउज्झा सदाजया सदागुत्ता अडयालकोट्ठगरइया अडयालकयवणमाला खेमा सिवा किंकरामरदंडोवरक्खिया लाउल्लोइयमहिया गोसीससरसरत्तचंदणदद्दरदिन्नपंचंगुलितला उवचितचंदनकलसा चंदनघडसुकयतोरणपडिदुवारदेसभागा आसत्तोसत्तविउलवट्टवग्घारिय- मल्लदामकलावा पंचवन्नसरसुरभिमुक्कपुप्फपुंजोवयारकलिया --

--कालागुरुपवरकुंदुरुक्कतुरुक्कडज्झंतधूवमधमधंतगंधुद्धुयाभिरामा सुगंधवरगंधिया गंधवट्टिभूया अच्छरगणसंघसंविगिन्ना दिव्वतुडियसद्दसंपणादिया सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा सस्सिरीया समिरीया सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा एत्थ णं असुरकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता,

उववाएणं लोयस्स असंखेज्जइभागे, समुग्धायेणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे, तत्थ णं बहवे असुरकुमारा देवा परिवसंति, काला लोहियक्खबिंबोट्ठा धवलपुप्फदंता असियकेसा वामे एगकुंडलधरा अद्दचंदनानुलित्तगत्ता ईसीसिलिंधपुप्फपगासाइं असंकिलिट्ठाइं सुहुमाइं वत्थाइं पवरपरिहिया वयं च पढमं समइक्कंता बिइयं च वयं असंपत्ता भद्दे जोव्वणे वट्टमाणा तलभंगयतुडियपवरभूसणनिम्मलमणिरयणमंडितभुया दसमुद्दामंडियग्गहतअथा चूडामणिविचित्तचिंधगया सुरूवा महिड्ढिया महज्जुइया जाव महासोक्खा हारविराइयवच्छा कडयतुडियथंभियभुया अंगयकुंडलमट्ठगंडयलकन्नपीढधारी विचित्तहत्थाभरणा विचित्तमालामउली कल्लाणगपवरवतअथपरिहिया कल्लाणगमल्लाणुलेवणधरा भासुरबोंदी पलंबवणमालधरा ।--

--दिव्वेणं वन्नेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए पभाए दिव्वाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेसाए दस दिसाओ उज्जोवेमाणा पभासेमाणा ते णं तत्थ साणं साणं भवणावाससयसहस्साणं साणं साणं सामानियसाहस्सीणं साणं साणं तायत्तीसाणं साणं साणं लोगपालाणं साणं साणं अग्गमहिसीणं साणं साणं परिसाणं साणं साणं अनियाणं साणं साणं अनियाहिवईणं साणं साणं आयरकक्खदेवसाहस्सीणं अन्नेसिं च बहूणं भवणवासीणं देवाण य देवीण य आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणाईसरसेणावच्चं रकारेमाणा पालेमाणा महताहतनट्टगीतवाइयतंतीतलतालतुडियघणमुइंगपडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति ॥

चमरबलिणो इत्थ दुवे असुरकुमारिंदा असुरकुमाररायणो परिवसंति, काला महानीलसरिसा णीलगुलिअगवलयअसिकुसुमप्पगासा वियसियसयवत्तणिम्मलईसिसितरत्ततंबणयणा गरुलाययउज्जुतुंगनासा उवचियसियप्पवालबिंबफलसंनिहाहरोट्ठा पंडुरससिसगलविमलनिम्मल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दहिघणसंखगोक्खीरकुंददगरयमुणालियाधवलदंतसेढीहुयवहनिद्धंतधोयतत्ततवनिज्जरत्त-तलतालुजीहा अंजणघणकसिणगरुयगरमणिज्ञणिद्धकेसा वामेयकुंडलधरा अद्दचंदनानुलित्तगत्ता ईसिसिलिंधपुप्फपगासाइं असंकिलिट्ठाइं सुहुमाइं वत्थाइं पवरपरिहिया वयं च पढमं समइक्कंता बइयं तु असंपत्ता भद्दे जोव्वणे वट्टमाणा तलभंगयतुडियपवरभूसणणिम्मलमणिरयणमंडियभुया दसमुद्दामंडियग्गहत्था चूडामणिचित्तचिंधगया –

–सुरूवा महड्डिया महजुईआ महायसा महाबला महानुभागा महासोक्खा हारविराइयवच्छा कडयतुडियथंभियभुया अंगदकुंडलमट्ठगंडतलकन्नपीढधारी विचित्तहत्थाभरणा विचिकत्तमालाम-उली कल्लाणगपवरवत्थपरिहिया कल्लाणगपवरमल्लाणुलेवणधरा भासुरबोंदी पलंबवणमालधरा दिव्वेणं वन्नेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्डीए दिव्वाए जुईए दिव्वाए पभाए दिव्वाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेसाए दस दिसाओ उज्जोवेमाणा पभासेमाणा ते णं तत्थ साणं साणं भवणावाससयसहस्साणं साणं साणं सामानियसाहस्सीणं साणं साणं तायत्तीसाणं साणं साणं लोगपालाणं साणं साणं अग्गमहिसीणं साणं साणं परिसाणं साणं साणं अनियाणं साणं साणं अनियाहिवईणं साणं साणं आयरक्खदेव-साहस्सीणं अन्नेसिं च बहूणं भवणवासीणं देवाण य देवीण य आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणाईसरसेणावच्चं कारेमाणा पालेमाणा महयाहनट्टगीयवाइयतंतीतलतालतुडियघण-मुइंगपडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति ।

मू. (२३९) *जं संठाणं तु इहं भवं चयंतस्स चरिमसमयंमि।*
आसी य पदेसघनं तं संठाणं तहिं तस्स ॥

वृ. 'जं संठाणं तु इहं' इत्यादि, यत्संस्थानं-यावत्प्रमाणं संस्थानं इह-मनुष्यभवे आसीत् तदेव भवन्ति प्राणिनः कर्मवशवर्तिनोऽस्मिन्निति भवं-शरीरं त्यजतः-परित्यजतः, काययोगं परिजिहानस्येति भावः, चरमसमये सूक्ष्मक्रियाऽप्रतिपातिध्यानबलेन वदनोदरादिरन्ध्रपूरणात् त्रिभागेन हीनं प्रदेशघनमासीत्, 'तं संठाणं तहिं तस्स' इति तदेव च प्रदेशघनं मूलप्रमाणापेक्षया त्रिभागहीनप्रमाणं संस्थानं तत्र-लोकाग्रे तस्य-सिद्धस्य, नान्यदिति ॥ साम्प्रतमुत्कृष्टावगाहनादिभेदभिन्नामवगाहनामभिधित्सुराह-

मू. (२४०) *तिन्नि सया तित्तीसा धनुत्तिभागो य होइ नायव्वो।*
एसा खलु सिद्धाणं उक्कोसोगाहणा भणिया।

वृ. 'तिन्नि सया तेत्तीसा' इत्यादि, त्रीणि शतानि त्रयस्त्रिंशानि-त्रयस्त्रिंशदधिकानि धनुस्त्रिभागश्च भवति बोद्धव्या, एषा खलु सिद्धानामुत्कृष्टावगाहना भणिता तीर्थंकरगणधरैः, सा च पञ्चधनुःशततनुकानामवसेया, ननु मरुदेवी नाभिकुलकरपत्नी, नाभेश्च पञ्चविंशत्यधिकानि पञ्चधनुःशतानि शरीरप्रमाणं, यदेव च तस्य शरीरमानं तदेव मरुदेवाया अपि, 'संघयणं संठाणं उच्चत्तं चेव कुलगरेहिं समं' इति वचनात्, मरुदेवी भगवती च सिद्धा, ततस्तस्या देहमानस्य त्रिभागे पातिते सिद्धावस्थायाः सार्धानि त्रीणि धनुःशतान्येवावगाहना प्राप्नोति, कथमुक्तप्रमाणा उत्कृष्टावगाहना घटते ? इति, नैष दोषः, मरुदेवाया नाभेः किञ्चिदून- प्रमाणा भवन्ति, ततो मरुदेवाऽपि पञ्चधनुःशतप्रमाणेति न कश्चिद्दोषः, अपिच-हस्तिस्कन्धाधिरूढा संकुचिताङ्गी सिद्धा ततः शरीरसंकोचभावाद् नाधिकावगाहनासंभव इत्यविरोधः, आह च भाष्यकृत्-

॥१॥ "कह मरुदेवामाणं ? नाभीतो जेण किञ्चिदूणा सा।
तो किर पंचसयच्चिय अहवा संकोचओ सिद्धा ॥"

मू. (२४१) *चत्तारि य रयणीओ रयणी तिभागूणिया य बोद्धव्वा।*
एसा खलु सिद्धाणं मज्झिमओगाहणा भणिया ॥

वृ. 'चत्तारि रयणीओ' इत्यादि, चतस्रो रत्नयो रत्निश्च त्रिभागोना च सा बोद्धव्या एषा खलु सिद्धानामवगाहना भणिता मध्यमा। आह-जघन्यपदे सप्तहस्तोच्छ्रितानामागमे सिद्धिरुक्ता, तत एषा जघन्या प्राप्नोति, कथं मध्यमा ?, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात्, जघन्यपदे हि सप्तहस्तानां सिद्धिरुक्ता तीर्थकरापेक्षया, सामान्यकेवलिनां तु हीनप्रमाणानामपि भवति, इदमपि चावगाहनामानं चिन्त्यते सामान्यसिद्धापेक्षया, ततो न कश्चिद्दोषः।

मू. (२४२) *एगा य होइ रयणी अट्ठेव य अंगुलाइं साहि या।*
एसा खलु सिद्धाणं जहन्नओगाहणा भणिया ॥

वृ. 'एगा य होइ' इत्यादि, एका रत्निः परिपूर्णा अष्टौ चाङ्गुलान्यधिकानि एषा भवति सिद्धानामवगाहना जघन्या, सा च कूर्मापुत्रादीनां द्विहस्तानामवसेया, यदिवा सप्तहस्तोच्छ्रितानामपि यन्त्रपीलनादिना संवर्तितशरीराणां, आह च भाष्यकृत-

॥१॥ "जेट्ठा उ पंचधनुसयतनुस्स मज्झा य सत्तहत्थस्स
देहत्तिभागहीणा जहन्निया जा बिहत्थस्स ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ २ ॥ सत्तूसियएसु सिद्धी जहन्नओ कहमिहं बिहत्थेसु ? ।
सा किर तित्थयरेसु सेसाणं सिज्झमाणाणं ॥

॥ ३ ॥ ते पुण होज्ज बिहत्था कुम्मापुत्तादयो जहन्नेणं ।
अन्ने संवट्टियसत्तहत्थसिद्धस्स हीणत्ति ॥"

साम्प्रतमुक्तानुवादेनैवसंस्थानलक्षणं सिद्धानामभिधत्सुराह—

मू. (२४३) *ओगाहणाइ सिद्धा भवत्तिभागेण होंति परिहीणा ।*
संठाणमनित्थंथं जरामरणविप्पमुक्काणं ॥

वृ. 'ओगाहणाओ' इत्यादि, सुगमं, नवरं 'अनित्थंथं' इति इदंप्रकारमापन्नमित्थं इतत्थं तिष्ठतीति इत्थंस्थं न इत्थंस्थं अनित्थंस्थं—वदनादिशुषिरप्रतिपूरणेन पूर्वाकारान्यथाभावतोऽनियताकारतमिति भावः, योऽपि च सिद्धादिगुणेषु 'सिद्धे न दीहे न हस्से' इत्यादिना दीर्घत्वादीनां प्रतिषेधः कृतः सोऽपि पूर्वाकारापेक्षया संसअथानस्यानित्थसंस्थत्वातचू प्रतिपत्तव्यो, न पुनःसर्वथा संस्थानस्याभावतः, आह च भाष्यकृत्—

॥ १ ॥ "सुसिरकपरिपूरणाओ पुव्वागारन्नहाववत्थाओ ।
संठाणमणित्थंत्थं जं भणियमणिययागारं ॥

॥ २ ॥ एत्तोच्चिय पडिसेहो सिद्धाइगुणेसु दीहयाईणं ।
जमणित्थंथं पुव्वागाराविक्खाए नाभावो ॥"

नन्वेते सिद्धाः परस्परं देशभेदेने व्यवसत्थिता उत नेति ? नेति तद् ब्रूमः कस्मादिति चेत्,

मू. (२४४) *जत्थ य एगो सिद्धो तत्थ अणंता भवक्खयविमुक्का ।*
अन्नोऽन्नसमोगाढा पुट्ठा सव्वेवि लोगंते ॥

वृ. 'जत्थ य' इत्यादि, यत्रैव देशे चशब्दस्य एवकारार्थत्वात् एकः सिद्धो—निवृ—तस्तत्रानन्नता भवक्षयविमुक्ताः, अत्र भवक्षयग्रहणेन स्वेच्छया भवावतरणशक्तिमत्सिद्धव्यवच्छेदमाह, अन्योऽन्यसमवगाढाः, तथाविधाचिन्त्यपरिणामत्वात्, धर्मास्तिकायादिवत्, तथा स्पृष्टा—लग्नाः सर्वेऽपि लोकान्ते ।

मू. (२४५) *फुसइ अनंते सिद्धे सव्वपएसेहिं नियमसो सिद्धा ।*
तेऽवि य असंखिज्जगुणा देसपएसेहिं पुट्ठा ॥

वृ. 'फुसइ' इत्यादि, स्पृशत्यनन्तान् सिद्धान् सर्वप्रदेशैरात्मसंबन्धिभिर्नियमशः सिद्धः, तथा तेऽपि सिद्धाः सर्वप्रदेशस्पृष्टेभ्योऽसंख्येयगुणा वर्तन्ते ये देशप्रदेशैः स्पृष्टाः कथमिति चेत्, उच्यते, इहैकस्य सिद्धस्य यदवगाहनक्षेत्रं तत्रैकस्मिन्नपि परिपूर्णेऽवगाढा अन्येऽप्यनन्ताः सिद्धाः प्राप्यन्ते, अपरे तु ये तस्य क्षेत्रस्यैकैकं प्रदेशमाक्रम्यावगाढास्तेऽपि प्रत्येकमनन्ताः, एवं द्वित्रिचतुःपञ्चादिप्रदेशवृध्या येऽवगाढास्तेऽपि प्रत्येकमनन्ताः, तथा तस्य मूलक्षेत्रस्यैकैकं प्रदेशं परित्यज्य येऽवगाढास्तेऽपि प्रत्येकमनन्ताः, एवं द्वित्रिचतुः- पञ्चादिप्रदेशहान्या येऽवगाढास्तेऽपि प्रत्येकमनन्ताः, एवं सति प्रदेशपरिवृद्धिहानिभ्याये समवगाढास्ते परिपूर्णैकक्षेत्रावगाढेभ्योऽसंख्येयगुणा भवन्ति, अवगाढप्रदेशानमसंख्यातत्वात्, आह च—

॥ १ ॥ "एगक्खेत्तेऽनंता पएसपरिवुड्ढिहाणिओ तत्तो ।
हुंति असंखेज्जगुणाऽसंखपएसो जमवगाढो ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्प्रति सिद्धानेव लक्षणतः प्रतिपादयति-

मू. (२४६) *असरीरा जीवघना उवउत्ता दंसणे य नाणे य।*
सागारमनागारं लक्खणमेयं तु सिद्धाणं ॥

वृ. 'असरीरा' इत्यादि, अविद्यमानशरीरा अशरीरा औदारिकादिपञ्चविधशरीररहिता इत्यर्थः, जीवाश्च ते घनाश्च वनदोदरादिशुषिरूरणात् जीवघना उपयुक्ता दर्शने- केवलदर्शने ज्ञाने च-केवलज्ञाने यद्यपि सिद्धत्वप्रादुर्भावसमये केवलज्ञानमिति ज्ञानं प्रधानं तथाऽपि सामान्यसिद्धलक्षणमेतदिति ज्ञापनार्थमादौ सामान्यावलम्बनं दर्शनमुक्तं,

तथा च सामान्यविषयं दर्शनं विशेषविषयं ज्ञानमिति, ततः साकारानाकारं सामान्यविशेषो-पयोगरूपमित्यर्थः, सूत्रे मकारोऽलाक्षणिको, लक्षणं-तदन्यव्यावृत्तिस्वरूपमेतत्-अनन्तरोक्तं, तुशब्दो वक्ष्यमाणनिरुपमसुखविशेषणार्थं, सिद्धानां-निष्ठितार्थानामिति। सम्प्रति केवलज्ञान-केवलदर्शनयोरशेषविषयतामुपदर्शयति-

मू. (२४७) *केवलनाणुवउत्ता जाणंता सव्वभावगुणभावे।*
पासंता सव्वओ खलु केवलदिट्ठीहिऽनंताहिं ॥

वृ. 'केवलनाणुवउत्ता' इत्यादि, केवलज्ञानेनोपयुक्ता न त्वन्तः करणेन तदभावादिति केवलज्ञानोपयुक्ता जानन्ति-अवगच्छन्ति सर्वभावगुणभावान्-सर्वपदार्थगुणपर्यायान्, प्रथमो भावशब्दः पदार्थवचनः द्वितीयः पर्यायवचनः, गुणपर्याययोस्त्वयं विशेषः-सहवर्तिनो गुणाः क्रमवर्तिनः पर्याया इति, तथा पश्यन्ति सर्वतः खलु-खलुशब्दस्यावधारणार्थत्वात् सर्वत एव, केवलदृष्टिभिरनन्ताभिः, अनन्तैः केवलदर्शनैरित्यर्थः, केवलदर्सनानां चानन्तता सिद्धानामनन्तत्वात्, इहादौ ज्ञानग्रहणं प्रथमतया तदुपयोगस्थाः सिध्यन्तीति ज्ञापनार्थं ॥

सम्प्रति निरुपमसुखभाजस्ते इति दर्शयति-

मू. (२४८) *नवि अत्थि माणुसाणं तं सुक्खं नवि य सव्वदेवाणं।*
जं सिद्धाणं सुक्खं अव्वाबाहं उवगयाणं ॥

वृ. 'नवि अत्थि' इत्यादि, नैवास्ति मनुष्याणां चक्रवर्त्यादीनामपि तत्सौख्यं, नैवास्ति सर्वदेवानामनुत्तरपर्यन्तानामपि यत् सिद्धानां सौख्यमव्याबाधामुपगतानां-न विविधाऽऽबाधा अव्याबाधा तां उप-सामीप्येन गतानां-प्राप्तानां ॥ यथा नास्ति तथा भङ्ग्योपदर्शयति-

मू. (२४९) *सुरगणसुहं समत्तं सव्वद्धापिंडियं अनंतगुणं।*
नवि पावइ मुत्तिसुहं नंताहिं वग्गवग्गूहिं ॥

वृ. 'सुरगणसुहं' इत्यादि, 'सुरगणसुखं' देवसंघातसुखं 'समस्तं' संपूर्णमतीतानाग-तवर्तमानकालोद्भवमित्यर्थः, पुनः 'सर्वाद्धापिण्डितं' सर्वकालसमयगुणितं तथाऽनन्तगुणमिति, तदेवंप्रमाणं किलासत्कल्पनया एकैकाकाशप्रदेशे स्थाप्यते इत्येवं सकलाकाशप्रदेशपूरणेन यद्यप्यनन्तं भवति तदनन्तमप्यनन्तैर्वर्गैर्वर्गितं तथाऽप्येवं प्रकर्षगतमपि मुक्तिसुखं-सिद्धिसुखं न प्राप्नोति ॥ एतदेव स्पष्टतरं भङ्ग्यन्तरेण प्रतिपादयति-

मू. (२५०) *सिद्धस्स सुहो रासी सव्वद्धापिंडिओ जइ हवेज्रा।*
सोऽनंतवग्गभइओ सव्वागासे न माइज्जा ॥

वृ. 'सिद्धस्स सुहो रासी' इत्यादि, सुखानां राशिः सुखराशिः-सुखसंघातः सिद्धस्य सुखराशिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धसुखराशिः 'सर्वाद्धापिण्डितः' सर्वयासाद्यपर्यवसितया अद्धया, यत्सुखं सिद्धः प्रतिसमयमनुभवति तदेकत्र पिण्डीकृतमिति भावः, सोऽनन्तवर्गभक्तः–अनन्तैर्वर्गमूलैरपवर्तितः, अनन्तैर्वर्गमूलैः तावदपवर्तितो यावत् सर्वाद्धालक्षणेन गुणकारेण गुणने यदधिकं जातं तस्य सर्वस्याप्यपवर्तनैः सिदअधात्वाद्यसमयभाविसुखमात्रतां प्राप्त इति भावः,

सर्वाकाशे न माति–एतावन्मात्रोऽपि सर्वाकाशे न माति सर्वस्तु दूरापास्तप्रसर एवेति ज्ञापनार्थं पिण्डयित्वा पुनरपवर्तनं सुखराशेः, इयमत्र भावना–इह किल विशिष्टाह्लादरूपं सुखं परिगृह्यते, ततश्च यत आरभ्य शिष्टानां सुखशब्दप्रवृत्तिस्तमाह्लादमवधिकृत्य एकैकगुणवृद्धितारतम्येन तावदसावाह्लादो विशिष्यते यावदनन्तगुणवृध्या निरतिशयनिष्ठामुपगतः,

सोऽयमत्यन्तोपमातीतैकान्तौत्सुक्यविनिवृत्तिरूपस्तिमिततमकल्पः चरमाह्लादः सदा सिद्धानां, तस्माच्चारतः प्रथमाच्चोध्वमपान्तरालवर्तिनो ये गुणास्तारतम्येनाह्लादविशेषरूपास्ते सर्वाकाशप्रदेशेभ्योऽप्यतिभूयांसः, ततः किलोक्तं–'सव्वागासे न माइज्जा' इति, अन्यथा यत् सर्वाकाशे न माति तत् कथमेकस्मिन् सिद्धे मायाद् ? इति पूर्वसूरिसंप्रदायः ।।

साम्प्रतमस्य निरुपमतां प्रतिपादयति–

मू. (२५१) *जह नाम कोइ मिच्छो नगरगुणे बहुविहे वियाणंतो ।*
न चएइ परिकहेउं उवमाए तहिं असंतीए ।।

वृ. 'जह नाम' इत्यादि, यता नाम कश्चिद् म्लेच्छो नगरगुणान्–गृहनिवासादीन् बहुविधान्–अनेकप्रकारान् विजानन् अरण्यगतः सन् अन्यम्लेच्छोभ्यो न शक्नोति परिकथयितुं, कस्मान्न शक्नोति ? इत्यत आह–उपमायां तत्रासत्यां "निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शनम्" इति न्यायाद् हेतौ सप्तमी, तत उपमाया अभावादिति द्रष्टव्यं, एष गाथाऽक्षरार्थः, भावार्थः कथानकादवसेयः, एगो महारन्नवासी मिच्छो रन्ने चिट्ठति, इत्तो य एगो राया आसेण अवहरितो तं अडविं पवेसिओ तेण दिट्ठो, सक्कारिऊण जनवयं नीतो, रन्नावि सो नगरं नीओ, पच्छा उवगारित्ति गाढमुपचरितो, जहा राया तहा चिट्ठइ, धवलधराइभोगेण विभासा, कालेण रन्नंसरिउमारद्धो, रन्ना विसज्जिओ, तत्तो रन्निगा पुच्छंति–'केरिसं नयरंति' ? सो वियाणंतोऽवि तत्थोवमाभावा न सक्कइ नयरगुणे परिकहेउं । एस दिट्ठंतो, अयमर्थोपनयः–

मू. (२५२) *इय सिद्धाणं सोक्खं अनोवमं नत्थि तस्स ओवम्मं ।*
किंचि विसेसेणित्तो सारिक्खमिणं सुणए वोच्छं ।।

वृ. 'इय सिद्धाणं' इत्यादि, इत्येवं सिद्धानां सौख्यमनुपमं वर्तते, किमिति ?, तत आह–यतो नास्ति तस्यौपम्यं, तथाऽपि बालजनप्रतिपत्तये किञ्चिद् विशेषेण 'इतो' इति आर्षत्वाद् अस्येत्यर्थः, सादृश्यमिदं–वक्ष्यमाणं श्रणुत–

मू. (२५३) *जह सव्वकामगुणियं पुरिसो भोत्तूण भोयणं कोई ।*
तण्हाछुहाविमुक्को अच्छिज्ज जहा अमियतित्तो ।।

वृ. 'जह सव्व' इत्यादि, यथेत्युदाहरणोपदर्शनार्थः, भुज्यते इति भोजनं 'सर्वकामगुणितं' सकलसौन्दर्यसंस्कृतं कोऽपि पुरुषो भुक्त्वा क्षुत्तृड्विप्रमुक्तः सन् यथा अमृततृप्तस्तथा तिष्ठति,

मू. (२५४) *इय सव्वकालतित्ता अतुलं निव्वाणमुवगया सिद्धा ।*
सासयमव्वाबाहं चिट्ठंति सुही सुहं पत्ता ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'इय'इत्यादि, एवं निर्वाणं–मोक्षमुपगताः सिद्धाः सर्वकालं–साद्यपर्यवसितं कालं तृप्ताः–सर्वथौत्सुक्यविनिवृत्तिभावतः परमसंतोषमधिगता अतुलम्–अनन्यसदृशमुपमाऽतीतत्वात् शाश्वतं प्रतिपाताभावात् अव्याबाधं लेशतोऽपि व्याबाधाया असंभवात् सुखं प्राप्ता अत एव सुखिनः तिष्ठन्तीति ।। एतदेव सविशषतरं भावयति–

मू. (२५५) *सिद्धत्ति य बुद्धत्ति य पारगयत्ति । य परंपरगयत्ति उ*
म्मुक्क कम्मकवया अजरा अमरा असंगा य ।।

वृ. 'सिद्धत्ति य' इत्यादि, सितं–बद्धमष्टप्रकारं कर्म ध्मातं–भस्मीकृतं यैस्ते सिद्धाः "पृषोदरादयः" इति रूपनिष्पत्तिः, निर्दग्धानेकभवकर्मेन्धना इत्यर्थः, ते च सामान्यतः कर्मादिसिद्धा अपि भवन्ति, यत उक्तम्–

।। १ ।। "कम्मे सिप्पे य विज्ञाए, मंते जोगे य आगमे ।
अत्थजत्ताअभिप्पाए, तवे कम्मक्खए इय ।।"

ततः कर्मादिसिद्धव्यपोहाय आह–'बुद्धा' इति, अज्ञाननिद्राप्रसुप्ते जगत्यपरोपदेशेन जीवादिरूपं तत्त्वं बुद्धवन्तो बुद्धाः, सर्वज्ञसर्वदर्शिस्वभावबोधरूपा इति भावः, एतेऽपि च संसारनिर्वाणोभयपरित्यगेन स्थितवन्तः कैश्चिदिष्यन्ते–

।। १ ।। "संसारे न च निर्वाणे, स्थितो भुवनभूतये ।
अचिन्त्यः सर्वलोकानां, चिन्तारत्नाधिको महान् ।।"

इति वचनात्, ततस्तन्निरासार्थमाह–'पारगता' इति, पारं–पर्यन्तं संसारस्य प्रयोजनव्रातस्य वा गताः पारगताः, तथाभव्यत्वाक्षिप्तसकलप्रयोजनसमाप्तया निरवशेषकर्तव्यशक्तिविप्रमुक्ता इति भावः, इत्थंभूता अपि कैश्चिद् यदृच्छावादिभिरक्रमसिद्धत्वेनापि गीयन्ते, तथोक्तम्–

।। १ ।। "नैकादिसंख्याक्रमतो, वित्तप्राप्तिर्नियोगतः ।
दरिद्रराज्यचारित्ररूपया, तद्वन्मुक्तिः क्वचिन्नकिम् ? ।।"

ततस्तन्मतव्यपोहाय 'परम्परागता' इति परम्परया–ज्ञानदर्शनचारित्ररूपया मिथ्यादृष्टिसासादन–सम्यग्मिथ्यादृष्टयअविरत सम्यग्दृष्टिदेशविरतिप्रमत्ताप्रमत्तनिवृत्त्यनिवृत्तिबादरसंपरायसूक्ष्मसंपरायोपशान्तमहक्षीण मोहसयोगिकेवल्ययोगिकेवलिगुणस्थानभेदभिन्नया गताः परम्परागताः, एते च कैश्चित् तत्त्वतोऽनुन्मुक्तकर्मकवचा अभ्युपगम्यन्ते 'तीर्थनिकारदर्सनादिहागच्छन्ति' इति वचनतः पुनः संसारावतरणाभ्युपगमात्, अतस्तन्मतापाकरणार्थमाह–

'उन्मुक्तकर्मकवचाः' उत्–प्राबल्येनापुनर्भवरूपतया मुक्तं–परित्यक्तं कर्म कवचमिव कर्मकवचं यैस्ते उन्मुक्तकर्मकवचाः, अत एवाजराः शरीराभावतो जरसोऽभावात् अमरा अशरीरत्वादेव प्राणत्यागासंभवात्, उक्तं च–

।। १ ।। "वयसो हाणीह जरा, पाणच्चाओ य मरणमादिट्ठं ।
सइ देहंमि तदुभयं तदभावे तं न कस्सेव ।।"

मू. (२५६) *निच्छिन्नसव्वदुक्खा जाइजरामरणबंधणविमुक्का ।*
अव्वाबाहं सोक्खं अणुहोंती सासयं सिद्धा ।।

वृ. असङ्गा बाह्याभ्यन्तरसङ्गरहितत्वात् 'निच्छिन्न' इत्यादि, निस्तीर्णं–लङ्घितं सर्वदुःखं यैस्ते निस्तीर्णसर्वदुःखाः, कुतः ? इत्याह–'जातिजरामरणबंधणविमुक्का' जातिः–जन्म जरा–वयोहानिलक्षणा मरणं– प्राणत्यागरूपं बन्धनानि–तन्नबन्धनरूपाणि कर्माणि तैर्विशेषतो–निःशेषा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पगमनेन मुक्ता जातिजरामरणबन्धनविमुक्ताः, हेताविय प्रथमा, यतो जातिजरामरणबन्धनविप्रमुक्तास्ततो निस्तीर्णसर्वदुःखाः, कारणाभावात्, ततोऽव्यावबाधं सौख्यं शाश्वतं सिद्धा अनुभवन्ति

पदं – २ – समाप्तम् ।

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापना उपाङ्गसूत्रे द्वीतीयपदस्य मलयगिरिविरचिताटीका परिसमाप्ता ।

पदं – ३ – अल्पबहुत्त्वम् (बहुवक्तव्य)

वृ. व्याख्यातं द्वितीयं पदं, अधुना तृतीयपदमारभ्यते, तस्य चायमभिसम्बन्धः–इह प्रथम पदे पृथिवीकायिकादयः प्रज्ञप्ताः द्वितीये ते एव स्वस्थानादिना चिन्तिताः अस्मिंस्तु तेषां दिग्विभागादिनाऽल्पबहुत्वादि निरूप्यते, तत्रेदमादौ द्वारसङ्ग्रहगाथाद्वयम्–

मू. (२५७) *दिसि गइ इंदिय काए जोए वेए कसाय लेसा य ।*
सम्मत्तं नाणदंसणं संजयउवओगआहारे ॥

वृ. प्रथमं दिग्द्वारं १, तदनन्तरं गतिद्वारं, २, तत इन्द्रियद्वारं ३, ततः कायद्वारं ४, ततो योगद्वारं ५, तदनन्तरं वेदद्वारं ६, ततः कषायद्वारं, ७, ततो लेश्याद्वारं ८, ततः सम्यकत्वद्वारं ९, तदनन्तरं ज्ञानद्वारं १०, ततो दर्शनद्वारं ११, ततः संयतद्वारं १२, तत उपयोगद्वारं १३, तत आहारद्वारं १४,

मू. (२५८) *भासगपरित्तपज्ञत्त सुहुमसन्नी भवऽत्थिए चरिमे ।*
जीवे य खित्तबंधे पुग्गलमहदंडए चेव ॥

वृ. ततो भाषकद्वारं १५, ततः 'परित्त' इति परित्ताः–प्रत्येकशरीरिणः शुक्लपाक्षिकाश्च तद्वारं १६, तदनन्तरं पर्याप्तद्वारं १७, ततः सूक्ष्मद्वारं १८, तदनन्तरं संज्ञिद्वारं १९, ततो 'भव'त्ति भवसिद्धिकद्वारं २०, ततोऽस्तीति अस्तिकायद्वारं २१, ततश्चरमद्वारं २२, तदनन्तरं जीवद्वारं, २३, ततः क्षेत्रद्वारं २४, ततो बन्धद्वारं २५, ततः पुद्गलद्वारं २६, ततो महादण्डकः २७, इति सर्वसङ्ख्यया सप्तविंशतिः द्वाराणि । तत्र प्रथमं द्वारमभिधित्सुराह–

–: पदं – २ – दारं – १ :– "दिसा":–

मू. (२५९) *दिसाणुवाएणं सव्वत्थोवा जीवा पच्छिमेणं, पुरच्छिमे णं विसेसाहिया, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया ।*

वृ. इह दिशः प्रथमे आचाराख्ये अङ्गे अनेकप्रकारा व्यावर्णिताः, तत्रेह क्षेत्रदिशः प्रतिपत्तव्याः, तासां नियतत्वात्, इतरासां च प्रायोऽनवसअथितत्वात् अनुपयोगित्वाच्च, क्षेत्रदिशां च प्रभवस्तिर्यग्लोकमध्यगतादष्टप्रदेशकाद्रुचकात्, यत उक्तम्–

॥१॥ "अट्ठपएसो रुयगो तिरियलोयस्स मज्झयारम्मि ।
एस पभवो दिसाणं एसेव भवे अनुदिसाणं ॥" इति,

दिशामनुपातो दिगनुपातो–दिगनुसरणं तेन दिशोऽधिकृत्येति तात्पर्यार्थः, सर्वस्तोका जीवाः पश्चिमेन–पश्चिमायां दिशि, कथमिति चेत् ?, उच्यते, इदं ह्यल्पबहुत्वं बादरानधिकृत्य द्रष्टव्यं, न सूक्ष्मान्, सूक्ष्माणां सर्वलोकापन्नानां प्रायः सर्वत्रापि समत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बादरेष्वपि मध्ये सर्वबहवो वनस्पतिकायिकाः, अनन्तसङ्ख्याकतया तेषां प्राप्यमाणत्वात्, ततो यत्र ते बहवस्तत्र बहुत्वं जीवानां, यत्र त्वल्पे तत्राल्पत्वं, वनस्पतयश्च तत्र बहवो यत्र प्रभूता आपः, 'जत्थ जलं तत्थ वणं' इति वचनात् तत्रावश्यं पनकसेवालादीनां भावात्, ते च पनकसेवालादयो बादरनामकर्मोदये वर्त्तमाना अपि अत्यन्तसूक्ष्मावगाहनत्वात् अतिप्रभूतपिण्डीभावाच्च सर्वत्र सन्तोऽपि न चक्षुषा ग्राह्याः,

तथा चोक्तमनुयोगद्वारेषु- "ते णं वालग्गा सुहुमपनगजीवस्स सरीरोगाणाहिंतो असंखेज्ञगुणा" इति, ततो यत्रापि नैते दृश्यन्ते तत्रापि ते सन्तीति प्रतिपत्तव्याः, आह च मूलटीकाकार;- "इह सर्वबहवो वनस्पतय इतिकृत्वा यत्र ते सन्ति तत्र बहुत्वं जीवानां, तेषां च बहुत्वं "जत्थ आउकाओ तत्थ नियमा वणस्सइकाइया इति पनगसेवालहढाई बायरावि होंति सुहुमा आणागेज्झा न चक्खुणा" इति, उदकं च प्रभूतं समुद्रादिषु, द्वीपात् द्विगुणविष्कम्भत्वात्, तेष्वपि च समुद्रेषु प्रत्येकं प्राचीप्रतीच्योर्दिशोर्यथाक्रमं चन्द्रसूर्यद्वीपाः, यावति च प्रदेशे चन्द्रसूर्यद्वीपा अवगाढास्तावत्युद- काभवः, उदकाभावाच्च वनस्पतिकायिकाभावः, केवलं प्रतीच्यां दिशि लवणसमुद्राधिपसुस्थितनाम- देवावासभूतो गौतमद्वीपो लवणसमुद्रेऽभ्यधिको वर्त्तते, तत्र चोदकाभावाद्वनस्पतिकायिकानाम- भावात् सर्वस्तोका जीवाःपश्चिमायां दिशि, तेभ्यो विशेषाधिकाः पूर्वस्यां दिशि, तत्र हि गौतमद्वीपो न विद्यते, ततस्तावता विशेषेणातिरिच्यते इति,

तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, यतस्तत्र चन्द्रसूर्यद्वीपा न विद्यन्ते, तदभावात्त्रोदकं प्रभूतं, तत्प्राभूत्याच्च वनस्पतिकायिका अपि प्रभूता इति विशेषाधिकाः, तेभ्योऽप्युदीच्यां दिशि विशेषाधिकाः, किं कारणमिति चेत् ?, उच्यते, उदीच्यां हि दिशि सङ्ख्येययोजनेषु द्वीपेषु मध्ये कस्मिंश्चित् द्वीपे आयामविष्कम्भाभ्यां सङ्ख्येयाजनकोटीप्रमाणं मानसं नाम सरः समस्ति, ततो दक्षिणदिगपेक्षया अस्यां प्रभूतमुदकम्, उदकबाहुल्याच्च प्रभूता वनस्पततः, प्रभूता द्वीन्द्रियाः शङ्खादयः प्रभूतास्तटलग्न- शङ्खादिकलेवराश्रितास्त्रीन्द्रियाः पिपीलिकादयः प्रभूताःपद्मादिषु चतुरिन्द्रियाः भ्रमरादयः प्रभूताः पञ्चेन्द्रिया मत्स्यादय इति विशेषाधिकाः ।।

तदेवं सामान्यतो दिगनुपातेन जीवानामल्पबहुत्वमुक्तम् ।। इदानीं विशेषेण तदाह-

मू. (२६०) *दिसाणुवाएणं सव्वत्थोवा पुढविक्काइया दाहिणेणं उत्तरेणं विसेसाहिया पुरच्छिमेणं विसेसाहिया पच्छिमेणं विसेसाहिया । दिसाणुवाएणं सव्वत्थोवा आउक्काइया पच्छिमेणं, पुरच्छिमेणं विसेसाहिया, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया ।। दिसाणुवाएणं सव्वत्थोवा तेउक्काइया दाहिणुत्तरेणं, पुरच्छिमेणं संखेज्ञगुणा, पच्छिमेणं विसेसाहिया ।।*

दिसाणुवाएणं सव्वत्थोवा वाउक्काइया पुरच्छिमेणं, पच्छिमेणं विसेसाहिया, उत्तरेणं विसेसाहिया, दाहिणेणं विसेसाहिया ।। दिसाणुवाएणं सव्वत्थोवा वणस्सइक्काइया पच्छिमेणं पुरच्छिमेणं विसेसाहिया दाहिणेणं विसेसाहिया उत्तरेणं विसेसाहिया ।।

निसाणुवाएणं सव्वत्थोवा बेइंदिया पच्छिमेणं पुरच्छिमेणं विसेसाहिया दक्खिणेणं विसेसाहिया उत्तरेणं विसेसाहिया । दिसाणुवाएणं सव्वत्थोवा तेइंदिया पच्चत्थिमेणं, पुरच्छिमेणं विसेसाहिया, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया । दिसाणुवाएणं सव्वत्थोवा चउरिंदिया पच्चत्थिमेणं, पुरच्छिमेणं विसेसाहिया, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिसाणुवाएणं सव्वत्थोवा नेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्रगुणा। दिसाणुवाएणं सव्वत्थोवा रयणप्पभापुढवीनेरइया पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेण असंखेज्रगुणा दिसाणुवाएणं सव्वत्थोवा सक्करप्पभापुढवीनेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्रगुणा। दिसाणुवाएणं सव्वत्थोवा वालुयप्पभापुढवीनेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्रगुणा। दिसाणुवाएणं सव्वत्थोवा पंकप्पभापुढवीनेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्रगुणा। दिसाणुवाएणं सव्वत्थोवा धूमप्पभापुढवीनेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्रगुणा। दिसाणुवाएणं सव्वत्थोवा तमप्पहापुढवीनेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्रगुणा। दिसाणुवाएणं सव्वत्थोवा अहे सत्तमापुढवीनेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्रगुणा।

दाहिणेहिंतो अहेसत्तमापुढवीनेरइएहिंतो छट्ठाए तमाए पुढवीए नेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं असंखेज्रगुणा, दाहिणेणं असंखेज्रगुणा, दाहिणिल्लेहिंतो तमाए पुढवीनेरइएहिंतो पंचमाए धूमप्पभाए पुढवीए नेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं असंखेज्रगुणा, दाहिणेणं असंखेज्रगुणा, दाहिणिल्लेहिंतो धूभप्पभापुढवीनेरइएहिंतो चउत्थीए पंकप्पभाए पुढवीए नेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं असंखेज्रगुणा, दाहिणेणं असंखेज्रगुणा, दाहिणिल्लेहिंतो पंकप्पभापुढवीनेरइएहिंतो तइया वालुयप्पभाए पुढवीए नेरइया पुरच्छिमपञ्चत्थिमउत्तरेणं असंखेज्रगुणा, दाहिणेणं असंखेज्रगुणा, दाहिणिल्लेहिंतो वालुयप्पभापुढवीनेरइएहिंतो दुइयाए सक्करप्पभाए पुढवीए नेरइया पुरच्छिमपञ्चच्छिमउत्तरेणं असंखेज्रगुणा, दाहिणेणं असंखेज्रगुणा, दाहिणिल्लेहिंतो सक्करप्पभापुढवीनेरइएहिंतो इमीसे रयणप्पभाए पुढवीए नेरइया पुरच्छिमपञ्चतअथिमउत्तरेणं असंखेज्रगुणा, दाहिणेणं असंखेज्रगुणा। दिसाणुवाएणं सव्वत्थोवा पंचिंदिया तिरिक्खजोणिया पच्छिमेणं, पुरच्छिमेणं विसेसाहिया, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा मणुस्सा दाहिणउत्तरेणं, पुरच्छिमेणं संखेज्रगुणा पञ्चत्थिमेणं विसेसाहिया।

दिसाणुवाएणं सव्वत्थोवा भवणवासी देवा पुरच्छिमेणं पञ्चत्थिमेणं, उत्तरेणं असंखेज्रगुणा, दाहिणेणं असंखेज्रगुणा। दिसाणुवाएणं सव्वत्थोवा वाणमंतरा देवा पुरच्छिमेणं, पञ्चत्थिमेणं विसेसाहिया, उत्तरेणं विसेसाहिया, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा जोइसिया देवा पुरच्छिमपञ्चत्थिमेणं, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया।

दिसाणुवाएणं सव्वत्थोवा देवा सोहम्मे कप्पे पुरच्छिमपञ्चत्थिमेणं, उत्तरणं असंखेज्रगुणा, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा देवा ईसाणे कप्पे पुरच्छिमपञ्चत्थिमेणं, उत्तरेणं असंखेज्रगुणा, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा देवा सणंकुमारे कप्पे पुरच्छिमपञ्चत्थिमेणं, उत्तरेणं असंखेज्रगुणा, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा देवा सणंकुमारे कप्पे पुरच्छिमपञ्चत्थिमेणं, उत्तरेणं असंखेज्रगुणा, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा देवा माहिंदे कप्पे पुरच्छिमपञ्चत्थिमेणं, उत्तरेणं असंखेज्रगुणा, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा देवा बंभलोए कप्पे पुरच्छिमपञ्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्रगुणा। दिसाणुवाएणं सव्वत्थोवा देवा लंतए कप्पे पुरच्छिमपञ्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्रगुणा। दिसाणुवाएणं सव्वत्थोवा देवा महासुक्के कप्पे पुरच्छिमपञ्चत्थिमउत्तरेणं, दाहिणेणअसंखेज्रगुणा। दिसाणुवाएणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वत्थोवा देवा सहस्सारे कप्पे पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा ।

-तेण परं बहुसमोववन्नगा समणाउसो ! ।। दिसाणुवाएणं सव्वत्थोवा सिद्धा दाहिणेणं उत्तरेणं, पुरच्छिमेणं संखेज्जगुणा, पच्चतअथिमेणं विसेसाहिया ।। दारं ।।

वृ. दिगनुपातेन-दिगनुसारेण दिशोऽधिकृत्येतिभावः, पृथिवीकायिकाश्चिन्त्यमानाः सर्वस्तोका दक्षिणस्यां दिशि, कथमिति चेद् ?, उच्यते, इह यत्र धनं तत्र बहवः पृथिवीकायिकाः यत्र सुषिरं तत्र स्तोकाः, दक्षिणस्यां दिशि बहूनि भवनपतीनां भवनानि बहवो नरकावासस्ततः सुषिरप्राभूत्यसंभवात् सर्वस्तोका दक्षिणस्यां दिशि पृथिवीकायिकाः,

तेभ्य उत्तरस्यां दिशि विशेषाधिकाः, यत उत्तरस्यां दिशि दक्षिणदिगपेक्षया स्तोकानि भवनानि स्तोका नरकावासाः, ततो घनप्राभूत्यसंभवात् बहवः पृथिवीकायिका इति विशेषाधिकाः, तेभ्योऽपि पूर्वस्यां दिशि विशेषाधिकाः, रविशशिद्वीपानां तत्र भावात्,

तेभ्योऽपि पश्चिमायां दिशि विशेषाधिकाः, किं कारणमिति चेत् ?, उच्यते, यावन्तो रविशशिद्वीपाः पूर्वस्यां दिशि तावन्तः पश्चिमायामपि, न तु एतावता साम्यं, परं लवणसमुद्रे गौतमनामा द्वीपः पश्चिमायामधिकोऽस्ति, तेन विशेषाधिकाः, अत्र पर आह-

ननु यथा पश्चिमायां दिशि गौतमद्वीपोऽभ्यधिकः समस्ति, तथा तस्यां पश्चिमायां दिशि अधोलौकिकग्रामा अपि योजनसहस्रावगाहाः सन्ति, ततः खातपूरितन्यायेन तत्र तुल्या एव पृथिवीकायिकाः प्राप्नुवन्ति न विशेषाधिकाः, नैतदेवं, यतोऽधोलौकिकग्रामावगाहो योजनसहस्रं, गौतमद्वीपस्य पुनः षट्सप्तत्यधिकं योजनसहस्रमुच्चैस्त्वं, विष्कम्भस्तस्य द्वादश योजनसहस्राणि, यच्च मेरोराभ्याधोलौकिकग्रामेभ्योऽर्वाक् हीनत्वं हीनतरत्वं तत् पूर्वस्यामपि दिशि प्रभूतगर्त्तादिसंभवात् समानं, ततो यद्यधोलौकिकग्रामच्छिद्रेषु बुद्धया गौतमद्वीपः प्रक्षिप्यते तथापि स समधिक एव प्राप्यते न तुल्य इति तेन समधिकेन विशेषाधिकाः पश्चिमायां दिशि पृथिवीकायिकाः ।।

उक्तं दिगनुपातेन पृथिवीकायिकानामल्पबहुत्वं, इदानीमप्कायिकानामल्पबहुत्वमाह-सर्वस्तोका अप्कायिकाः पश्चिमायां दिशि, गौतमद्वीपस्थाने तेषामभावात्, तेभ्योऽपि विशेषाधिकाः पूर्वस्यां दिशि, गौतमद्वीपाभावात्, तेभ्योऽपि विशेषाधिका दक्षिणस्यां दिशि, चन्द्रसूर्यद्वीपाभावात्, तेभ्योऽप्युत्तरस्यां दिशि विशेषाधिकाः, मानससरःसद्भावात् ।।

तथा दक्षिणस्यामुत्तरस्यां च दिशि सर्वस्तोकास्तेजःकायिकाः, यतो मनुष्यक्षेत्रे एव बादरास्तेजःकायिका नान्यत्र, तत्रापि यत्र बहवो मनुष्यास्तत्रैते बहवः, बाहुल्येन पाकारम्भसम्भवात्, यत्र त्वल्पे तत्र स्तोकाः, तत्र दक्षिणस्यां दिशि पञ्चसु भरतेषु उत्तरस्यां दिशि पञ्चस्वैरावतेषु क्षेत्रस्याल्पत्वात् स्तोका मनुष्याः, तेषां स्तोकत्वेन तेजःकायिका अपि स्तोकाः, अल्पपाकारम्भसम्भवात्, ततः सर्वस्तोका दक्षिणोत्तरयोर्दिशोस्तेजःकायिकाः, स्वस्थाने तु प्रायः समानाः, तेभ्यः पूर्वस्यां दिशि सङ्ख्येयगुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात्, ततोऽपि पश्चिमायां दिशि विशेषाधिकाः, अधोलौकिकग्रामेषु मनुष्यबाहुल्यात् ।।

इह यत्र सुषिरं तत्र वायुः यत्र घनं तत्र वाय्वभावः, तत्र पूर्वस्यां दिशि प्रभूतं घनमित्यल्पा वायवः, पश्चिमायां दिशि विशेषाधिका;, अधोलौकिकग्रामसम्भवात्, उत्तरस्यां दिशि विशेषाधिकाः, भवननरकावासबाहुल्येन सुषिरबाहुल्यात्, ततोऽपि दक्षिणस्यां दिशि विशेषाधिकाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तरदिगपेक्षया दक्षिणस्यां दिशिभवनानां नरकावासानां चातिप्रभूतत्वात्।

तथा यत्र प्रभूता आपस्तत्र प्रभूताः पनकादयोऽनन्तकायिका वनस्पतयः प्रभूताः शङ्खादयो द्वीन्द्रियाः प्रभूताः पिण्डीभूतसेवालाद्याश्रिताः कुन्थ्वादयस्त्रीन्द्रियाः प्रभूताः पद्माद्याश्रिता भ्रमरादयश्चतुरिन्द्रिया इति हेतोर्वनस्पत्यादिसूत्राणि चतुरिन्द्रियसूत्रपर्यन्तानि अप्कायिकसूत्रवद् भावनीयानि

नैरयिकसूत्रे सर्वस्तोकाः पूर्वोत्तरपश्चिमदिग्विभागभाविनो नैरयिकाः, पुष्पावकीर्णनरकावासानां तत्राल्पत्वात्, बहूनां प्रायः सङ्ख्येययोजनविस्तृतत्वाच्च, तेभ्यो दक्षिणदिग्विभागभाविनोऽसङ्ख्येयगणाः, पुष्पावकीर्णनरकावासानां तत्र बाहुल्यात्, तेषां च प्रायोऽसङ्ख्येययोजनविस्तृतत्वात्, कृष्णापाक्षिकाणां तस्यां दिशि प्राचुर्येणोत्पादाच्च, तथाहि–द्विविधा जन्तवः, शुक्लपाक्षिकाः कृष्णपाक्षिकाश्च, तेषां लक्षणमिदं–येशां किञ्चिदूनपुद्गलपरावर्त्तार्धमात्रसंसारस्ते शुक्लपाक्षिकाः, अधिकतरसंसारभाजिनस्तु कृष्णपाक्षिकाः, उक्तं च–

॥१॥ "जेसिमवड्ढो पुग्गलपरियट्टो सेसओ य संसारो।
ते सुक्कपक्खिया खलु अहिए पुन कण्हपक्खी उ ॥"

अत एव च स्तोकाः शुक्लपाक्षिकाः, अल्पसंसारिणां स्तोकत्वात्, बहवः कृष्णपाक्षिकाः, प्रभूतसंसारिणामतिप्रचुरत्वात्, कृष्णपाक्षिकाश्च प्राचुरयेण दक्षिणस्यां दिशि समुत्पद्यन्ते, न शेषासु दिक्षु, तथास्वाभाव्यात्, तच्च तथास्वाभाव्यं पूर्वाचार्यैरेवं युक्तिभिरुपबृंह्यते, तद्यथा–

कृष्णपाक्षिका दीर्घतरसंसारभाजिन उच्यन्ते, दीर्घतरसंसारमाजिनश्च बहुपापोदयाद् भवन्ति, बहुपापोदयाश्च कूरकर्म्माणः, क्रूरकर्माणश्च प्रायस्तथास्वाभाव्यात् तद्‌भवसिद्धिका अपि दक्षिणस्यां दिशि समुत्पद्यन्ते, न शेषासु दिक्षु, यत उक्तं–

॥१॥ "पायमिह कूरकम्मा भवसिद्धियावि दाहिणिल्लेसुं।
नेरइयतिरियमणुसायसुराइठाणेसु गच्छंति ॥"

ततो दक्षिणस्यां दिशि बहूनां कृष्णापाक्षिकाणामुत्पादसम्भवात् पूर्वोक्तकारणद्वयाच्च सम्भवन्ति पूर्वोत्तरपश्चिमदिग्विभागभाविभ्यो दाक्षिणात्या असङ्ख्येयगुणाः।

यथा च सामान्यतो नैरयिकाणां दिग्विभागेनाल्पबहुत्वमुक्तं, एवं प्रतिपृथिव्यापि वक्तव्यं, युक्तेः सर्वत्रापि समानत्वात्। तदेवं प्रतिपृथिव्यपि दिग्विभागेनाल्पबहुत्वमभिहितं, इदानीं सप्तापि पृथिवीरधिकृत्य दिग्विभागेनाल्पबहुत्वमाह–

सप्तमपृथिव्यां पूर्वोत्तरपश्चिमदिग्भाविभ्यो नैरयिकेभ्यो ये सप्तमपृथिव्यामेव दाक्षिणात्यास्तेऽसङ्ख्येयगुणाः, तेभ्यः षष्ठपृथिव्यां तमःप्रभाभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसङ्ख्येयगुणाः, कथमिति चेद्?, उच्यते, इह सर्वोत्कृष्टपापकारिणः संज्ञिपञ्चेन्द्रियतिर्यग्मनुष्याः सप्तमनरकपृथिव्यामुत्पद्यन्ते, किञ्चिद्हीनहीनतरपापकर्मकारिणश्च षष्ठ्यादिषु पृथिवीषु,

सर्वोत्कृष्टपापकर्मकारिणश्च सर्वस्तोकाः बहवश्च यथोत्तरं किञ्चिद्धीनहीनतरादिपापकर्मकारिणः ततो युक्तमसङ्ख्येयगुणत्वं सप्तमपृथिवीदाक्षिणात्यनारकापेक्षया षष्ठपृथिव्यां पूर्वोत्तरपश्चिमनारकाणां, एवमुत्तरोत्तपृथिवीरप्यधिकृत्य भावयितव्यम्, तेभ्योऽपि तस्यामेव षष्ठपृथिव्यां दक्षिणस्यां दिशि नारका असङ्ख्येयगुणाः, युक्तिरत्र प्रागेवोक्ता, तेभ्योऽपि पञ्चमपृथिव्यां धूमप्रभाभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसङ्ख्येयगुणाः, तेभ्योऽपि तस्यामेव पञ्चमपृथिव्यां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दाक्षिणात्या असङ्ख्येयगुणाः, एवं सर्वास्वपि क्रमेणं वाच्यम् ॥

तिर्यक्पञ्चेन्द्रियसूत्रं त्वष्कायसूत्रवद् भावनीयम् ॥ सर्वस्तोका मनुष्या दक्षिणस्यामुत्तरस्यां च, पञ्चानां भरतक्षेत्राणां पञ्चानामैरावतक्षेत्राणामल्पत्वात्, तेभ्यः, पूर्वस्यां दिशि सङ्ख्येयगुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात्, तेभ्योऽपि पश्चिमायां दिशि विशेषाधिकाः, स्वभावत एवाधोलौकिकग्रामेषु मनुष्यबाहुल्यभावात् ॥ दिसाणुवाएणं सव्वत्थोवा भवणवासी' इत्यादि, सर्वस्तोका भवनवासिनो देवाः पूर्वस्यां पश्चिमायां च दिशि, तत्र भवनानामल्पत्वात्, तेभ्य उत्तरदिग्भाविनोऽसङ्ख्येयगुणाः, स्वस्थानतया तत्र भवनानां बाहुल्यात्, तेभ्योऽपि दक्षिणदिग्भाविनोऽसङ्ख्येयगुणाः, तत्र भवनानामतीव बाहुल्यात्, तथाहि-निकाये निकाये चत्वारि चत्वारि भवनशतसहस्राण्यतिरिच्यन्ते, कृष्णपाक्षिकाश्च बहवस्तत्रोत्पद्यन्ते, ततो भवन्त्यसङ्ख्येयगुणाः ।

व्यन्तरसूत्रे भावना-यत्र सुषिरं तत्र व्यन्तराः प्रचलन्ति, यत्र धनं तत्र न, ततः पूर्वस्यां दिशि धनत्वात् स्तोका व्यन्तराः, तेभ्योऽपरस्यां दिशि विशेषाधिकाः, अधोलौकिकग्रामेषु सुषिरसंभवात्, तेभ्योऽप्युत्तरस्यां दिशि विशेषाधिकाः, स्वस्थानतया नगरावासबाहुल्यात्, तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, अतिप्रभूतनगरावासबाहुल्यात् ।

तथा सर्वस्तोका ज्योतिष्काः पूर्वस्यां पश्चिमायां च दिशि, चन्द्रादित्यद्वीपेषूद्यानकल्पेषु कतिपयानामेव तेषां भावात्, तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, विमानबाहुल्यात् कृष्णपाक्षिकाणां दक्षिणदिग्भावित्वाच्च, तेभ्योऽप्युत्तरस्यां दिशि विशेषाधिकाः, यतो मानसे सरसि बहवो ज्योतिष्काः क्रीडास्थानमिति क्रीडनव्यापृता नित्यमासते, मानसरतसि च ये मत्स्यादयो जलचरास्ते आसन्नविमानदर्शनतः समुत्पन्नजातिस्मरणाः किञ्चिद् व्रतं प्रतिपद्यानशनादि च कृत्वा कृतनिदानस्तत्रोत्पद्यन्ते ततो भवन्ति उत्तराहा दाक्षिणात्येभ्यो विशेषाधिकाः ॥

तथा सौधर्मे कल्पे सर्वस्तोकाः पूर्वस्यां पश्चिमायां च दिशि वैमानिका देवाः, यतो यान्यावलिकाप्रविष्टानि विमानानि तानि चतसृष्वपि दिक्षु तुल्यानि, यानि पुनः पुष्पावकीर्णानि तानि प्रभूतानि असङ्ख्येययोजनविस्तृतानि, तानि च दक्षिणस्यामुत्तरस्यां दिशि नान्यत्र, ततः सर्वस्तोकाः पूर्वस्यां पश्चिमायां च दिशि, तेभ्य उत्तरस्यां दिशि असङ्ख्येयगुणाः, पुष्पावकीर्णकविमानानां बाहुल्यात् असङ्ख्येयोजनविस्तृतत्वाच्च, तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, कृष्णपाक्षिकाणां प्राचुर्येण तत्र गमनात् । एवमीशानसनत्कुमारमाहेन्द्रकल्पसूत्राण्यपि भावनीयानि ।

ब्रह्मलोककल्पे सर्वस्तोकाः पूर्वोत्तरपश्चिमदिग्भाविनो देवाः, यतो बहवः कृष्णपाक्षिकास्तिर्यग्योनयो दक्षिणस्यां दिशि समुत्पद्यन्ते शुक्लापाक्षिकाश्च स्तोका इति पूर्वोत्तरपश्चिमदिग्भाविनः सर्वस्तोकाः, तेभ्यो दक्षिणस्यां दिशि असङ्ख्येयगुणाः, कृष्णपाक्षिकाणां बहूनां तत्रोत्पादात् ।एवं लान्तकशुक्रसहस्रारसूत्राण्यपि भावनीयानि ।

आनतादिषु पुनर्मनुष्या एवोत्पद्यन्ते, तेन प्रतिकल्पं प्रतिग्रैवेयकं प्रत्यनुत्तरविमानं चतसृषु दिक्षु प्रायो बहुसमा वेदितव्याः, तथा चाह-

'तेण परं बहुसमोववन्नगा समणाउसो !' इति ॥ सर्वस्तोकाः सिद्धा दक्षिणस्यामुत्तरस्यां च दिशि, कथमिति चेत् ?, उच्यते, इह मनुष्या एव सिध्यन्ति, नान्ये, मनुष्या अपि सिध्यन्तो येष्वाकाशप्रदेशेष्विह चरमसमयेऽवगाढास्तेष्वेवाकाशप्रदेशेषूर्ध्वमपि गच्छन्ति तेष्वेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चोपर्यवतिष्ठन्ते न मनागपि वक्रं गच्छन्ति,

सिध्यन्ति च तत्र दक्षिणस्यां दिशि पञ्चसु भरतेषु उत्तरस्यां दिशि पञ्चस्वैरावतेषु मनुष्या अल्पाः, क्षेत्रस्याल्पत्वात् सुषमसुषमादौ च सिधद्यभावादिति तत्क्षेत्रसिद्धाः सर्वस्तोकाः, तेभ्यः पूर्वस्यां दिशि सङ्ख्येयगुणाः, पूर्वविदेहाना भरतैरावतक्षेत्रेभ्यः सङ्ख्येयगुणतया तद्गतमनुष्याणामपि सङ्ख्येयगुणत्वात् तेषां च सर्वकालं सिद्धिभावात्, तेभ्यः पश्चिमायां दिशि विशेषाधिकाः, अधोलोकिकग्रामेषु मनुष्यबाहुल्यात् । गतं दिग्द्वारं इदानीं गतिद्वारम्, तत्रेदमादिसूत्रम्—

—: पदं – ३ – दारं – २ :– "गतिः" :—

मू. (२६१) *एएसि णं भंते ! नेरइयाणं तिरक्खजोणियाणं मणुस्साणं देवाणं सिद्धाण य पंचगति० समणेणं कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा सव्वत्थोवा मणुस्सा नेरइया असंखेज्जगुणा देवा असंखेज्जगुणा सिद्धा अनंतगुणा तिरिक्खजोणिया अनंतगुणा ।। एएसि णं भंते ! नेरइयाणं तिरिक्खजोणियाणं तिरिक्खजोणीणीणं मणुस्साणं मणुस्सीणं देवाणं देवीणं सिद्धाण य अट्ठगति० समसेणं कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवाओ मणुस्सीओ, मणुस्सा असंखेज्जगुणा, नेरइया असंखेज्जगुणा, तिरिक्खजोणियीओ असंखेज्जगुणाओ, देवा असंखेज्जगुणा, देवीओ संखेज्जगुणाओ, सिद्धा अनंतगुणा, तिरिक्खजोणिया अनंतगुणा ।।*

वृ. सर्वस्तोका मनुष्याः, षन्नवतिच्छेदनकच्छेद्यराशिप्रमाणत्वात्, स च षन्नवतिच्छेदनकदायी राशिरग्रे दर्शयिष्यते, तेभ्यो नैरयिका असङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशेः सम्बन्धिनि प्रथमवर्गमूले द्वितीयवर्गमूलेन गुणिते यावान् प्रदेशशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभः प्रदेशास्तावत्प्रमाणत्वात्, तेभ्यो देवा असङ्ख्येयगुणाः, व्यन्तराणां ज्योतिष्काणां च प्रत्येकं प्रतरासङ्ख्येयभागवर्तिश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यः सिद्धा अनन्तगुणाः, अभव्येभ्योऽनन्तगुणत्वात्, तेभ्यस्तिर्यग्योनिका अनन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात् ।

तदेवं नेरयिकतिर्यग्योनिकमनुष्यदेवसिद्धरूपाणां पञ्चनामल्पबहुत्वमुक्तम्, इदानीं नैरयिकतिर्यग्योनिकतैर्यग्योनिकीमनुष्यामानुषीदेवदेवीसिद्धलक्षणानामष्टानामल्पबहुत्वमभिधित्सुरिदमाह—सर्वस्तोका मानुष्यो – मनुष्यस्त्रियः, सङ्ख्येयकोटीकोटीप्रमाणत्वात्, ताभ्यो मनुष्या असङ्ख्येयगुणाः, इह मनुष्या इति संमूर्च्छनजा अपि गृह्यन्ते, वेदस्याविवक्षणात्, ते च संमूर्च्छनजा वान्तादिषु नगरनिर्द्धमनान्तेषु जायमाना असङ्ख्येयाः प्राप्यन्ते, तेभ्यो नैरयिका-असङ्ख्येयगुणाः, मनुष्या हि उत्कृष्टपदे ऽपि श्रेणयसङ्ख्येयभागगतप्रदेशराशिप्रमाणा लभ्यन्ते नैरयिकास्त्वङ्गुलमात्रक्षेत्रप्रदेशराशिसत्कतृतीयवर्गमूलगुणितप्रथमवर्गमूलप्रमाणश्रेणिगताकाश प्रदेशराशिप्रमाणाः ततो भवन्त्यसङ्ख्येयगुणाः तेभ्यस्तिर्यग्योनिकाः स्त्रियोऽसङ्ख्येयगुणाः, प्रतरासङ्ख्येयभागवत्तच्यसङ्ख्येयश्रेणिनभः- प्रदेशराशिप्रमाणत्वात्, ताभ्योऽपि देवा असङ्ख्येयगुणाः, असङ्ख्येयगुणप्रतरासङ्ख्येयभागवत्य- सङ्ख्येयश्रेणिगतप्रदेशराशिमानत्वात्, तेभ्योऽवि देव्यः सङ्ख्येयगुणाः, द्वात्रिंशद्गुणत्वात्, ताग्योऽपि सिद्धा अनन्तगुणाः, तेभ्योऽपि तिर्यभ्यो निका अनन्तगुणाः, अत्र युक्तिः प्रागेवोक्ता ।। गतं गतिद्वारम् ।। इदानीं इन्द्रियद्वारमधिकृत्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-: पदं - ३ - दारं - ३ :- "इन्द्रियं":-

मू. (२६२) *एएसि णं भंते! सइंदियाणं एगिंदियाणं बेइंदियाणं तेइंदियाणं चउरिंदियाणं पंचिंदियाणं अनिंदियाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा पंचिंदिया चउरिंदिया विसेसाहिया तेइंदिया विसेसाहिया बेइंदिया विसेसाहिया अनिंदिया अनंतगुणा एगिंदिया अनंतगुणा सइंदिया विसेसाहिया ॥*

एएसि णं भंते! सइंदियाणं एगिंदियाणं बेइंदियाणं तेइंदियाणं चउरिंदियाणं पंचिंदियाणं अपज्ञत्तगाणं कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा? गोयमा! सव्वत्थोवा पंचिंदिया अपज्ञत्तगा चउरिंदिया अपज्ञत्तगा विसेसाहिया तेइंदिया अपज्ञत्तगा विसेसाहिया बेइंदिया अपज्ञत्तगा विसेसाहिया एगिंदिया अपज्ञत्तगा अनंतगुणा सइंदिया अपज्ञत्तगा विसेसाहिया ॥

एएसिं णं भंते! सइंदियाणं एगिंदियाणं बेइंदियाणं तेइंदियाणं चउरिंदियाणं पंचिंदियाणं पज्ञत्ताणं कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा चउरिंदिया पज्ञत्तगा पंचिंदिया पज्ञत्तगा विसेसाहिया बेइंदिया पज्ञत्तया विसेसाहिया तेइंदिया पज्ञत्तगा विसेसाहिया एगिंदिया पज्ञत्तगा अनंतगुणा सइंदिया पज्ञत्तगा विसेसाहिया ॥

एएसि णं भंते! सइंदियाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा सइंदिया अपज्ञत्तगा सइंदिया पज्ञत्तगा संखेज्ञगुणा ॥

एएसिणं भंते! एगिंदियाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा! सव्वत्थोवा एगिंदिया अपज्ञत्तगा एगिंदिया पज्ञत्तगा संखेज्ञगुणा ।एएसि णं भंते! बेइंदियाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा! सव्वत्थोवा बेइंदिया पज्ञत्तगा बेइंदिया अपज्ञत्तगा असंखेज्ञगुणा

एएसि णं भंते! तेइंदियाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा! सव्वत्थोवा तेइंदिया पज्ञत्तगा तेइंदिया अपज्ञत्तगा असंखेज्ञगुणा एएसि णं भंते! चउरिंदियाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिता वा ?, गोयमा! सव्वत्थोवा चउरिंदिया पज्ञत्तगा चउरिंदिया अपज्ञत्तगा असंखेज्ञगुणा

एएसि णं भंते! पंचिंदियाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा! सव्वत्थोवा पंचेंदिया पज्ञत्तगा पंचेंदिया अपज्ञत्तगा असंखेज्ञगुणा

एएसि णं भंते सइंदियाणं एगिंदियाणं बेइंदियाणं तेइंदियाणं चउरिंदियाणं पंचिंदियाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्प वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा! सव्वत्थोवा चउरिंदिया पज्ञत्तगा पंचिंदिया पज्ञत्तगा विसेसाहिआ बेइंदिया पज्ञत्तगा विसेसाहिआ तेइंदिया पज्ञत्तगा विसेसाहिआ पंचिंदिया अपज्ञत्तगा असंखेज्ञगुणा चउरिंदिया अपज्ञत्तगा विसेसाहिआ तेइंदिया अपज्ञत्तगा विसेसाहिआ बेइंदिया अपज्ञत्तगा विसेसाहिआ एगिंदिया अपज्ञत्तगा अनंतगुणा सइंदिआ अपज्ञत्तगा विसेसाहिआ एगिंदिया पज्ञत्तगा संखेज्ञगुणा सइंदिआ पज्ञत्तगा विसेसाहिआ सइंदिया विसेसाहिआ ।

वृ. सर्वस्तोकाः पञ्चेन्द्रियाः सङ्ख्येययोजनकोटीकोटीप्रमाणविष्कम्भसुचीप्रमितप्रतरासङ्ख्येयय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भागवत्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यश्चतुरिन्द्रिया विशेषाधिकाः, विष्कम्भसूच्यास्तेषां प्रभूतसङ्ख्येययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि त्रीन्द्रिया विशेषाधिकाः-,तेषा विष्कम्भसूच्या प्रभूततरसङ्ख्येययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि द्वीन्द्रिया विशेषाधिकाः, तेषा विष्कम्भसूच्या प्रभूततमसङ्ख्येययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि द्वीन्द्रिया विशेषाधिकाः, तेषा विष्कम्भसूच्या प्रभूततमसङ्ख्येययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि अनिन्द्रिया अनन्तगुणाः,सिद्धानामनन्तत्वात्, तेभ्योऽपि एकेन्द्रिया अनन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात्, तेभ्योऽपि सेन्द्रिया विशेषाधिकाः द्वीन्द्रियादीनामपि तत्र प्रक्षेपात् तदेवमुक्तमेकमौधिकानामल्पबहुत्वम्, इदानीं तेषामेवापर्याप्तानां द्वितीयमल्पबहुत्वमाह–

सर्वस्तोकाः पञ्चेन्द्रिया अपर्याप्ताः, एकस्मिन् प्रतरे यावन्त्यङ्गुलासङ्ख्येयबागमात्राणि खण्डानि तावत्प्रमाणत्वात् तेषां, तेभ्यश्चतुरिन्द्रिया अपर्याप्ता विशेषाधिकाः, प्रभूताङ्गुला- सङ्ख्येयभागखण्डप्रमाणत्वात्, तेभ्यस्त्रीन्द्रिया अपर्याप्ता विशेषाधिकाः, प्रभूततरप्रतराङ्गुलासङ्ख्येय- भागखण्डमानत्वात्, तेभ्योऽपि द्वीन्द्रिया अपर्याप्ता विशेषाधिकाः, प्रभूततमप्रतराङ्गुलासङ्ख्येय- भागखण्डप्माणत्वात्, तेभ्य एकेन्द्रिया अपर्याप्ता अनन्तगुणाः, वनस्पतिकायिकानामपर्याप्तानाम- नन्ततया सदा प्राप्यमाणत्वात्, तेभ्योऽपि सेन्द्रिया अपर्याप्ता विशेषाधिकाः, द्वीन्द्रियाद्यपर्याप्तनामपि तत्र प्रक्षेप्ता गतं द्वितीयमल्पबहुत्वम्, अधुना एतेषामेव पर्याप्तनामल्पबहुत्वमाह–सर्वस्तोका- श्चतुरिन्द्रियाःपर्याप्ताः, यतोऽल्पायुषश्चतुरिन्द्रियास्ततः प्रभतकालमवस्थानाभावात् पृच्छासमये स्तोका अवाप्यन्ते, ते च स्तोका अपि प्रतरे यावन्त्यङ्गुलंसङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणा वेदितव्याः, तेभ्यः पञ्चेन्द्रियाः पर्याप्ता विशेषाधिकाः, प्रभूतप्रतराङ्गुलसङ्ख्येयभा गखण्डमानत्वात्, तेभ्योऽपि द्वीन्द्रियाः पर्याप्ता विशेषाधिकाः, प्रभूततरप्रतराङ्गुलसङ्ख्येयभागखण्डमानत्वात्, तेभ्योऽपि त्रीन्द्रियाः पर्याप्ता विशेषाधिकाः, स्वभावत एव तेषां प्रभूततमप्रतराङ्गुलसख्ख्येयभागखण्डप्रमाणत्वात्, तेभ्य एकेन्द्रियाः पर्याप्ता अनन्तगुणाः, वनस्पतिकायिकानां पर्याप्तानामनन्तमानत्वात्, तेभ्यः सेन्द्रियाः पर्याप्ता विशेषाधिकाः, द्वीन्द्रियादीनामपि पर्याप्तानां तत्र प्रक्षेपात्। (गतं) तृतीयमल्पबहुत्वं, सम्प्रत्येतषामेव सेन्द्रियादीनां प्रत्येकं पर्याप्तापर्याप्तगतान्यल्पबहुत्वान्याह–

सर्वस्तोकाः सेन्द्रिया अपर्याप्तकाः, इह सेन्द्रियेषु मध्ये एकेन्द्रिया एव बहवः तत्रापि च सूक्ष्माः तेषां सर्वलोकापन्नत्वात् सूक्ष्माश्चापर्याप्ताःसर्वस्तोकाः पर्याप्ताः सङ्ख्येयगुणा इति सेन्द्रिया अपर्याप्ताः सर्वस्तोकाः, पर्याप्ताः सङ्ख्येयगुणाः, एवमेकेन्द्रिया अपि अपर्याप्ताः सर्वस्तोकाः, पर्याप्ताः सङ्ख्येयगुणा भावनीयाः। तथा सर्वस्तोका द्वीन्द्रियाःपर्याप्तकाः, यावन्ति प्रतरेयऽङ्गुलस्य सङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात् तेषां, तेभ्योऽपर्याप्ताः असङ्ख्येयगुणाः, प्रतरगताङ्गुलासङ्ख्येयभागखण्डप्रमाणत्वात्, एवं त्रिचतुरिन्द्रियपञ्चेन्द्रियाल्पबहुत्वान्यपि वक्तव्यानि। गतं षडल्पबहुत्वात्मकं चतुर्थमल्पबहुत्वम्। सम्प्रत्येतेषां सेन्द्रियादीनां समुदितानां पर्याप्तापर्याप्तानामल्पबहुत्वमाह–

'एएसि णं भंते' इत्यादि। इदं प्रागुक्तद्वितीयतृतीयाल्पबहुत्वभावनानुसारेण स्वयं भावनीयं, तत्त्वतो भावितत्वात्। गतमिन्द्रियद्वारम्, इदानीं कायद्वारमधिकृत्याह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-: पदं - ३ - दारं - ४ :- "कायः" :-

मू. (२६३) *एएसि णं भंते ! सकाइयाणं पुढविकाइयाणं आउकाइयाणं तेउकाइयाणं वाउकाइयाणं वणस्सइकाइयाणं तसकाइयाणं अकाइयाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा तसकाइया तेउकाइया असंखेज्जगुणा पुढविकाइया विसेसाहिया आउकाइया विसेसाहिया वाउकाइया विसेसाहिया अकाइया अनंतगुणा वणस्सइकाइया अनंतगुणा सकाइया विसेसाहिया ॥*

एएसि णं भंते ! सकाइयाणं पुढविकाइयाणं आउकाइयाणं तेउकाइयाणं वाउकाइयाणं वणस्सइकाइयाणं तसकाइयाणं अपज्जत्तगाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा तसकाइया अपज्जत्तगा तेउकाइया अपज्जत्तगा असंखेज्जगुणा पुढविकाइया अपज्जत्तगा विसेसाहिया आउकाइया अपज्जत्तगा विसेसाहिया वाउकाइया अपज्जत्तगा विसेसाहिया वणस्सइकाइया अपज्जत्तगा अनंतगुणा सकाइया अपज्जत्तगा विसेसाहिया ॥

एएसि णं भंते ! सकाइयाणं पुढविकाइयाणं आउकाइयाणं तेउकाइयाणं वाउकाइयाणं वणस्सइकाइयाणं तसकाइयाणं पज्जत्तगाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा तसकाइया पज्जत्तगा तेउकाइया पज्जत्तगा असंखेज्जगुणा पुढविकाइया पज्जत्तगा विसेसाहिया आउकाइया पज्जत्तगा विसेसाहिया वाउकाइया पज्जत्तगा विसेसाहिया वणस्सइकाइया पज्जत्तगा अनंतगुणा सकाइया पज्जत्तगा विसेसाहिया ॥

एएसि णं भंते ! सकाइयाणं पज्जत्तापज्जत्तगाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा सकाइया अपज्जत्तगा सकाइया पज्जत्तगा संखेज्जगुणा

एएसि णं भंते ! पुढविकाइयाणं पज्जत्तापज्जत्तगाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा पुढविकाइया अपज्जत्तगा पुढवीकाइया पज्जत्तगा संखेज्जगुणा ॥ एएसि णं भंते ! आउकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वाबहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा आउकाइया अपज्जत्तगा आउकाइया पज्जत्तगा संखेज्जगुणा ॥

एएसिणं भंते ! तेउकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा तेउकाइया अपज्जत्तगा तेउकाइया पज्जत्तगा संखेज्जगुणा

एएसि णं भंते ! वाउकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा वाउकाइया अपज्जत्तगा वाउकाइया पज्जत्ता संखेज्जगुणा ॥ एएसि णं भंते ! वणस्सइकाइयाणं पज्जत्तपज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा वणस्सइकाइया अपज्जत्तगा वणस्सइकाइया पज्जत्तगा संखेज्जगुणा ॥

एएसि णं भंते ! तसकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, सव्वत्थोवा तसकाइया पज्जत्तगा अपज्जत्तगा असंखेज्जगुणा ॥

एएसि णं भंते !सकाइयाणं पुढविकाइआणं आउकाइआणं तेउकाइआणं वाउकाइआणं वणस्सइकाइआणं तसकाइयाण य पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा तसकाइआ पज्ञत्तगा तसकाइआ अपज्ञत्तगा संखेज्रगुणा तेउकाइआ अपज्ञत्तगा असंखेज्रगुणा पुढविकाइआ अपज्ञत्ता विसेसाहिया वाउकाइआ अपज्ञत्तगा विसेसाहिआ तेउकाइआ पज्ञत्तगा संखेज्रगुणा पुढविकाइआ पज्ञत्ता विसेसाहआ आउकाइआ पज्ञत्ता विसेसाहिया वाउकाइआ पज्ञत्ता विसेसाहिआ वणस्सइकाइआ अपज्ञत्ता अनंतगुणा सकाइआ अपज्ञत्तगा विसेसाहिया वणस्सइकाइआ पज्ञत्तगा विसेसाहिआ सकाइया विसेसाहिया

वृ. सर्वस्तोकास्त्रसकायिकाः, द्वीन्द्रियादीनामेव त्रसकायिकत्वात्, तेषा च शेषकायापेक्षया अल्पत्वात्, तेभ्यस्तेजःकायिका असङ्घेयगुणाः, असङ्घेयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यः पृथिवीकायिका विशेषाधिकाः, प्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्योऽप्कायिका विशेषाधिकाः, प्रभूततरासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यो वायुकायिका विशेषाधिकाः, प्रभूततमासङ्ख्येयलोकाकाशप्रदेशमानत्वात्, तेभ्योऽकायिका अनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यो वनस्पतिकायिका अनन्तगुणाः, अनन्तलोकाकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यः सकायिका विशेषाधिकाः, पृथिवीकायिकादीनामपि तत्र प्रक्षेपात् । उक्तमौधिकानामल्पबहुत्वम्, इदानीमेतेषामेववापर्याप्तानां द्वितीयमल्पबहुत्वामाह–

'एएसि णं भंते ! सकाइयाणं' इत्यादि सुगमं ।। सम्प्रत्येतेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह– 'एएसि णं भंते ! सकाइयाणं' इत्यादि सुगमं, सामप्रतमेतेषामेव सकायिकादीनां प्रत्येकं पर्याप्तापर्याप्तगमल्पबहुत्वमाह– 'एएसि णं भंते !सकाइयाणं पज्ञत्तापज्ञत्ताणं' इत्यादि सुगमम् सम्प्रत्येतेषामेव सकायिकादीनां समुदितानां पर्याप्तापर्याप्तानामल्पबहुत्वमाह–

'एएसि णं भंते ! सकाइयाणं' इत्यादि, सर्वस्तोकास्त्रसकायिकाः पर्याप्तकाः, तेभ्यस्त्रसकायिका एवापर्याप्तका असङ्घ्येयगुणाः, द्वीन्द्रियादीनामपर्याप्तानां पर्याप्तद्वीन्द्रियादिभ्योऽसङ्घ्येयगुणत्वात्, ततः तेजःकायिका अपर्याप्ता असङ्घ्येयगुणाः, असङ्घ्ययोलाकाशप्रदेशप्रमाणत्वात्, ततः पृथिव्यम्बुवायवोऽपर्याप्तकाः क्रमेण विशेषाधिकाः, ततः तेजःकायिकाः पर्याप्ताः सङ्घ्येगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानां सङ्घेयगुणत्वात्, ततःपृथिव्याब्वायवः पर्याप्ताः क्रमेण विशेषाधिकाः, ततो वनस्पतयोऽपर्याप्ता अनन्तगुणाः, पर्याप्ताः सङ्घेयगुणाः ।।

तदेवं कायद्वारे सामान्येन पञ्च सूत्राणि प्रतिपादितानि, सम्प्रत्यस्मिन्नेव द्वारे सूक्ष्मबादरादिभेदेन पञ्चदश सूत्राण्याह–

मू. (२६४) *एएसि णं भंते ! सुहुमाणं सुहुमपुढविकाइयाणं सुहुमआउकाइआणं सुहुमतेउकाइआणं सुहुमवाउकाइआणं सुहुमवणस्सइकाइयाणं सुहुमनिओयाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा सुहुमतेउकाइया सुहुमपुढविकाइआ विसेसाहिया सुहुमआउकाइआ विसेसाहिया सुहुमवाउकाइआ विसेसाहिआ सुहुमनिगोदा असंखेज्रगुणा सुहुमवणस्सइकाइया अनंतगुणा सुहुमा विसेसाहिया ।।*

एएसि णं भंते ! सुहुमअपज्ञत्तगाणं सुहुमपुढविअपज्ञत्तगाणं सुहुमआउअपज्ञत्तयाणं सुहुमतेउअपज्ञत्तयाणं सुहुमवण० अपज्ञत्तयाणं सुहुमनिगोदाअपज्ञत्ताण य कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमतेउअपज्ञत्तया सुहुमपुढवि० अप० विसे० सुहुमआउ० अप० विसे० सुहुमवाउ० अप० विसे० सुहुमनिगोदा अप० असंखे० सुहुमवण० अपज्ञत्तया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणंतगुणा सुहुमा अपज्जत्तया विसेसा० एएसि णं भंते ! सुहुमपज्जत्त० सुहुमपुढविका० पज्जत्त० सुहुमआउका० पज्जत्त० सुहुमते- उका० पज्जत्त० सुहुमवाउका० पज्जत्तगाणं सुहुमवणस्सइका० पज्जत्त० सुहुनमनिगोदपज्जत्तगाण य कयरे कयरेहिंतो अप्पा वा ४ ?,

गोयमा ! सव्वत्थोवा सुहुमतेउका० पज्जत्तगा सुहुमपुढविका० पज्जत्तगा विसेसा० सुहुमआउका० पज्जत्तगा विसेसा० सुहुमआउका० पज्जत्तगा विसेसा० सुहुमवाउका० पज्जत्त० विसेसा० सुहुमनिगोया पज्जत्तगा असंखेज्जगुणा सुहुमवण० पज्जत्त० अनंत० सुहुमपज्जत्त० विसेसा० एएसि णं भंते ! सुहुमाणं पज्जत्तापज्जत्तगाणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमअपज्जत्तगा सुहुमपज्जत्तगा संखे० ! एएसि णं भंते ! सुहुमपुढवी० पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमपुढविकाइया अपज्जत्तया सुहुमपुढविकाइया पज्जत्तया संखेज्जगुणा । एएसि णं भंते ! सुहुमआउ० पज्जत्तापज्जत्तगाणं कयरे कयरेहिंतो अप्पा ४ गोयमा ! सव्वत्थोवा सुहुमआउका० अपज्जत्त० सुहुमाउका० पज्जत्तगा संखेज्जगुणा । एएसि णं भंते ! सुहुमतेउ० पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमतेउका० अपज्जत्त० सुहुमतेउका० पज्जत्तां संखे० ।

एएसि णं भंते ! सुहुमवाउका० पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा सव्वत्थोवा सुहुमवाउका० अपज्जत्त० वाउका० पज्जत्त० संखेज्ज० ।

एएसि णं भंते ! सुहुमवण० पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमवण० अपज्ज० सुहुमवणस्सइपज्जत्त० संखे० ।

एएसि णं भंते ! सुहुमनिगोयाणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमनिगोया अपज्जत्त० सुहुमनिगोया पज्जत्त० संखेज्जगुणा ।

एएसि णं भंते ! सुहुमाणं सुहुमपुढ० सुहुमआउ० सुहुमतेउ० सुहुमवाउ० सुहुमवण० सुहुमनिगोदाण य पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमतेउकाइया अपज्जत्तया सुहुमपुढवीअपज्ज० विसेसा० सुहुमआउ० अपज्ज० विसेसा० सुहुमवाउ० अपज्ज० विसेसा० सुहुमतेउ० अपज्ज० संखेज्जगुणा सुहुमपुढवीपज्जत्त० विसेसा० सुहुमाउ० पज्जत्त० विसेसा० सुहुमवाउ० पज्जत्त० विसेसा० सुहुमनिगोदा अपज्ज- असंखे० सुहुमनिगोदा पज्जत्त० संखे० सुहुमवण० अपज्ज० अणंतगुणा सुहुमअपज्ज० विसेसा० सुहुमवण० पज्जत्त० संखेज्ज० सुहुमपज्जत्त० विसेसा० सुहुमा विसेसाहिया ।

वृ. सर्वस्तोकाः सूक्ष्माः तेजःकायिकाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वा, तेभ्यः सूक्ष्मपृथिवीकायिका विशेषाधिकाः, प्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यः सूक्ष्माप्कायिका विशेषाधिकाः, प्रभूततरासङ्ख्येयलोकाकाशप्रदेशमानत्वात्, तेभ्यः सूक्ष्मवायुकायिका विशेषाधिकाः प्रभूततमासङ्ख्येयलोकाकाशप्रदेशराशिमानत्वात्, तेभ्यः सूक्ष्मनिगोदा असङ्ख्येयगुणाः, सूक्ष्मग्रहणं बादरव्यवच्छेदार्थं, द्विविधा हि निगोदाः-सूक्ष्मा बादराश्च, तत्र बादराः सूरणकन्दादिषु, सूक्ष्माः सर्वलोकापन्नाः, ते च प्रतिगोलकमसङ्ख्येया इति सूक्ष्मवायुकायिकेभ्योऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मवनस्पतिकायिका अनन्तगुणाः, प्रतिनिगोदमनन्तानां जीवानां भावात्, तेभ्यः सामानिकाः सूक्ष्मजीवा विशेषाधिकाः, सूक्ष्मपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतमौधिकानामिदमल्पबहुत्वम्, इदानीमेतेषामेवापर्याप्तानामाह– 'एएसि णं भंते ! सुहुम-अपज्जत्तगाणं' इत्यादि, सर्वं प्राग्वद्भावनीयम् । सम्प्रत्येतेषामेव पर्याप्तनां तृतीयमल्पबहुत्वमाह–

'एएसि णं भंते ! सुहुमपज्जत्तगाणं' इत्यादि, इदमपि प्रागुक्तक्रमेणैव भावनीयं । अधुना अमीषामेव सूक्ष्मादीनां प्रत्येकं पर्याप्तपर्याप्तगतान्यलप्बहुत्वान्याह–

'एएसि णं भंते ! सुहुमाणं पज्जत्तापज्जत्ताणं' इत्यादि, इह बादरेषु पर्याप्तेभ्योऽपर्याप्ता असङ्खेयगुणाः, एकैकपर्याप्तनिश्रयाऽसङ्खेययानामपर्याप्तानामुत्पादात्, तथा चोक्तं प्राक् प्रथमे प्रज्ञापनाख्ये पदे– ''पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जतअथ एगो तत्त नियमा असंखेज्ञा'' इति, सूक्ष्मेषु पुनर्नायं क्रमः, पर्याप्ताश्चापर्याप्तापेक्षया चिरकालावस्थायिन इति सदैव ते बहवो लभ्यन्ते, तत उक्तं सर्वस्तोकाः सूक्ष्मा अपर्याप्ताः, तेभ्यःसूक्ष्माः पर्याप्तकाः सङ्घ्येयगुणाः, एवं पृथिवीकायिकादिष्वपि प्रत्येकं भावनीयम् । गतं चतुर्थमल्पबहुत्वम्, इदानीं सर्वेषा समुदितानां पर्याप्तपर्याप्तगतं पञ्चममल्पबहुत्वमाह– 'एएसि णं भंते ! सुहुमाणं सुहुमपुढविकाइयाणं' इत्यादि, सर्वस्तोकाः सूक्ष्मतेजःकायिका अपर्याप्ताः, कारणं प्रागेवोक्तं, तेभ्यः सूक्ष्मपृथिवीकायिका अपर्याप्ता विशेषाधिकाः तेभ्यः सूक्ष्माप्कायिका अपर्याप्ता विशेषाधिकाः तेभ्यः सूक्ष्मवायुकायिका अपर्याप्ता विशषाधिकाः, अत्रापि कारणं प्रागेवोक्तं, तेभ्यः सूक्ष्मतेजःकायिकाः पर्याप्ताः सङ्घ्येयगुणाः, अपर्याप्तेभ्यो हि पर्याप्ताःसङ्घ्येयगुणा इत्यनन्तरं भावितं,

–तत्र सर्वस्तोकाःसूक्ष्मतेजःकायिका अपर्याप्ता उक्ताः इतरे च सूक्ष्मापर्याप्तपृथिवी-कायिकादयो विशेषाधिकाः, विशेषाधिकत्वं च मनागधिकत्वं न द्विगुणत्वं न त्रिगुणत्वं वा, ततः सूक्ष्मतेजःकायिकेभ्योऽपर्याप्तेभ्यः पर्याप्ताः सूक्ष्मतेजःकायिकाः सङ्घ्येयगुणाः सन्तःसूक्ष्मवायुकायि-कापर्याप्तेभ्योऽपि सङ्घ्येयगुणा भवन्ति,

तेभ्यःसूक्ष्मपृथिवीकायिकाः पर्याप्ताः विशेषाधिकाः तेभ्यः सूक्ष्माप्कायिकाः पर्याप्ता विशेषाधिकाः तेभ्योऽपि सूक्ष्मवायुकायिकाः पर्याप्ता विशेषाधिकाः तेभ्यः सूक्ष्मनिगोदाः अपर्याप्ता असङ्खेयगुणाः, तेषामतिप्राचुर्यात्, तेभ्यः सूक्ष्मनिगोदाःपर्याप्ताःसङ्घ्येयगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघतः सङ्घ्येयगुणत्वात्, तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्तका अनन्तगुणाः प्रतिनिगोदमनन्तानां तेषां भावात्, तेभ्यः सामान्यतःसूक्ष्मा अपर्याप्तका विशेषाधिकाः, सूक्ष्मपृथिवी-कायिकादीनामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्तकाः सङ्खेयगुणाः, सूक्ष्मेषु ह्यपर्याप्तेभ्यः पर्याप्तकाः सङ्घ्येयगुणाः, यद्यापान्तराले विशेषाधिकत्वं तदल्पमिति न सङ्घ्येयगुण-त्वव्याघातः, तेभ्यः सूक्ष्माः पर्याप्तका विशेषाधिकाः, सूक्ष्मपृथिव्यादीनामपि पर्याप्तानां तत्र प्रक्षेपात्, तेभ्यःसूक्ष्मा विशेषाधिकाः, अपर्याप्तानमपि तत्र प्रक्षेपात्, । तदेवमुक्तानि सूक्ष्माश्रितानि पञ्च सूत्राणि, सम्प्रति बादराश्रितानि पञ्चोक्तक्रमेणा- भिधित्सुराह–

मू. (२६५) *एएसि णं बंते! बादराणं बादरपुढविकाइयाणं बादरआउकाइयाणं बादरतेउ-काइयाणं बादरवाउकाइयाणं बादरवणस्सइकाइयाणं पत्तेयसरीरबादरवणस्सइकाइयाणं बादरनिगोदाणं बादरतसकाइयाणं कयरे कयरेहिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवा बादरतस-काइया बादरतेउकाइया असंखेज्ञगुणना पत्तेयसरीरबादरवणस्सइकाइया असंखेज्ञगुणा बादरनिगोदा असंखेज्ञगुणा बादरा पुढवी० असंखे० बादरा आउकाइया असं० बादरा वाउकाइया*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असंखे० बादरा वणस्स० अनंतगुणा बादरा विसेसाहिया।

एएसि णं भंते ! बादरपुढविकाइयअपज्ञत्तगाणं बादरआउअपज्ञत्तगाणं बादरतेउअ-पज्ञत्तगाणं बादरवाउअपज्ञत्तगाणं बादरवणस्सइअपज्ञत्तगाणं पत्तेयसरीरबादरवणस्सइअपज्ञत्त-गाणं बादरनिगोदअपज्ञत्तगाणं बादरतसकाइयअपज्ञत्तगाण य कयरे कयरेहिंतो अप्प वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बादरतसकाइया अपज्ञत्तगा बादरतेउकाइया अपज्ञत्तगा असंखेज्ञगुणा पत्तेयसरीरबादरवणस्सइकाइया अपज्ञत्तगा असखेज्ञगुणा बादरनिगोदा अपज्ञत्तगा असंखेज्ञगुणा बायरपुढवीकाइया अपज्ञत्तगा असंखेज्ञगुणा बादरआउकाइया अपज्ञत्तगा असंखेज्ञगुणा बादरवाउकाइया अपज्ञत्तगा असंखेज्ञगुणा बादरवणस्सइकाइया अपज्ञत्तगा अनंतगुणा बादरअपज्ञत्तगा विसेसाहिया।

एएसि णं भंते ! बायरपज्ञत्तयाणं बादरपुढवीकाइयाणं पज्ञत्तयाणं बायरआउकाइयाणं पज्ञत्तयाणं बायरतेउकाइयाणं पज्ञत्तयाणं बायरवाउकाइयाणं पज्ञत्तयाणं पत्तेयसरीरबायर-वणस्सइकाइयाणं पज्ञत्तयाणं बायरनिगोदपज्ञत्तयाणं बायरतसकाइयपज्ञत्तगाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरतेउकाइया पज्ञत्तया बायरतसकाइया पज्ञत्तया असंखेज्ञगुणा पत्तेयसरीरबायरवणस्सइकाइया पज्ञत्तया असंखेज्ञगुणा बायरनिगोदा पज्ञत्तया असंखेज्ञगुणा बादरपुढवीकाइया पज्ञत्तया असंखेज्ञगुणा बायरआउकाइया पज्ञत्तया असंखेज्ञगुणा बायरवाउकाइया पज्ञत्तया असंखेज्ञगुणा बायरवणस्सइकाइया पज्ञत्तया अनंतगुणा बायरपज्ञत्तया विसेसाहिया।

एएसि णं भंते ! बायराणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरपज्ञत्तया बायरअपज्ञत्तया असंखेज्ञगुणा। एएसि णं भंते ! बायरपुढवीकाइयाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरपुढवीकाइया पज्ञत्तया बायरपुढविकाइया अपज्ञत्तया असंखेज्ञगुणा। एएसि णं भंते ! बायरआउकाइयाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायराउकाइया पज्ञत्तया बायरआउकाइया अपज्ञत्तया असंखेज्ञगुणा।

एएसि णं भंते ! बायरतेउकाइयाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गो० सव्वत्थोवा बायरतेउकाइया पज्ञत्तया अपज्ञत्तया असंखेज्ञगुणा

एएसि णं भंते ! बायरवाउकाइयाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिं तो अप्पावा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बादरवाउकाइया पज्ञत्तया बायरवाउकाइया अपज्ञत्तया असंखेज्ञगुणा। एएसि णं भंते ! बायरवणस्सइकाइयाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा बायरवणस्सइकाइया पज्ञत्तया बायरवणस्सइकाइया अपज्ञत्तया असंखेज्ञगुणा।

एएसि णं भंते ! पत्तेयसरीरबायरवणस्सइकायइयाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा पत्तेयसरीरबायरवणस्सइकाइया पज्ञत्तया पत्तेयसरीरबायरवणस्सइकाइया अपज्ञत्तया असंखेज्ञगुणा। एएसि णं भंते !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बायरनिगोयाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बायरनिगोया पज्ञत्ता बायरनिगोया अपज्ञत्ता असंखेज्ञगुणा। एएसि णं भंते! बायरतसकाइयाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बायरतसकाइया पज्ञत्ता बायरतसकाइया अपज्ञत्ता असंखेज्ञगुणा।

एएसि णं भंते! बायराणं बायरपुढवीकाइयाणं बायरआउकाइयाणं बायरतेउकाइयाणं बायरवाउकाइयाणं बायरवणस्सइकाइयाणं पत्तेयसरीरबायरवणस्सइकाइयाणं बायरनिगोयाणं बायतसकाइयाणं पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा

—गोयमा! सव्वत्थोवा बायरतेउकाइया पज्ञत्तया बायरतसकाइया पज्ञत्तया असंखेज्ञगुणा बायरतसकाइया अपज्ञत्तया असंखेज्ञगुणा पत्तेयसरीरबायरवणस्सइकाइया पज्ञत्तया असंखेज्ञगुणा बायरनिगोया पज्ञत्तया असंखेज्ञगुणा बादरपुढवीकाइया पज्ञत्तया असंखेज्ञगुणा बायरआउकाइया पज्ञत्तया असंखेज्ञगुणा बायरवाउकाइया पज्ञत्तया असंखेज्ञगुणा बायरतेउकाइया अपज्ञत्तया असंखेज्ञगुणा पत्तेयसरीरबायरवणस्सइकाइया अपज्ञत्तया असंखेज्ञगुणा बायरनिगोया अपज्ञत्तया असंखेज्ञगुणा बायरपुढवीकाइया अपज्ञत्तया असंखेज्ञगुणा बायरआउकाइया अपज्ञत्तया असंखेज्ञगुणा बायरवाउकाइया अपज्ञत्तया असंखेज्ञगुणा बायरवणस्सइकाइया पज्ञत्तया अनंतगुणा बायरवणस्सइकाइया अपज्ञत्तया असंखेज्ञगुणा बायरअपज्ञत्तया विसेसा० बायरा विसेसा०।

वृ. 'एएसि णं भंते! बायराणं बायरपुढवीकाइयाणं' इत्यादि, सर्वस्तोका बादरत्रसकायिकाः, द्वीन्द्रियादीनामेव बादरत्रसत्वात्, तेषां च शेषकायेभ्योऽल्पत्वात्, तेभ्यो बादरतेजःकायिका असङ्ख्येयगुणाः, असङ्ख्ययलोकाकाशप्रदशप्रमाणत्वात्, तेभ्योऽपि प्रत्येकशरीरबादरवनस्पतिकायिका असङ्ख्येयगुणाः, स्थानस्यासङ्ख्येयगुणत्वात्, बादरेतजःकायिका हि मनुष्यक्षेत्रे एव भवन्ति, तथा चोक्तं द्वितीये स्थानाख्ये पदे—

"कहि णं भंते! बादरतेउकाइयाणं पज्ञत्तगाणं ठाणा पन्नत्ता?, गोयमा! सट्ठाणेणं अंतो मणुस्सखित्ते अड्ढाइज्ञेसु दीवसमुद्देसु निव्वाघाएणं पन्नरससु कम्मभूमीसु वाघाएणं पंचसु महाविदेहेसु, एत्थ णं बायरतेउकाइयाणं पज्ञत्तगाणं ठाणा पन्नत्ता" तथा "जत्थेव बायरतेउकाइयाणं पज्ञत्तगाणं ठाणा तत्थेव बायरतेउकाइयाणं अपज्ञत्तगाणं ठाणा पन्नत्ता" इति, बादरवनस्पतिकायिकास्तु त्रिष्वपि लोकेषु भवनादिषु, तता चोक्तं तस्मिन्नेव द्वितीये स्थानाख्ये पदे—

"कहि णं भंते! बायरवणस्सइकाइयाणं पज्ञत्तगाणं ठाणा पन्नत्ता?, गोयमा! सट्ठाणेणं सत्तसु घनोदहिसु सत्तसु घनोदहिवलयेसु अहोलोए पायालेसु भवणेसु भवणपत्थडेसु उड्ढलोए कप्पेसु विमाणेसु विमाणावलियासु विमाणपत्थडेसु तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वाविसु पुक्खरिणीसु दिहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव चलासएसु जलठाणेसु,

एत्थ णं बायरवणस्सइकाइयाणं पज्ञत्तगाणं ठाणा पन्नत्ता" तथा "जत्थेव बायरवणस्सइकाइयाणं पज्ञत्तगाणं ठाणा तत्थेव बायरवणस्सइकाइयाणं अपज्ञत्तगाणं ठाणा पन्नत्ता" इति, ततः क्षेत्रस्यासङ्ख्येयगुणत्वादुपपद्यन्ते बादरतेजःकायिकेभ्योऽसङ्ख्येयगुणाः प्रत्येकशरीरबादरवनस्पतिकायिकाः, तेभ्यो बादरनिगोदा असङ्ख्येयगुणाः, तेषामत्यन्तसूक्ष्मावगाहनत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलेषु सर्वत्रापि च भावात्, पनकसेवालादयो हि जलेऽवश्यंभाविनः ते च बादरानन्तकायिका इति, तेभ्योऽपि बादरपृथिवीकायिका असङ्ख्येयगुणाः, अष्टासु पृथिवीषु सर्वेषु विमानभवन पर्वतादिषु भावात्, तेभ्योऽसङ्ख्येयगुणा बादराप्कायिकाः समुद्रेषु जलप्राभूत्यात्, तेभ्यो बादरवायुकायिका असङ्ख्ययेगुणाः, सुषिरे सर्वत्र वायुसंभवात्, तेभ्यो बादरवनस्पतिकायिका अनन्तगुणाः, प्रतिबादरनिगोदमनन्तानं जीवानां भावात्, तेभ्यः सामान्यतो बादरा जीवा विशेषाधिकाः, बादरत्रसकायिकादीनामपि तत्र प्रक्षेपात्। गतमेकमौधिकानां बादराणामल्पबहुत्वम्, इदानीमेतेषामेवापर्याप्तानां द्वितायमाह- 'एएसि णं भंते! बायरापज्ञत्तगाणं' इत्यादि, सर्वस्तोका बादरत्रसकायिका अपर्याप्तकाः, युक्तिरत्र प्रागुक्तैव, तेभ्यो बादरतेजःकायिका अपर्याप्ता असङ्ख्येयगुणाः, असङ्ख्ययेलोकाकाश- प्रदेशप्रमाणत्वात्, इत्येवं प्रागुक्तक्रमेणेदमप्यल्पबहुत्वं भावनीयं। गतं द्वीतीयमल्पबहुत्वम्, इदानीमेतेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह-

'एएसि णं भंते! बायरपज्ञत्तगाणं' इत्यादि, सर्वस्तोका बादरतेजःकायिकाः पर्याप्ताः, आवलिकासमयवर्गस्य कतिपयसमन्यूनैरावलिकासमयैर्गुणितस्य यावान्यसमयराशिर्भवति तावत्प्रमाणत्वात्तेषा, उक्तं च- "आवलियवग्गो ऊणावलिए गुणिओ हु बायरा ते उ" इति तेभ्यो बादरत्रसकायिकाः पर्याप्ता असङ्ख्येयगुणाः, प्रतरे यावन्त्यङ्गुलसङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्तेषां, तेभ्यः प्रत्येकशरीरबादरवनस्पतिकायिकाः पर्याप्ताः असङ्ख्येयगुणाः, प्रतरे यावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्तेषां, उक्तं च- "पत्तेयपज्ञवणकाइयाओ पयरं हरंति लोगस्स। अङ्गुलअसंखभागेण भाइय"मिति तेभ्यो बादरनिगोदाः पर्याप्तका असङ्ख्येयगुणातः, तेषामत्यन्तसूक्ष्मावगाहनन्तावज्ञलाशयेषु च सर्वत्र भावात्, तेभ्यो बादरपृथिवीकायिकाः पर्याप्ताः असङ्ख्येयगुणाः, अतिप्रभूतसङ्ख्यप्रतराङ्गुलासङ्ख्येयभागखण्डमानत्वात्, तेभ्योऽपि बादराप्कायिकाः पर्याप्ता असङ्ख्येयगुणाः, अतिप्रभूततरसङ्ख्यप्रतराङ्गुलासङ्ख्येयभागखण्डमानत्वात्, तेभ्यो बादरवायुकायिकाः पर्याप्ता असङ्ख्येयगुणाः, धनीकृतस्य लोकस्यासङ्ख्येयेषु सङ्ख्याततमभागवर्त्तिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात्तेषां, तेभ्यो बादरवनस्पतिकायिकाः पर्याप्ता अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां जीवानां भावात्, तेभ्यः सामान्यतो बादरपर्याप्तका विशेषाधिकाः, बादरतेजःकायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्। गतं तृतीयमल्पबहुत्वम्, इदानीमेतेषामेव पर्याप्तपर्याप्तगतान्यल्पबहुत्वान्याह-

'एएसि णं भंते १ बायराणं पज्ञत्तापज्ञत्ताणं' इत्यादि, इह बादरैकैकपर्याप्तनिश्रया असङ्ख्येया बादरा अपर्याप्ता उत्पद्यन्ते, 'पज्ञत्तगनिस्साए अपज्ञत्तगा वक्कमंति, जत्थ एगो तत्त नियमा असंखेज्ञा' इति वचनात्, ततः सर्वत्र पर्याप्तेभ्योऽपर्याप्ता असङ्ख्येयगुणा वक्तव्याः, त्रसकायिकसूत्रं प्रागुक्तयुक्त्या भावनीयं। गतं चतुर्थमल्पबहुत्वम्, सम्प्रत्येतेषामेव समुदितानां पर्याप्तापर्याप्तानां पञ्चममल्पबहुत्वमाह- 'एएसि णं भंते! बायराणं बायरपुढवीकाइयाणं' इत्यादि, सर्वस्तोकाः बादरतेजःकायिकाः पर्याप्तकाः तेभ्यो बादरत्रसकायिकाः पर्याप्ता असङ्ख्येयगुणाः तेभ्यो बादरत्रसकायिका अपर्याप्ता असङ्ख्येयगुणाः तेभ्यो बादरुप्रत्येकवनस्पतिकायिकाः पर्याप्ता असङ्ख्येयगुणाः तेभ्यो बादरनिगोदा; पर्याप्तका असङ्ख्येयगुणाः तेभ्यो बादरप्रत्येकवनस्पतिकायिकाः पर्याप्ता असङ्ख्येयगुणाः तेभ्यो बादरनिगोदाः पर्याप्तका असङ्ख्येयगुणाः तेभ्यो बादरपृथिवीकायिकाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्याप्तका असङ्ख्येय- गुणाःतेभ्यो बादराप्कायिकाः पर्याप्तका असङ्ख्येयगुणा; तेभ्यो बादरवायुकायिकाः पर्याप्ता असङ्ख्येयगुणाः, एतेषु पदेषु युक्तिः प्रागुक्ताऽनुसरणीया, तेभ्यो बादरतेजःकायिका अपर्याप्तका असङ्ख्येयगुणाः, यतो बादरवायुकायिकाः पर्याप्ताः असङ्ख्येयषु प्रतरेषु यावन्त आकाशप्रदेशास्ताव- त्प्रमाणाः,बादरतेजःकायिकाश्चपर्याप्ता असङ्ख्येयलोकाकाशप्रदेशप्रमाणाः, ततो भवन्त्य सङ्ख्येयगुणाः,

—ततः प्रत्येकबादरवनस्पतिकायिका अपर्याप्तका असङ्ख्येयगुणाः ततो बादरनिगोदा अपर्याप्तका असङ्ख्येयगुणाः ततो बादरपृथिवीकायिका अपर्याप्तका असङ्ख्येयगुणाः ततो बादराप्कायिका अपर्याप्तका असङ्ख्येयगुणाः बादरवायुकायिका अपर्याप्ता यथोत्तरमसङ्ख्येयगुणाः वक्तव्याः, यद्यपि चैते प्रत्येकसमङ्ख्येयलोकाकाशप्रदेशप्रमाणास्तथाप्यसङ्ख्यातस्यासङ्ख्यातभेदभिन्नत्वात् इत्थं यथोत्तरमसङ्ख्येयगुणत्वं न विरुध्यते, तेभ्यो बादरवायुकायिकापर्याप्तेभ्यो बादरवनस्पतिकायिका जीवाः पर्याप्ता अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां जीवानां भावात्, तेभ्यः सामान्यतो बादराः पर्याप्तका विशेषाधिकाः, बादरतेजःकायिकादीनां पर्याप्तानां तत्र प्रक्षेपात्, तेभ्यो बादरवनस्पतिकायिका अपर्याप्तका असङ्ख्येयगुणाः,

—एकैकपर्याप्तबादरवनस्पतिकायिकनिगोदनिश्रयाऽसङ्ख्येयानामपर्याप्तबादरवनस्पतिकायिकनिगोदानामुत्पादात्, तेभ्यःसामान्यतो बादरा अपर्याप्ता विशेषाधिकाः, बादरतेजःकायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः पर्याप्तापर्याप्तविशेषणरहिताः सामान्यतो बादरा विशेषाधिकाः, बादरपर्याप्ततेजःकायिकादीनामपि तत्र प्रक्षेपात् ॥

गतानि बादराश्रितान्यपि पञ्च सूत्राणि, सम्प्रति सूक्ष्मबादरसमुदायगतां पञ्चसूत्रीमभिधित्सुः प्रथमत औधिकं सूक्ष्मबादरसूत्रमाह—

मू. (२६६) *एएसि णं भंते! सुहुमाणं सुहुमपुढवीकाइयाणं सुहुमआउकाइयाणं सुहुमतेउकाइयाणं सुहुमवाउकाइयाणं सुहुमवणस्सइकाइयाणं सुहुमनिगोयाणं बायराणं बायरपुढवीकाइयाणं बायराउकाइयाणं बायरतेउकाइयाणं बायरवाउकाइयाणं बायरवणस्सइकाइयाणं पत्तेयसरीरबायरवणस्सइकाइयाणं बायरनिगोयाणं तसकाइयाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरतसकाइया बायरतेउकाइया असंखेज्जगुणा पत्तेयसरीरबाय-वणस्सइकाइया असंखेज्जगुणा बायरनिगोया असंखेज्जगुणा बायरपुढवीकाइया असंखेज्जगुणा बायरआउकाइया असंखेज्जगुणा बायरवाउकाइया असंखेज्जगुणा सुहुमतेउकाइया असंखेज्जगुणा सुहुमपुढवीकाइया विसेसाहिया सुहुमआउकाइया विसेसाहिया सुहुमवाउकाइया विसेसाहिया सुहुमनिगोया असंखेज्जगुणा बायरवणस्सइकाइया अनंतगुणा बायरा विसेसाहिया सुहुमवणस्सइ- काइया अनंतगुणा सुहुमा विसेसाहिया ॥*

एएसि णं भंते! सुहुमअपज्जत्तयाणं सुहुमपुढवीकाइयाणं अपज्जत्तयाणं सुहुमआउकाइयाणं अपज्जत्तयाणं सुहुमतेउकाइयाणं अपज्जत्तयाणं सुहुमवाउकाइयाणं अपज्जत्तयाणं सुहुमवणस्सइकाइयामं अपज्जत्तयाणं सुहुमनिगोयाणं अपज्जत्तयाणं बायरअपज्जत्तयाणं बायरपुढवीकाइयाणं अपज्जत्तयाणं बायरआउकाइयाणं अपज्जत्तयाणं बायरतेउकाइयाणं अपज्जत्तयाणं बायरवाउकाइयाणं अपज्जत्तयाणं बायरवणस्सइकाइयाणं अपज्जत्तयाणं पत्तेयसरीरबायरवणस्सइकाइयाणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपज्ञत्तयाणं बायरनिगोयाणं अपज्ञत्तयाणं बायरतसकाइयाणं अपज्ञत्तयाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरतसकाइया अपज्ञत्तया बायरतेउकाइया अपज्ञत्तया असंखेज्ज- गुणा पत्तेयसरीरबायरवणस्सइकाइया अपज्ञत्तया असंखेज्जगुणा बायरनिगोया अपज्ञत्तया असंखेज्ज- गुणा बायरपुढवीकाइया अपज्ञत्तया असंखेज्जगुणा बादरआउकाइया अपज्ञत्तया असंखेज्जगुणा बायरवाउकाइया अपज्ञत्तया असंखेज्जगुणा सुहुमतेउकाइया अपज्ञत्तया असंखेज्जगुणा सुहुमपुढवी- काइया अपज्ञत्तया विसेसाहिया सुहुमआउकाइया अपज्ञत्तया विसेसाहिया सुहुमवाउकाइया अपज्ञत्तया विसेसाहिया सुहुमनिगोया अपज्ञत्तया असंखेज्जगुणा बायरवणस्सइकाइया अपज्ञत्तया अनंतगुणा बायरा अपज्ञत्तया विसेसाहिया सुहुमवणस्सइकाइया अपत्तज्ञया असंखेज्जगुणा सुहुमा अपज्ञत्तया विसेसाहिया ॥

एएसि णं भंते ! सुहुमपज्ञत्तयाणं सुहुमपुढविकाइया पज्ञत्तयाणंसुहुमआउकाइया पज्ञत्तयाणं सुहुमतेउकाइया पज्ञत्तयाणं सुहुमवाउकाइया पज्ञत्तयाणं सुहुमवणस्सइकाइया पज्ञत्तयाणं सुहुमनिगोया पज्ञत्तयाणं बायरपज्ञत्तयाणं बायरपुढवीकाइया पज्ञत्तयाणं बायरआउकाइया पज्ञत्तयाणं बायरतेउकाइया पज्ञत्तयाणं बायरवाउकाइया पज्ञत्तयाणं बायरवणस्सइकाइया पज्ञत्तयाणं पत्तेयसरीरबायरवणस्सइकाइया पज्ञत्तयाणं बायरनिगोया पज्ञत्तयाणं बायरत- सकाइयपज्ञत्तयाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?,

गोयमा ! सव्वत्थोवा बायरतेउकाइया पज्ञत्तया बायरतसकाइया पज्ञत्तया असंखेज्जगुणा पत्तेयसरीरबायरवणस्सइकाइया पज्ञत्तया असंखेज्जगुणा बायरनिगोया पज्ञत्तया असंखेज्जगुणा बायरपुढविकाइया पज्ञत्तया असंखेज्जगुणा बायरआउकाइया पज्ञत्तया असंखेज्जगुणा बायरवाउ- काइया पज्ञत्तया असंखेज्जगुणा सुहुमतेउकाइया पज्ञत्तया असंखेज्जगुणा सुहुमपुढवीकाइया पज्ञत्तया विसेसाहिया सुहुमआउकाइया पज्ञत्तया विसेसाहिया सुहुमवाउकाइया पज्ञत्तया विसेसाहिया सुहुमनिगोया पज्ञत्तया असंखेज्जगुणा बायरवणस्सइकाइया पज्ञत्तया अनंतगुणा बायरपज्ञत्तया विसेसाहिया सुहुमवणस्सइकाइया पज्ञत्तया असंखेज्जगुणा बायरवणस्सइकाइया पज्ञत्तया अनंतगुणा बायरपज्ञत्तया विसेसाहिया सुहुमवणस्सइकाइया पज्ञत्तया असंखेज्जगुणा सुहुमपज्ञत्तया विसेसाहिया ॥ एएसि णं भंते ! सुहुमाणं बायराण य पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरा पज्ञत्तया बायरअपज्ञत्तया असंखेज्जगुणा सुहुमअपज्ञत्तया असंखेज्जगुणा सुहुमपज्ञत्तया संखेज्जगुणा ॥

एएसि णं भंते ! सुहुमपुढविकाइयाणं बायरपुढविकाइया य पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरपुढविकाइया पज्ञत्तया बायरपुढविकाइया अपज्ञत्तया असंखेज्जगुणा सुहुमपुढवीकाइया अप्प० असं० सुहुमपुढविकाइया पज्ञत्तया संखेज्जगुणा ॥ एएसि णं भंते ! सुहुमआउकाइयाणं बायरआउकाइयाण य पज्ञत्तापज्ञत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरआउ- काइया पज्ञत्तया बायरआउकाइया अपज्ञत्तया असंखेज्जगुणा सुहुमआउकाइया अपज्ञत्तया असंखेज्जगुणा सुहुमआउकाइया पज्ञत्तया संखेज्जगुणा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एएसि णं भंते! सुहुमतेउकाइयाणं बायरतेउकाइयाण य पज्जत्ताज्ञपज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बायरतेउकाइया पज्जत्तया बायरतेउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमतेउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमतेउ-काइया पज्जत्तया संखेज्जगुणा ॥ एएसि णं भंते सुहुमवाउकाइयाणं बायरवाउकाइयाण य पज्जत्तपज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बायरवाउकाइया पज्जत्तया बायरवाउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमवाउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमवाउकाइया पज्जत्तया संखेज्जगुणा ॥

एएसि णं भंते! सुहुमवणस्सइकाइयाणं बायरवणस्सइकायाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बायरवणस्सइकाइया पज्जत्तया बायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा सुहुमवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा सुहुमवणस्सइकाइया पज्जत्तया संखेज्जगुणा ॥ एएसि णं भंते! सुहुमनिगोयाणं बायरनिगोयाण य पज्जत्तपज्जत्ताणं कयरे कयरेहिंतो अप्प वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बायरनिगोयया पज्जत्तया बायरनिगोयया अपज्जत्तया असंखेज्जगुणा सुहुमनिगोयया अपज्जत्तया असंखेज्जगुणा सुहुमनिगोयया पज्जत्तया संखेज्जगुणा ॥

एएसि णं भंते! सुहुमाणं सुहुमपुढवीकाइयाणं सुहुमआउकाइयाणं सुहुमतेउकाइयाणं सुहुमवाउकाइयाणं सुहुमवणस्सइकाइयाणं सुहुमनिगोयाणं बायराणं बायरपुढविकाइयाणं बायरआउकाइयाणं बायरतेउकाइयाणं बायरवाउकाइयाणं बायरवणस्सइकाइयाणं पत्तेयसरीरबायरवणस्सइकाइयाणं बायरनिगोयाणं बायरतसकाइयाण य पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बादरतेउकाइया पज्जत्तया बायरतसकाइया पज्जत्तया असंखेज्जगुणा बायरतसकाइया अपज्जत्तया असंखेज्जगुणा पत्तेयसरीरबायरवणस्सइकाइया पज्जत्तया असंखेखज्जगुणा बायरनिगोया पज्जत्तया असंखेज्जगुणा बायरपुढवीकाइया पज्जत्तया असंखेज्जगुणा बायरआउकाइया पज्जत्तया असंखेज्जगुणा बायरवाउकाइया पज्जत्तया असंखेज्जगुणा बायरतेउकाइया अपज्जत्तया असंखेज्जगुणा पत्तेयसरीरबायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा बायरनिगोया अपज्जत्तया असंखेज्जगुणा बायरपुढवीकाइया अपज्जत्तया असंखेज्जगुणा बायरआउकाइया अपज्जत्तया असंखेज्जगुणा बायरवाउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमतेउकाइया अपज्जत्तया असंखेज्जगुणा

सुहुमपुढवीकाइया अपज्जत्तया विसेसाहिया सुहुमआउकाइया अपज्जत्तया विसेसाहिया सुहुमवाउकाइया अपज्जत्तया विसेसाहिया सुहुमतेउकाइया पज्जत्तया असंखेज्जगुणा सुहुमपुढवीकाइया पज्जत्तया विसेसाहिया सुहुमआउकाइया पज्जत्तया विसेसाहिया सुहुमवाउकाइया पज्जत्तया विसेसाहिया सुहुमनिगोया अपज्जत्तया असंखेज्जगुणा सुहुमनिगोया पज्जत्तया संखेज्जगुणा बायरवणस्सइकाइया पज्जत्तया अणंतगुणा बायरपज्जत्वया विसेसाहिया बायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा बायरअपज्जत्तया विसेसाहिया बायरा विसेसाहिया सुहुमवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा सुहुमअपज्जत्तया विसेसाहिया सुहुमवणस्सइकाइया पज्जत्तया संखेज्जगुणा सुहुमपज्जत्तया विसेसाहिया सुहुमा विसेसाहिया।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वृ. 'एएसि णं भंते !' इत्यादि, इह प्रथमं बादरगतमल्पबहुत्वं बादरपञ्चसूत्र्यां यत्प्रथमं सूत्रं तद्वद्भावनीयं यावद्बादरवायुकायपदं, तदनन्तरं यत्सूक्ष्मगतमल्पबहुत्वं तत्सूक्ष्मपञ्चसूत्र्यां यत्प्रथमं सूत्रं तद्वत्तावद् यावत्सूक्ष्मनिगोदचिन्ता, तदनन्तरं बादरवनस्पतिकायिका अनन्तगुणाः, प्रतिबादर-निगोदामनन्तानां जीवानां भावात्, तेभ्यो बादरा विशेषाधिकाः, बादरतेजःकायिकादीनामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिका असङ्ख्येयगुणाः, बादरनिगोदेभ्यः-सूक्ष्मनिगोदानाम-सङ्ख्येयगुणत्वात्, तेभ्यः सामान्यतःसूक्ष्मा विशेषाधिकाः, सूक्ष्मतेजः कायिकादीनामपि तत्र प्रक्षेपात् । गतमेकल्पबहुत्वम्, इदानीमेतेषामेवापर्याप्तानां द्वितीयमाह—

'एएसि णं भंते !' इत्यादि, सर्वस्तोका बादरत्रसकायिका अपर्याप्ताः ततो बादरतेजः-कायिकबादरप्रत्येकवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायि-कबादरवायुकायिका अपर्याप्ताः क्रमेण यथोत्तरमसङ्ख्येयगुणाः, अत्र भावना बादरपञ्चसूत्र्यां यद्द्वितीयमपर्याप्तकसूत्रं तद्वत्कर्तव्या, ततो बादरवायुकायिकेभ्योऽसङ्ख्येयगुणाः सूक्ष्मतेजः-कायिका अपर्याप्ताः, अतिप्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यः सूक्ष्मपृथिवीकायि-कसूक्ष्मा-प्कायिकसूक्ष्मवायुकायिकसूक्ष्मनिगोदा अपर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, अत्र भावना सूक्ष्म- पञ्चसूत्र्यां यद् द्वितीयं सूत्रं तद्वत्, तेभ्यः सूक्ष्मनिगोदापर्याप्तेभ्यो बादरवनस्पतिकायिका जीवा अपर्याप्ताः अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां जीवानां सद्भावात्, तेभ्यः सामान्यतो बादरापर्याप्तका विशेषाधिकाः, बादरत्रसकायिकापर्याप्तादीनामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता असङ्ख्येयगुणाः, बादरनिगोदापर्याप्तेभ्यः सूक्ष्मनिगोदापर्याप्तानाम-सङ्ख्येयगुणत्वात्, तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, सूक्ष्मतेजःकायिकापर्याप्तादी-नामपि तत्र प्रक्षेपात् । गतं द्वितीयमल्पबहुत्वम्, अधुना एतेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह—

'एएसि णं भंते ! सुहुमपज्जत्तयाणं' इत्यादि, सर्वस्तोकाबादरतेजःकायिकाः पर्याप्ताः तेभ्यो बादरत्रसकायिकबादरप्रत्येकवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादरप्का-यिकबादरवायुकायिकाः पर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, अत्र भावना बादरपञ्चसूत्र्यां यत्तृ तीयं पर्याप्तसूत्रं तद्वत् कर्त्तव्या, बादरपर्याप्तवायुकायिकेभ्य; सूक्ष्मतेजःकायिकाः पर्याप्ता असङ्ख्येयगुणाः, बादरवायुकायिका हि असङ्ख्येयप्रतरप्रदेशराशिप्रमाणाः सूक्ष्मतेजःकायिकास्तु पर्याप्ता असङ्ख्येय-लोकाकाशप्रदेशराशिप्रमाणास्ततोऽसङ्ख्येयगुणाः, ततः सूक्ष्मपृथिवीकायिकसूक्ष्माप्कायिक-सूक्ष्मवायुकायिकाः, पर्याप्ताः क्रमेण यथोत्तरं विशेषाधिकाः ततः सूक्ष्मवायुकायिकेभ्यः पर्याप्तेभ्यः सूक्ष्मनिगोदाः पर्याप्तका असङ्ख्येयगुणाः, तेषामतिप्रभूततया प्रतिगोलकं भावात्, तेभ्यो बादरवन-स्पतिकायिका जीवाः पर्याप्तका अनन्तगुणाः, प्रतिपादरैकनिगोदमनन्तानां भावात्, तेभ्यः सामान्यतो बादराः पर्याप्तका विशेषाधिकाः, बादरतेजःकायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्ता असङ्ख्येयगुणाः, बादरनिगोदपर्याप्तेभ्य; सूक्ष्मनिगोदपर्याप्ता-नामसङ्ख्येयगुणत्वात्, तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, सूक्ष्मतेजःकायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्, । गतं तृतीयमल्पबहुत्वम्, इदानीमेतेषामेव सूक्ष्मबादरादीनां प्रत्येकं पर्याप्ताप-र्याप्तानां पृथग् पृथगल्पबहुत्वमाह— 'एएसि णं भंते ! सुहुमाणं बायराणं पज्जत्तापज्जत्ताणं' इत्यादि, सर्वत्रेय भावना—सर्वस्तोका बादराः पर्याप्ताः, परिमितक्षेत्रवर्त्तित्वात्, तेभ्यो बादरा अपर्याप्ताः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असङ्ख्येयगुणाः, एकैकबादर- पर्याप्तनिश्रया असङ्ख्येयानां बादरापर्याप्तानामुत्पादात्, तेभ्यः सूक्ष्मा अपर्याप्ताः असङ्ख्येयगुणाः, सर्वलोकापन्नतया तेषां क्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यः सूक्ष्मपर्याप्तकाः सङ्ख्येयगुणाः, चिरकाला- वस्थायितया तेषां सदैव सङ्ख्येयगुणतयाऽवाप्यमानत्वात् । गतं चतुर्थमल्पबहुत्वम्, इदानीमेतेषामेव सूक्ष्मसूक्ष्मपृथिवीकायिकादीनां बादरबादरपृथिवीकायिकादीना च प्रत्येकं पर्याप्तापर्याप्तानां च समुदायेन पञ्चममल्पबहुत्वमाह--

सर्वस्तोका बादरतेजःकायिकाः पर्याप्ताः, आवलिकासमयवर्गे कतिपयसमयन्यूनैरावलिकासमयैर्गुणिते यावान्समयराशिस्तावत्प्रमाणत्वात् तेषां, तेभ्यो बादरत्रसकायिकाः पर्याप्ता असङ्ख्येयगुणाः, प्रतरे यावत्यङ्गुलसङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात् तेषां, तेभ्यो बादरत्रसकायिका अपर्याप्ता असङ्ख्येयगुणाः, प्रतरे यावत्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात् तेषां, तेभ्यः प्रत्येकबादरवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायिकाः पर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, यद्यप्येते प्रत्येकं प्रतरे यावत्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणास्तथाप्यङ्गुलासङ्ख्येयभागस्यासङ्ख्येयभेदभिन्नत्वात् इत्थं यथोत्तरमसङ्ख्येयगुणत्वमभिधीयमानं न विरुध्यते, तेभ्यो बादरतेजःकायिका अपर्याप्ता असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्,

ततः प्रत्येकशरीरबादरवनस्पतिकायिकाबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायिका अपर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, ततो बादरवायुकायिकेभ्योऽपर्याप्तेभ्यः सूक्ष्मतेजःकायिका अपर्याप्ता असङ्ख्येयगुणाः ततः सूक्ष्मपृथिवीकायिकसूक्ष्मप्कायिकसूक्ष्मवायुकायिका अपर्याप्ता यथोत्तरं विशेषाधिकाः ततः सूक्ष्मपर्याप्तस्तेजःकायिकाः सङ्ख्यातगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानां ओघत एव सङ्ख्येयगुणत्वात्, ततः सूक्ष्मपृथिवीकायिकसूक्ष्माप्कायिकसूक्ष्मवायुकायिकाः पर्याप्ताः यथोत्तरं विशेषाधिकाः तेभ्यः सूक्ष्मनिगोदा अपर्याप्तका असङ्ख्येयगुणाः, तेषामतिप्राभूत्येन सर्वलोकेषु भावात्, तेभ्यः सूक्ष्मनिगोदाः पर्याप्तकाः सङ्ख्येयगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघत एव सदा सङ्ख्येयगुणत्वात्, एते च बादरापर्याप्ततेजःकायिकादयः पर्याप्तसूक्ष्मनिगोदापर्यवसानाः षोडश पदार्था यद्यप्यन्यत्राविशेषेणासङ्ख्येयलोकाकाशप्रदेशप्रमाणतया संगीयन्ते तथाप्यसङ्ख्येयत्वस्यासंख्येयभेभिन्नत्वाद् इत्थमसङ्ख्येयगुणत्वं विशेषाधिकत्वं सङ्ख्येयगुणत्वं च प्रतिपाद्यमानं न विरोधभागिति, तेभ्यः पर्याप्तसूक्ष्मनिगोदेभ्यो बादरवनस्पतिकायिकाः पर्याप्ता अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां जीवानां भावात्, तेभ्यः सामान्यतो बादराः पर्याप्ता विशेषाधिकाः, बादरपर्याप्ततेजःकायिकादीनामपि तत्र प्रक्षेपात्, तेभ्यो बादरवनस्पतिकायिका अपर्याप्तका असङ्ख्येयगुणाः, एकैकपर्याप्तबादरनिगोदनिश्रया असङ्ख्येयानां बादरनिगोदापर्याप्तानामुत्पादात्, तेभ्यः सामान्यतो बादरा अपर्याप्ता विशेषाधिकाः, बादरतेजःकायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः सामान्यतो बादरा विशेषाधिकाः, पर्याप्तानामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता असङ्ख्येयगुणाः, बादरनिगोदेभ्यः सूक्ष्मनिगोदानामपर्याप्तानामप्यसङ्ख्येयगुणत्वात्,

ततः सामान्यतः सूक्ष्मापर्याप्तका विशेषाधिकाः, सूक्ष्मपृथिवीकायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मवनस्पतिकायिकाप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्याप्तेभ्यो हि सूक्ष्मवनस्पतिकायिकपर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मेष्वोघतोऽपर्याप्तेभ्यः पर्याप्तानां सङ्ख्येयगुणत्वात् ततः सूक्ष्मापर्याप्तेभ्योऽपि सङ्ख्येयगुणाः, विशेषाधिकत्वस्य सङ्ख्येयगुणत्वबाधनायोगात्, तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, पर्याप्तसूक्ष्मपृथिवीकायिकादीनामपि तत्र प्रक्षेपात्, ततः सामान्यतः सूक्ष्माः पर्याप्तपर्याप्तविशेषणरहिता विशेषाधिकाः, अपर्याप्तानामपि तत्र प्रक्षेपात् । गतं सूक्ष्मबादरसमुदायगतं पञ्चममल्पबहुत्वं, तद्गतौ समर्थितानि पञ्चदशापि सूत्राणीति ।। गतं कायद्वारम्, इदानीं योगद्वारमाह-

-: पदं - ३ - दारं - ५ :- "योगः" :-

मू. (२६७) *एएसि णं भंते ! जीवाणं सयोगीणं मणजोगीणं वइजोगीणं कायजोगीणं अयोगीण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसाहिया वा ?, गो० सव्वत्थोवा जीवा मणयोगी वययोगी असंखे० अयोगी अनंतगुणा काययोगी अनंत० सयोगी विसे० ।।*

वृ. सर्वस्तोका मनोयोगिनः, संज्ञिनः पर्याप्ता एव हि मनोयोगिनः ते च स्तोका इति, तेभ्यो वाग्योगिनोऽसङ्ख्येयगुणाः, द्वीन्द्रियादीनां वाग्योगिनां संज्ञिभ्योऽसङ्ख्यातगुणत्वात्, तेभ्योऽयोगिनोऽनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यः काययोगिनोऽनन्तगुणाः, वनस्पतीनामनन्तत्वात्, यद्यपि निगोदजीवानामनन्तानामेकं शरीरं तथापि तेनैकेन शरीरेण सर्वेऽप्याहारादिग्रहणं कुर्वन्तीति सर्वेषामपि काययोगित्वान्नानन्तगुणत्वाव्याघातः तेभ्यः सामान्यतः सयोगिनो विशेषाधिकाः, द्वीन्द्रियादीनामपि वाग्योगादीनां तत्र प्रक्षेपात् ।।

गतं योगद्वारम्, इदानीं वेदद्वारमाह-

-: पदं - ३ - दारं - ६ :- "वेद" :-

मू. (२६८) *एएसिणं भंते ! जीवाणं सवेयगाणं इत्थीवेयगाणं पुरिसवेयगाणं नपुंसकवेयगाणं अवेयगाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गो० सव्वत्थोवा जीवा पुरिसवेयगा इत्थी० संखे० अवेयगा अनंतगुणा नपुंसक० अनंत० सवेयगा विसेसाहिया*

वृ. सर्वस्तोकाः पुरुषवेदाः, संज्ञिनामेव तिर्यग्मनुष्याणां देवानां च पुरुषवेदभावात्, तेभ्यः स्त्रीवेदाः सङ्ख्येयगुणाः, यत उक्तं जीवाभिगमे- "तिरिक्खजोणियपुरिसेहिंतो तिरिक्खजोणियइत्थीओ तिगुणीओ तिरूवाहियाओ य, तहा मणुस्सपुरिसेहिंतो मणुस्सइत्थीओ सत्तावीसगुणाओ सत्तावीसरूवुत्तराओ य, तथा देवपुरिसेहिंतो देवित्थीओ बत्तीसगुणाओ बत्तीसरूवुत्तराओ" इति, वृद्धाचार्यैरप्युक्तं-

॥ १ ॥ "तिगुणा तिरूवअहिया तिरियाणं इत्थिया मुणेयव्वा ।
सत्तावीसगुणा पुन मणुयाणं तदहिया चेव ॥
॥ २ ॥ बत्तीसगुणा बत्तीसरूवअहिया य तहय देवाणं ।
देवीओ पन्नत्ता जिनेहिं जियरागदोसेहिं ॥"

अवेदका अनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यो नपुंसकवेदा अनन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात्, सामान्यतः सवेदकाः विशेषाधिकाः, स्त्रीवेदकपुरुषवेदकानामपि तत्र प्रक्षेपात्, ।। गतं वेदद्वारम्, इदानीं कषायद्वारमाह-

-: पदं - ३ - दारं - ७ :- "कषाय" :-

मू. (२६९) *एएसिं णं भंते ! सकसाईणं कोहकसाईणं मानकसाईणं मायाकसाईणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोहकसाईणं अकसाईण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा अकसाई मानकसाई अनंतगुणा कोहकसाई विसेसाहिया मायाकसाई विसेसाहिया लोहकसाई विसेसाहिया सकसाई विसेसाहिया।

वृ. सर्वस्तोका अकषायिणः, सिद्धानां कतिपयानां च मनुष्याणामकषायित्वात्, तेभ्यो मानकषायिणो–मानकषाययपरिणामन्तोऽनन्तगुणाः, षट्स्वपि जीवनिकायेषु मानकषाय-परिणामस्यावाप्यमानत्वात्, तेभ्यः क्रोधकषायायिणो विशेषाधिकाः तेभ्योऽपि मायाकषायिणो विशेषाधिकाः तेभ्योऽपि लोभकषायिणो विशेषाधिकाः, मानकषायपरिणामकालापेक्षया क्रोधादि-कषायपरिणामकालस्य यथोत्तरं विशेषाधिकतया क्रोधादिकषायाणामपि यथोत्तरं विशेषाधि-कत्वभावात्, लोभकषायिभ्यः सामान्यतः सकषायिणो विशेषाधिकाः, मानादिकषायिणामपि तत्र प्रक्षेपात्, सकषायिण इत्यत्रैवं व्युत्पत्तिः–कषायशब्देन कषायोदयः परिगृह्यते, तथा च लोके व्यवहारः–सकषायोऽयं कशायोदयवानित्यर्थः, सह कषायेण–कषायोदयेन ये वर्त्तन्ते ते सकषा- योदयाः–विपाकावस्थां प्राप्ताः स्वोदयमुपदर्शयन्तः कषायकर्मपरमाणवस्तेषु सत्सु जीवस्यावश्यं कषायोदयसम्भवात्, सकषाया विद्यन्ते येषां ते सकषायिणः कषायोदयसहिता इति तात्पर्यार्थः गतं कषायद्वारम्, इदानीं लेश्याद्वारम् –

–: पदं – ३ – दारं – ८ :– "लेश्या" :–

मू. (२७०) *एएसि णं भंते ! जीवाणं सलेसाणं किण्हलेसाणं निललेस्साणं काउलेस्साणं तेउलेस्साणं पम्हलेस्साणं सुक्कलेस्साणं अलेस्साण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा सुक्कलेस्सा पम्हलेस्सा संखेज्जगुणा तेउलेस्सा संखेज्जगुणा अलेस्सा अनंतगुणा काउलेस्सा अनंतगुणा नीललेस्सा विसे० कण्हलेसा विसे० सलेस्सा विसे०*

वृ. सर्वस्तोकाः शुक्ललेश्याः, लान्तकादिषश्वेवानुत्तरपर्यवसानेषु वैमानिकेषु देवेषु कतिपयेषु च गर्भव्युत्क्रान्तिकेषु कर्मभूमिकेषु सङ्ख्येयवर्षायुष्केषु मनुष्येषु तिर्यक्स्त्रीपुंसेषु च कतिपयेषु सङ्ख्येयवर्षायुष्केषु तस्याः संभवात्, तेभ्यः पद्मलेश्याकाः सङ्ख्येयगुणाः, सा हि पद्मलेश्या सनत्कुमारमाहेन्द्रब्रह्मलोककल्पवासिषु देवेषु तथा प्रभूतेषु गर्भव्युत्क्रान्तिकेषु कर्मभूमिजेषु सङ्ख्येयवर्षायुष्केषु मनुष्यस्त्रीपुंसेषु तथा गर्भव्युत्क्रान्तिकतिर्यग्योनिकस्त्रीपुंसेषु सङ्ख्येयवर्षायुष्केष्व-वाप्यते, सनत्कुमारादिदेवादयश्च समुदिता लान्तकादिदेवादिभ्यः सङ्ख्येयगुणा इति भवन्ति शुक्ललेश्याकेभ्यः पद्मलेश्याकाः सङ्ख्येयगुणाः, तेभ्यस्तेजोलेश्याकाः सङ्ख्येयगुणाः, सर्वेषां सौधर्मेशानज्योतिष्कदेवानां कतिपयानां च भवनपतिव्यन्तरगर्भव्युत्क्रान्तिकतिर्यक्प श्चेन्द्रिय-मनुष्याणां बादरपर्याप्तैकेन्द्रियाणां च तेजोलेश्याभावात्, नन्वसङ्ख्येयगुणाः कस्मान्न भवन्ति ?, कथं भवन्तीति चेत्, उच्यते,

इह ज्योतिष्काः भवनवासिभ्योऽप्यसङ्ख्येयगुणाः किं पुनः सनत्कुमारादिदेवेभ्यः, ते च ज्योतिष्कास्तेजोलेश्याकाः तथा सौधर्मेशानकल्पदेवाश्च, ततः प्राप्नुवन्त्यसङ्ख्येयगुणाः, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात्, लेश्यापदे हि गर्भव्युत्क्रान्तिकतिर्यग्योनिकानां संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनि-कानां च कृष्णलेश्याद्यल्पबहुत्वे सूत्रं वक्ष्यति–'सव्वत्थोवा गब्भवक्कंतियतिरिक्खजोणिया सुक्कलेसा तिरिक्खजोणिणीओ संखेज्जगुणाओ, पम्हलेसा गब्भवक्कंतियतिरिक्खजोणिया संखेज्जुणा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिरिक्खजोणिणीओ संखेज्जगुणाओ, तेउलेसागब्भवक्कंतियतिरिक्खजोणिया संखेज्जगुणा तेउलेसाओ तिरिक्खजोणिणीओ संखेज्जगुणाओ" इति, महादण्डके च तिर्यग्योनिकस्त्रीभ्यो व्यन्तरा ज्योतिष्काश्च सङ्ख्येयगुणा वक्ष्यन्ते, ततो यद्यपि भवनवासिभ्योऽप्यसङ्ख्येयगुणा ज्योतिष्काः तथापि पद्मलेश्याकेभ्यस्तेजोलेश्याकाः सङ्ख्येयगुणा एव, इदमत्र तात्पर्यं-

यदि केवलान् देवानेव पद्मलेश्याधिकृत्य देवा एव तेजोलेश्याकाश्चिन्त्यन्ते ततो भवन्त्यसङ्ख्येयगुणाः यावता तिर्यक्सम्मिश्रतया पद्मलेश्याकेभ्यस्तिर्यक्सम्मिश्रा एव तेजोलेश्याकाश्चिन्त्यन्ते तिर्यञ्चश्च पद्मलेश्या अपि अतिबहवस्ततः सङ्ख्येयगुणा एव लभ्यन्ते नासङ्ख्येयगुणा इति, तेभ्योऽवलेश्याका अनन्तगुणाः, सिद्धानामभनन्तत्वात्, तेभ्यः कापोतलेश्या अनन्तगुणाः, वनस्पतिकायिकानामपि कापोतलेश्यायाः संभवात्, वनस्पतिकायिकानां च सिद्धेभ्योऽप्यनन्तगुणत्वात्, तेभ्योऽपि नीललेश्या विशेषाधिकाः, प्रभूततराणां नीललेश्यासंभवात्, तेभ्योऽपि कृष्णलेश्याका विशे०, प्रभूततमानां कृष्णलेश्याकत्वत्, तेभ्यः सामान्यतः सलेश्या विशे० नीललेश्याकादीनामपि तत्र प्रक्षेपात् ।। गतं लेश्याद्वारम्, इदानीं सम्यकत्वद्वारमाह-

-: पदं - ३ - दारं - ९ :- "सम्यकत्वं"

मू. (२७१) *एएसि णं भंते ! जीवाणं सम्मद्दिट्ठीणं मिच्छादिट्ठीणं सम्मामिच्छादिट्ठीणं च कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा सम्मामिच्छदिट्ठी सम्मदिट्ठी अनंतगुणा मिच्छादिट्ठी अनंतगुणा ।*

वृ. सर्वस्तोकाः सम्यग्मिथ्यादृष्टयः, सम्यग्मिथ्यादृष्टिपरिणामकालस्यान्तर्मुहूर्त्तप्रमाणतयाऽतिस्तोकत्वेन तेषां पृच्छासमये स्तोकानामेव लभ्यमानत्वात्, तेभ्यः सम्यग्दृष्टयोऽनन्तगुणाः,सिद्धानामनन्त्वात्, तेभ्योऽपि मिथ्यादृष्टयोऽननतगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात्, तेषां च मिथ्यादृष्टित्वादिति ।। गतं सम्यकत्वद्वारम्, अधुना ज्ञानद्वारमाह-

-: पदं - ३ - दारं - १० :- "ज्ञान"

मू. (२७२) *एएसि णं भंते ! जीवाणं आभिनिबोहियनाणीणं सुयनाणीणं ओहिनाणीणं मनपज्जवनाणीणं केवलनाणीण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा गोयमा ! सव्वत्थोवा जीवा मनपज्जवनाणी ओहीनाणी असंखेज्जगुणा आभिनिबोहियनाणी सुयनाणी दोवि तुल्ला विसेसाहिया केवलनाणी अनंतगुणा ।*

एएसि णं भंते ! जीवाणं मइअन्नाणीणं सुयअन्नाणीणं विभंगणाणीय कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा विभंगनाणी मइअन्नाणी सुयअन्नाणी दोवि तुल्ला अनंतगुणा । एएसि णं भंते ! जीवाणं आभिनिबोहियनाणीणं सुयना० ओहिना० मनपज्जवनाणीणं केवलनाणीणं मइन्नाणीणं सुयअन्नाणीणं विभंगनाणीय य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गो० सव्वत्थोवा जीवा मणपज्जवनाणी ओहिनाणी असंखेज्जगुणा आभिणि सुयनाणी दोवि तुल्ला विसे० विभंगनाणी असंखेज्जगुणा केवलनाणी अनंतगुणा मइअन्नाणी सुयअन्नाणी य दोवि तुल्ला अनंतगुणा ।

वृ. सर्वस्तोका मनःपर्यवज्ञानिनः, संयतानमेवामर्षौषध्यादिऋद्धिप्राप्तानां मनःपर्यवज्ञान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संभवात्, तेभ्योऽसङ्ख्येयगुणा अवधिज्ञानिनः, नैरयिकतिर्यक्पञ्चेन्द्रियमनुष्यदेवानामप्यवधिज्ञानसंभवात्, तेभ्य आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्च विशेषाधिकाः, संज्ञितिर्यक्पञ्चेन्द्रियमनुष्याणामेवावधिज्ञानविकलानामपि केषाञ्चिदाभिनिबोधिकश्रुतज्ञानभावात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, "जत्थ मइनाणं तत्थ सुयनाणं जत्थ सुयनाणं तत्थ मइनाणं" इति वचनात्, तेभ्यः केवलज्ञानिनोऽनन्तगुणाः, सिद्धानामनन्त्वात् ।। उक्तं ज्ञानिना मल्पबहुत्वम्, इदानीं तत्प्रतिपक्षभूतानामज्ञानिनामल्पबहुत्वमाह–

सर्वस्तोका विभङ्गज्ञानिनः, कतिपयानामेव नैरयिकदेवतिर्यक्पञ्चेन्द्रियमनुष्याणां विभङ्गभावात्, तेभ्यो मत्यज्ञानिनः श्रुताज्ञानिनोऽनन्तगुणाः, वनस्पतीनामपि मत्यज्ञानश्रुताज्ञानभावात् तेषां चानन्तत्वात् स्वस्थाने तु परस्परंतुल्याः "जत्थ मइअन्नाणं तत्थ सुयअन्नाणं जत्थ सुयअन्नाणं तत्थ मइअन्नाणं" इति वचनात् ।। सम्प्रत्युभयेषां ज्ञान्याज्ञानिनां समुदायेनाल्पबहुत्वमाह–

सर्वस्तोका मनःपर्यवज्ञानिनः तेभ्योऽसङ्ख्येयगुणा अवधिज्ञानिनः तेभ्य आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्च विशेषाधिकाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, अत्र भावना प्रागेवोक्ता, तेभ्योऽसङ्ख्येयगुणा विभङ्गज्ञानिनः, यस्मात्सुरगतौ निरयगतौ च सम्यग्दृष्टिभ्यो मिथ्यादृष्टयोऽसङ्ख्येयगुणाः पठ्यन्ते, देवनैरयिकाश्च सम्यग्दृष्टोऽवधिज्ञानिनो मिथ्यादृष्टो विभङ्गज्ञानिन इत्यसङ्ख्येयगुणाः, तेभ्यः केवलज्ञानिनोऽनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यो मत्यज्ञानिनः श्रुतज्ञानिनश्चानन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तत्वात्, तेषां च मत्यज्ञानिश्रुताज्ञानित्वात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः ।।

गतं ज्ञानद्वारम्, इदानीं दर्शनद्वारमाह–

–: पदं – ३ – दारं – ११ :– "दर्शनं"

मू. (२७३) *एएसि णं भंते ! जीवाणं चक्खुदंसणीणं अचक्खुदंसणीणं ओहिदंसणीणं केवलदंसणीण य कयरे कयरेहिंतो अप्पा वा जाव विसेसाहिया वा ?, गो० सव्वत्थोवा जीवा ओहिदंसणी चक्खुदंसणी असंखेज्जगुणा केवलदंसणी अनंतगुणा अचक्खुदंसणी अनंतगुणा ।*

वृ. सर्वस्तोका अवधिदर्शनिनः, देवनैरयिकाणां कतिपयानां च संज्ञिपञ्चेन्द्रियतिर्यग्मनुष्याणामवधिदर्शनभावात्, तेभ्यश्चक्षुर्दर्शनिनोऽसङ्ख्येयगुणाः, सर्वेषां देवनैरयिकगर्भजमनुष्याणां संज्ञितिर्यक्पञ्चेन्द्रियाणां असंज्ञितिर्यक्पञ्चेन्द्रियाणां चतुरिन्द्रियाणां च चक्षुर्दर्शनभावत्, तेभ्यः केवलदर्शनिनोऽनन्तगुणाः, सिद्धानामनन्त्वात्व, तेभ्योऽचक्षुर्दर्शनिनोऽनन्तगुणाः, वनस्पतिकायिकानां सिद्धभ्योऽप्यननत्वात् ।। गतं दर्शनद्वारम्, अधुना संयतद्वारमाह–

–: पदं – ३ – दारं – १२ :– "संयतः"

मू. (२७४) *एएसि णं भंते ! जीवाणं संयताणं असंयताणं संजयासंजयाणं नोसंजयनोअसंजयनोसंजयासंजयाण य कयरो कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सवत्थोवा जीवा संजया संजया संयता असंखेज्जगुणा नोसंयतानोअसंजयानोसंयतासंयता अनंतगुणा असंजया अनंतगुणा ।।*

वृ. सर्वस्तोकाः संयताः, उत्कृष्टपदेऽपि तेषां कोटीसहस्रपृथकत्वप्रमाणतया लभ्यमानत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"कोडिसहस्सपुहुत्तं मणुयलोए संजयाणं" इति वचनात्, तेभ्यः संयतासंयताः-देशविरता असङ्ख्येयगुणाः, तिर्यक्पञ्चेन्द्रियाणामसङ्ख्ययातानां देशविरतिसद्भावात्, तेभ्यो नोसंयतनोऽसंयत-नोसंयासंयता अनन्तगुणाः, प्रतिषेधत्रयवृत्ता हि सिद्धास्ते चानन्ता इति, तेभ्योऽसंयता अनन्त-गुणाः, वनस्पतीनां सिद्धेभ्योऽप्यनन्तत्वात् ॥ गतं संयतद्वारम्, सम्प्रत्युपयोगद्वारमाह-

-: पदं - ३ - दारं - १३ :- "उपयोगः"

मू. (२७५) *एएसि णं भंते ! जीवाणं सागारोवउत्ताणं अनागारोवउत्ताण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसा हिया वा ?, गोयमा ! सव्वत्थोवा जीवा अनागारोवउत्ता सागारोवउत्ता संखेज्जगुणा ।*

वृ. इहानाकारोपयोगकालः सर्वस्तोकः साकारोपयोगकालस्तु सङ्ख्येयगुणः ततो जीवा अप्यनाकारोपयोगोपयुक्ताः सर्वस्तोकाः, पृच्छासमये तेषां स्तोकानामेवावाप्यमानत्वात्, तेभ्यः साकारोपयोगोपयुक्ताः सङ्ख्येयगुणाः, साकारोपयोगकालस्य दीर्घतया तेषां पृच्छासमये बहूनां पर्राप्यमाणत्वात् ॥ गतमुपयोगद्वारम्, इदानीमाहारद्वारमाह-

-: पदं - ३ - दारं - १४ :- "आहार"

मू. (२७६) *एएसि णं भंते ! जीवाणं आहारगाणं अनाहारगाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा अनाहारगा आहारगा असंखेज्जगुणा ।*

वृ. सर्वस्तोका जीवा अनाहारकाः, विग्रहगत्यापन्नादीनामेवानाहारकत्वात्, उक्तं च-

॥१॥ "विग्गहगइमावन्ने केवलिणो समुहया अयोगी य ।
सिद्धा य अनाहारा सेसा आहारगा जीवा ॥"

तेभ्यः आहारका असङ्ख्येयगुणाः, ननु वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तत्वात् तेषां चाहारकतयापि लभ्यमानत्वात् कथमनन्तगुणा न भवन्ति ?, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात्, इह सूक्ष्मनिगोदाः सर्वसङ्ख्ययाप्यसङ्ख्येयाः, तत्राप्यन्तर्मुहूर्तसमयराशितुल्याः सूक्ष्मनिगोदाः सर्वकालं विग्रहे वर्त्तमाना लभ्यन्ते, ततोऽनाहारका अप्यतिबहवः सकलजीवराश्यसङ्ख्येयभागतुल्या इति तेभ्यः आहारका असङ्ख्येयगुणा एव नानन्तगुणाः ॥ गतमाहारद्वारम्, इदानीं भाषकद्वारमाह-

-: पदं - ३ - दारं - १५ :- "भाषकः"

मू. (२७७) *एएसि णं भंते ! जीवाणं भासगाणं अभासगाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा भासगा अभासगा अनंतगुणा*

वृ. सर्वस्तोका भाषकाः-भाषालब्धिसम्पन्नाः, द्वीन्द्रियादीनामेव भाषकत्वात्, अभाषका-भाषालब्धिहीना अनन्तगुणाः, वनस्पतिकायिकानामनन्तत्वात् ॥ गतं भाषकद्वारं, सम्प्रति परीत्तद्वारमाह-

-: पदं - ३ - दारं - १६ :- "परित्तः"

मू. (२७८) *एएसि णं भंते ! जीवाणं परीत्ताणं अपरीत्ताण य नोपरीत्तनोअपरीत्ताण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परीत्ता नोपरीत्तानोअपरीत्ता अनंतगुणा, अपरीत्ता अनंतगुणा।

वृ. इह परीत्ता द्विविधाः—भवपरित्ताः कायपरीताश्च, तत्र भवपरीत्ता येषां किञ्चिदूनोऽपार्धपुद्गलपरावर्त्तमात्रसंसारः, कायपरीत्ताः—प्रत्येकशरीरिणः, तत्रोभयेऽपि परीत्ताः सर्वस्तोकाः, शुक्लपाक्षिकाणां प्रत्येकशरीररिणां चाशेषजीवापेक्षयाऽस्तिकत्वात्, ततो नोपरीत्तानोअपरीत्ता अनन्तगुणाः, उभयप्रतिषेधवृत्ता हि सिद्धाः ते चानन्ता इति, तेभ्योऽपरीत्ता अनन्तगुणाः, कृष्णपाक्षिकाणां साधारणवनस्पतीनां वा सिद्धेभ्योऽप्यनन्तगुणत्वात् ॥ गतं परीत्तद्वारं, सम्प्रति पर्याप्तद्वारमाह—

—: पदं – ३, – दारं – १७ :– "पर्याप्तः"

मू. (२७९) *एएसि णं भंते ! जीवाणं पज्जत्ताणं अपज्जत्ताणं नोपज्जत्तानोअपज्जत्ताण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा नोपज्जत्तानोअपज्जत्तगा अपज्जत्तगा अणंतगुणा पज्जत्तगा संखिज्जगुणा।*

वृ. सर्वस्तोका नोपर्याप्तकनोअपर्याप्तकाः, उभयप्रतिषेधवर्त्तिनो हि सिद्धाः ते चापर्याप्ताकादिभ्यः सर्वस्तोका इति, तेभ्योऽपर्याप्तका अनन्तगुणाः, साधारणवनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणाना सर्वकालमपर्याप्तत्वेन लभ्यमानत्वात्, तेभ्यः पर्याप्ताः सङ्ख्येयगुणाः, इह सर्वबहवो जीवाः सूक्ष्माः, सूक्ष्माश्च सर्वकालमपर्याप्तिभ्यः पर्याप्ताः सङ्ख्येयगुणा इति सङ्ख्येयगुणा उक्ताः ॥ गतं पर्याप्तद्वारं, सम्प्रति सूक्ष्मद्वारमाह—

—: पदं – ३ – दारं – १८ :– "सूक्ष्मं"

मू. (२८०) *एएसि णं भंते ! जीवाणं सुहुमाणं बायराणं नोसुहुमनोबायराणय कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा नोसुहुमानोबायरा बायरा अनंतगुणा सुहुमा असंखेज्जगुणा।*

वृ. सर्वस्तोका जीवा नोसूक्ष्मनोबादराः सिद्धा इत्यर्थः, तेषां सूक्ष्मजीवराशेर्बादरजीवराशेश्चानन्तभागकल्पत्वात्, तेभ्यो बादरा अनन्तगुणाः, बादरनिगोदजीवानां सिद्धेभ्योऽप्यनन्तगुणत्वात्, तेभ्यः सूक्ष्मा असङ्ख्येयगुणाः, बादरनिगोदेभ्यः सूक्ष्मनिगोदानामसङ्ख्येयगुणत्वात् ॥ गतं सूक्ष्मद्वारम्, इदानीं संज्ञिद्वारम्—

—: पदं – ३ – दारं – १९ :– "संज्ञी"

मू. (२८१) *एएसि णं भंते ! जीवाणं सन्नीणं असन्नीणं नोसन्नीनोअसन्नीणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा सन्नी नोसन्नीनोअसन्नी अनंतगुणा असन्नी अणनतगुणा।*

वृ. सर्वस्तोकाः संज्ञिनः, समनस्कानामेव संज्ञित्वात्, तेभ्यो नोसंज्ञिनोनोअसंज्ञिनः अनन्तगुणाः, उभयप्रतिषेधवृत्ता हि सिद्धाः ते च संज्ञिभ्योऽनन्तगुणा एवेति, तेभ्योऽसंज्ञिनोऽनन्तगुणाः, वनस्पतीनां सिद्धेभ्योऽप्यनन्तगुणत्वात् ॥ गतं संज्ञिद्वारम्, इदानीं भवसिद्धिकद्वारमाह—

—: पदं – ३ – दारं – २० :– "भवः"

मू. (२८२) *एएसि णं भंते ! जीवाणं भवसिद्धियाणं अभवसिद्धियाणं नोभवसिद्धियानो-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभवसिद्धियाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा अभवसिद्धिया नोभवसिद्धियानोअभवसिद्धिया अनंतगुणा भवसिद्धिया अनंतगुणा ।

वृ. सर्वस्तोका अभवसिद्धिकाः-अभव्याः, जघन्ययुक्तानन्तकपरिमाणत्वात्, उक्तं चानुयोगद्वारेषु-"उक्कोसए परित्तानंतए रूव पक्खित्ते जहन्नयं जुत्तानंतयं होइ, अभवसिद्धियावि तत्तिया चेवे"ति, तेभ्यो नोभवसिद्धिकनोअभवसिद्धिका अनन्तगुणाः, यत उभयप्रतिषेधवृत्तयः सिद्धाः ते चाजधन्योत्कृष्टयुक्तानन्तकपरिमाणा इत्यनन्तगुणाः, तेभ्योऽपि भवसिद्धिका अनन्तगुणाः यतो भव्यनिगोदस्यैकस्यानन्तभागकल्पाः सिद्धाः भव्यजीवराशिनिगोदाश्चसङ्घयेया लोके इति । गतं भवसिद्धिकद्वारं, साम्प्रतमस्तिकायद्वारमाह-

-: पदं - ३ - दारं - २१ :- "अस्तिकायः"

मू. *(२८३) एएसि णं भंते ! धम्मत्थिकायअधम्मत्थिकायआगासत्थिकायजीवत्थिकायपोग्गलत्थिकायअद्धासमयाणं दव्वट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए एए णं तिन्निएवि तुल्ला दव्वट्ठयाए सव्वत्थोवा, जीवत्थिकाए दव्वट्ठाए अनंतगुणे, पोग्गलत्थिकाए दव्वट्ठाए अनंतगुणे, अद्धासमए दव्वट्ठयाए अनंतगुणे । एएसि णं भंते ! धम्मत्थिकायअधम्मत्थिकायआगासत्थिकायजीवत्थिकायपोग्गलत्थिकाय- अद्धासमयाणं पएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! धम्मत्थिकाए अधम्मत्थिकाए एए णं दोवि तुल्ला पएसट्ठयाए सव्वत्थोवा, जीवत्थिकाए पएसट्ठयाए अनंतगुणे, पोग्गलत्थिकाए पएसट्ठयाए अनंतगुणे, अद्धासमए पएसट्ठयाए अनंतगुणे, आगासत्थिकाए पएसट्ठयाए अनंतगुणे ।*

एएयस्स णं भंते ! धम्मत्थिकायस्स दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा बा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे एगे धम्मत्थिकाए दव्वट्ठयाए से चेव पएसट्ठयाए असंखेज्जगुणे । एयस्स णं भंते ! अधम्मत्थिकायस्स दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे एगे अधम्मत्थिकाए दव्वट्ठाए से चेव पएसट्ठयाए असंखेज्जगुणे ।

एयस्स णं भंते ! आगासत्थिकायस्स दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे एगे आगासत्थिकाए दव्वट्ठयाए से चेव पएसट्ठयाए अणनतगुणे । एयस्स णं भंते ! जीवत्थिकायस्स दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे जीवत्थिकाए व्वट्ठयाए से चेव पएसट्ठयाए असंखेज्जगुणे,

एयस्स णं भंते ? पोग्गलत्थिकायस्स दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे पोग्गलत्थिकाए दव्वट्ठयाए ते चेव पएसट्ठयाए असंखेज्जगुणे अद्धासमये न पुच्छिज्जइ पएसाभावा । एएसि णं भंते ! धम्मत्थिकायअधम्मत्थिकायआगासत्थिकायजीवत्थिकायपोग्गलत्थिकायअद्धासमयाणं दव्वट्ठपएसट्ठयाए य कयरे कयरेहिंतो जाव विसेसाहिया वा ?, गोयमा ! धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए एए तिन्निवलि तुल्ला

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दव्वट्ठयाए सव्वत्थोवा, धम्मत्थिकाए अधम्मत्थिकाए य एएसि णं दोन्निवि तुल्ला पएसट्ठयाए असंखेज्जगुणा, जीवत्थिकाए दव्वट्ठयाए अणंतगुणे से चेव पएसट्ठयाए असंखेज्जगुणे, पोग्गलत्थिकाए दव्वट्ठयाए अमंतगुणे से चेव पएसट्ठयाए असंखेज्जगुणे, अद्धासमए दव्वट्ठपएसट्ठयाए अणंतगुणे, आगासत्थिकाए पएसट्ठयाए अनंतगुणे ।

वृ. धर्म्मास्तिकायोऽधर्म्मास्तिकाय आकाशा एते त्रयोऽपि द्रव्यार्थतया–द्रव्यमेवार्थो द्रव्यार्थः तस्य भावो द्रव्यार्थता तया द्रव्यरूपतया इत्यर्थः तुल्याः–समानानंन्तः, प्रत्येकमेकसङ्ख्याकत्वात्, अत एव सर्वस्तोकाः,तेभ्यो जीवास्तिकायो द्रव्यार्थतया अन्तगुणाः, जीवानां प्रत्येकं द्रव्यत्वात् तेषां च जीवास्तिकाये अनन्तत्वात्, तस्मादपि पुद्गलास्तिकायो द्रव्यार्थतयाऽनन्तगुणः, कथमिति चेत्, उच्यते, इह परमाणुद्विप्रदेशकादीनि पृथक् पृथक् द्रव्याणि, तानि च सामान्यतस्त्रिधा, तद्यथा–प्रयोगपरिणतानि मिश्रपरिणतानि विश्रसापरिणतानि च, तत्र प्रयोगपरिणतान्यपि तावज्जीवेभ्योऽनन्तगुणानि, एकैकस्य जीवस्यानन्तैः प्रत्येकं ज्ञानावरणीयदर्शनावरणीयादिकर्मपुद्गलस्कन्धैरावेष्टितत्वात्, किं पुनः शेषाणि ?, ततः प्रयोगपरिणतेभ्यो मिश्रपरिणतान्यनन्तगुणानि, तेभ्यो विश्रसापरिणतान्यनन्तगुणानि, तथा चोक्तं प्रज्ञप्तौ–"सव्वत्थोवा पुग्गला पयोगपरिणया मीसपरिणया अनंतगुणा वीससापरिणया अनंतगुणा" इति, ततो भवति जीवास्तिकायात् पुद्गलास्तिकायो द्रव्यार्थतयाऽनन्तगुणः,

तस्मादप्यद्धासमयो द्रव्यार्थतयाऽनन्तगुणः, कथमिति चेत्, उच्यते, इहैकस्यैव परमाणोरनागते काले तत्र द्विप्रदेशिकत्रिप्रदेशकयावत्दशप्रदेशिकसङ्ख्यातप्रदेशिकासङ्ख्यातप्रदेशिकानन्तप्रदेशिकस्कन्धान्तःपरिणामितया अनन्ता भाविनः संयोगा पृथक्पृथक्काला: केवलवेदसोपलब्धाः, यथा चैकस्य परमाणोस्तथा सर्वेषां प्रत्येकं द्विप्रदेशादिस्कन्धानां चानन्ताः संयोगाः पुरस्कृताः पृथक्पृथक्काला उपलब्धाः, सर्वेषामपि मनुष्यलोकक्षेत्रान्तर्वर्त्तितया परिणाम संभवात्, तथा क्षेत्कतोऽप्ययं परमाणुरमुष्मिन्नाकाशप्रदेशे अमुष्मिन् कालेऽवगाहिष्यते इत्येवमनन्ता एकस्य परमाणोर्भाविनः संयोगाः, यथैकस्य परमाणोस्तथा सर्वेषां परमाणूनां, तथा द्विप्रदेशकादीनामपि स्कन्धानामनन्तप्रदेशस्कन्धपर्यन्तानां प्रत्येकं तत्तदेकप्रदेशाद्यवगाहभेदतो भिन्नभिन्नकाला अनन्ता भाविनः संयोगाः, तथा कालतोऽप्ययं परमाणुरमुष्मिन्नाकाशप्रदेशे एकसमयस्थितिको द्विसमयस्थितिक इत्येवमेकस्यापि परमाणोरेकस्मिन्नाकाशप्रदेशेऽसङ्ख्येया भाविनः संयोगाः एवं सर्वेष्वपि आकाशप्रदेशेषु प्रत्येकमसङ्ख्येया भाविनः संयोगाः ततो भूयो भूयस्तेष्वाकाशप्रदेशेषु परावृत्तौ कालस्यानन्तत्वादनन्ताः कालतो भाविनः संयोगाः,

यथा चैकस्य परमाणोस्तथा सर्वेषां परमाणूनां सर्वेषां च प्रत्येकं द्विप्रदेशिकादीनां स्कन्धानां, तथा भावतोऽप्ययं परमाणुरमुष्मिन् काले एकगुणकालकोभवतीत्येवमेकस्यापि परमाणोर्भिन्नभिन्नकाला अनन्ताः संयोगाः, यथा चैकस्य परमाणोस्तथा सर्वेषां परमाणूनां सर्वेषां च द्विप्रदेशिकादीनां स्कन्धानां पृथक् पृथक् अनन्ता भावतः पुरस्कृतसंयोगाः, तदेवमेकस्यापि परमाणोर्द्रव्यक्षेत्रकालभावविशेषसम्बन्धवशादनन्ता भाविनः समया उपलब्धा;, यथैकस्य परमाणोस्तथा सर्वेषां परमाणूनां सर्वेषां च प्रत्येकं द्विप्रदेशिका (दी) नां स्कन्धानां, न चैतत् परकिणामिकालवस्तव्यतिरेके परिणामिपुद्गलास्तिकायादिव्यतिरेकेचोपपद्यते, ततः सर्वमिदं तात्त्विकमवसेयं, उक्तं च–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ "संयोगपुरस्कारश्च नाम भाविनि हि युज्यते काले ।
न हि संयोगपुरस्कारो ह्यसतां केषांचिदुपपन्नः ॥" इति,

यथा च सर्वेषां परमाणूनां सर्वेषां च द्विप्रदेशिकादीनां स्कन्धानां प्रत्येकं द्रव्यक्षेत्रकालभावविशेषसम्बन्धवशादनन्ता भाविनोऽद्धासमयाः तथा अतीता अपीति सिद्धः पुद्गलास्तिकायदनन्तगुणोऽद्धासमयो द्रव्यार्थतयेति ।

उक्तं द्रव्यार्थतया परस्परमल्पबहुत्वम्, इदानीमेतेषामेव प्रदेशार्थतया तदाह-

धर्म्मास्तिकायोऽधर्म्मास्तिकाय एतौ द्वावपि परस्परं प्रदेशार्थतया तुल्यौ, उभयोरपि लोकाकाशप्रदेशपरिमाणप्रदेशत्वात्, शेषास्तिकायाद्धासमयापेक्षया च सर्वस्तोकौ, ततो जीवास्तिकायः प्रदेशार्थतया अनन्तगुणः, जीवास्तिकाये जीवानामनन्तत्वात् एकैकस्य च जीवस्य लोकाकाशप्रदेशपरिमाणप्रदेशत्वात्, तस्मादपि पुद्गलास्तिकायः प्रदेशार्थतयाऽनन्तगुणः, कथमिति चेत्, उच्यते, इह कर्मस्कन्धप्रदेशा अपि तावत् सर्वजीवप्रदेशेभ्योऽनन्तगुणाः, एकैकस्य जीवप्रदेशस्यानन्तानन्तैः कर्मपरमाणुभिरावेष्टितपरिवेष्टितत्वात्, किं पुनः सकलपुद्गलास्तिकायप्रदेशाः ?, ततो भवति जीवास्तिकायात् पुद्गलास्तिकायः प्रदेशार्थतयाऽनन्तगुणः, तस्मादप्यद्धासमयः प्रदेशार्थतयाऽनन्तगुणः, एकैकस्य पुद्गलास्तिकायप्रदेशस्य प्रागुक्तक्रमेण तत्तद्रव्यक्षेत्रकालभावविशेषसम्बन्धबा वतोऽनन्तानामतीताद्धासमयानामनन्तानामनागतसमयानां भावात्, तस्मादाकाशास्तिकायः प्रदेशार्थतयाऽनन्तगुणाः, अलोकस्य सर्वतोऽप्यनन्तताभावात् ॥ गतं प्रदेशार्थतयाऽल्पबहुत्वम्, इदानीं प्रत्येकं द्रव्यार्थप्रदेशार्थतयाऽल्पबहुत्वमाह-

सर्वस्तोको धर्म्मास्तिकायो द्रव्यार्थतया, एकत्वात्, प्रदेशार्थतयाऽसङ्ख्येयगुणः, लोकाकाशप्रदेशपरिमाणप्रदेशात्मकत्वात्, एवमधर्म्मास्तिकायसूत्रमपि भावनीयम्, आकाशास्तिकायो द्रव्यार्थतया सर्वस्तोकः, एकत्वात्, प्रदेशार्थतयाऽनन्तगुणः, अपरिमितत्वात्, जीवास्तिकायो द्रव्यार्थतया सर्वस्तोकाः, प्रदेशार्थतयाऽसङ्ख्येयगुणः, प्रतिजीवं लोकाकाशप्रदेशपरिमाणप्रदेशभावात्, तथा सर्वस्तोकः पुद्गलास्तिकायो द्रव्यार्थतया, द्रव्याणां सर्वत्रापि स्तोकत्वात्, स एव पुद्गलास्तिकायस्तत्तद्रव्यापेक्षया प्रदेशार्थतया चिन्त्यमानोऽसङ्ख्येयगुणः, ननु बहवः खलु जगत्यनन्तप्रदेशका अपि स्कन्धा विद्यन्ते ततोऽनन्तगुणाः कस्मान्न संभवन्ति ?, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात्, इह हि खल्पा अनन्तप्रदेशकाः स्कन्धाः परमाण्वादयस्त्वतिबहवः, तथा च वक्ष्यति सूत्रम्-

"सव्वत्थोवा अनंतपएसिया खंधा दव्वट्ठयाए, परमाणुपोग्गला दव्वट्ठयाए अनंतगुणा, संखेज्जपएसिया खंधा दव्वट्ठयाए संखेज्जगुणा, असंखेज्जपएसिया खंधा दव्वट्ठयाए असंखेज्जगुणा" इति, ततो यदा सर्व एव पुद्दलास्तिकायः प्रदेशार्थतया चिन्त्यते तदाऽनन्दप्रदेशकानां स्कन्धानामतिस्तोकत्वात् परमाणूनां चातिबहुत्वात् तेषा च पृथक् पृथक् द्रव्यत्वात् असङ्ख्येयप्रदेशकानां च स्कन्धानां परमाण्वपेक्षयाऽसङ्ख्येयगुणत्वादसङ्ख्येयगुण एवोपपद्यते नानन्तगुण इत्यर्थः, 'अद्धासमए न पुच्छिज्जइ' इति, अद्धासमयो द्रव्यार्थप्रदेशार्थतया न पृच्छयते, कुतः ?

इत्याह-प्रदेशाभावात्, आह-कोऽयमद्धासमयानां द्रव्यार्थतानियमो ?, यावता प्रदेशार्थताऽपि तेषां विद्यते एव, तथाहि-यथाऽनन्तानां परमाणूनां समुदायः स्कन्धो भण्यते स च द्रव्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदवयवाश्च प्रदेशाः तथेहापि सकलः कालो द्रव्यं तदवयवाश्च समयाः प्रदेशा इति, तदयुक्तं, दृष्टान्तदार्ष्टान्तिकवैषम्यात्, परमाणूनां समुदायः तदा स्कन्धो भवति यदा ते परस्परसापेक्षतया परिणमन्ते, परस्परनिरपेक्षणांकेवलपरमैणूनामिव स्कन्धत्वायोगात्, अद्धासमयास्तु परस्परनिरपेक्षा एव, वर्त्तमानसमयभावे पूर्वापरसमययोरभावात्, ततो न स्कन्धत्वपरिणामः, तद्यावाच्च नाद्धा-समयाः प्रदेशाः, किं तु पृथग् द्रव्याण्येवेति ॥ सम्प्रत्यमीषां धर्म्मास्तिकायादीनां सर्वेषां युगपत् द्रव्यार्थप्रदेशार्थतयाऽल्पबहुत्वमाह–

धर्म्मास्तिकायोऽधर्म्मास्तिकाय आकाशास्तिकाय एते त्रयोऽपि द्रव्यार्थतया तुल्याः सर्वस्तोकाश्च, प्रत्येकमेकसङ्ख्याकत्वात्, तेभ्यो धर्मास्तिकायोऽधर्म्मास्तिकाय एतौ द्वावपि प्रदेशार्थ-तयाऽसङ्खयेयगुणौ, स्वस्थाने तु परस्परं तुल्यौ, ताभ्यां जीवास्तिकायो द्रव्यार्थतयाऽनन्तगुणः, अनन्तानां जीवद्रव्याणां भावात्, स एव जीवास्तिकायः प्रदेशार्थतयाऽसङ्ख्येगुणः, प्रतिजीवम-सङ्ख्येयानां प्रदेशानां भावात्, तस्मादपि प्रदेशार्थतया जीवास्तिकायात् पुद्‌गलास्तिकायो द्रव्यार्थतया-ऽनन्तगुणः, प्रतिजीवप्रदेशं ज्ञानावरणीयादिकर्म्मपुद्‌गलस्कन्धानामप्यनन्तानां भावात्, स एव पुद्‌गलास्तिकायः प्रदेशार्थतयाऽसङ्ख्येयगुणः, अत्र भावना प्रागिव, तस्मादपि प्रदेशार्थतया पुद्‌गलास्तिकायात् अद्धासमयो द्रव्यार्थप्रदेशार्थतयाऽनन्तगुणः, अत्रापि भावना प्रागिव, तस्मादप्याकाशास्तिकायः प्रदेशार्थतया अनन्तगुणः, सर्वास्वपि दिक्षु तस्यान्ताभावात्, अद्धासमयस्य च मनुष्यक्षेत्रमात्रभावात् ॥ गतमस्तिकायद्वारम्, इदानीं चरमद्वारमाह–

–: पदं – ३ – दारं – २२ :– "चरम"

मू. (२८४) *एएसि णं भंते ! जीवाणं चरिमाणं अचरिमाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा अचरिमा चरिमा अनंतगुणा।*

वृ. इह येषा चरमो भवः संभवी योग्यतयाऽपि ते चरमा उच्यन्ते, ते चार्थात् भव्याः, इतरे अचरमा–अभव्याः सिद्धाश्च, उभयेषामपि चरमभवाभावात्, तत्र स्तोका अचरमाः, अभव्यानां सिद्धाना च समुदितानामप्यजघन्योत्कृष्टयुक्तानन्तकपरिमाणत्वात्, तेभ्योऽनन्तगुणाश्चरमाः, अजधन्योत्कृष्थनन्तानन्तकपरिमाणत्वात् ॥ गतं चरमद्वारम्, अधुना जीवद्वारमाह–

–: पदं – ३ – दारं – २३ :– "जीवः"

मू. (२८५) *एएसि णं भंते ! जीवाणं पोग्गलाणं अद्धासमयाणं सव्वदव्वाणं सव्वपएसाणं सव्वपज्रवाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा पोग्गला अनंतगुणा अद्धासमया अनंतगुणा सव्वदव्वा विसेसाहिया सव्वपएसा अनंतगुणा सव्वपज्रवा अनंतगुणा । दारं ।*

वृ. सर्वस्तोका जीवाः, तेभ्यः पुद्‌गला अनन्तगुणाः, तेभ्योऽद्धासमया अनन्तगुणाः, अत्र भावना प्रागेव कृता, तेभ्योऽद्धासमयेभ्यः सर्वद्रव्याणि विशेषाधिकानि, कथमिति चेत्, उच्यते, इह येऽनन्तरमद्धासमयाः पुद्‌गलेभ्योऽनन्तगुणा उक्तास्ते प्रत्येकं द्रव्याणि ततो द्रव्यचिन्तायां तेऽपि परिगृह्यन्ते तेषु च मध्ये सर्वजीवद्रव्याणि सर्वपुद्‌गलद्रव्याणि धर्म्माधर्म्माकाशास्तिकायद्रव्याणि च प्रक्षिप्यन्ते तानि च समुदितान्यप्यद्धासमयानामनन्तभागकल्पानीति तेषु प्रक्षिप्तेष्वपि मनागधिकत्वं जातं इत्यद्धासमयेभ्यः सर्वद्रव्याणि विशेषाधिकानि, तेभ्यः सर्वप्रदेशा अनन्तगुणाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आकाशानन्तत्वात्, तेभ्यः सर्वपर्यवा अनन्तगुणाः, एकैकस्मिन्नाकाशप्रदेशेऽनन्तानामगुरुलघुपर्यायाणां भावात् ॥ गतं जीवद्वारम्, अधुना क्षेत्रद्वारमाह–

–: पदं – ३ – दारं – २४ :– "क्षेत्रं"

मू. (२८६) *खेत्ताणुवाएणं सव्वत्थोवा जीवा उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखेज्जगुणा तेलुक्के असंखेज्जगुणा उड्ढलोए असंखेज्जगुणा अहोलोए विसेसाहिया।*

वृ. क्षेत्रस्यानुपातः–अनुसारः क्षेत्रानुपातः तेन चिन्त्यमाना जीवाः सर्वस्तोका ऊर्ध्वलोकतिर्यग्लोके, इह ऊर्ध्वलोकस्य यदधस्तनमाकाशप्रदेशप्रतरं यच्च तिर्यग्यलोकस्य सर्वोपरितनमाकाशप्रदेशप्रतरमेष ऊर्ध्वलोकतिर्यग्लोकः, तथाप्रवचनप्रसिद्धेः, इयमत्र भावना–इह सामास्त्येन चतुर्दशरज्ज्वात्मको लोकः, स च त्रिधा भिद्यते, तद्यथा–ऊर्ध्वलोकः तिर्यग्लोकोऽधोलोकश्च, रुचकाश्चैतेषां विभागः,

तथाहि–रुचकस्याधस्तान्नव योजनशतानि रुचकस्योपरिष्टान्नवयोजनशतानि तिर्यग्लोकः, तस्य च तिर्यग्लोकस्याधस्तादधोलोकः उपरिष्टादूर्ध्वलोकः, देशोनसप्तरज्जुप्रमाण ऊर्ध्वलोकः समधिकसप्तरज्जुप्रमाणोऽधोलोकः मध्येऽष्टादशयोजनशतोच्छ्रयस्तिर्यग्लोकः, तत्र रुचकसमाद्भूतलभागान्नवयोजनशतानि गत्वा यज्ज्योतिश्चकस्योपरितनं तिर्यग्लोकसम्बन्धिन एकप्रादेशिकामाकाशप्रतरं तत्तिर्यग्लोकप्रतरं तस्य चोपरि यदेकप्रादेशिकमाकाशप्रतरं तदूर्ध्वलोकप्रतरं ते द्वे अपूर्द्धलोकतिर्यग्लोक इति व्यवह्रियते, तथाअनादिप्रवचनपरिभाषाप्रसिद्धेः,

तत्र वर्त्तमानाः जीवाः सर्वस्तोकाः, कथमिति चेत्, उच्यते, इह ये ऊर्द्धलोकात्तिर्यग्लोके तिर्यग्लोकादूर्ध्वलोके (च) समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशन्ति ये च तत्रस्था एव केचन तत्प्रतरद्वयाध्यासिनो वर्त्तन्ते ते किल विवक्षिते प्रतरद्वये वर्त्तन्ते, नान्ये, ये पुनरूर्ध्वलोकादधोलोके समुत्पद्यमानास्तत्प्रतरद्वयं स्पृशन्ति ते न गण्यन्ते, तेषां सूत्रान्तरविषयत्वात्, ततः स्तोका एवाधिकृतप्रतरद्वयवर्त्तिनो जीवाः, ननूर्ध्वलोकगतानामपि सर्वजीवानामसङ्ख्येयो भागोऽनवरतं म्रियमाणोऽवाप्यते, ते च तिर्यग्लोके समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशन्तीति कथमधिकृतप्रतरद्वयसंस्पर्शिनः स्तोकाः ?, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात्,

तथाहि–यद्यपि नामोर्द्धलोकगतानां सर्वजीवानामसङ्ख्येयो भागोऽनवरतं म्रियमाणोऽवाप्यते तथापि न ते सर्व एव तिर्यग्लोके समुत्पद्यन्ते, प्रभूततराणामधोलोके ऊर्ध्वलोके च समुत्पादात्, ततोऽधिकृतप्रतरद्वयवर्त्तिनः सर्वस्तोका एव, तेभ्योऽधोलोकतिर्यग्लोके विशेषाधिकाः, इह यदधोलोकस्योपरितनमेकप्रमादेशिकमाकाशप्रदेशप्रतरं यच्च तिर्यग्लोकस्य सर्वाधस्तनमेकप्रादेशिकमाकाशप्रदेशप्रतरमेतद्द्वयमप्यधोलोकतिर्यग्लोक इत्युच्यते, तथाप्रवचनप्रसिद्धेः, तत्र ये विग्रहगत्या तत्रस्थतया वा वर्त्तन्ते ते विशेषाधिकाः, कथमिति चेत्, उच्यते, इह येऽधोलोकात्तिर्यग्लोके तिर्यग्लोकाद्वाऽधोलोके ईलिकागत्या समुत्पद्यमाना अधिकृतप्रतरद्वयं स्पृशन्ति ये च तत्रस्था एव केचन तत्प्रतरद्वयमध्यासीना वर्त्तन्ते ते विवक्षितप्रतरद्वयवर्तिनो, ये पुनरधोलोकादूर्ध्वलोके समुत्पद्यमानास्तत्प्रतरद्वयं स्पृशन्ति ते न परिगृह्यन्ते, तेषां सूत्रान्तरविषयत्वात्, केवलमूर्ध्वलोकादधोलोके विशषाधिका इत्यधोलोकात्तिर्यग्लोके समुत्पद्यमाना ऊर्ध्वलोकापेक्षया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषाधिका अवाप्यन्ते ततो विशेषाधिकाः,

–तेभ्यस्तिर्यग्लोकवर्त्तिनोऽसङ्ख्येयगुणाः, उक्तक्षेत्रद्विका त्तिर्यग्लोकक्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यस्त्रैलोक्ये–त्रिलोकसंस्पर्शिनोऽसङ्ख्येयगुणाः, इह ये केवले ऊध्र्ध्वलोकेऽधोलोके तिर्यग्लोके वा वर्त्तन्ते ये च विग्रहगत्या ऊध्र्ध्वलोकतिर्यग्लोकौ स्पृशन्ति ते न गण्यन्ते, किं तु ये विग्रहगत्यापन्नास्त्रीन्पि लोकान् स्पृशन्ति ते परिग्राह्याः, सूत्रस्य विशेषविषयत्वात्, ते च तिर्यग्लोकवर्त्तिभ्योऽसङ्ख्येयगुणा एव, कथमिति चेत्, उच्यते, इह बहवः प्रतिसमयमूध्र्ध्वलोकेऽधोलोके च सूक्ष्मनिगोदा उद्वर्त्तन्ते, य तु तिर्यग्लोकवर्त्तिनः सूक्ष्मनिगोदा उद्वर्त्तन्ते अर्थादधोलोके ध्र्ध्वलोके वा केचित्तस्मिन्नेव वा तिर्यग्लोके समुत्पद्यन्ते ततो न ते लोकत्रयसंस्पर्शिन इति नाधिकृतसूत्रविषयाः, तत्रोध्र्ध्वलोकाधोलोकगतानां सूक्ष्मनिगोदानामुद्वर्त्तमानानां मध्ये केचित् स्वस्थाने एवोध्र्णलोकेऽधोलोके वा समुत्पद्यन्ते केचित्तिर्यग्लोके, तेभ्योऽसङ्ख्येयगुणा अधोलोकगता ऊध्र्ध्वलोके ऊध्र्ध्वलोकगता अधोलोके समुत्पद्यन्ते, ते च तथोत्पद्यमानास्त्रीनपि लोकान् स्पृशन्तीत्यसङ्ख्येयगुणाः,

कथं पुनरेतदवसीयते यदुत एवंप्रमाणा बहवो जीवाः सदा विग्रहगत्यापन्नाः लभ्यन्ते इति चेत् ?, उच्यते, युक्तिवशात्, तथाहि–प्रागुक्तमिदमत्रैव सूत्रं पर्याप्तद्वारे–"सव्वत्थोवा जीवा नोपज्ञत्तानोअपज्ञत्ता अपज्ञत्ता अनंतगुणा पज्ञत्ता संखेज्ञगुणा" इति, त एवं नामापर्याप्ता बहवः येनैतेभ्यः पर्याप्ताः सङ्ख्येयगुणा एव नासङ्ख्येयगुणा नाप्यनन्तगुणाः, ते चापर्याप्ता बहवोऽनन्तरगतौ वर्त्तमाना लभ्यन्ते इति, तेभ्यो ऊध्र्ध्वलोके–ऊध्र्ध्वलोकावस्थिता असङ्ख्येयगुणाः, उपपातक्षेत्रस्यातिबहुत्वात्, असङ्ख्येयाना य भागानामुद्वर्त्तनायाश्च संभवात्, तेभ्योऽ धोलोके–अधोलोकवर्त्तिनो विशे० ऊध्र्ध्वलोकक्षेत्रादधोलोकक्षेत्रस्य विशे० । तदेवं सामान्यतो जीवानां क्षेत्रानुपातेनाल्पबहुत्वमुक्तम्, इदानीं चतुर्गतिदण्डकक्रमेण तदभिधित्सुः प्रथमतो नैरयिकाणमाह–

मू. (२८७) *खेत्ताणुवाएणं सव्वत्थोवा नेरइया तेलोक्के अहोलोयतिरियलोए असंखेज्ञगुणा, अहोलोए असंखेज्ञगुणा ॥ खेत्ताणुवाएणं सव्वत्थोवा तिरिक्खजोणिया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखेज्ञगुणा तेलोक्के असंखेज्ञगुणा उड्ढलोए असंखेज्ञगुणा अद्दोलोए विसेसाहिया ॥ खेत्ताणुवाएणं सव्वत्थोवाओ तिरिक्खजोणिणीओ उड्ढलोए उड्ढलोयतिरियलोए असंखेज्ञगुणाओ तेलोक्के संखेज्ञगुणाओ अहोलोयतिरियलोए संखेज्ञगुणाओ अहोलोए संखेज्ञगुणाओ तिरियलोए संखेज्ञगुणाओ ॥*

खेत्ताणुवाएणं सव्वत्थोवा मणुस्सा तेलोक्के उड्ढलोयतिरियलोए असंखेज्ञगुणा अहोलोयतिरियलोए संखेज्ञगुणा उड्ढलोए संखेज्ञगुणा अहोलोए संकेज्ञगुणा तिरियलोए संखेज्ञगुणा खेत्ताणुवाएणं सव्वत्थोवा मणुस्सीओ तेलोक्के उड्ढलोयतिरियलोए संखेज्ञगुणाओ अहोलोयतिरियलोए संखेज्ञगुणाओ उड्ढलोए संखेज्ञगुणाओ अहोलोए संखेज्ञगुणाओ तिरियलोए संखेज्ञगुणाओ ॥

खेत्ताणुवाएणं सव्वत्थोवा देवा उड्ढलोए उड्ढलोयतिरियलोए असंखेज्ञगुणा तेलोक्के संखेज्ञगुणा अहोलोयिरियलोए संखेज्ञगुणा अहोलोए संखेज्ञगुणा तिरियलोए संखेज्ञगुणा । खेत्ताणुवाएणं सव्वत्थोवाओ देवीओ उड्ढलोए उड्ढलोयतिरियलोए असंखेज्ञगुणाओ तेलोक्के संखेज्ञगुणाओ अहोलोयतिरियलोए संखेज्ञगुणाओ अहोलोए संखेज्ञगुणाओ तिरियलोए संखेज्ञगुणाओ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'क्षेत्रानुपातेन' क्षेत्रानुसारेण नैरयिकाश्चिन्त्यमानाः सर्वस्तोकास्त्रैलोक्ये–लोकत्रयसंस्पर्शिनः, कथं लोकत्रयसंस्परिश्नो नैयिकाः कथं वा ते सर्वस्तोकाः इति चेत् ?, उच्यते, इह ये मेरुशिखरे अञ्जनदधिमुखपर्वतशिखरादिषु वा वापीषु वर्त्तमाना मत्स्यादयो नरकेषूत्पित्सव ईलिकागत्या प्रदेशान् विक्षिपन्ति ते किल त्रैलोक्यमपि स्पृशन्ति नारकव्यपदेशं च लभन्ते तत्कालमेव नरकेषूत्पत्तेर्नाकायुष्कप्रतिसंवेदनात्, ते चेत्थंभूताः कतिपये इति सर्वस्तोकाः,

अन्ये तु व्याचक्षते–नारका एव यथोक्तवापीषु तिर्यक्पञ्चेन्द्रियतयोत्पद्यमानाः समुद्घातवशतो विक्षिप्तनिजात्मप्रदेशदण्डाः परिगृह्यन्ते, ते हि किल तदा नारका एव निर्विवादं, तदायुष्कप्रतिसंवेदनात्, त्रैलोक्यसंस्पर्शिनश्च, यथोक्तवापीर्यावदात्मप्रदेशदण्डस्व विक्षिप्तत्वादिति, तेभ्योऽधोलोकतिर्यग्लोके–अधोलोकतिर्यग्लोकसञ्ज्ञप्रागुक्तप्रतरद्वयस्य संस्पर्शिनोऽसङ्खयेयगुणाः, यतो बहवोऽसङ्खयेयेषु द्वीपसमुद्रेषु पञ्चेन्द्रियतिर्यग्योनिका नरकेषूत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशन्ति ततो भवन्ति पूर्वोक्तेभ्योऽसङ्खयेयगुणाः, क्षेत्रस्यासङ्खयातगुणत्वात्, मन्दरादिक्षेत्रादसङ्खयेयद्वीपसमुद्रात्मकं क्षेत्रमसङ्खयेयगुणमित्यतो भवन्त्यसङ्खयेयगुणाः,

अन्ये त्वभिदधति–नारका एवासङ्खयेयेषु द्वीपसमुद्रेषु तिर्यक्पञ्चेन्द्रियतयोत्पद्यमाना मारणान्तिकसमुद्घातेन विक्षिप्तनिजात्मप्रदेशदण्डा द्रष्टव्याः, ते हि नार कायुःप्रतिसंवेदनान्नारका उद्वर्त्तमाना अपि असङ्खयेया; प्राप्यन्ते इति प्रागुक्तेभ्योऽसङ्खयेयगुणाः, तेभ्योऽधोलोकेऽसङ्खयेयगुणाः, तस्य तेषां स्वस्थानत्वात् । उक्तं नारकगतिमधिकृत्य क्षेत्रानुपातेनाल्पबहुत्वम्, इदानीं तिर्यग्गतिमधिकृत्याह–

इदं सर्वमपि सामान्यतो जीवसूत्रमिव भावनीयं, तदपि तिरश्च एव सूक्ष्मनिगोदानधिकृत्य भावितम्, अधुना तिर्यग्योनिकस्त्रीविषयमल्पबहुत्वमाह–क्षेत्रानुपातेन तिर्यग्योनिकस्त्रियश्चिन्त्य मानाः सर्वस्तोकाः ऊर्ध्ध्वलोके, इह मन्दराद्रिवापीप्रभृतिष्वपि हि पञ्चेन्द्रियतिर्यग्योनिकाः स्त्रियो भवन्ति, ताश्च क्षेत्रस्याल्पत्वात् सर्वस्तोकाः, ताभ्य ऊर्ध्ध्वलोकतिर्यग्लोके–ऊर्ध्ध्वलोकतिर्यग्लोकसंज्ञे प्रतरद्वये वर्त्तमानाः असङ्खयेयगुणाः, कथमिति चेत् ?, उच्यते,

यावत्सहस्रादेवलोकस्तावद्देवा अपि गर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रिययोनिषूत्पद्यन्ते किं पुनः शेषकायाः ?, ते हि यथासंभवमुपरिवर्त्तिनोऽपि तत्रोत्पद्यन्ते, ततो ये सहस्रारान्ता देवा अन्येऽपि च शेषकाया ऊर्ध्ध्वलोकात्तिर्यग्लोके तिर्यक्पञ्चेन्द्रियस्त्रीत्वेन तदायुः प्रतिसंवेदयमाना उत्पद्यन्ते यास्तिर्यग्लोकवर्त्तिन्यस्तिर्यक्पञ्चेन्द्रियस्त्रिय ऊर्ध्ध्वलोके देवत्वेन शेषकायत्वेन चोत्पद्यमाना मारणान्तिकसमुद्घाततेनोत्पत्तिदेशे निजनिजात्मप्रदेशदण्डान् विक्षिपन्ति ता यथोक्तं प्रतरद्वयं स्पृशन्ति तिर्यग्योनिकस्त्रैयश्च तास्ततोऽसङ्खयेयगुणाः, क्षेत्रस्यासङ्खयेयगुणत्वात्, ताभ्यस्त्रैलोक्ये सङ्खयेयगुणाः, यस्मादधोलोकात् भवनपतिव्यन्तरनारकाः शेषकाया अपि चोर्ध्ध्वलोकेऽपि तिर्यक्पञ्चेन्द्रियस्त्रीत्वेनोत्पद्यन्ते ऊर्ध्ध्वलोकाद् देवादयोऽप्यधोलोके च ते समवहता निजनिजात्मप्रदेशदण्डैस्त्रीनपि लोकान् स्पृशन्ति प्रभूताश्च ते तथा तिर्यग्योनिकस्त्र्यायुःप्रतिसंवदनात् तिर्यग्योनिकस्त्रियश्च ततः सङ्खयेयगुणाः,

ताभ्योऽधोलोकतिर्यग्लोके–अधोलोकतिर्यग्लोकसंज्ञे प्रतरद्वये वर्त्तमानाः सङ्खयेयगुणाः, बहवो हि नारकादयः समुद्घातमन्तरेणापि तिर्यग्लोके तिर्यक्पञ्चेन्द्रियस्त्रीत्वेनोत्पद्यन्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिर्यग्लोकवर्त्तिनश्च जीवास्तिर्यग्योनिकस्त्रीत्वेनाधोलौकिकग्रामेष्वपि च ते च तथोत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशन्ति तिर्यग्योनिकस्त्र्यायुःप्रतिसंवेदनाच्च तिर्यग्योनिकास्त्रियोऽपि, तथाऽधोलौकिकग्रामा योजनसहस्रावगाहाः पर्यन्तेऽर्वाक् क्वचित्प्रदेशे नवयोजनशतावगाह्या अपि तत्र काश्चित्तिर्यग्योनिकस्त्रियोऽवसअथानेनापि यथोक्तप्रतरद्वयाध्यासिन्यो वर्त्तन्ते ततो भवन्ति पूर्वोक्ताभ्यः सङ्घयेयगुणाः, ताभ्योऽधोलोके सङ्घयेयगुणाः, यतोऽधोलौकिकग्रामाः सर्वेऽपि च समुद्रा योजनसहस्रावगाहाः ततो नवयोजनशतानामधस्तात् या वर्त्तन्ते मत्सीप्रभृतिकास्तिर्यग्योनिकस्त्रियस्ताः स्वस्थानत्वात् प्रभूता इति सङ्घयेयगुणाः, क्षेत्रस्य सङ्घयेयगुणत्वात्, ताभ्यस्तिर्यग्लोके सङ्घयेयगुणाः उक्तं तिर्यग्गतिमप्यधिकृत्याल्पबहुत्वम्, इदानीं मनुष्यगतिविषयमाह—

क्षेत्रानुपातेन मनुष्याश्चिन्त्यमानास्त्रैलोक्ये—त्रैलोक्यसंस्पर्शिनः सर्वस्तोकाः, यतो ये ऊर्ध्वलोकादधोलौकिकग्रामेषु समुत्पित्सवो मारणान्तिकसमुद्घातेन समवहता भवन्ति ते केचित् समुद्घातवशाद् वहिर्निर्गतैः स्वात्मप्रदेशैस्त्रीनपि लोकान् स्पृशन्ति येऽपि चान्ये वैक्रियसमुद्घातमाहारकसमुद्घातं वा गताः प्राप्ताः तथाविधप्रयत्नविशेषात् दूरतरमूर्द्धाधोविक्षिप्तात्मप्रदेशाः ये च केवलिसमुद्घातगतास्तेऽपि त्रीन्पि लोकान् स्पृशन्ति स्तोकाश्चेति सर्वस्तोकाः,

तेभ्य ऊर्ध्वलोकतिर्यग्लोके—ऊर्ध्वलोकतिर्यग्लोकसंज्ञकप्रतरद्वयसंस्पर्शिनोऽसङ्घयेयगुणाः, यत इह वैमानिकदेवाः शेषकायाश्च यथासंभवमूर्ध्वलोकात्तिर्यग्लोके मनुष्यत्वेन समुत्पद्यमाना यथोक्तप्रतरद्वयसंस्पर्शिनो भवन्ति विद्याधराणामपि च मन्दरादिषु गमनं तेषां च शुक्ररुधिरादिपुद्ग- लेषु संमूर्च्छिमनुष्याणामुत्पाद इति ते विद्याधरा रुधिरादिपुद्गलसम्मिश्रा यदा गच्छन्ति तदा संमूर्च्छिममनुष्या अपि यथोक्तप्रतरद्वयसंस्पर्शवन्त उपजायन्ते ते चातिबहव इत्यासङ्घयेयगुणाः,

तेभ्योऽधोलोकतिर्यग्लोके—अधोलोकतिर्यग्लोकसंज्ञे प्रतरद्वये सङ्घयेयगुणाः, यतोऽधोलौकिकग्रामेषु स्वभावत एव बहवो मनुष्याः, ततो ये तिर्यग्लोकात् मनुष्येभ्यः शेषकायेभ्यो वाऽधोलौकिकग्रामेषु ग्रभव्युत्क्रान्तिकमनुष्यत्वेन संमूर्च्छिममनुष्यत्वेन वा समुत्पित्सवो ये चाधोलोकादधोलौकिकग्रामरूपात् शेषाद्वा मनुष्येभ्यः शेषकायेभ्यो वा तिर्यग्लोके गर्भव्युत्क्रान्तिकमनुष्यत्वेन वा संमूर्च्छिममनुष्यत्वेन वा समुत्पत्तुकामास्ते यथोक्तं किल प्रतरद्वयं स्पृशन्ति बहुतराश्च ते तथा स्वस्थानतोऽपि केचिदधोलौकिकग्रामेषु यथोक्तप्रतरद्वयसंस्पर्शिन इति ते प्रागुक्तेभ्यः सङ्घयेयगुणाः, तेभ्यः ऊर्ध्वलोके सङ्घयेयगुणाः, सौमनसादिक्रीडार्थं चैत्यवन्दनिमित्तं वा प्रभूततराणां विद्याधरचारणमुनीनां भावात् तेषां च यथायोगं रुधिरादिपुद्गलयोगतः संमूर्च्छिमम-नुष्यसंभवात्, तेभ्योऽधोलोके सङ्घयेयगुणाः, स्वस्थानत्वेन बहुत्वभावात्, तेभ्यस्तिर्यग्लोके सङ्घयेय- गुणाः, क्षेत्रस्य सङ्घयेयगुणत्वात् स्वस्थानत्वाच्च । सम्प्रति क्षेत्रानुपातेन मानुषीविषयमल्पबहुत्वमाह—

क्षेत्रानुपातेन मानुष्यश्चिन्त्यमानाः सर्वस्तोकाःत्रैलोक्यस्पर्शिन्यः, ऊर्ध्वलोकादधोलोके समुत्पित्सूना मारणान्तिकसमुद्घातवशविनिर्गतदूरतरात्मप्रदेशानामथवावैक्रियसमुद्घातगतानां केवलिसमुद्घातगतानां वा त्रैलोक्यसंस्पर्शनात् तासां चातिस्तोकत्वमिति सर्वस्तोकाः,

ताभ्य ऊर्ध्वलोकतिर्यग्लोके—ऊर्ध्वलोकतिर्यग्लोकसंज्ञे प्रतरद्वये सङ्घयेयगुणाः वैमानिकदेवानां शेषकायाणां चोर्ध्वलोकात् तिर्यग्लोके मनुष्यस्त्रीत्वेनोत्पद्यमानानां तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिर्यग्लोकगतमनुष्यस्त्रीणामूर्ध्वलोके समुत्पित्सूनां मारणान्तिकसमुद्घातवशात् दूरतरमूर्द्धविक्षिप्तात्मप्रदेशानामद्यापि कालमकुर्वन्तीनां यथक्तप्रतरद्वयसंस्पर्शनभावात् तासां चोभयासामपि बहुतरत्वात्, ताभ्योऽधोलोकतिर्यग्लोके-प्रागुक्तस्वरूपे प्रतरद्वयरूपे सङ्ख्येयगुणाः, तिर्यग्लोकाद् मनुष्यस्त्रीभ्यः शेषेभ्यो वाऽधोलौकिकग्रामेषु यदिवाऽधोलौकिकग्रामरूपात् शेषाद्वा तिर्यग्लोके मनुष्यस्त्रीतेवेनोत्पित्सूनां कासाञ्चिदधोलौकिकग्रामेष्ववस्थानतोऽ यथोक्तप्रतरद्वयसंस्पर्शसंभवात् तासां च प्रागुक्ताभ्योऽतिबहुत्वात्, ताभ्योऽपि ऊर्ध्वलोके सङ्ख्येयगुणाः, क्रीडार्थं चैत्यवन्दनिमित्तं वा सौमनसादिषु प्रभूततराणां विद्याधरीणां (गमन)-संभवात्, ताभ्योऽप्यधोलोके सङ्ख्येयगुणाः, स्वस्थानत्वेन तत्रापि बहुतराणां भावात्, ताभ्यस्तिर्यग्लोके सङ्ख्येयगुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात् स्वस्थानत्वाच्च। गतं मनुष्यगतिमधिकृत्याल्पबहुत्वम्, इदानीं देवगतिमधिकृत्याह-

क्षेत्रानुपातेन चिन्त्यसमाना देवाः सर्वस्तोकाः ऊर्ध्वलोके, वैमानिकानामेव तत्र भावात् तेषां चाल्पत्वात्, येऽपि भवनपतिप्रभृतयो जिनेन्द्रजन्ममहोत्सवादौ मन्दरादिषु गच्छन्ति तेऽपि स्वल्पा एवेति सर्वस्तोकाः, तेभ्य ऊर्ध्वलोकतिर्यग्लोके-ऊर्ध्वलोकतिर्यग्लोकसंज्ञे प्रतरद्वयेऽसङ्ख्येयगुणाः, तद्धि ज्योतिष्काणा प्रत्यासन्नमिति स्वस्थानं, तथा भवनपतिव्यन्तरज्योतिष्का मन्दरादौ सौधर्मादिकल्पगताः स्वस्थाने गमागमेन तथा ये सौधर्मादिषु देवत्वेनोत्पित्सवो देवायुः प्रतिसंवेदयमानाः स्वोत्पत्तिदेशमभिगच्छन्ति ते यथोक्तं प्रतरद्वयं स्पृशन्ति ततः सामास्त्येन यथोक्तप्रतरद्वयसंस्पर्शिनः परिभाव्यमाना अतिबहव इति पूर्वोक्तेभ्योऽसङ्ख्येयगुणाः, तेभ्यस्त्रैलोक्यसंस्पर्शिनः सङ्ख्येयगुणाः, यतो भवनपतिव्यन्तरज्योतिष्कवैमानिका देवाः तथाविधप्रयत्नविशेषवशतो वैक्रियसमुद्घातेन समवहताः सन्तः त्रीनपि लोकान् स्पृशन्ति ते चेत्थं समवहताः प्रागुक्तप्रतरद्वयस्पर्शिभ्यः सङ्ख्येयगुणाः केवलवेदसोपलभ्यन्ते इति सङ्ख्येयगुणाः,

तेभ्योऽधोलोकतिर्यग्लोके-अधोलोकतिर्यग्लोकसंज्ञे प्रतरद्वये वर्त्तमानाः सङ्ख्येयगुणाः, तद्धि प्रतरद्विकं भवनपतिव्यन्तरदेवानां प्रत्यासन्नतया स्वस्थानं तथा बहवो भवनपतयः स्वभवनस्थाः तिर्यग्लोकगमागमेन तथोद्वर्त्तमानाः तथा वैक्रियसमुद्घातेन समवहतास्तथा तिर्यग्लोकवर्त्तिनस्तिर्यक्पञ्चेन्द्रियमनुष्या वा भवनपतित्वेनोत्पद्यमाना भवनपत्यायुरनुभवन्तो यथोक्तप्रतरद्वयसंस्पर्शिनोऽतिबहव इति सङ्ख्येयगुणाः, तेभ्योऽधोलोके सङ्ख्येयगुणाः, भवनपतीनां स्वस्थानमितिकृत्वा, तेभ्यस्तिर्यग्लोते सङ्ख्येयगुणाः, ज्योतिष्कव्यन्तराणां स्वस्थानत्वात्। अधुना देवीरधिकृत्याल्पबहुत्वमाह- 'खेत्ताणुवाएणं' इत्यादि, सर्वं देवसूत्रमिवाविशेषेण भावनीयं।

तदेवमुक्तं देवविषयमौधिकमल्पबहुत्वम्, इदानीं भवनपत्यादिविशेषविषयं प्रतिपिपादयिषुः प्रथमतो भवनपतिविषयमाह-

मू. (२८८) *खेत्ताणुवाएणं सव्वत्थोवा भवणवासी देवा उड्ढलोए उड्ढलोयतिरियलोए असंखेज्जगुणा तेलोक्के संखेज्जगुणा अहोलोयतिरियलोए असंखेज्जगुणा तिरियलोए असंखेज्जगुणा अहोलोए असंखेज्जगुणा। खेत्ताणुवाएणं सव्वत्थोवाओ भवणवासिणीओ देवीओ उड्ढलोए उड्ढलोयतिरियलोए असंखेज्जगुणाओ तेलोक्के संखेज्जगुणाओ अहोलोयतिरियलोए असंखेज्जगुणाओ तिरियलोए असंखेज्जगुणाओ अहोलोए असंखेज्जगुणाओ ॥*

खेत्ताणुवाएणं सव्वत्थोवा वाणमंतरा देवा उड्ढलोए उड्ढलोयतिरियलोए असंखेज्जगुणा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेलोक्के संखेज्रगुणा अहोलोयतिरियलोए असंखेज्रगुणा अहोलोए संखेज्रगुणा तिरियलोए संखेज्रगुणा खेत्ताणुवाएणं सव्वत्थोवाओ वाणमंतरीओ देवीओ उड्ढलोए उड्ढलोयतिरियलोए असंखेज्रगुणाओ तेलोक्के संखेज्रगुणाओ अहोलोयतिरियलोए असंखेज्रगुणाओ अहोलोए संखेज्रगुणाओ तिरियलोए संखेज्रगुणाओ ॥ खेत्ताणुवाएणं सव्वत्थोवा जोइसिया देवा उड्ढलोए उड्ढलोयतिरियलोए असंखेज्रगुणा तेलोक्के संखेज्रगुणा अहोलोयतिरियलोए असंखेज्रगुणा अहोलोए संखेज्रगुणा तिरियलोए असंखेज्रगुणा। खेत्ताणुवाएणं सव्वत्थोवाओ जोइसिणीओ देवीओ उड्ढलोए उड्ढलोयतिरियलोए असंखेज्रगुणाओ तेलोक्के संखेज्रगुणाओ अहोलोयतिरियलोए असंखेज्रगुणाओ अहोलोए संखेज्रगुणाओ तिरियलोए असंखेज्रगुणाओ ॥

खेत्ताणुवाएणं सव्वत्थोवा वेमाणिया देवा उड्ढलोयतिरियलोए तेलोक्के संखेज्रगुणा अहोलोयतिरियलोए संखि० अहोलोए संखि० तिरियलोए संखे० उड्ढलोए असंखि० खित्ताणुवाएणं सव्वत्थोवाओ वेमाणिणीओ देवीओ उड्ढलोयतिरियलोए तेलोक्के संखेज्रगुणाओ अहोलोयतिरियलोए संखेज्रगुणाओ अहोलोए संख० तिरियलोए संखेज्रगुणाओ उड्ढलोए असंखेज्रगुणाओ

वृ. क्षेत्रानुपातेन भवनवासिनो देवाश्चिन्त्यमानाः सर्वस्तोका ऊर्ध्वलोके, तथाहि–केषाञ्चित्सौधर्म्मादिष्वपि कल्पेषु पूर्वसंगतिकनिश्रया गमनं भवति, केषाञ्चिन्मन्दरे तीर्थकरजन्ममहिमानिमित्तमञ्जनदधिमुखेष्वष्टाह्निकानिमित्तमपरेषां मन्दरादिषु क्रीडानिमित्तं गमनमेते च सर्वेऽपि स्वल्पा इति सर्वस्तोका ऊर्ध्वलोके, तेभ्य ऊर्ध्वलोकतिर्यग्लोकसंज्ञे प्रतरद्वये असङ्ख्येयगुणाः, तथमिति चेत् ?, उच्यते, इह तिर्यग्लोकस्था वैक्रियसमुद्घातेन समवहता ऊर्ध्वलोकं तिर्यग्लोकं च स्पृशन्ति तथा ये तिर्यग्लोकस्था एव मारणान्तिकसमुद्घातेन समवहता ऊर्ध्वलोके सौधर्म्मादिषु देवलोकेषु बादर-पर्याप्तपृथिवीकायिकतया बादरपर्याप्ताप्कायिकतया बादरपर्याप्तप्रत्येकवनस्पतिकायिकतया च शुरेषु मणिविधानादिषु स्थानेषूत्पत्तुकामा अद्यापि स्वभवायुः प्रतिसंवेदयमानाः, न पारभविकं पृथिवीकायिकाद्यत्युः, द्विविधा हि मारणान्तिकसमुद्घातसमवहताः– केचित्पारभविकमायुः प्रतिसंवेदयन्ते केचिन्नेति, तथा चोक्तं प्रज्ञप्तौ–"जीवे णं भंते ! मारणंतियसमुग्घाएणं समोहए समोहणित्ता जे भविए मंदरस्स पव्वयस्स पुरच्छिमे णं बायरपुढविकाइयत्ताए उववज्जित्तए से णं भंते ! किं तत्थगए उववज्जेज्रा उयाहु पडिनियत्तित्ता उववज्जइ ?, गोयमा ! अत्थेगइए तत्थगए चेव उववज्जइ अत्थेगइए ततो पडिनियत्तित्ता दोच्चंपि मारणंतियसमुग्घाएणं समोहणति, समोहणित्ता तओ पच्छा उववज्जइ" इति, स्वभवायुःप्रतिसंवेदनाच्च ते भवनवासिन एव लभ्यन्ते, ते इत्थंभूता उत्पत्तिदेशे विक्षिप्तात्मप्रदेशदण्डाः तथोर्द्धलोके गमनागमनतस्तत्प्रतरद्वयप्रत्यासन्नक्रीडास्थानतश्च यथोक्तं प्रतरद्वयं स्पृशन्ति ततः प्रागुक्तेभ्योऽसङ्ख्येयगुणाः,

–तेभ्यस्त्रैलोक्ये–त्रैलोक्यसंस्पर्शिनः सङ्ख्येयगुणाः यतो ये ऊर्ध्वलोक तिर्यक्पञ्चेन्द्रिया भवनपतित्वेनोत्पत्तुकामा ये च स्वस्थाने वैक्रियसमुद्घातेन मारणान्तिकप्रथमसमुद्घातेन वा तथाविघतीव्रप्रयत्नविशेषेण समवहतास्ते त्रैलोक्यसंस्पर्शिन इति सङ्ख्येयगुणाः, परस्थानसमवहतेभ्यः स्वस्थानसमवहतानां सङ्ख्येयगुणत्वात्, तेभ्योऽधोलोकतिर्यग्लोके–अधोलोकतिर्यग्लोकसंज्ञे प्रतरद्वयेऽसङ्ख्येयगुणाः, स्वस्थानप्रत्यातन्नतया तिर्यग्लोके गमनागमनभावतश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्थानस्थितक्रोधादिसमुद्घातगमनतश्च बहूनां यथोक्तप्रतरद्वयसंस्पर्शभावात्, तेभ्यस्तिर्यग्लोकेऽसङ्घयेयगुणाः, समवसरणादौ वन्दननिमित्तं द्वीपेषु च रमणीयेषु क्रीडानिमित्तमागमनसंभवात् आगतानां च चिरकालमप्यवस्थानात्, तेभ्योऽधोलोकेऽसङ्घयेयगुणाः, भवनवासिनामधोलोकस्य स्वस्थानत्वात् । एवं भवनवासिदेवीगतमप्यल्पबहुत्वं भावनीयं । सम्प्रति व्यन्तरगतमल्पबहुत्वमाह—

क्षेत्रानुपातेन चिन्त्यमाना व्यन्तराः सर्वस्तोका ऊर्द्धलोके, कतिपयानामेव पण्डकवनादौ तेषां भावात्, तेभ्य ऊर्ध्वलोकतिर्यग्लोके प्रतरद्वरूपेऽसङ्घयेयगुणाः, केषांचित् स्वस्थानान्तर्वर्त्तितया अपरेषां स्वस्थानप्रत्यासन्नतया अन्येषां बहूनां मन्दरादिषु गमनागमनभावतो यथोक्तप्रतरद्वयसंस्पर्शात्, तेषां समुदायेन चिन्त्यमानामातिबहुत्वभावात्, तेभ्यस्त्रैलोक्ये सङ्घयेयगुणाः, यतो लोकत्रयवर्त्तिनोऽपि व्यन्तरास्तथाविधप्रयत्नविशेषवशतो वैक्रियसमुद्घातेन समवहताः सन्तस्त्रीनपि लोकानात्मप्रदेशैः स्पृशन्ति, ते च प्रागुक्तेभ्योऽतिबहव इति सङ्घयेयगुणाः,

तेभ्योऽधोलोकतिर्यग्लोके प्रतरद्वयरूपे असङ्घयेयगुणाः, तद्धि बहूनां व्यन्तराणां स्वस्थानं ततस्तत्संस्पर्शिनो बहव इत्यसङ्घयेयगुणाः, अधोलोके सङ्घयेयगुणाः, अदोलौकिकग्रामेषु तेषां स्वस्थानभावात् बहूनामधोलोके क्रीडार्थं गमनभावात्, तेभ्यस्तिर्यग्लोके सङ्ख्येयगुणाः, तिर्यग्लोकस्य तेषां स्वस्थानत्वात् । एवं व्यन्तरदेवीविषयमप्यल्पबहुत्वं वक्तव्यं । सम्प्रति ज्योतिष्कविषयमल्पबहुत्वमाह—

क्षेत्रानुपातेन चिन्त्यमाना ज्योतिष्काः सर्वस्तोका ऊर्ध्वलोके, केषाञ्चिदेव मन्दरे तीर्थकरजन्म- महोत्सवनिमित्तमञ्जनदधिमुखेष्वष्टाह्निकानिमित्तं च परेषां केषाञ्चिन्मन्दरादिषु क्रीडानिमित्तं गमनसंभवात्, तेभ्य ऊर्ध्वलोकतिर्यग्लोके प्रतरद्वयरूपे असङ्घयेयगुणाः, तद्धि प्रतरद्वयं केचित् स्वस्थानस्थिता अपि स्पृशन्ति, प्रत्यासन्नत्वात्, अपरे वैक्रियसमुद्घातसमवहताः, अन्ये ऊर्ध्वलोक- गमनागमनभावतः, ततोऽधिकृतप्रतरद्वयस्पर्शिनः पूर्वोक्तेभ्योऽसङ्घयेयगुणाः, तेभ्यस्त्रलोक्ये– त्रैलोक्यसंस्पर्शिनः सङ्घयेयगुणाः, ये हि ज्योतिष्कास्तथाविधतीव्रप्रयत्नवैक्रियसमुद्घातेन समवहतास्त्रीनपि लोकान् स्वप्रदेशैः स्पृशन्ति ते स्वभावतोऽप्यतिबहव इति पूर्वोक्तेभ्य; सङ्घयेयगुणाः, तेभ्योऽधोलोकतिर्यग्लोके प्र[illegible]द्वये वर्त्तमाना असङ्घयेयगुणाः, यतो बहवोऽधोलौकिक- ग्रामेषु समवसरणादिनिमित्तमधोलोके क्रीडानिमित्तं गमनागमनभावतो बहवश्चाधोलोकात् ज्योति- ष्केषु समुत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशन्ति, ततो घटन्ते पूर्वोक्तेभ्योऽसङ्घयेयगुणाः, तेभ्यः सङ्घयेयगुणा अधोलोके, बहूनामधोलोके क्रीडानिमित्तधोलौकिकग्रामेषु समवसरणादिषु चिरका- लावस्थानात्, तेभ्योऽसङ्घयेयगुणास्तिर्यग्लोके, तिर्यग्लोकस्य तेषां स्वस्थानत्वात् । एवं ज्योतिष्क- देवीसूत्रमपि भावनीयं । सम्प्रति वैमानिकदेवविषयमल्पबहुत्वमाह—

'क्षेत्रानुपातेन' क्षेत्रानुसारेण चिन्त्यमाना वैमानिका देवाः सर्वस्तोकाः ऊर्ध्वलोकतिर्यग्लोके—ऊर्ध्वलोकतिर्यग्लोकसंज्ञे प्रतरद्वये, यतो येऽधोलोके तिर्यग्लोके वा वर्तमाना जीवा वैमानिकेषूत्प- द्यन्ते ये च तिर्यग्लोके वैमानिका गमनागमनं कुर्वन्ति ये च विवक्षितप्रतरद्वयाध्यासितं क्रीडास्थानं संश्रिता ये च तिर्यग्लोकस्थिता एव वैक्रियसमुद्घातं मारणान्तिकसमुद्घातं वा कुर्वाणास्तथाविघप्रय- त्नविशेषादूर्द्धमात्मप्रदेशान् निसृदन्ति ते विवक्षितं प्रतरद्वयं स्पृशन्ति ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चाल्पे इति सर्वस्तोकाः, तेभ्यस्त्रैलोक्ये सङ्ख्येयगुणाः, कथमिति चेत् ?, उच्यते,

इह येऽधोलौकिकग्रामेषु समवसरणादिनिमित्तमधोलोके वा क्रीडानिमित्तं गताः सन्तो वैक्रियसमुद्घातं मारणान्तिकसमुद्घातं वा कुर्वाणास्तथाविघप्रयत्नविशेषाद् दूरतरमूर्द्धं विक्षिप्तात्मप्रदेशदण्डा ये च वैमानिकभवादीलिकागत्या च्यवमाना अधोलौकिकग्रामेषु समुत्पद्यन्ते ते किलत्रीनपि लोकान् स्पृशन्ति बहवश्च पूर्वोक्तेभ्य इति सङ्ख्येयगुणाः, तेभ्योऽप्यधोलोकतिर्यग्लोके–अधोलोकतिर्यग्लोकसंज्ञे प्रतरद्वये सङ्ख्येयगुणाः, अधोलौकिकग्रामेषु समवसरणादौ गमनागमनभावतो ववक्षितप्रतरद्वयाध्यासितसमवसरणादौ चावस्थानतो बहूनां यथोक्तप्रतरद्वयसंस्पर्शभावात्,

–तेभ्योऽधोलोके सङ्ख्येयगुणाः, अधोलौकिकग्रामेषु बहूनां समवसरणादाववस्थानभावात्, तेभ्यस्तिर्यग्लोके सङ्ख्येयगुणाः, बहुषु समवसरणेषु बहुषु च क्रीडास्था नेषु बहूनामवस्थानभावात्, तेभ्य ऊर्ध्ध्वलोकेऽसङ्ख्येयगुणाः, ऊर्ध्ध्वलोकस्य स्वस्थानत्वात्, तत्र च सदैव बहुतरभावात्। एवं वैमानिकदेवीविषयं सूत्रमपि भावनीयं ।। सम्प्रत्येकेन्द्रियादिगतमल्पबहुत्वमाह–

मू. (२८९) *खेत्ताणुवाएणं सव्वत्थोवा एगिंदिया जीवा उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया। खेत्ताणुवाएणं सव्वत्थोवा एगिंदिया जीवा अपज्जत्तगा उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखेज्जगुणा उड्ढलोए असंखेज्जगुणा अहोलोए विसेसाहिया।*

खित्ताणुवाएणं सव्वत्थोवा एगिंदिया जीवा पज्जत्तगा उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया।

वृ. क्षेत्रानुपातेन चिन्त्यमाना एकेन्द्रिया जीवाः सर्वस्तोका ऊर्ध्ध्वलोकतिर्यग्लोके–ऊर्ध्ध्वलोकतिर्यग्लोकसंज्ञा प्रतरद्वये, यतो ये तत्रस्था एव केचन ये चोर्द्धलोकात्तिर्यग्लोके तिर्यग्लोकादूर्द्धलोके समुत्पित्सवः कृतमारणान्तिकसमुद्घातास्ते किल विवक्षितं प्रतरद्वयं स्पृशन्ति स्वल्पाश्च ते इति सर्वस्तोकाः, तेभ्योऽधोलोकतिर्यगलोके विशेषाधिकाः, यतो ये अधोलोकात्तिर्यग्लोके तिर्यग्लोकाद्वाऽधोलोके ईलिकागत्या मसुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशन्ति तत्रस्थाश्च ऊर्ध्ध्वलोकाच्चाधोलोके विशेषाधिकास्ततो बहवोऽधोलोकात्तिर्यग्लोके समुत्पद्यमाना अवाप्यन्ते इति विशेषाधिकाः, तेभ्यस्तिर्यग्लोकेऽसङ्ख्येयगुणाः, उक्तप्रतरद्विकक्षेत्रात्तिर्यग्लोकक्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यस्त्रैलोक्यऽसङ्ख्येयगुणाः, बहवो ह्यूर्ध्ध्वलोकादधोलोके अधोलोकादूर्द्धलोके च समुत्पद्यन्ते, तेषां च मध्ये बहवो मारणान्तिकसमुद्घातवशाद्विक्षिप्तात्मप्रदेशदण्डास्त्रीनपि लोकान् स्पृशन्ति ततो भवन्त्यसङ्ख्येयगुणाः, तेभ्य ऊर्ध्ध्वलोकेऽसङ्ख्येयगुणाः, उपपातक्षेत्रस्यातिबहुत्वात्, तेभ्योऽधोलोके विशेषाधिकाः, ऊर्ध्ध्वलोकक्षेत्रादधोलोकक्षेत्रस्य विशेषाधिकत्वात्।

एवमपर्याप्तविषयं पर्याप्तविषयं च सूत्रं भावयितव्यम् ।।

अधुना द्वीन्द्रियविषयमल्पबहुत्वमाह–

मू. (२९०) *खेत्ताणुवाएणं सव्वत्थोवा बिइंदिया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा बेइंदिया अवज्जत्तया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्ज-गुणा तेलोक्के असंखेज्जगुणा अहोलोयतिरियलोए असंखेज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा बेइंदिया पज्जत्ता उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुण तेलोक्के असंखि० अहोलोयतिरियलोए असंखि० अहोलोए संखि० तिरियलोए संखि० ॥

खित्ताणुवाएणं सव्वत्थोवा तेइंदिया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा खित्ताणुवाएणं सव्वत्थोवा तेइंदिया अपज्जत्तया उड्ढलोए उड्ढलोगतिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा खित्ताणुवाएणं सव्वत्थोवा तेइंदिया पज्जत्तया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा

खित्ताणुवाएणं सव्वत्थोवा चउरिंदिया जीवा उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा चउरिंदिया जीवा अपज्जत्तया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा चउरिंदिया जीवा पज्जत्तया उड्ढलोए उड्ढलोयति-रियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा।

वृ. 'क्षेत्रानुपातेन' क्षेत्रानुसारेण चिन्त्यमाना द्वीन्द्रियाः सर्वस्तोका ऊर्ध्वलोके, ऊर्ध्वलोकस्यैकदेशे तेषां संभवात्, तेभ्य ऊर्ध्वलोकतिर्यग्लोके प्रतरद्वयरूपेऽसङ्ख्येयगुणाः, यतो ये ऊर्ध्वलोकात्तिर्यग्लोके तिर्यग्लोकादूर्ध्वलोके द्वीन्द्रियत्वेन समुत्पत्तुकामास्तदायुरनुभवन्त ईलिकागत्या समुत्पद्यंते ये च द्वीन्द्रिया एव तिर्यग्लोकादूर्ध्वलोके ऊर्ध्वलोकाद्वा तिर्यग्लोके द्वीन्द्रियत्वेनान्यत्वेन वा समुत्पत्तुकामाः कृतप्रथममारणान्तिकसमुद्घाताः अत एव द्वीन्द्रियायुः प्रतिसंवेदयमानाः समुद्घातवशाच्च दूरतरविक्षिप्तनिजात्मप्रदेशदण्डा ये च प्रतरद्वयाध्यासितक्षेत्रस-मासीनास्ते यथोक्तप्रतरद्वयसंस्पर्शिनः बहवश्चेति पूर्वोक्तेभ्योऽसङ्ख्येयगुणाः, तेभ्यस्त्रैलोक्येऽ-सङ्ख्येयगुणाः,

यतो द्वीन्द्रियाणां प्राचुर्येणोत्पत्तिस्थानान्यधोलोके तस्माच्चातिप्रभूतानि तिर्यग्लोके, तत्र ये द्वीन्द्रिया अधोलोकादूर्ध्वलोके द्वीन्द्रियत्वेनान्यत्वेन वा समुत्पत्तुकामाः कृतप्रथममारणान्तिक-समुद्घाताः समुद्घातवशाच्चोत्पत्तिदेशं यावत् विक्षिप्तात्मप्रदेशदण्डास्ते द्वीन्द्रियायुः प्रतिसंवेदयामानः ये चोर्ध्वलोकादधोलोके द्वीन्द्रियाः शेषकाया वा यावत् द्वीन्द्रियत्वेन समुत्पद्यमाना द्वीन्द्रिया-युरनुभवन्ति ते त्रैलोक्यसंस्पर्शिनः ते च बहव इति पूर्वोक्तेभ्योऽसङ्ख्येयगुणाः, तेभ्योऽधोलोक-तिर्यग्लोकप्रतरद्वयरूपेऽसङ्ख्येयगुणाः, यतो येऽधोलोकात्तिर्यग्लोके तिर्यग्लोकाद्वाऽधोलोके द्वीन्द्रियत्वेन समुत्पत्तुकामास्तदायुरनुभवन्त लिकागत्या समुत्पद्यन्ते ये च द्वीन्द्रियास्तिर्यग्लोका-दधोलोके द्वीन्द्रियत्वेन शेषकायत्वेन वोत्पित्सवः कृतप्रथममारणान्तिकसमुद्घाता द्वीन्द्रियायुरनु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्तः समुद्घातवशेनोत्त्पत्तिदेशं यावद् विक्षिप्तात्मप्रदेशदण्डास्ते यथोक्तं प्रतरद्वयं स्पृशन्ति प्रभूताश्चेति पूर्वोक्तेभ्योऽसङ्ख्येयगुणाः,

तेभ्योऽधोलोके सङ्ख्येयगुणाः, तत्रोत्पत्तस्थानानामतिप्रचुराणां भावात्, तेभ्योऽपि तिर्यग्लोके सङ्ख्येयगुणाः, अतिप्रचुरातराणां योनिस्थानानां तत्र भावात्, यथेदमौघिकं द्वीन्द्रियसूत्रं तथा पर्याप्तापर्याप्तद्वीन्द्रियसूत्रौधिकत्रीन्द्रियपर्याप्तापर्याप्तौधिकचतुरिन्द्रिययपर्याप्तापर्याप्तसूत्राणि भावनीयनि ॥ साम्प्रतमौधिकपञ्चेन्द्रियविषयमल्पबहुत्वमाह–

मू. (२९१) *खित्ताणुवाएणं सव्वत्थोवा पंचिंदिया तेलुक्के उड्ढलोयतिरियलोए संखिज्जगुणा अहोलोयतिरियलोए संखिज्जगुणा उड्ढलोए संखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए असंखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा पंचिंदिया अपज्जतया तेलोक्क उड्ढलोयतिरियलोए संखेज्जगुणा अहोलोयतिरियलोए संखिज्जगुणा उड्ढलोए संखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए असंखिज्जगुणा।*

खित्ताणुवाएणं सव्वत्थोवा पंचिंदिया पज्जत्ता उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलुक्के संखि० अहोलोयतिरियलोए संखि० अहोलोए संखि० तिरियलोए असंखि०।

वृ. क्षेत्रानुपातेन चिन्त्यमानाः पञ्चेन्द्रियाः सर्वस्तोकास्त्रैलोक्ये–त्रैलोक्यसंस्पर्शिनः, यतो येऽलोकादूध्र्वलोके ऊध्र्वलोकाद्वाऽधोलोके शेषकायाः पञ्चेन्द्रियायुरनुभवन्त ईलिकागत्या समुत्पद्यन्ते ये च पञ्चेन्द्रिया ऊध्र्वलोकादधोलोके अधोलोकादूध्र्वलोके शेषकायत्वेन पञ्चेन्द्रियत्वेन वोत्पित्सवः कृतमारणान्तिकसमुद्घाताः समुद्घातवशाच्चोत्पत्तिदेश यावत् विक्षिप्तात्मप्रदेशदण्डाः पञ्चेन्द्रियायुरद्याप्यनुभवन्ति ते त्रैलोक्यसंस्पर्शिनः ते चाल्पे इति सर्वस्तोकाः,

–तेभ्य ऊध्र्वलोकतिर्यग्लोके प्रतरद्वयरूपे असङ्ख्येयगुणाः, प्रभूततराणामुपपातेन समुद्घातेन वा यथोक्तप्रतरद्वयसंस्पर्शसंभवात्, तेभ्योऽधोलोकतिर्यग्लोके सङ्ख्येयगुणाः, अतिप्रभूततराणामुपपातसमुद्घाताभ्यामधोलोकतिर्यग्लोकसंज्ञप्रतरद्वयसंस्पर्शभावात्, तेभ्य ऊध्र्वलोके सङ्ख्येयगुणाः, वैमानिकानामवस्थानभावात्, तेभ्योऽधोलोके सङ्ख्येयगुणाः, वैमानिकदेवेभ्यः सङ्ख्येयगुणानां नैरयिकाणां तत्र भावात्, तेभ्यस्तिर्यग्लोकेऽसङ्ख्येयगुणाः, संमूर्च्छिमजलचरखचरादीनां व्यन्तर- ज्योतिष्काणां संमूर्च्छिममनुष्याणां तत्र भावात्। एवं पञ्चेन्द्रियापर्याप्तसूत्रमपि भावनीयं।

पञ्चेन्द्रियपर्याप्तसूत्रमिदम्–'खेत्ताणुवाएणं' इत्यादि, क्षेत्रानुपातेन चिन्त्यमानाः पञ्चेन्द्रियाः पर्याप्ताः सर्वस्तोका ऊध्र्वलोके, प्रायो वैमानिकानामेव तत्र भावात्, तेभ्य ऊध्र्वलोकतिर्यग्लोके प्रतरद्वयरूपेऽसङ्ख्येयगुणाः, विवक्षितप्रतरद्वयप्रत्यसन्नज्योतिष्काणां तदध्यासितक्षेत्राश्रित-व्यन्तरतिर्यक्पञ्चेन्द्रियाणां वैमानिकव्यन्तरज्योतिष्कविद्याधरचारणमुनितिर्यक्पञ्चेन्द्रियाणा-मूध्र्वलोके तिर्यग्लोके च गमनागमने कुर्वतामधिकृतप्रतरद्वयसंस्पर्शात्, तेभ्यस्त्रैलोकये त्रैलोक्य-संस्पर्शिनः सङ्ख्येयगुणाः, कथमिति चेत्, उच्यते, यतो ये भवनपतिव्यन्तरज्योतिष्कवैमानिकाः विद्याधरा वाऽधोलोकस्थाः कृतवैक्रियसमुद्घातस्थाविधप्रयत्नविशेषादूध्र्वलोके विक्षिप्तात्म-प्रदेशदण्डास्ते त्रीनपि लोकान् स्पृशन्ति इति सङ्ख्येयगुणाः,

–तेभ्योऽधोलोकतिर्यग्लोके प्रतरद्वयरूपे सङ्ख्येयगुणाः, बहवो हि व्यन्तराः स्वस्थानप्रत्या-

सन्नतया भवनपतयस्तिर्यग्लोके ऊर्ध्वलोके वा व्यन्तरज्योतिष्कवैमानिका देवा अधोलौकिकग्रामेषु समवसरणादौ अधोलोके क्रीडादिनिमित्तं च गमनागमनाकरणतः तथा समुद्रेषु केचित्तिर्यक्पञ्चेन्द्रियाः स्वस्थानप्रत्यासन्नतया अपरे तदध्यासितक्षेत्राश्रिततया यथोक्तं प्रतरद्वयं स्पृशन्ति ततः सङ्ख्येयगुणाः, तेभ्योऽधोलोके सङ्ख्येयगुणाः, नैरयिकाणां भवनपतीनां च तत्रावस्थानात्, तेभ्यस्तिर्यग्लोकेऽसङ्ख्येयगुणाः, तिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तरज्योतिष्काणामवस्थानात् ।

तदेवमुक्तं पञ्चेन्द्रियाणामल्पबहुत्वम्, इदानीमेकेन्द्रियभेदानां पृथवीकायिकादीनां पञ्चानामौधिकपर्याप्तापर्याप्तभेदेन प्रत्येक त्रीणि त्रीण्यल्पबहुत्वान्याह–

मू. (२१२) *खित्ताणुवाएणं सव्वत्थोवा पुढविकाइया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया । खित्ताणुवाएणं सव्वत्थोवा पुढविकाइया अपज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया । खित्ताणुवाएणं सव्वत्थोवा पुढविकाइया पज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया ॥*

खित्ताणुवाएणं सव्वत्थोवा आउकाइया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया । खित्ताणुवाएणं सव्वत्थोवा आउकाइया अपज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया । खित्ताणुवाएणं सव्वत्थोवा आउकाइया पज्जत्तया उड्ढलोयतिरियोलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया ॥

खित्ताणुवाएणं सव्वत्थोवा तेउकाइया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया खित्ताणुवाएणं सव्वत्थोवा तेउकाइया अपज्जत्तया उडअढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया । खित्ताणुवाएणं सव्वत्थोवा तेउकाइया पज्जत्तया उड्ढलो यतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखेज्जगुणा अहोलोए विसेसाहिया ॥ खित्ताणुवाएणं सव्वत्थोवा वाउकाइया अपज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया । खित्ताणुवाएणं सव्वत्थोवा वाउकाइया पज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया ॥

खित्ताणुवाएणं सव्वत्थोवा वणस्सइकाइया उड्ढलोयतिरियलोए अहोलोयतिरियलोए वसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विसेसाहिया। खित्ताणुवाएणं सव्वत्थोवा वणस्सइकाइया अपज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया। खित्ताणुवाएणं सव्वत्थोवा वणस्सइकाइया पज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया।

वृ. इमानि पञ्चदशापि सूत्राणि प्रागुक्तेकेन्द्रियसूत्रवद्भावनीयानि साम्प्रतमौधिकत्रसकायापर्याप्तपर्याप्तर्याप्तत्रसकायसूत्राण्ह–

मू. (२९३) *खित्ताणुवाएणं सव्वत्थोवा तसकाइया तेलोक्के उड्ढलोयतिरियलोए असंखिज्जगुणा अहोलोयतिरियलोए संखिज्जगुणा उड्ढलोए संखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए असंखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा तसकाइया अपज्जत्तया तेलोक्के उड्ढलोयतिरियलोए असंखिज्जगुणा अहोलोयतिरियलोए संखिज्जगुणा उड्ढलोए संखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए असंखिज्जगुणा।*

खित्ताणुवाएणं सव्वत्थोवा तसकाइया पज्जत्तया तेलोक्के उड्ढलोयतिरियलोए असंखिज्जगुणा अहोलोयतिरियलोए संखि० उड्ढलोए संखि० अहोलोए संखि० तिरियलोए असंखि० ॥

वृ. इमानि पञ्चेन्द्रियसूत्रवद् भावनीयानि। गतं क्षेत्रद्वारम्, इदानीं बन्धद्वारं वक्तव्यं–बन्धोपलक्षितं द्वारं, तदाह–

–: पदं – ३ – दारं – २५ :– "बन्ध"

मू. (२९४) *एएसि णं भंते! जीवाणं आउयस्स कम्मस्स बंधगाणं अबंधगाणं पज्जत्ताणं अपज्जत्ताणं सुत्ताणं जागराणं समोहयाणं असमोहयाणं सायावेयगाणं असायावेयगाणं इंदिओवउत्ताणं नोइंदिओवउत्ताणं सागारोवउत्ताणं अनागारोवउत्ताण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?,*

गोयमा! सव्वत्थेवा जीवा आउयस्स कम्मस्स बंधगा १ अपज्जत्तया संखेज्जगुणा २ सुत्ता संखेज्जगुणा ३ समोहया संखेज्जगुणा ४ सायावेयगा संखेज्जगुणा ५ इंदिओवउत्ता संखेज्जगुणा ६ अनागारोवउत्ता संखेज्जगुणा ७ सागारोवउत्ता संखेज्जगुणा ८ नोइंदिओवउत्ता विसेसाहिया ९ असायावेयगा विसेसाहिया १० असमोहया विसेसाहिया ११ जागरा विसेसाहिया १२ पज्जत्तया विसेसाहिया १३ आउयस्स कम्मस्स अबंधया विसेसाहिया १४।

वृ. इहायुःकर्मबन्धकाबन्धकानां पर्याप्तपर्याप्तानां सुप्तजाग्रतां समवहतासमवहतानां सातवेदकासातवेदकानां इन्द्रियोपयुक्तनोइन्द्रियोपयुक्तानां साकारोपयुक्तानाकारोपयुक्तानां समुदायेनाल्पबहुत्वं वक्तव्यं, तत्र प्रत्येकं तावत् ब्रूमः येन समुदायेन सुखेन तदवगम्यते, तत्र सर्वस्तोकाः आयुषो बन्धका अबन्धकाः सङ्घयेयगुणाः, यतोऽनुभूयमानभवायुष। त्रिभागावशेषे पारभविकमायुर्जीवा बध्नन्ति त्रिभागत्रिभागाद्यवशेषे वा ततो द्वौ त्रिभागावबन्धकाल एकस्त्रिभागो बन्धकाल इति बन्धकेभ्योऽबन्धकाः सङ्घयेयगुणाः।

तथा सर्वस्तोका अपर्याप्तकाः पर्याप्तकाःसङ्घयेयगुणाः, एतच्च सूक्ष्मजीवानधिकृत्य वेदितव्यं, सूक्ष्मेषु हि बाह्यो व्याघातो न भवति ततस्तद्भावाद् बहूनां निष्पत्तिःस्तोकानामेव चानिष्पत्तिः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा सर्वस्तोकाः सुप्ताः,जागराः सङ्ख्येयगुणाः, एतदपि सूक्ष्मानेकेन्द्रियानधिकृत्य वेदितव्यं, यस्मादपर्याप्ताः सुप्ता एव लभ्यन्ते, पर्याप्ता जागरा अपि, [उक्तं च मूलटीकाया–"जम्हा अपज्जत्ता सुत्ता लब्भंति, केइ अपज्जत्तगा जेसिं संखिज्जा समया अतीता ते य थोवा इयरेऽवि थोवगा चेव सेसा, जागरा पज्जत्ता ते संखिज्जगुणा" इति] जागराः पर्याप्तस्तेन सङ्ख्येयगुणा इति ।

तथा समवहताःसर्वस्तोकाः, यत इह समवहता मारणान्तिकसमुद्घातेन परिगृह्यन्ते, मारणान्तिकश्च समुद्घातो मरणकाले न शेषकालं, तत्रापि न सर्वेषामिति सर्वस्तोकाः, तेभ्योऽसमवहता असङ्ख्येयगुणाः, जीवनकालस्यातिबहुत्वात् ।

तथा सर्वस्तोकाः सातवेदकाः, यत इह बहवः साधारणशरीरा अल्पे च प्रत्येकशरीरिणः, साधारणशरीराश्च बहवोऽसातवेदकाः स्वल्पाः सातवेदिनः प्रत्येकशरीरिणस्तु भूयांसः सातवेदकाः स्तोका असातवेदिनः, ततः स्तोकाः सातवेदकाः तेभ्योऽसातवेदकाः सङ्ख्येयगुणाः ।

तथा सर्वस्तोका इन्द्रियोपयुक्ताःतेभ्यो नोइन्द्रियोपयुक्ताः सङ्ख्येयगुणाः,इन्द्रियोपयोगो हि प्रत्युत्पन्नाकालविषयः ततस्तदुपयोगकालस्य स्तोकत्वात् पृच्छासमये स्तोका अवाप्यन्ते, यदा तु तमेवार्थमिन्द्रियेण दृष्ट्वाविचारयत्योघसंज्ञयाऽपि तदा नोइन्द्रियोपयुक्तः स व्यपदिश्यते ततो नोइन्द्रियोपयोगस्यातीतानागतकालविषयतया बहुकालत्वात् सङ्ख्येयगुणा नोइन्द्रियोपयुक्ताः

तथा सर्वस्तोका अनाकारोपयुक्ताः, अनाकारोपयोगकालस्य स्तोकत्वात्, साकारोपयुक्ताः सङ्ख्येयगुणाः,अनाकारोपयोगकालात् साकारोपयोगकालस्य सङ्ख्येयगुणत्वात् ॥

इदानीं समुदायगतं सूत्रोक्तमल्पबहुत्वं भाव्यते–

सर्वस्तोका जीवा आयुःकर्मणो बन्धकाः, आयुर्बन्धकालस्य प्रतिनियतत्वात्, तेभ्योऽपर्याप्ताः सङ्ख्येयगुणाः, यस्मादपर्याप्ता अनुभूयमानभवत्रिभागाद्यवशेषायुषः पारभविकमायुर्बध्नान्ति ततो द्वौ त्रिभागावबन्धकाल एको बन्धकाल इति बन्धकालादबन्धकालःसङ्ख्येयगुणः तेन सङ्ख्येयगुणा एवापर्याप्ता आयुर्बन्धकेभ्यः, तेभ्योऽपर्याप्तेभ्य सुप्ताः सङ्ख्येयगुणाः, यस्मादपर्याप्तेषु पर्याप्तेषु च सुप्ता लभ्यन्ते, पर्याप्ताश्चापर्याप्तेभ्यः सङ्ख्येयगुणा इत्यपर्याप्तेभ्यः सुप्ताः सङ्ख्येयगुणाः, तेभ्यः समवहताःसङ्ख्येयगुणाः, बहूनां पर्याप्तेष्वपर्याप्तेषु मारणान्तिकसमुद्घातेन समवहतानां सदा लभ्यमानत्वात्, तेभ्यः सङ्ख्येयगुणाः, आयुर्बन्धकापर्याप्तसुप्तेष्वपि सातवेदकानां लभ्यमानत्वात्,

–तेभ्य इन्द्रियोपयुक्ताः सङ्ख्ययगुणाः असातवेदकानामपि इन्द्रियोपयोगस्य लभ्यमानत्वात्, तेभ्योऽनाकारोपयोगोपयुक्ताः सङ्ख्येयगुणाः,इन्द्रियोपयोगेषु नोइन्द्रियोपयोगेषु चानाकारोपयोगस्य लभ्यमानत्वात्, तेभ्यःसाकारोपयुक्ताः सङ्ख्येयगुणाः, इन्द्रियोपयोगेषु नोइन्द्रियोपयोगेषु च साकारोपयोगकालस्य बहुत्वात्, तेभ्यो नोइन्द्रियोपयोगोपयुक्ता विशेषाधिकाः, नोइन्द्रियानाकारोपयुक्तानामपि तत्र प्रक्षेपात्, अत्र विनेयजनानुग्रहार्थमसद्भावस्थापना निदर्शनमुच्यते–इह सामान्यतः किल साकारोपयुक्ता द्विनवत्यधिकं शतं ते च किल द्विधा–इन्द्रियसाकारोपयुक्ता नोइन्द्रियासाकारोपयुक्ताश्च, तत्रेन्द्रियसाकारोपयुक्ताः किलातीव स्तोका इति विंशतिसङ्ख्याः कल्प्यन्ते, शेषं द्विसप्तत्युत्तरशतं नोन्द्रियसाकारोपयुक्ताः, नोइन्द्रियानाकारोपयुक्ताश्च द्विपञ्चाशत्कल्पाः, ततः सामान्यतः साकारोपयुक्तेभ्यः इन्द्रियासाकारोपयुक्तेषु विंशतिकल्पेष्वपनीतेषु द्विपञ्चाशत्कल्पेषु अनाकारोपयुक्तेषु तेषु मध्ये प्रक्षिप्तेषु द्वे शते चतुर्विंशत्यधिके भवतः, ततः साकारोपयुक्तेभ्यो नोइन्द्रियोपयुक्ता विशेषाधिकाः, तेभ्योऽसातवेदका विशेषाधिकाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इन्द्रियोपयुक्तानामप्यसातवेदकत्वात्, तेभ्योऽसमवहता विशेषाधिकाः, सातवेदकानामप्यसमवहतत्वभावात्, तेभ्यो जागरा विशेषाधिकाः, समवहतानामपि केषांचिज्जागरत्वात्,

तेभ्यः पर्याप्ताः विशेषाधिकाः, सुप्तानामपि केषाञ्चित्पर्याप्तत्वात्, सुप्ता हि पर्याप्ता अपि भवन्ति जागरास्तु पर्याप्ता एवेति नियमः, तेभ्योऽपि पर्याप्तेभ्यः आयुःकर्मबन्धकाः विशेषाधिकाः, अपर्याप्तानामप्यायुःकर्मबन्धकत्वभावात्, इदमेवाल्पबहुत्वं वियेनजनानुग्रहाय स्थापनाराशिभिरुपदर्श्यते–इह द्वेपङ्क्ती उपर्यधोभावेन न्यस्तेते, तत्रोपरितन्या पङ्क्तावायुःकर्मबन्धका अपर्याप्ताः सुप्ताः समवहताः सातवेदका इन्द्रियोपयुक्ताः अनाकारोपयुक्ताःक्रमण स्थाप्यन्ते, तस्या अधस्तन्यां पङ्क्तौ तेषामेवपदानामधस्तात् यथासङ्खयमायुरबन्धकाः पर्याप्ता जागरा असमवहता असातवेदका नोइन्द्रियोपयुक्ताः साकारोपयुक्ताः । स्थापना चेयं

आयुर्बन्धकाः १ अपर्याप्ताः २ सुप्ताः ४ समवहताः ८ सातवेदकाः १६ इन्द्रियोपयुक्ताः ३२ अनाकारोपयुक्ताः ६४ आयुरबन्धकाः २५५ पर्याप्ताः २५४ जागराः २५२ असमवहताः २४८ असातवेदकाः २४० नोइन्द्रियोपयुक्ताः २२४ साकारोपयुक्ताः १९२ ॥

अत्रोपरितन्यां पङ्क्तो सर्वाण्यपि पदानि सङ्ख्येयगुणानि, आयुःपदं सर्वेषामाद्यमिति तत्परिमाणसङ्ख्यायमेकः स्थाप्यते, ततः शेषपदानि किल जघन्येन सङ्ख्येयन सङ्ख्येयगुणानीति द्विगुणद्विगुणाङ्कः तेषु स्थाप्यते, तद्यथा–द्वौ चत्वारः अष्टौ षोडश द्वात्रिंशत् चतुष्षष्टिः, सर्वोऽपि जीवराशिरन्तानन्तस्वरूपोऽप्यसत्कल्पनया षट्पञ्चाशदधिकशतद्वयपरिमाणः परिकल्प्यते, ततोऽस्माद् राशेरायुर्बन्धकादिगताः सङ्ख्याः शोधयित्वा यद्यत् शेषमवतिष्ठति तत्तदायुरबन्धकादीनां परिमाणं स्थापयितव्यं, तद्यथा–

आयुरबन्धकादिपदे द्वे शते पञ्चपञ्चाशदधिके, शेषेषु यथोक्तक्रमं द्वे शते चतुः पञ्चाशदधिके द्वे शते द्विपञ्चाशदधिके द्वे शते अष्टाचत्वारिंशदधिके द्वे शते चत्वारिंशदधिके द्वे शते चतुर्विंशत्यधिके द्विनवत्यधिकं शतं, एवं च सत्युपरितनपङ्क्तिगतान्यनाकारोपयुक्तपर्यन्तानि पदानि सङ्ख्येयगुणानि द्विगुणद्विगुणा धिकत्वात्, ततः परं साकारोपयुक्तपदमपि सङ्ख्येयगुणं त्रिगुणत्वात्, शेषाणि तु नोइन्द्रियोपयुक्तादीनि प्रतिलोमं विशेषाधिकानि, द्विगुणत्वस्यापि क्वचिदभावात् ॥

तदेवं गतं बन्धद्वारम्, इदानीं पुद्गलद्वारमाह–

–ः पदं – ३ – दारं – २६ :– "पुद्गल"

मू. (२९५) *खित्ताणुवाएणं सव्वत्थोवा पुग्गला तेलोक्के उड्ढलोयतिरियलोए अणंतगुणा अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया ॥ दिसाणुवाएणं सव्वत्थोवा पुग्गला उड्ढदिसाए अहोलोए विसेसाहिया उत्तरपुरच्छिमेणं दाहिणपच्चत्थिमेण य दोवि तुल्ला असंखिज्जगुणा दाहिणपुरच्छिमेण उत्तरपच्चत्थिमेण य दोवि विसेसाहिया पुरच्छिमेणं असंखिज्जगुणा पच्चत्थिमेणं विसेसाहिया दाहिणेणं विसेसाहिया उत्तरेणं विसेसाहिया ॥*

खित्ताणुवाएणं सव्वत्थोवाइं दव्वाइं तेलोक्के उड्ढलोयतिरियलोए अनंतगुणाइं अहोलोयतिरियलोए विसेसाहियाइं उड्ढलोए असंखिज्जगुणाइं अहोलोए अनंकतगुणाइं तिरियलोए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संखिज्जगुणाइं ।। दिसाणुवाएणं सव्वत्थोवाइं दव्वाइं अहोदिसाए उड्ढदिसाए अनंतगुणाइं उत्तरपुरचअछिमेणं दाहिणपच्चत्थिमेण य दोवि तुल्लाइं असंखिज्जगुणाइं दाहिणपुरच्छिमेणं उत्तरपच्चत्थिमेण य दोवि तुल्लाइं विसेसाहियाइं पुरच्छिमेणं असंखिज्जगुणाइं पच्चत्थिमेणं विसेसाहियाइं दाहिणेणं विसेसाहियाइं उत्तरेणं विसेसाहियाइं ।

वृ. इदमल्पबहुत्वं पुद्‌गलानां द्रव्यार्थत्वमङ्गीकृत्य व्याख्येयं, तथासम्प्रदायात्, तत्र 'क्षेत्रानुपातेन' क्षेत्रानुसारेण चिन्त्यमानाः पुद्‌गलास्रलोक्ये-त्रैलोक्यसंस्पर्शिनः सर्वस्तोकाः, सर्वस्तोकानि त्रैलोक्यव्यापीनि पुद्‌गलद्रव्याणीति भावः, यस्मात् महास्कन्धा एव त्रैलोक्यव्यापिनः ते चाल्पा इति, तेभ्य ऊर्ध्ध्वलोकतिर्यग्लोकेऽनन्तगुणाः, यतस्तिर्यग्लोकस्य यत्सर्वोपरितनमेकप्रादेशकं प्रतरं यच्चोर्ध्ध्वलोकस्य सर्वाधस्तनमेकप्रादेशिकं प्रतरमेते द्वे अपि प्रतरे ऊर्ध्ध्वलोकतिर्यग्लोक उच्यते ते चानन्ताः सङ्ख्येयप्रादेशिकाः अनन्ता असङ्ख्ययप्रादेशिका; अनन्ता अनन्तप्रादेशिकाः स्कन्धाः स्पृशन्तीति द्रव्यार्थतयाऽनन्तगुणाः, तेभ्योऽधोलोकतिर्यग्लोकेप्रागुक्तप्रकारेण प्रतरद्वयरूपे विशेषाधिकाः, क्षेत्रस्याऽऽयामविष्कम्भाभ्यां मनाग् विशेषाधिकत्वात्, तेभ्यस्तिर्यग्लोकेऽसङ्ख्येयगुणाः, क्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यऊर्ध्ध्वअधलोकेऽसङ्ख्येयगुणाः, यतस्तिर्यग्लोकक्षेत्रादूर्ध्ध्वलोकक्षेत्रसमङ्ख्येयगुणमिति, तेभ्योऽधोलोके विशेषाधिकाः, ऊर्ध्ध्वलोकादधोलोकस्य विशेषाधिकत्वात्, देशोनसप्तरज्जुप्रमाणो ह्यूर्ध्ध्वलोकः समधिकसप्तरज्जुप्रमाणस्त्वधोलोकः ।।

सम्प्रति दिगनुपातेनाल्पबहुत्वमाह-'दिगनुपातेन' दिगनुसारेण चिन्त्यमानाः पुद्‌गलाः सर्वस्तोकाः ऊर्ध्ध्वदिशि, इह रत्नप्रभासमभूतलमेरुध्यऽष्यप्रादेशिको रुचकस्तस्माद्विनिर्गता चतुःप्रदेशा ऊर्ध्ध्वदिग् यावल्लोकान्तस्ततस्तत्र सर्वसोत्काः पुद्‌गलाः, तेभ्योऽधोदिशि विशेषाधिकाः, अधोदिगपि रुचकादेव प्रभवति चतुष्प्रदेशा यावल्लोकान्तस्तस्तस्या विशेषाधिकत्वात् तत्र पुद्‌गला विशेषाधिकाः तेभ्य उत्तरपूर्वस्यां दक्षिणपश्चिमायां च प्रत्येकमसङ्ख्येयगुणाः स्वस्थाने तु परस्परं तुल्याः, यतस्ते द्वे अपि दिशौ रुचकाद्विनिर्गते मुक्तावलिसंस्थिते तिर्यग्लोकान्तमधोलोकान्तमूर्ध्ध्वलोकान्तं पर्यवसिते, येन क्षेत्रस्यासङ्ख्येयगुणत्वात्तत्र पुद्‌गला असङ्ख्येयगुणाः, क्षेत्रं तु स्वस्थाने सममिति पुद्‌गला अपि स्वस्थाने तुल्याः, ।

-तेभ्योऽपि दक्षिणपूर्वस्यामुत्तरपश्चिमाया च प्रत्येकं विशेषाधिकाः, स्वस्थाने तु परस्परं तुल्याः, कथं विशेषाधिका इति चेत् ?, उच्यते, इह सौमनसगन्धमादनेषु सप्त सप्त कूटानि विद्युत्प्रभमाल्पवतोर्नव नव, तेषु च कूटेषु धूमिका अवश्यायादिसूक्ष्मपुद्‌गलाः प्रभूताः संभवन्ति ततो विशेषाधिकाः, स्वस्थाने तु क्षेत्रस्य पर्वतादेश्च समानत्वात् तुल्याः, तेभ्यः पूर्वस्यां दिशि असङ्ख्येयगुणाः, क्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यः पश्चिमायां विशेषाधिकाः, अधोलौकिकग्रामेषु शुषिरभावतो बहूनां पुद्‌गलानामवस्थानभावात्, दक्षिणेन विशेषाधिकाः, बहुभुवनशुषिरभावात्, तेभ्य उत्तरस्यां दिशि विशेषाधिकाः, यत उत्तरस्यामायामविष्कम्भाभ्यां सङ्ख्येययोजनकोटीकोटीप्रमाणं मानसं सरस्तत्र ये जलचराः पनकसेवालादयश्च सत्त्वास्ते अतिबहव इति तेषां ये तैजसकार्मणपुद्‌गलास्तेऽधिकाः प्राप्यन्ते इति पूर्वोक्तेभ्यो विशेषाधिकाः ।।

तदेवं पुद्‌गलविषयमल्पबहुत्वमुक्तम्, इदानीं सामान्यतो द्रव्यविषयं क्षेत्रानुपातेनाह-क्षेत्रानुपातेन चिन्त्यमानानि द्रव्याणि सर्वस्तोकानि त्रैलोक्ये-त्रैलोक्यसंस्पर्शानि, यतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्म्मास्तिकायाधर्म्मास्तिकायाकाशास्तिकायद्रव्याणि पुद्गलास्तिकायस्य महास्कन्धा जीवास्तिकायस्य मारणान्तिकसमुद्घातोनातीव समवहता जीवाः त्रैलोक्यव्यापिनः ते चाल्पे इति सर्वस्तोकानि, तेभ्य ऊर्ध्वलोकतिर्यग्लोके–प्रागुक्तस्वरूपप्रतरद्वयात्मकेऽनन्तगुणानि, अनन्तैः पुद्गलद्रव्यै नन्तैर्जीवद्रव्यैस्तस्य संस्पर्शात्, तेभ्योऽलोकतिर्यग्लोके विशेषाधिकानि, ऊर्ध्वलोकतिर्यग्लोका- दधोलोकतिर्यग्लोकस्य मनाग् विशेषाधिकत्वात्, तेभ्य ऊर्ध्वलोकेऽसङ्ख्येयगुणानि, क्षेत्रस्यासङ्ख्येय-गुणत्वात्, तेभ्योऽधोलोकेऽनन्तगुणानि, कथमिति चेत् ?, उच्यते, इहाधोलौकिकग्रामेषु कालोऽस्ति, तस्य च कालस्य तत्तत्परमाणुसङ्ख्येयासङ्ख्येयमानन्त प्रादेशिकद्रव्यक्षेत्रकालभावपर्यायसम्बन्धवशात् प्रतिपरमाण्वादिद्रव्यमनन्तता ततो भवन्त्येधोएकेऽनन्तगुणानि, तेभ्यस्तिर्यग्लोके सङ्ख्येयगुणानि, अधोलौकिकग्रामप्रमाणानां खण्डानां मुष्यलोके कालद्रव्याधारभूते सङ्ख्येयया- नामवाप्यमानत्वात्, ॥ सम्प्रति दिगनुपातेन सामान्यतो द्रव्याणामल्पबहुत्वमाह–'दिगनुपातेन' दिगनुसारेण चितन्यमानानि सामान्यतो द्रव्याणि सर्वस्तोकान्यधोदिशि–प्राग्व्यावर्णितस्वरूपायां, तेभ्य ऊर्ध्वदिश्यनन्तगुणानि, किं कारणमिति चेत् ?, उच्यते, इहोर्ध्वलोके मेरोः पञ्चयोजनशतिकं स्फटिकमयं काण्डं, तत्र चन्द्रादित्यभाऽनुप्रवेशात् द्रव्याणां क्षणादिकालप्रतिभागोऽस्ति, कालस्य च प्रागुक्तनीत्या प्रतिपरमाण्वादिद्रव्यमानन्यात् तेभ्योऽनन्तगुणानि, तेभ्य उत्तरपूर्वस्यामीशान्यां दक्षिणपश्चिमायां–नैर्ऋतकोणे इत्यर्थः असङ्ख्येयगुणानि, क्षेत्रस्याङ्ख्येयगुणत्वात्, स्वस्थाने तु द्वयान्यपि परस्परं तुल्यानि, समानक्षेत्रत्वात्,

तेभ्योदक्षिणपूर्वस्याम्–आग्नेय्यामुत्तरपश्चिमायां–वायव्यकोणे इति भावः विशेषाधिकानि, विद्युत्प्रभमाल्यवत्कूटाश्रितानां धूमिकाऽवश्यायादिश्लक्ष्णपुद्गलद्रव्याणां बहूनां संभवात्, तेभ्यः पूर्वस्यां दिश्यसङ्ख्येयगुणानि, क्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यः पश्चिमायां विशेषाधिकानि अधोलौकिकग्रामेषु शुषिकभावतो बहूनां पुद्गलद्रव्याणामवस्थानसंभवात्, ततो दक्षिणस्यां दिशि विशेषाधिकानि, बहुभुवनशुषिरभावात्, तत् उत्तरस्यां विशेषाधिकानि, तत्र मानससरसि जीवद्वयाणां तदाश्रितानां तैजसकार्मणपुद्गलस्कन्धद्रव्याणां च भूयसां भावात् ॥ सम्प्रति परमाणुपुद्गलानां सङ्ख्येयप्रदेशानामसङ्ख्येयप्रदेशानामनन्तप्रदेशानां परस्परमल्पबहुत्वमाह–

मू. (२९६) *एएसि णं भंते ! परमाणुपोग्गलाणं संखेज्जपएसियाणं असंखेज्जपएसियाणं अनंतपएसियाण य खंधाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा अनंतपएसिया खंधा दव्वट्ठयाए परमाणुपोग्गला दव्वट्ठयाए अणंतगुणा संखेज्जपएसिया खंधा दव्वट्ठयाए संखेजजगुणा असंखपएसिया खंधा दव्वट्ठयाए असंखेज्जगुणा पएसट्ठयाए सव्वत्थोवा अनंतपएसिया खंधा पएसट्ठयाए परमाणुपोग्गला अपएसट्ठयाए अनंतगुणा संखेज्जपएसिया खंधा पएसट्ठयाए संखेज्जगुणा असंखपएसिया खंधा पएसट्ठयाए असंखेज्जगुणा दव्वट्ठापएसट्ठयाए सव्वत्थोवा अनंतपएसिया खंधा दव्वट्ठयाए ते चेव पएसट्ठयाए अनंतगुणा परमाणुपोग्गला दव्वट्ठपएसट्ठयाए अनंतगुणा संखेज्जपएसिया खंधा दव्वट्ठाए संखेज्जगुणा ते चेव पएसट्ठयाए संखेज्जगुणा असंखेज्जपएसिया खंधा दव्वट्ठयाए असंखेज्जगुणा ते चेव पएसट्ठयाए असंखेज्जगुणा ॥*

एएसिणं भंते ! एगपएसोगाढाणं संखेज्जपएसोगाढाणं असंखेज्जपएसोगाढाण य पोग्गलाणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा एगपएसोगाढा पोग्गला दव्वट्ठयाए संखेज्जपएसोगाढा पोग्गला दव्वट्ठयाए संखेज्जगुणा असंखेज्जपएसोगाढा पोग्गला दव्वट्ठयाए असंखेज्जगुणा पएसट्ठयाए सव्वत्थोवा एगपएसोगाढा पोग्गला पएसट्ठयाए संखिज्जपएसोगाढा पोग्गला पएसट्ठयाए संखिज्जगुणा असंखिज्जपएसोगाढा पुग्गला पएसट्ठयाए असंखेज्जगुणा दव्वट्ठपएसट्ठयाए सव्वत्थोवा एगपएसोगाढा पुग्गला दव्वट्ठपएसट्ठयाए संखिज्जपएसोगाढा पुग्गला दव्वट्ठयाए संखिज्जगुणा ते चेव पएसट्ठयाए संखिज्जगुणा असंखिज्जपएसोगाढा पुग्गला दव्वट्ठयाए असंखिज्जगुणा ते चेव पएसट्ठयाए असंखिज्जगुणा ।

एएसि णं भंते ! एगसमयठिइयाणं० असंखिज्जसमयठिइयाणं पुग्गलाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा एगसमयठिइया पुग्गला दव्वट्ठयाए संखिज्जसमठिइया पुग्गला दव्वट्ठयाए संखिज्जगुणा असंखिज्जसमयठिइया पुग्गला दव्वट्ठयाए असंखिज्जगुणा पएसट्ठयाए सव्वत्थोवा एगसमयठिइया पुग्गला पएसट्ठयाए संखिज्जसमयठिइया पुग्गला पएसट्ठयाए संखेज्जगुणा असंखिज्जसमयठिइया पुग्गला पएसट्ठयाए असंखेज्जगुणा दव्वट्ठपएसट्ठयाए सव्वत्थोवा एगसमयठिइया पुग्गला दव्वट्ठपएसट्ठयाए संखिज्जसमयठिइया पुग्गला दव्वट्ठयाए संखिज्जगुणा ते चेव पएसट्ठयाए संखिज्जगुणा असंखिज्जसमयठिइया पुग्गला दव्वट्ठयाए असंखिज्जगुणा ते चेव पएसट्ठयाए असंखिज्जगुणा ।

एएसि णं भंते एगगुणकालगाणं संखिज्जगुणकालगाणं असंखिज्जगुणकालगाणं अनंतगुणकालगाण य पुग्गलाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! जहा पुग्गला तहा भाणियव्वा, एवं संखिज्जगुणकालगाणवि, एवं सेसावि वण्णगंधा रसा फासा भाणियव्वा, फासाण कक्खडमउयगुरुयलहुयाणं जहा एगपएसोगाढाणं भणियं तहा भाणियव्वं । अवसेसा फासा जहा वन्ना तहा भाणियव्वा ।।

वृ. 'एएसि णं भंते ! परमाणुपोग्गलाणं संखेज्जपएसियाणं' इत्यादि पाठसिद्धं, नवरमात्राल्पबहुत्वभावनायां सर्वत्र तथास्वाभाव्यं कारणं वाच्यं । सम्प्रत्येतेषामेव क्षेत्रप्राधान्येनाल्पबहुत्वमाह-

इह क्षेत्राधिकारतः क्षेत्रस्य प्राधान्यात् परमाणुकाद्यनन्ताणुकस्कन्धा अपि विवक्षितैकप्रदेशावगाढा आधाराधेययोरभेदोपचारादेकद्रव्यत्वेन व्यवह्रियन्ते, ते इत्थभूता एकप्रदेशावगाढाः पुद्गलाः-पुद्गलद्रव्याणि सर्वस्तोकानि, लोकाकाशप्रदेशप्रमाणानीत्यर्थः, न हि स कश्चिदेवंभूत आकाशप्रदेशोऽस्ति य एकप्रदेशावगाहनपरिणामपरिणतानां परमाण्वादीनामवकाशदानपरिणामेन परिणतो न वर्त्तते इति,

-तेभ्यः सङ्ख्येयप्रदेशावगाढाः पुद्गला द्रव्यार्थतया सङ्ख्येयगुणाः, कथमिति चेत् ?, उच्यते, इहापि क्षेत्रस्य प्राधान्यात् द्व्यणुकाद्यनन्ताणुकस्कन्धा द्विप्रदेशावगाढा एकद्रव्यत्वेन विवक्ष्यन्ते, तानि च तथाभूतानि पुद्गलद्रव्याणि पूर्वोक्तेभ्यः सङ्ख्येयगुणानि, तथाहि-सर्वलोकप्रदेशास्तत्त्व-तोऽसङ्ख्येया अपि असत्कल्पनया दश परिकल्प्यन्ते, ते च प्रत्येकचिन्तायां दशैवेति दश एकप्रदेशावगाढानि पुद्गलद्रव्याणि लब्धानि, तेष्वेव च दशसु प्रदेशेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यग्रहणान्यमोक्षणद्वारेण बहवो द्विकसंयोगा लभ्यन्ते इति भवन्त्येकप्रदेशावगाढेभ्यो द्विप्रदेशावगाढानि पुद्गलद्रव्याणि सङ्ख्येयगुणानि एवं तेभ्योऽपि त्रिप्रदेशावगाढानि एवमुत्तरोत्तरं यावदुत्कृष्टसङ्ख्येयप्रदेशावगाढानि, ततः स्थितमेतत्–एकप्रदेशावगाढेभ्यः सङ्ख्येयप्रदेशावगाढाः पुद्गलाः द्रव्यार्थतया सङ्ख्येयगुणा इति,

–इति तेभ्यो सङ्ख्येयप्रदेशावगाढाः पुद्गला द्रव्यार्थतया असङ्ख्येयगुणाः, असङ्ख्यातस्यासङ्ख्यातभेदभिन्नत्वात्, द्रव्यार्थतासूत्रं प्रदेशार्थतासूत्रं द्रव्यपर्यायार्थतासूत्रं च सुगमत्वात् स्वयं भावनीयं, कालभावसूत्राण्यपि सुगमत्वात् स्वयं भावयितव्यानि, नवरं 'जहा पोग्गला तहा भाणियव्वा' इति यथा प्राक् सामान्यतः पुद्गला उक्तास्तथा एकगुणकालकादयोऽपि वक्तव्याः, ते चैवम्–यतः 'सव्वत्थोवा अनंतपएसिआ खंधा एगगुणकालगा, परमाणुपुग्गला दव्वट्ठयाए एगगुणकालग अनंतगुणा, संखिज्जपएसिया खंधा एगगुणकालगा संखिज्जगुणा, असंखिज्जपएसिआ खंधा एगगुणकालगा असंखिज्जगुणा।

उवरिमहेट्ठिमगेविज्ञगदेवाणं पुच्छा गोयमा! जहन्नेणं अट्ठावीसं सागरोवमाइं उक्कोसेणं एगूणकीसं सागरोवमाइं, अपज्ञत्तयाणं पुच्छा गोयमा! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, पज्ञत्तयाणं पुच्छा गोयमा! जहन्नेणं अट्ठावीसं सागरोवमाइं अंतोमुहुत्तूणाइं उक्कोसेणं एगूणतीसं सागरोवमाइं अंतोमुहुत्तूणाइं ।। उवरिममज्झिमगेवेज्ञगदेवाणं पुच्छा गोयमा! जहन्नेणं एगुणतीसं सागरोवमइं उक्कोसेणं तीसं सागरोवमाइं, अपज्ञत्तयाणं पुच्छा गोयमा! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, पज्ञत्तयाणं पुच्छा गोयमा! जहन्नेणं एगूणतीसं सागरोवमाइं अंतोमुहुत्तूणाइं उक्कोसेणं तीसं सागरोवमाइं अंतोमुहुत्तूणाइं ।।

उवरिमउवरिमगेवेज्ञगदेवाणं पुच्छा गोयमा! जहन्नेणं तीसं सागरोवमाइं उक्कोसेणं एक्कतीसं सागरोवमाइं, अपज्ञत्तयाणं पुच्छा गोयमा! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, पज्ञत्तयाणं पुच्छा गो० जहन्नेणं तीसं सागरोवमाइं अंतोमुहुत्तूणाइं उक्कोसेणं एक्कतीसं सागरोवमाइं अंतोमुहुत्तूणाइं

विजयवेजयंतजयंतअपराजितेसु णं भंते! देवाणं केवइयं कालं ठिई पन्नत्ता? गोयमा! जहन्नेणं एक्कतीसं सागरोवमाइं उक्कोसेणं तेत्तीसं सागरोवमाइं, अपज्ञत्तयाणं पुच्छा गोयमा! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, पज्ञत्तयाणं पुच्छा गोयमा! जहन्नेणं एक्कतीसं सागरोवमाइं अंतोमुहुत्तूणाइं उक्कोसेणं तेत्तीसं सागरोवमाइं अंतोमुहुत्तूणाइं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वट्ठसिद्धगदेवाणं भंते! केवइयं कालं ठिई प० गो० जहन्नमणुक्कोसं तेत्तीसं सागरोवमाइं ठिई पन्नत्ता, सव्वट्ठसिद्धगदेवाणं अपज्जत्तयाणं पुच्छा गोयमा! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, सव्वट्ठसिद्धगदेवाणं पज्जत्तयाणं केवइयं कालं ठिई पन्नत्ता?, गोयमा! अजहन्नमणुक्कोसं तेत्तीसं सागरोवमाइं अंतोमुहुत्तूणाइं ठिई पन्नत्ता ॥ (पन्नवणाए भगवईए चउत्थं ठिइपदं समत्तं)

पदं – ४ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापना उपाङ्ग सूत्रे चतुर्थपदस्य मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता।

पदं – ५ – विसेसपदं (पर्यायपदं)

वृ. तदेवं व्याख्यातं चतुर्थं पदं, इदानीं पञ्चममारभ्यते–तस्य चायमभिसम्बन्धः–इहानन्तरपदे नारकादिपर्यायरूपेण सत्त्वानामवस्थितिरुक्ता, इह त्वौदयिकक्षायोपशमिकक्षायिकभावाश्रयपर्यायावधारणं प्रतिपाद्यते, तत्र चेदमादिसूत्रम्–

मू. (३०७) *कइविहा णं भंते! पज्जवा पन्नत्ता?, गोयमा! दुविहा पज्जवा पन्नत्ता, तंजहा–जीवपज्जवा य अजीवपज्जवा य। जीवपज्जवा णं भंते! किं संखेज्जा असंखेज्जा अनंता?, गोयमा नो संखेज्जा नो असंखेज्जा अनंता, से केणट्ठेणं जीवपज्जवा नो संखेज्जा नो असंखेज्जा अनंता?,*

गोयमा! असंखिज्जा नेरइया असंखिज्जा असुरकुमारा असंखिज्जा नागकुमारा असंखिज्जा सुवण्णकुमारा असंखिज्जा विज्जुकुमारा असंखिज्जा अगनिकुमारा असंखिज्जा दीवकुमारा असंखिज्जा उदहिकुमारा असंखिज्जा दिसीकुमारा असंखिज्जा वाउकुमारा असंखिज्जा थणियकुमारा असंखिज्जा पुढविकाइया असंखिज्जा आउकाइया असंखिज्जा तेउकाइया असंखिज्जा वाउकाइया अनंता वणप्फइकाइया असंखेज्जा बेइंदिया असंखेज्जा तेइंदिया असंखेज्जा चउरिंदिय असंखेज्जा पंचिंदियतिरिक्खजोणिया असंखेज्जा मणुस्सा असंखेज्जा वाणमंतरा असंखेज्जा जोइसिया असंखेज्जा वेमाणिया अनंता सिद्धा, से एएणट्ठेणं गोयमा! एवं वुच्चइ–ते णं नो संखिज्जा नो असंखिज्जा अनंता ॥

वृ. 'कइविहा णं भंते! पज्जवा पन्नत्ता?' इति, अथ केनाभिप्रायेण गौतमस्वामिना भगवानवं पृष्टः?, उच्यते, उक्तमादौ प्रथमे पदे प्रज्ञापना द्विविधा प्रज्ञप्ता, तद्यथा–जीवप्रज्ञापना अजीवप्रज्ञापना चेति, तत्र जीवाश्चाजीवाश्च द्रव्याणि, द्रव्यलक्षणं चेदम्–'गुणपर्यायवद्रव्य'मिति ततो जीवाजीवपर्यायभेदावगमार्थमेवं पृष्टवान्, तथा च भगवानपि निर्वचनमेवमेवाह–

'गोयमा! दुविहा पज्जवा पन्नत्ता, तंजहा–जीवपज्जवा य अजीवपज्जवा य' इति, तत्र पर्याया गुणा विशेषा धर्म्मा इत्यनर्थान्तरं, ननु सम्बन्धं प्रतिपादयतेदमुक्तम्–इह त्वौदयिकादिभावाश्रयपर्यापरिमाणावधारणं प्रतिपाद्यत इति, औदयिकादयश्च भावा जीवाश्रयाः, ततो जीवपर्याया एव गम्यन्ते अथ चास्मिन्निर्वचनसूत्रे द्वयानामपि पर्याया उक्तास्ततो न सुन्दरः सम्बन्धः, तदयुक्तम्, अभिप्रायापरिज्ञानात्, औदयिको हि भावः पुद्‌गलवृत्तिरपि भवति, ततो जीवाजीवभेदेनौदयिकभावस्य द्वैविध्यान्न सम्बन्धकथननिर्वचनसूत्रयोर्विरोधः।

सम्प्रति सम्बन्ध(पर्याय)परिमाणावगमाय पृच्छति–'जीवपज्जवा णं भंते! किं संखेज्जा' इत्यादि, इह यस्माद्वनस्पतिसिद्धवर्जाः सर्वेऽपि नैरयिकादयः प्रत्येकमसङ्ख्येयाः मनुष्येष्वसङ्ख्येयत्वं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संमूर्च्छिममनुष्यापेक्षया वनस्पतयः सिद्धाश्च प्रत्येकमनन्ताः ततः पर्यायिणामनन्तत्वाद् भवन्त्यनन्ता जीवपर्यायाः ।। तदेवं गौतमेनं सामान्यतो जीवपर्यायाः पृष्ठः भगवानपि सामान्येन निर्वचनमुक्तवान्, इदानीं विशषविषयं प्रश्नं गौतम आह–

मू. (३०८) *नेरइयाणं भंते ! केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ–नेरइयाणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! नेरइए नेरइयस्स दव्व-ट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए सिय हीणे सिय तुल्ले सिय अब्भहिए जइ हीणे असंखिज्जइभानहीणे वा संखिज्जइभागहीणे वा संखिज्जगुणहीणे वा असंखिज्जगुणहीणे वा अह अब्भहिए असंखिज्जइभागमब्भहिए वा संखिज्जइभागमब्भहिए वा संखिज्जगुणमब्भहिए वा असंखिज्जगुणमब्भहिए वा, ठिईए सिय हीणे सिय तुल्ले सिय अब्भहिए जइ हीणे असंखिज्जइभागहीणे वा संखिज्जइभागहीणे वा संखिज्जगुणहीणे वा असंखिज्जगुणहीणे वा अह अब्भहिएअसंखि-ज्जभागमब्भहिए वा संखिज्जभागमब्भहिए वा संखिज्जगुणमब्भहिए वा असंखिज्जगुणमब्भहिए वा, कालवण्णपज्जवेहिं सिय हीणे सिय तुल्ले सिय अब्भहिए ।*

–जइ हीणे अनंतभागहीणे वा असंखेज्जभागहीणे संखेज्जभागहीणे वा संखेज्जगुणहीणे वा असंखेज्जगुणहीणे वा अणनतगुणहीणे वा अह अब्भहिए अनंतभागमब्भहिए वा असंखेज्जभागमब्भहि- ए वा संखेज्जभागमब्भहिए वा संखेज्जगुणमब्भहिए वा असंखेज्जगुणमब्भहिए वा अणंतगुणमब्भहिए वा, नीलवन्नपज्जवेहिं लोहियवन्नपज्जवेहिं पीयवन्नपज्जवेहिं हालिद्दवन्नपज्जवेहिं सुक्किल्लवन्नपज्जवेहिं छट्ठाणवडिए, सुब्भिगंधपज्जवेहिं दुब्भिगंधपज्जवेहि य छट्ठाणवडिए, तित्तरसपज्जवेहिं कडुयरसपज्जवेहिं कसायरसपज्जवेहिं अंबिलरसपज्जवेहिं महुररसपज्जवेहिं छट्ठाणवडिए, कक्खडफासपज्जवेहिं मउयफासपज्जवेहिं गरुयफासपज्जवेहिं लहुयफासपज्जवेहिं सीयफासपज्जवेहिं उसिणकासपज्जवेहिं निद्धफासपज्जवेहिं लुक्खफासपज्जवेहिं छट्ठाणवडिए,

–आभिनिबोहियनाणपज्जवेहिं सुयनाणपज्जवेहिं ओहिनाणपज्जेविहं मइअन्नाणपज्जवेहिं सुयअन्नाणपज्जवेहिं विभंगनाणपज्जवेहिं चक्खुदंसणपज्जवेहिं अचक्खुदंसणपज्जवेहिं ओहिदंसणपज्जवेहिं छट्ठाणवडिए, से तेणट्ठेणं गोयमा ! एवं वुच्चइ नेरइयाणं नो संखेज्जा नो असंखेज्जा अनंता पज्जवा पन्नत्ता ।

वृ. 'नेरइयाणं भंते ! केवइया पज्जवा पन्नत्ता' इति, अथ केनाभिप्रायेणौवं गौतमः पृष्टवान् उच्यते, पूर्वं किल सामान्यप्रश्ने पर्यायिणामनन्तत्वात् पर्यायाणामानन्त्यमुक्तं, यत्र पुनः पर्यायिणा-मानन्त्यं नास्ति तत्र कथमिति पृच्छति–'नेरइयाणं' इत्यादि, तत्रापि निर्वचनमिदम् 'अनन्ता' इति, अत्रैव जातसंशयः प्रश्नयति–'से केणट्ठेणं भंते !' इत्यादि, अथ केनार्थेन–केन कारणेन केन हेतुना भदन्त ! एवमुच्यते–नैरयिकाणां पर्याया एवम्–अनन्ता इति ?, भगवानाह–

'गोयमा ! नेरइए नेरइयस्स दव्वट्ठयाए तुल्ले, इत्यादि, अथ पर्यायाणामानत्यं कथं घटते इति पृष्टे तदेव पर्यायाणामानन्त्यं यथा युक्तयुपपन्नं भवति तथा निर्वचनीयं नान्यत् ततः केनाभिप्रायेण भगवतैवं निर्वचनमवाचि–नैरयिको नैरयिकस्य द्रव्यार्थतया तुल्य इति ?, उच्यते, एकमपि द्रव्यमनन्तपर्यायमित्यस्य न्यायस्य प्रदर्शनार्थं, तत्र यस्मादिदमपि नारकजीवद्रव्यमेक-सङ्ख्याऽवरुद्धमिति नैरयिको नैरयिकस्य द्रव्यार्थतया तुल्यः, द्रव्यमेवार्थो द्रव्यार्थः तद्भावोद्रव्यार्थता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तया द्रव्यार्थतया तुल्यः, एवं तावत् द्रव्यार्थतया तुल्यत्वमभिहितं ।

इदानीं प्रदेशार्थामधिकृत्य तुल्यत्वमाह-'पएसट्ठयाए तुल्ले' इदमपि नारकजीवद्रव्यं लोकाकाशप्रदेशपरिमाणप्रदेशमिति प्रदेशार्थतयाऽपि नैरयिको नैरयिकस्य तुल्यः, प्रदेश एवार्थ प्रदेशार्थः तद्भावः प्रदेशार्थता तया प्रदेशार्थतया, कस्मादभिहितचमिति चेत्, उच्यते, ।

द्रव्यद्वैविध्यप्रदर्शनार्थं, तथाहि-द्विविधं द्रव्यं-प्रदेशवत् अप्रदेशवच्च, तत्र परमाणुरप्रदेशः, द्विप्रदेशत्रिप्रदेशादिकं तु प्रदेशवत्, एतच्च द्रव्यद्वैविधयं पुद्गलास्तिकाय एव भवति, शेषाणि तु धर्म्मास्तिकायादीनि द्रव्याणि नियमात् सप्रदेशानि, 'ओगाहणट्ठयाए सिय हीणे' इत्यादि, नैरयिकोऽसङ्ख्यातप्रदेशोऽपरस्य नैरयिकस्य तुल्यप्रदेशस्य अवगाहनमवगाहः-शरीरोच्छ्रयः अवगाहनमेवार्थोऽवगाहनार्थस्तद्भावोऽवगाहनार्थता तया अवगाहनार्थतया –

'सिय हीणे' इत्यादि, स्याच्छब्दः प्रशंसाऽस्तित्वविवादविचारणाऽनेकान्तसंशय-प्रश्नादिष्वर्थेषु, अत्रानेकान्तद्योतकस्य ग्रहणं, स्याद्धीनः अनेकान्तेन हीन इत्यर्थः, स्यात्तुल्यः-अनेकान्तेन तुल्य इत्यर्थः, स्यादभ्यधिकः-अनेकान्तेनाभ्यधिक इति भावः, कथमिति चेत्, उच्यते, यस्माद्वक्ष्यति रत्नप्रभापृथिवीनैरयिकाणां भवधारणीयस्य वैक्रियशरीरस्य जघन्येना वगाहनाया अङ्गुलस्यासङ्ख्येयो भागः उत्कर्षतः सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानि, उत्तरोत्तरासु च पृथिवीषु द्विगुणं द्विगुणं यावत् सप्तमनरकपृथिवीनैरयिकाणां जघन्यतोऽवगाहनाऽङ्गुलस्यासङ्ख्येयो भागः उत्कर्षतः पञ्चधनुःशतानीति, । तत्र 'जइ हीणे; इत्यादि, यदि हीनस्ततोऽसङ्ख्येयभागहीनो वा स्यात् सङ्ख्येयभागहीनो वा सङ्ख्येयगुणहीनो वा स्यात् असङ्ख्येयगुणहीनो वा, अथाभ्यधिकस्ततो ऽसङ्ख्येयभागाभ्यधिको वा स्यात्सङ्ख्येयभागाभ्यधिको वा सङ्ख्येयगुणाभ्यदिको वाऽसङ्ख्येयगुणा-भ्याधिको वा, कथमिति चेत् ?, उच्यते, एकः किल नारक उच्चैस्त्वेन पञ्च धनुःशतानि अपरस्तान्ये-वाङ्गुलासङ्ख्येयभागहीनानि, अङ्गुलासङ्ख्येयभागश्च पञ्चानां धनुःशतानामसङ्ख्येये भागे वर्त्तते, तेन सोऽङ्गुलासङ्ख्येयभाग- हीनपञ्चधनुः-शतप्रमाणः अपरस्य परिपूर्णपञ्चधनुःशतप्रमाण-स्यापेक्षयाऽसङ्ख्येयभागहीनः, इतरस्त्वितरापेक्षयाऽसङ्ख्येयभागाभ्यधिकः-

-तथा एकः पञ्चधनुःशतान्युच्चैस्त्वेन अपरस्तान्येव द्वाभ्यां त्रिभिर्वा धनुर्भिन्यूनानि ते च द्वे त्रीणि वा धनूंषि पञ्चाना धनुः-शतानां सङ्ख्येयभागे वर्त्तन्ते ततः सोऽपरस्य परिपूर्णपञ्चधनुः-शतप्रमाणस्यापेक्षया सङ्ख्येयभागहीनः, इतरस्तु परिपूर्णपञ्चधनुःशतप्रमाणस्तदपेक्षया सङ्ख्येयभागाभ्यधिकः, तथा एकः पञ्चविंशं धनुःशतमुच्चैस्तेवेनापरः परिपूर्णानि पञ्चधनुःशतानि, पञ्चवंशं च धनुःशतं चतुर्भिर्गुणितं पञ्च धनुःशतानि भवन्ति ततः पञ्चविंशत्यधिकधनुःश-तप्रमाणोच्चैस्त्वेऽप्यपरस्य

परिपूर्णपञ्चधनुःशतप्रमाणस्यापेक्षया सङ्ख्येयगुणहीनो भवति तदपेक्षया त्वितरः परिपूर्णपञ्चधनुःशतप्रमाणः सङ्ख्येयगुणाभ्यधिकः,

-तथा एकोऽपर्याप्तावस्थायामङ्गुलस्यासङ्ख्येयभागावगाहे वर्त्तते अन्यस्तु पञ्चधनुःशतान्यु-च्चैस्तेवेन, अङ्गुलासङ्ख्येयभागश्चासङ्ख्येयेन गुणितःसन् पञ्चधनुःशतप्रमाणो भवति, ततोऽपर्याप्ता-वस्थायामङ्गुलासङ्ख्येयभागप्रमाणेऽवगाहे वर्त्तमानः परिपूर्णपञ्चधनुःशतप्रमाणापेक्षया असङ्ख्येयगुणहीनः, पञ्चधनुःशतप्रमाणस्तु तदपेक्षयाऽसङ्ख्येयगुणाभ्यधिकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ठीईए सिय हीणे' इत्यादि, यथाऽवगाहनया हानौ वृद्धौ च चतुःस्थानपतित उक्तस्तथा स्थित्याऽपि वक्तव्य इति भावः, एतदेवाह–'जइ हीणे' इत्यादि, तत्रैकस्य किल नारकस्य त्रयस्त्रिंशत्सागरोपमाणि स्थितिः अपरस्य तु तान्येव समयादिन्यूनानि, तत्र यः समयादिन्यूनत्रयस्त्रिंशत्सागरोपमप्रमाणस्थितिकः स परिपूर्णत्रयस्त्रिंशत्सागरोपमस्थितिकनारकापेक्षयाऽसङ्ख्येयभागहीनः परिपूर्णत्रयस्त्रिंशत्सागरोपमस्थितिकस्तु तदपेक्षयाऽसङ्ख्येयभागाभ्याधिकः, समयादेः सागरोपमापेक्षयाऽसङ्ख्येयभागमात्रत्वात्, ।

तथाहि–असङ्ख्येयैः समयैरेकाऽऽवलिका सङ्ख्याताभिरावलिकाभिरेक उच्छ्वासनिःश्वासकालः सप्तभिरुच्छ्वासनिःश्वासैरेकः स्तोकः सप्तभिः स्तोकैरेको लवः सप्तसप्तत्या लवानामेको मुहूर्त्तः त्रिंशता मुहूर्त्तैरहोरात्रः पञ्चदशभिरहोरात्रैः पक्षः द्वाभ्यां पक्षाभ्या मासः द्वादशभिर्मासैः संवत्सरः असङ्ख्येयैः संवत्सरैः पल्योपमसागरोपमाणि, समयाऽऽवलिकोच्छवासमुहूर्त्तदिवसाहोरात्रपक्षमाससंवत्सरयुगैः हीनः परिपूर्णस्थितिकनारकापेक्षयाऽसङ्ख्येयभागहीनो भवति तदपेक्षया त्वितरोसङ्ख्येयभागाभ्यधिकः, ।

तथा एकस्य त्रयस्त्रिंशत्सागरोपमाणि स्थितिः परस्य तान्येव पल्योपमैन्यूनानि, दशभिश्च पल्योपमकोटीकोटीभिरेकं सागरोपमं निष्पद्यते, ततःपल्योपमैन्यूनस्थितिकः परिपूर्णस्थितिकनारकापेक्षया सङ्ख्येयभागहीनः परिपूर्णस्थितिकस्तु तदपेक्षया सङ्ख्येयभागाभ्यधिकः, तथैकस्य सागरोपममेकं स्थितिः अपरस्य परिपूर्णानि त्रयस्त्रिंशत्सागपोपमाणि, तत्रैकसागोपमस्थितिकः परिपूर्णस्थितिकनारकापेक्षया सङ्ख्येयगुणहीनः, एकस्य सागरोपमस्य त्रयस्त्रिंशता गुणने परिपूर्णस्थितिकत्वप्राप्तेः, परिपूर्णस्थितिकस्तु तदपेक्षया सङ्ख्यगुणाभ्यधिकः ।

–तथैकस्य दश वर्षसहस्राणि स्थितिः अपरस्य त्रयस्त्रिंशत्सागरोपमाणि, दश वर्षसहस्राण्यसङ्ख्येयरूपेण गुणकारेण गुणितानि त्रयस्त्रिंशत्सागरोपमाणि भवन्ति, ततो दशवर्षसहस्रस्थितिकः त्रयस्त्रिंशत्सागरोपमस्थितिकनारकापेक्षयाऽसङ्ख्येयगुणहीनः तदपेक्षया तु त्रयस्त्रिंशत्सागरोपमस्थितिकोऽसङ्ख्येयगुणाभ्यधिक इति, तदेवमेकस्य नारकस्यापरनाकापेक्षया द्रव्यतो द्रव्यार्थतया प्रदेशार्थताय च तुल्यत्वमुक्तं क्षेत्रतोऽवगाहनं प्रति हीनाधिकत्वेने चतुःस्थानपतितत्वं कालतोऽपि स्थितितो हीनाधिकत्वेनचतुःस्थानपतितत्वं, इदानीं भावाश्रयं हीनाधिकत्वं प्रतिपाद्यते–यतः सकलमेव जीवद्रव्यमजीवद्रव्यं वा परस्परतो द्रव्यक्षेत्रकालभावैर्विभज्यते यथा घटः –

–तथाहि–द्रव्यत एको मार्त्तिकः अपरः काञ्चनो राजतादिर्वा क्षेत्रत एक इहत्यः अपरः पाटलिपुत्रकः कालत एकोऽद्यतनः अन्यस्तवैषमः परुत्तनो वा भावत एकः श्यामः अपरस्तु रक्तादिः एवमन्यदपि । तत्र प्रथमतः पुद्गलविपाकिनामकर्मोदयनिमित्तं जीवौदयिकभावाश्रयेण हीनाधिकत्वमाह–'कालवन्नपज्जवेहिं सिय हीणे सिय तुल्ले सिय अब्भहिए' अस्याक्षरघटना पूर्ववत्, तत्र यथा हीनत्वमभ्यधिकत्वं च तथा प्रतिपादयति–

'जइ हीने' इत्यादि, इह भावापेक्षया हीनत्वाभ्यधिकत्वचिन्तायां हानौ वृद्धौ च प्रत्येकं षट्स्थानपतितत्वमवाप्यते, षट्स्थानके च यद्यदपेक्षयाऽनन्तभागहीनं तस्य सर्वजीवानन्तकेन भागे हृते यल्लभ्यते तेनानन्तमेन भागेन हीनं, यच्च यदपेक्षयाऽसङ्ख्येयभागहीनं तस्यापेक्षणीयस्याऽसङ्ख्येयलोकाकाशप्रदेशप्रदेशप्रमाणेन राशिना भागे हृते यल्लभ्यते तावता भागेन न्यूनं, यच्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदधिकृ त्य सङ्ख्येयभागहीनं तस्यापेक्षणीयस्योत्कृष्टसङ्ख्येयकेन भागे हते यल्लभ्यते तावता हीनं, गुणसङ्ख्यायां तु यद्यतः सङ्ख्येयगुणं तदवधिभूतमुत्कृष्टेन सङ्ख्येकेन गुणितं सद्यावद् भवति तावत्प्रमाणमवसातव्यं, यच्च यतोऽसङ्ख्येयगुणं तदवधिभूतमसङ्ख्येयलोकाकाशप्रदेशप्रमाणेन गुणकारेण गुण्यते गुणितं सद्यावद्भवति तावदवसेयं, यच्च यस्मादनन्तगुणं तदवधिभूतं सर्वजीवानन्तकरूपेण गुणकारेण गुण्यते गुणितं सद्यावद्भवति तावत्प्रमाणं द्रष्टव्यं, तथा चैतदेव कर्मप्रकृतिसङ्ग्रहिण्यां षट्स्थानकप्ररूपणाऽवसरे भागहारगुणकारस्वरूपमुपवर्णितं 'सव्वजियानंतमसंखलोगसंखेज्जगस्स

भागो तिसु गुणणातिसु' इति, सम्प्रत्यधिकृतसूत्रोक्तषट्स्थानपतितत्वं भाव्यते–तत्र कृष्णवर्णपर्यायपरिमाणं तत्त्वतोऽनन्तरसङ्ख्यात्मकमप्यसद्भावस्थापनया किल दश सहस्राणि तस्य सर्वजीवानन्तकेन शतपरिमाणपरिकल्पितेन भागो ह्रियते लब्धं शतं **तत्रैकस्य किल** नारकस्य कृष्णवर्णपर्यायपरिमाणं दश सहस्राणि, अपरस्य तान्येव शतेन हीनानि **शतं च सर्वजीवा**नन्तभागहारलब्धत्वादनन्ततमो भागः, ततो यस्य हीनानि दश सहस्राणि **सोऽपरस्य परिपूर्णदशसहस्र**प्रमाणकृष्णवर्णपर्यायस्य नारकस्यापेक्षयाऽनन्तभागहीनः तदपेक्षया तु सोऽपरः कृष्णवर्णपर्यायोऽनन्तभागाभ्यधिकः, तथा कृष्णवर्णपर्यायपरिमाणस्य दशसहस्रसङ्ख्याकस्याऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणपरिकल्पितेन पञ्चाशत्परिमाणेन भागहारेण भागो ह्रियते लब्धे द्वे शते एषोऽसङ्ख्येयतमो भागः, तत्रैकस्य किल नारकस्य कृष्णवर्णपर्याया दशसहस्राणि शतद्वयेन हीनानि अपरस्य परिपूर्णानि दश सहस्रणि तत्र यः शतद्वयहीनदशसहस्रप्रमाणकृष्णवर्णपर्यायः स परिपूर्णकृष्णवर्णपर्यायिनारकापेक्षया असङ्ख्येयभागहीनः परिपूर्णकृष्णवर्णपर्यायस्तु तदपेक्षयाऽसङ्ख्येयभागाभ्यधिकः,

तथा तस्यैव कृष्णवर्णपर्यायराशेर्दशहसस्रसङ्ख्यायकस्योत्कृष्टसङ्ख्येयकपरिमाणकल्पितेन दशकपरिमाणेन भागहारेण भागो ह्रियते तल्लब्धं सहस्रं एष किल सङ्ख्याततमो भागः, तत्रैकस्य नारकस्य किल कृष्णवर्णपर्यायपरिमाणं नव सहस्रणि अपरस्य दश सहस्राणि नव सहस्राणि तु दशसहस्रेभ्यः सहस्रेण हीनानि सहस्रं च सङ्ख्येयतमो भाग इति नवसहस्रप्रमाणकृष्णवर्णपर्यायः परिपूर्णकृष्णवर्णपर्यायनारकापेक्षया सङ्ख्येयभागहीनः तदपेक्षया त्वितरः सङ्ख्येयभागाधिकः, तथैकस्य नारकस्य किल कृष्णवर्णपर्यापरिमाणं सहस्रं अपरस्य दश सहस्राणि, तत्र सहस्रं दशकेनोत्कृष्टसङ्ख्यातककल्पेन गुणितं दशसहस्रसङ्ख्याकं भवति इति सहस्रसङ्ख्यकृष्णवर्णपर्यायो नारको दशसहस्रसङ्ख्याककृष्णवर्णपर्यायनारकापेक्षया सङ्ख्येयगुणहीनः तदपेक्षया परिपूर्णकृष्णवर्णपर्यायः सङ्ख्येयगुणाभ्यधिकः, तथैकस्य किल नारकस्य कृष्णवर्णपर्यायाग्रं द्वे शते परस्य परिपूर्णानि दश सहस्राणि, द्वे च शते असङ्ख्येयलोकाकाशप्रदेशपरिमाणप्रकल्पितेन पञ्चाशत्परिमाणेन गुणकारेण गुणिते दश सहस्राणि जायन्ते,

–ततो द्विशतपरिमाणकृष्णवर्णपर्यायो नारकः परिपूर्णकृष्णवर्णपर्यायनारकापेक्षयाऽसङ्ख्येयगुणहीनः तदपेक्षया त्वितरोऽसख्ययेयगुणाभ्यधिकः, तथैकस्य किल नारकस्य कृष्णवर्णपर्यायपरिमाणं शतमपरस्य दश सहस्राणि शते च सर्वजीवानन्तपरिमाणपरिकल्पितेन (शत) गुण- कारेण गुणिते जायन्ते दश सहस्राणि, ततः शतपरिमाणकृष्णवर्णपर्यायो नारकः परिपूर्णकृष्णवर्ण- पर्यायनारकापेक्षया अननतगुणहीनः इतरस्तु तदपेक्षयाऽनन्तगुणाभ्यधिकः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा कृष्णवर्णपर्याया- नधिकृत्य हानौ वृद्धौ च षट्स्थानपतितत्वमुक्तमेवं शेषवर्णगन्धरसस्पर्शैरपि प्रत्येकं शट्स्थानपतितत्वं भावनीयं, । तदेवं पुद्गलविपाकिनामकर्मोदयजनितजीवौदयिक-भावाश्रयेण षट्स्थानपतितत्वमुपदर्शितं, इदानीं जीवविपाकिज्ञानावरणीयादिकर्मक्षयोपश-मभावाश्रयेण तदुपदर्शयति-

'आभिनिबोहियनाणपज्ञवेहिं' इत्यादि, पूर्ववत् प्रत्येकमाभिनिबोधिकादिषु षट्स्थानपतितत्वं भावनीयं, इह द्रव्यतस्तुल्यत्वं वदता संमूर्चअछिमसर्वप्रभेदनिर्भेदबीजं मयूराण्डकरसवदनभिव्यक्त- देशकालक्रमं प्रत्यवबद्धविशेषबेदपरिणतेर्योग्यं द्रव्यमित्यावेदितं, अवगाहनया चतुःस्थानपतितत्व- मभिवदात क्षेत्रतः सङ्कोचविकोचधर्म्मा आत्मा न तु द्रव्यप्रदेशसङ्ख्याया इति दर्शितं, उक्तं चैतदन्यत्रापि-

॥१॥ "विकसनसङ्कोचनयोर्नस्तो द्रव्यप्रदेशसङ्ख्यायाः ।
वृद्धिह्रासौ स्तः क्षेत्रतस्तु तावात्मस्तस्मात् ॥"

स्थित्या चतुःस्थानपतित्वं वदताऽऽयुःकर्मस्थितिनिर्वर्त्तकानामध्यवसायस्थानानामुत्कर्षाप-कर्षवृत्तिरुपदर्शिता, अन्यथा स्थित्या चतुः स्थानपतितत्वायोगात्, आयुःकर्म चोपलक्षणं तेन सर्वकर्मस्थितिनिर्वर्त्तकेष्वप्यध्यवसायेषूत्कर्षापकर्षवृत्तिरवसातव्या, कृष्णादिपर्यायैः षट्स्थान-पतितत्वमुपदर्शयता एकस्यापि नारकस्य पर्याया अनन्ताः किं पुनः सर्वेषां नारकाणामिति दर्शितं, अथ नारकाणां पर्यायानन्त्यं पृष्टेन भगवता तदेव पर्यायानन्त्यं वक्तव्यं न त्वन्यत् ततः किमर्थं द्रव्यक्षेत्रकालभावाभिधानमिति ?,

तदयुक्तं, अभिप्रायापरिज्ञानात्, इह न सर्वेषां सर्वे स्वपर्यायाः समसङ्ख्याः किं तु षट्स्थान पतिताः, एतच्चानन्तरमेव दर्शितं, तच्च षट्स्थानपतित्तवं परिणामित्वमन्तरेण न भवति, तच्च परिणामित्वं यथोक्तलक्षणस्य द्रव्यस्येति द्रव्यतस्तुल्यत्वमभिहितं, तथा न कृष्णादिपर्यायैरेव पर्यायवान् जीवः किं तु तत्तत्क्षेत्रसङ्कोचविकोचधर्मतयाऽपि तथा तत्तदध्यवसायस्थान-युक्ततयाऽपीति ख्यापनार्थं क्षेत्रकालाभ्यां चतुःस्थानपतितत्वमुक्तमिति कृतं प्रसङ्गेन । तदेवमवसितं नैरयिकाणां पर्यायानत्यं, इदानीमसुरकुमारेषु पर्यायाग्रं पिपृच्छिषुराह-

मू. (३०९) *असुरकुमाराणं भंते ! केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ-असुरकुमाराणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! असुरकुमारे असुरकुमारस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए चउट्ठाणवडिए कालवन्नपज्जवेहिं छट्ठाणवडिए एवं नीलवन्नपज्जवेहिं लोहियवन्नपज्जवेहिं हालिद्दवन्नपज्जवेहिं सुक्किल्लवन्नपज्जवेहिं सुब्भिगंधपज्जवेहिं दुब्भिगंधपज्जवेहिं तित्तरसपज्जवेहिं कडुयरसपज्जवेहिं कसायरसपज्जवेहिं अंबिलरसपज्जवेहिं महुररसपज्जवेहिं --*

-कक्खडफासपज्जवेहिं मउयफासपज्जवेहिं गरुयफासपज्जवेहिं लहुयफासपज्जवेहिं सीयफासपज्जवेहिं उसिणफासपज्जवेहिं निद्धफासपज्जवेहिं लुक्खफासपज्जवेहिं आभिनिबोहियनाण-पज्जवेहिं सुयनाणपज्जवेहिं ओहिनाणपज्जवेहिं मइअन्नाणपज्जवेहिं सुयअन्नाणपज्जवेहिं विभंगनाणपज्जवेहिं चक्खुदंसणपज्जवेहिं अचक्खुदंसणपज्जवेहिं ओहिदंसणपज्जवेहिं छट्ठाणवडिए,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से एएणट्ठेणं गोयमा ! एवं वुच्चइ–असुरकुमाराणं अनंता पज्जवा पन्नत्ता एवं जहा नेरइया, जहा असुरकुमारा तहा नागकुमारावि जाव थणियकुमारा–

वृ. 'असुरकुमाराणं भंते! केवइया बज्जवा पन्नत्ता ?' इत्यादि, उक्त एवार्थः प्रायः सर्वेष्वप्यसुरकुमारादिषु, ततः सकलमपि चतुर्विंशतिदण्डकसूत्रंप्राग्वद् भावनीयं, यस्तु विशेषः स उपदर्श्यते,

मू. (३१०) *पुढविकाइयाणं भंते ! केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ पुढविकाइयाणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! पुढविकाइए पुढविकाइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए सिय हीणे सिय तुल्ले सिय अब्भहिए, जइ हीणे असंखिज्जइभागहीणे वा संखिज्जइभागहीणे वा संखिज्जइगुणहीणे वा असंखिज्जगुणहीणे वा, अह अब्भहिए असंखिज्जइभागअब्भहिए वा संखिज्जइभागअब्भहिए वा संखिज्जगुणअब्भहिए वा असंखिज्जगुणअब्भहिए वा, ठिईए तिट्ठाणवडिए सिय हीणे सिय तुल्ले सिय अब्भहिए, जइ हीणे असंखिज्जभागहीणे वा संखिज्जभागहीणे वा संखिज्जगुणहीणे वा अह अब्भहिए असंखिज्जइभागअब्भहिए वा संखिज्जइभागअब्भहिए वा संखिज्जगुणअब्भहिए वा वन्नेहिं गंधेहिं रसेहिं फासेहिं मइअन्नाणपज्जवेहिं सुयअन्नाणपज्जवेहिं अचक्खुदंसणपज्जवेहिं छट्ठाणवडिए –*

आउकाइयाणं भंते ! केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ आउकाइयाणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! आउकाइए आउकाइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तिट्ठाणवडिए वन्नगंधरसफासमइअन्नाणसुअअन्नाणअचक्खुदंसणपज्जवेहिं छट्ठाणवडिए ॥

तेउकाइयाणं पुच्छा गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ–तेउकाइयाणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! तेउकाइए तेउकाइयस्स दव्वट्ठाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए, ठिईए तिट्ठाणवडिए, वन्नगंधरसफासमइअन्नाणसुयअन्नाणअचक्खुदंसणपज्जवेहि य छट्ठाणवडिए ॥

वाउकाइयाणं पुच्छा गोयमा ! वाउकाइयाणं अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्चइ–वाउकाइयाणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! वाउकाइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तिट्ठाणवडिए वन्नगंधरसफासमइअन्नाणसुयअन्नाणअचक्खुदंसणपज्जवेहिं छट्ठाणवडिए ॥

वणस्सइकाइयाणं पुच्छा गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्छइ–वणस्सइकाइयाणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! वणस्सइकाइए वणस्सइकाइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तिट्ठाणवडिए वन्नगंधरसफासमइअन्नाणसुयअन्नाणअचक्खुदंसणपज्जवेहि य छट्ठाणवडिए, से एएणट्ठेणं गोयमा ! एवं वुच्चइ–वणस्सइकाइयाणं अनंता पज्जवा पन्नत्ता ॥

मू. (३११) *बेइंदियाणं पुच्छा गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ–बेइंदियाणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! बेइंदिए बेइंदियस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए सिय हीणे सिय तुल्ले सिय अब्भहिए, जइ हीणे असंखिज्जइभागहीणे वा संखिज्जइभागहीणे वा संखिज्जइगुणहीणे वा असंखिज्जइगुणहीणे वा, अह अब्भहिए असंखिज्ज-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भागअब्भहिए वा संखिज्जइभागअअब्भहिए वा संखिज्जगुणमब्भहए वा असंखिज्जइगुणम्भहिए वा, ठिईए तिट्ठाणवडिए, वन्नगंधरसफासआभिणिबोहियनाणसुयनाणमइअन्नाणसुय-अन्नाणअचक्खुदंसणपज्जवेहि य छट्ठाणवडिए–

एवं तेइंदियावि, एवं चउरिंदियावि नवरं दो दंसणा चक्खुदंसणं अचक्खुदंसणं।

वृ. तत्र यत्पृथिवीकायिकादीनामवगाहनाया अङ्गुलासङ्ख्येयभागप्रमाणाया अपि चतुःस्थापनपतितत्वं तदङ्गुलासङ्ख्येयभागप्रमाणस्यासङ्ख्येयभेदभिन्नत्वादवसेयं, स्थित्या हीनत्वमभ्यधिकत्वं च त्रिस्थानपतितं न चतुःस्थानपतितं, असङ्ख्येयगुणवृद्धिरहान्योरसंभवात्, कथं तयोरसंभव इति चेत्, उच्यते, इह पृथिव्यादीनां सर्वजघन्यमायुः क्षुल्लकभवग्रहणं, क्षुल्लक-भवग्रहणस्य च परिमाणमावलिकानां द्वे शते षट्पञ्चाशदधिके, मुहूर्त्ते च द्विघटिकाप्रमाणे सर्वसङ्ख्याय क्षुल्लकभवग्रहणानां पञ्चषष्टिः सहस्राणि पञ्चशतानि षट्त्रिंशधिकानि उक्तं च–

॥१॥ "दोन्नि सयाइं नियमा छप्पन्नाइं पमाणओ हुंति।
आवलियपमाणेण खुड्डगभवग्गहणमेयं॥
॥२॥ पन्नट्ठिसहस्साइं पंचेव सयाइं तह य छत्तीसा।
खुड्डागभवग्गहणं भवंति एते मुहुत्तेणं॥"

पृथिव्यादीनां च स्थितिरुत्कर्षतोऽपि सङ्ख्येयवर्षप्रमाणा ततो नासङ्ख्येयगुण-वृद्धिहान्योःसंभवः शेषवृद्धिहानित्रिकभावना त्वेवं–एकस्य किल पृथिवीकायस्य स्थितिः परिपूर्णानि द्वाविंशतिवर्षसहस्राणि अपरस्य तान्येव समयन्यूनानि ततः समयन्यूनद्वाविंशति-वर्षखसहस्रस्थितिकः परिपूर्णद्वाविंशतिवर्षसहस्रस्थितिकापेक्षयाऽसङ्ख्येयभागहीनः तदपेक्षया त्वितरोऽसङ्ख्येयभागाधिकः, तथैकस्य परिपूर्णानि द्वाविंशतिवर्षसहस्राणि स्थितिरपरस्य तान्येवान्तर्मुहूर्त्तादिनोनानि, अन्तर्मुहूर्त्तादिकं(च) द्वाविंशतिवर्षसहस्राणां सङ्ख्येयतमो भागः,

ततोऽन्तर्मुहूर्त्तादिन्यूनद्वाविंशतिवर्षसहस्रस्थितिकः परिपूर्णद्वाविंशतिवर्षसहस्रस्थिति-कापेक्षया सङ्ख्येयभागहीनः तदपेक्षया परिपूर्णद्वाविंशतिवर्षसहस्रस्थितिकः सङ्ख्येयभाभ्यधिकः, तथैकस्य द्वाविंशतिवर्षसहस्राणि स्थितिरपरस्यान्तमुहूर्त्तं मासो वर्षं वर्षसहस्रं वा, अन्तर्मुहूर्त्ता-दिकं(च) नियतपरिमाणया सङ्ख्यागुणितं द्वाविशंतिवर्षसहस्रप्रमाणं भवति तेनान्तर्मुहूर्त्तादि-प्रमाणस्थितिकःपरिपूर्णद्वाविंशतिवर्षसहस्रस्थितिकापेक्षया सङ्ख्येयगुणहीनः तदपेक्षया तु परिपूर्ण-द्वाविंशतिवर्षसहस्रस्थितिकः सङ्ख्येयगुणाभ्यधिकः, एवमप्कायिकादीनामपि चतुरिन्द्रियपर्याप्तानां स्वस्वोत्कृष्टस्थित्यनुसारेण स्थित्या त्रिस्थानपतितत्वं भावनीयं।

मू. (३१२) *पंचिंदियतिरिक्खजोणियाणं पज्जवा जहा नेरइयाणं तहा भाणियव्वा।*

मू. (३१३) *मणुस्साणं भंतो! केवइया पज्जवा पन्नत्ता?, गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्चइ–मणुस्साणं अनंता पज्जवा पन्नत्ता?, गोयमा! मणूसे मणूसस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठणवडिए ठिईए चउट्ठाणवडिए वन्नगंधरसफासआभिनिबोहियनाणसुयनाणओहिनाणमनपज्जवनाणकेवलनाणपज्जवेहिं तुल्ले तिहिं दंसणेहिं छट्ठाणवडिए केवलदंसणपज्जवेहिं तुल्ले।*

वृ. तिर्यक्पञ्चेन्द्रियाणां मनुष्याणां च चतुःस्थानपतितत्वं, तेषां ह्युत्कर्षस्त्रीणि पल्योपमानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थितिः, पल्योपमं चासङ्ख्येयवर्षसहस्रप्रमाणतोऽसङ्ख्येयगुणवृद्धिहान्योरपि संभवादुपपद्यते चतुःस्थापतितत्वं,

मू. (३१४) *वाणमंतरा ओगाहणट्ठयाए ठिईए चउट्ठाणवडिया वण्णाईहिं छट्ठाणवडिया जोइसिया वेमाणियावि एवं चेव नवरं ठिईए तिट्ठाणवडिया ।*

वृ. एवं व्यन्तराणामपि, तेषां जघन्यतो दशवर्षसहस्रस्थितिकत्वदुत्कर्षतः पल्योपमस्थितिः (तेः), ज्योतिष्कवैमानिकानां पुन स्थित्या त्रिस्थानपतित्वं, यतो ज्योतिष्काणां जघन्यमायुःप-ल्योपमाष्टभागः उत्कृष्टं वर्षलक्षाधिकं पल्योपमं, वैमानिकानां जघन्यं पल्योपमं उत्कृष्टं त्रयस्त्रिं-शत्सागरोपमाणिस, दशकोटीकोटीसङ्ख्येयपल्योपमप्रमाणं च सागरोपममतस्तेषामपायसङ्ख्येयगुण-वृद्धिहान्यसंभवात् स्थितिस्त्रिस्थानपतिता, शेषसूत्रभावना तु सुगमत्वात् स्वयं भावनीया ॥

तदेवं सामान्यतो नैरयिकादीनां प्रत्येकं पर्यायानन्त्यं प्रतिपादितं, इदानीं जघन्याद्य-वगाहनाद्यधिकृत्य तेषामेव प्रत्येकं पर्यायाग्रं प्रतिपिदायिषुराह—

मू. (३१५) *जहन्नोगाहगाणं भंते ! नेरइयाणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ ? गोयमा ! जहन्नोगाहणए नेरइए जहन्नोगाहणस्स नेरइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले गाहणट्ठयाए तुल्ले ठिईए चउट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं तिहिं नाणेहिं तिहिं अन्नाणेहिं तिहिं दंसणेहिं छट्ठाणवडिए, ।*

उक्कोसोगाहणगाणं भंते ! नेरइयाणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ उक्कोसोगाहणयाणं नेरइयाणं अनंता पज्जवा पन्नत्ता ?, गोयमा उक्कोसोगाहणए नेरइए उक्कोसोगाहणस्स नेरइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए तुल्ले, ठिईए सिय हीणे सिय तुल्ले सिय अब्भहिए, जइ हीणे असंखिज्जभागहीणे वा संखिज्जभागहीणे वा अह अब्भहिए असंखिज्जभागअब्भहिए वा संखिज्जभागअब्भहिए वा, वन्नगंधरसफासपज्जवेहिं तिहिं नाणेहिं तिहिं अन्नाणेहिं तिहिं दंसणेहिं छट्ठाणवडिए,

अजहन्नमणुक्कोसोगाहणाणं नेरइयाणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ अजहन्नमणुक्कोसोगाहणाणं अनंता पज्जवा पन्नत्ता ?, गोयमा अजहन्नमणुक्कोसागहणए नेरइए अजहन्नमणुक्कोसोगाहणस्स नेरइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए सिय हीणे सिय तुल्ले सिय अब्भहिए जइ हीणे असंखिज्जभागहीणे वा संखिज्जभाग-हीणे वा संखिज्जगुणहीणे वा असंखिज्जगुणहीणे वा अह अब्भहिए असंखिज्जभागअब्भहिए वा संखिज्जभागअब्भहिए वा संखिज्जगुणअब्भहिए वा असंखिज्जगुणअब्भहिए वा, ठिईए सिय हीणे सिय तुल्ले सिय अब्भहिए । जइ हीणे असंखिज्जभागहीणे वा संखिज्जभागहीणे वा संखिज्जगुणहीणे वा असंखिज्जगुणहीणे वा अह अब्भहिए असंखिज्जभागअब्भहिए वा संखिज्जभागअब्भिहिए वा संखिज्जगुणअब्भहिए वा असंखिज्जगुणअब्भहिए वा, वन्नगंधरसफासपज्जवेहिं तिहिं नाणेहिं तिहिं अन्नाणेहिं तिहिं दंसणेहिं छट्ठाणवडिए, से एएणट्ठेणं गोयमा ! वुच्चइ अजहन्नमणुक्कोसोगाहणाणं नेरइयाणं अनंता पज्जवा पन्नत्ता ।

जहन्नठिइयाणं भंते ! नेरइयाणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ जहन्नठिइयाणं नेरइयाणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! जहन्नठिइए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेरइए जहन्नठियस्स नेरइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तुल्ले वन्नगंधरसफासपज्जवेहिं तिहिं नाणेहिं तिहिं अन्नणेहिं तिहिं दंसणेहिं छट्ठाणवडिए एवं उक्कोसठिइएवि, अजहन्नमणुक्कोसठिइएवि, नवरं सट्ठाणे चउट्ठाणवडिए।

जहन्नगुणकालगाणं भंते! नेरइयाणं केवइया पज्जवा पन्नत्ता?, गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्चइ–जहन्नगुणकालगाणं नेरइयाणं अनंता पज्जवा पन्नत्ता?, गोयमा! अजहन्नगुणकालए नेरइए जहन्नगुणकालगस्स नेरइयस्स दव्वट्ठाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए चउट्ठाणवडिए कालवन्नपज्जवेहं तुल्ले अवसेसेहिं वन्नगंधरसफासपज्जवेहिं तिहिं नाणेहिं तिहिं अन्नाणेहिं तिहिं दंसणेहिं छट्ठाणवडिए, से एएणट्ठेणं गोयमा! एवं वुच्चइ जहन्नगुणकालगाणं नेरइयाणं अनंता पज्जवा पन्नत्ता,

एवं उक्कोसगुणकालेवि, अजहन्नमणुक्कोसगुणकालएवि एवं चेव, नवरं कालवन्नपज्जवेहिं छट्ठाणवडिए, एवं अवसेसा चत्तारि वन्ना दो गंधा पंच रसा अट्ठ फासा भाणियव्वा।

जहन्नाभिनिबोहियनाणीणं भंते! नेरइयाणं केवइया पज्जवा पन्नत्ता?, गोयमा! जहन्नाभिणिबोहियनाणीणं नेरइयाणं अनंता पज्जवा पन्नत्ता, से केणट्ठणं भंते! एवं वुच्चइ जहन्नाभिनिबोहियनाणीणं नेरइयाणं अनंता पज्जवा पन्नत्ता?, गोयमा! जहन्नाभिनिबोहियनाणी नेरइए जहन्नाभिनिबोहियस्स नाणिस्स नेरइयस्स दव्वट्ठाए तुल्ले पएसट्ठाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए चउट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं छट्ठाणवडिए आभिणिबोहियनाणपज्जवेहिं तुल्ले सुयनाण० ओहिनाणपज्जवेहिं छट्ठाणवडिए तिहिं दंसणेहिं छट्ठाणवडिए, एवं उक्कोसाभिनिबोहयनाणीवि, ।

अजहन्नमणुक्कोसाभिणिबोहियनाणीवि एवं चेव, णवरं आभिनिबोहयनाणपज्जवेहिं सट्ठाणे छट्ठाणवडिए, एवं सुयनाणी ओहिनाणीवि, नवरं जस्स नाणा तस्स अन्नाणा नत्थि, जहा नाणा तहा अन्नाणावि भाणियव्वा, स नवरं जस्स अन्नाणा तस्स नाणा न भवंति।

जहन्नचक्खुदंसणीणं भंते! नेरइयाणं केवइया पज्जवा पन्नत्ता?, गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्चइ जहन्नचक्खुदंसणीणं नेरइयाणं अनंता पज्जवा पन्नत्ता?, गोयमा! जहन्नचक्खुदंसणीणं नेरइए जहन्नचक्खुदंसणिस्स नेरइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए चउट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं तिहिं नाणेहिं तिहिं अन्नाणेहिं छट्ठाणवडिए चक्खुंदसणपज्जवेहिं तुल्ले अचक्खुदंसणपज्जवेहिं ओहिदंसणपज्जवेहिं छट्ठाणवडिए, एवं उक्कोसचक्खुदंसणीवि, अजहन्नमणुक्कोसचक्खुदंसणीवि एवं चेव, नवरं सट्ठाणे छट्ठाणवडिए, एवं अचक्खुदंसणीवि ओहिदंसणीवि।

वृ. 'जहन्नोगाहणाणं भंते!' इत्यादि, सुगमं नवरं 'ठिईए चउट्ठाणवडिए' इति जघन्यावगाहनो हि दशवर्षसहस्राणि स्थितिकोऽपि भवति रत्नप्रभायां उत्कृष्टस्थितिकोऽपि सप्तमनरकपृथिव्यां, तत उपपद्यते स्थित्या चतुःस्थानपतितता, 'तिहिं नाणेहिं तिहिं अन्नणेहिं' ति इह यदा गर्भव्युत्क्रान्तिकसंज्ञिपञ्चेन्द्रियो नरकेषूत्पद्यते तदा स नारकायुःसंदेवन प्रथमसमय एव पूर्वगृहीतौदारिकशरीरपरिशाटं करोति तस्मिन्नेव समये सम्यग्दष्टेस्त्रीणि ज्ञानानि मिथ्यादष्टेस्त्रीण्यज्ञानननानि समुत्पद्यन्ते, ततोऽविग्रहेण विग्रहेण वा गत्वा वैक्रियशरीरसंघातं करोति, यस्तु संमूर्च्छिमासंज्ञिपञ्चेन्द्रियोनरकेषूत्पद्यते तस्य तदानीं विभङ्गज्ञानं नास्तीति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

–जघन्यावगाहनस्यास्याज्ञानानि भजनया द्रष्टव्यानि द्वे त्रीणि वेति, उत्कृष्टावगाहनसूत्रे स्थित्या हानौ वृद्धौ च द्विस्थानपतितत्वं, तद्यथा–असङ्ख्येयभागहीनत्वं वा सङ्ख्येयभागहीनत्वं वा, तथा असङ्ख्येयभागाधिकत्वं वा सङ्ख्येयभागाधिकत्वं वा न तु सङ्ख्येयसङ्ख्येयगुणवृद्धिहानी, कस्मादिति चेत्, उच्यते, उत्कृष्टावगाहना हि नैरयिकाः पञ्चधनुःशतप्रमाणाः, ते च सप्तमनरकपृथिव्यां, तत्र जघन्या स्थितिः द्वाविंशतिः सागरोपमाणि उत्कृष्टा त्रयस्त्रिंशत्सागरोपमाणि, ततोऽसङ्ख्येयसङ्ख्येयभागहानिवृद्धी एव घटेते न त्वसङ्ख्ययसङ्ख्येयगुणहानिवृद्धी, तेषां तोत्कृष्टावगाहनानां त्रीणि ज्ञानानि त्रीण्यज्ञानानि वा नियमाद्वेदितव्यानि, न भजनया, भजनाहेतोः संमूर्च्छिमासंज्ञिपञ्चेन्द्रियोत्पादस्य तेषामसंभवात् ।

–अजघन्योत्कृष्टावगाहनसूत्रे यदवगाहनया चतुःश्थानपतित्वं तदेवं–अजघन्योत्कृष्टावगाहनो हि सर्वजघन्याङ्गुलासङ्ख्येयभागात्परतो मनाक् बृहत्तराङ्गुलासङ्ख्येयभागादारभ्य यावदङ्गुलासङ्ख्येयभागन्यूनानि पञ्चधनुःशतानि तावदवसेयः, ततः सामान्यनैरयिकसूत्रे इवात्राप्युपपद्यते अवगाहनातश्चतुःस्थानपतितता, स्थित्या चतुःस्थानपतितता सुप्रतीता, दशवर्षसहस्रेभ्य आरभ्योत्कर्षतस्रयस्त्रिंशत्सागरोपमाणामपि तस्यां लभ्यमानत्वात्, जघन्यस्थितिसूत्रे अवगाहनाय चतुःस्थानपतितत्वं तस्यामवगाहनायां जघन्योऽङ्गुलासङ्ख्येयभागादारभ्योत्कर्षतः सप्तानां धनुषामवाप्यमा त्वात्, अत्रापि त्रीण्यज्ञानानि केषांचित्कादाचित्कतया द्रष्टव्यानि, संमूर्च्छिमासंज्ञिपञ्चेन्द्रियेभ्य उत्पन्नानमपर्याप्तावस्थायां विभङ्गस्याभावात्,

उत्कृष्टस्थितिचिन्तायामवगाहनया चतुःस्थानपतितत्वमुत्कृष्टस्थितिकस्यावगाहनाया जघन्यतोऽङ्गुलासङ्ख्येयागादारभ्योत्कर्षतः पञ्चानां धनुःशतानामवाप्यमानत्वात्,

'अजहन्नुक्कोसठिइएवि एवं चेव' इत्यादि, अजधन्योत्कृष्टस्थितावपि तथा वक्तव्यं यथा जघन्यस्थितिसूत्रे उत्कृष्टस्थितिसूत्रे चट, नवरमयं विशेषः–जघन्यस्थितिसूत्रे उत्कृष्टस्थितिसूत्रे च स्थित्या तुल्यत्वमभितं अत्र तु 'स्वस्थानेऽपि' स्थितावपि चतुःस्थानपतित इति वक्यवयं, समयाधिकदशवर्षसंहस्रेभ्य आरभ्योत्कर्षतः समयोनत्रयस्त्रिंशत्सागरोपमाणामवाप्यमानत्वात्,

जघन्यगुणकालकादिसूत्राणि सुप्रतीतानि, नवरं 'जस्सनाणा तस्स अन्नाणा नत्थि'त्ति यस्य ज्ञानानि तस्याज्ञानानि न संभवन्तीति, यतः सम्यग्दृष्टेर्ज्ञानानि मिथ्यादृष्टेरज्ञानानि, सम्यगदृष्टित्वं च मिथ्यादृष्टित्वोमपर्देन भवति मिथ्यादृष्टित्वमपि सम्यग्दृष्टित्वोपमर्देन भवति, ततो ज्ञानसद्भावेऽज्ञानाभावः एवमज्ञानसद्भावे ज्ञानाभावः, तत उक्तं–'जहा नाणा तहा अन्नाणावि भाणियव्वा, नवरं जस्स अन्नाणा तस्स नाणा न संभवन्ति' इति शेषं पाठसिद्धं ।

मू. (३१६) *जहन्नोगाहगाणं भंते ! असुरकुमाराणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ जहन्नोगाहगाणं असुरकुमाराणं अनंता पज्जवा पन्नत्ता !, गोयमा ! जहन्नोगाहणए असुरकुमारे जहन्नोगाहणस्स असुरकुमारस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए तुल्ले ठिईए चउट्ठाणवडिए वन्नाईहिं छट्ठाणवडिए आभिनिबोहियनाण० सुयनाण० ओहिनाणपज्जवेहिं तिहिं अन्नाणेहिं तिहिं दंसणेहिं य छट्ठाणवडिए,*

एवं उक्कोसोगाहणएवि, एवं अजहन्नमणुक्कोसोगाणएवि, नवरं उक्कोसोगाहणएवि असुरकुमारे ठीईए चउट्ठाणवडिए, एवं जाव थणियकुमारा ।

वृ. एवमसुरकुमारादिसूत्राण्यपि भावनीयानि प्रायः समानगमत्वात् ।

मू. (३१७) *जहन्नोगाहणाणं भंते ! पुढविकाइयाणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ जहन्नोगाहणाणं पुढविकाइयाणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! जहन्नोगाहणए पुढविकाइए जहन्नोगाणहस्स पुढविकाइयस्स दव्वट्ठाए तुल्ले पएसट्ठयाए तुल्लो ओगाहणट्ठयाए तुल्ले ठिईए तिट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं दोहिं अन्नाणेहिं अचक्खुंदंसणपज्जवेहि य छट्ठाणवडिए, एवं उक्कोसोगाणएवि, अजहन्नमणुक्कोसोगा- हणएवि एवं चेव, नवरं सट्ठाणे चउट्ठाणवडिए,*

जहन्नठिइयाणं पुढविकाइयाणं पुच्छा गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ जहन्नठिइयाणं पुढविकाइयाणं अनंता पज्जवा पन्नत्ता !, गोयमा ! जहन्नठिइए पुढविकाइए जहन्नठिइयस्स पुढविकाइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तुल्ले वन्नगंधरसफासपज्जवेहिं मतिअन्नाण० सुयअन्नाण० अचक्खुदंसणपज्जवेहिं छट्ठाणवडिए, एवं उक्कोसठिइएवि, अजहन्नमणुक्कोसठिइएवि एवं चेव, नवरं सट्ठाणे तिट्ठाणवडिए ।

जहन्नगुणकालयाणं भंते ! पुढविकाइयाणं पुच्छा गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ जहन्नगुणकालयाणं पुढविकाइयाणं अनंता पज्जवा पन्नत्ता, गोयमा ! जहन्नगुण- कालए पुढविकाइए जहन्नगुणनकालगस्स पुढविकायस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तिट्ठाणवडिए कालवन्नपज्जवेहिं तुल्ले अवसेसेहिं वन्नगंधरसफासपज्जवेहिं छट्ठाणवडिए दोहिं अन्नाणेहिं अचक्खुदंसणपज्जवेहि य छट्ठाणवडिए, एवं उक्कोसगुणकालएवि, अजहन्नमणुक्कोसगुणकालएवि एवं चेव, नवरं सट्ठाणे छट्ठाणवडिए, एवं पंच वन्ना दो गंधा पंच रसा अट्ठ फासा भाणियव्वा ।

जहन्नमतिअन्नाणीणं भंते ! पुढविकाइयाणं पुच्छा गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ जहन्नमतिअन्नाणीणं पुढविकाइयाणं अनंता पज्जवा पन्नत्ता ?, गोयमा जहन्नमतिअन्नाणी पुढविकाइए जहन्नमतिअन्नाणिस्स पुढविकाइयस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तिट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं छट्ठाणवडिए मइअन्नाणवज्जवेहिं तुल्ले सुयअन्नाणपज्जवेहिं अचक्खुदंसणपज्जवेहिं छट्ठाणवडिए-

एवं उक्कोसमइअन्नाणीवि, अजहन्नमणुक्कोसमइअन्नाणीवि एवं चेव, नवरं सट्ठाणे छट्ठाणवडिए, एवं सुयअन्नाणीवि अचक्खुदंसणीवि एवं चेव जाव वणप्फइकाइया ।

वृ. जघन्यावगाहनादिपृथिव्यादिसूत्रे स्थित्या त्रिस्थानपतितत्वं सङ्ख्येयवर्षायुष्कत्वात्, एतच्च प्रागेव सामान्यपृथिवीकायिकसूत्रे भावितं, पर्यायचिन्तायामज्ञाने एव मत्यज्ञानश्रुता- ज्ञानलक्षणे वक्तव्ये न तु ज्ञाने, तेषां सम्यकत्वसल्य तेषु मध्ये सम्यकत्वसहितस्य चोत्पादासंभवात् 'उभयाभावो पुढवाइएसु' इति वचनात्, अत एवैतदेवोक्तमत्र 'दोहिं अन्नाणेहिं' इति ।

मू. (३१८) *जहन्नोगाहणगाणं भंते ! बेइंदियाणं पुच्छा गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ जहन्नोगाहणगाणं बेइंदियाणं अनंता पज्जवा पन्नत्ता !, गोयमा ! जहन्नोगाहणए बेइंदिए जहन्नोगाहणस्स बेइंदियस्स दव्वट्ठाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठायए तुल्ले ठिईए तिट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं दोहिं नाणेहिं दोहिं अन्नाणेहिं अचक्खुदंसणपज्जवेहि*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

य छट्ठाणवडिए, एवं उक्कोसोगाहणएवि, नवरं नाना नत्थि, अजहन्नमणुक्कोसोगाहणए जहा जहन्नोगाहणए, नवरं सट्ठाणे ओगहणाए चउट्ठाणवडिए। जहन्नठिइयाणं भंते! बेइंदियाणं पुच्छा गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते एवं वुच्चइ जहन्नठियाणं बेइंदिइयाणं अनंता पज्जवा पन्नत्ता?, गोयमा! जहन्नठिइए बेइंदिए जहन्नठिइयस्स बेइंदियस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवड़ए ठितीए तुल्ले वन्नगंधरसफासपज्जवेहिं दोहिं अन्नाणेहिं अचक्खुदंसणपज्जवेहिं य छट्ठाणवडिए, एवं उक्कोसठिइएवि, नवरं दो नाना अब्भहिया, अजहन्नमणुक्कोसाठिइए जहा उक्कोसठिइए नवरं ठिईए तिट्ठाणवडिए।

जहन्नगुणकालगाणं बेइंदियाणं पुच्छा गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्चइ–जहन्नगुणकालगाणं बेइंदियाणं अनंता पज्जवा पन्नत्ता?, गोयमा! जहन्नगुणकालए बेइंदिए जहन्नगुणकालगस्स बेइंदियस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए छट्ठाणवडिए ठिईए तिट्ठाणवडिए कालवन्नपज्जवेहिं तुल्ले अवसेसेहिं वन्नगंधरसफासपज्जवेहिं दोहिं नाणेहिं दोहिं अन्नाणेहिं अचक्खुदंसणपज्जवेहि य छट्ठाणवडिए, एवं उक्कोसगुणकालएवि, अजहन्नमणुक्कोसगुणकालएवि एवं चेव, णवरं सट्ठाणे छट्ठाणवडिए, एवं उक्कोसगुणकालएवि, अजहन्नमणुक्कोसगुणकालएवि एवं चेव, नवरं सट्ठाणे छट्ठाणवडिए, एवं पंच वन्ना दो गंधा पंच रसा अट्ठ फासा भाणियव्वा। जहन्नाभिनिबोहियनाणीणं भंते! बेइंदियाणं केवइया पज्जवा पन्नत्ता!, गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्चइ–जहन्नाभिनिबोहियनाणीणं बेइंदियाणं अनंता पज्जवा पन्नत्ता!, गोयमा! जहन्नाभिनिबोहियाणी बेइंदिए जहन्नाभिनिबोहियणाणिस्स बेइंदियस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तिट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं छट्ठाणडिए वन्नगंधरसफासपज्जवेहिं छट्ठाणवडिए आभिनिबोहियणाणपज्जवेहिं तुल्ले सुयणाणपज्जवेहिं छट्ठाणवडिए अचक्खुंसणपज्जवेहिं छट्ठाणवडिए।

एवं उक्कोसाभिनिबोहियणाणीवि, अजहन्नमणुक्कोसाभिनिबोहियनाणवि एवं चेव, नवरं सट्ठाणे छट्ठाणवाडेए, एवं सुयनाणीवि सुयअन्नाणीवि अचक्खुदंसणीवि, नवरं जत्थ नाना तत्थ अन्नाणा नत्थि जत्थ अन्नाणा तत्थ नाना नत्थि, जत्थ दंसणं तत्थ नानावि अन्नाणावि, एवं तेइंदियाणवि, चउरिंदियाणवि एवं चेव नवरं चक्खुदंसणं अब्भिहियं

वृ. जघन्यावगाहनद्वीन्द्रियसूत्रे 'दोहिं नाणेहं दोहिं अन्नाणेहिं' इति, द्वीन्द्रियाणां हि केषाञ्चिदपर्याप्तावस्थायां सास्वादनसम्यकत्वमवाप्यते सम्यगद्दष्टेश्च ज्ञाने इति द्वे ज्ञाने लभ्येते शेषाणामज्ञाने तत उक्तं द्वाभ्यां ज्ञानाभ्यां द्वाभ्यामज्ञानाभ्यामिति, उत्कृष्टावगाहनायां त्वपर्याप्ताव-स्थाया अभावाद् सास्वादनसम्यकत्वं नावाप्यते ततस्तत्र ज्ञाने न वक्तव्ये, तथा चाह–'एवं उक्कोसितोगाहणाए वि नवरं नाणा नत्थि'त्ति, तथाऽजधन्योत्कृष्टावगाहना किल प्रथमसमयादूर्ध्वं भवति इत्यपर्याप्तवस्थायामपि, तस्यः संभवात् सासदनसम्यकत्ववतां ज्ञाने अन्येषां चाज्ञाने इति ज्ञाने चाज्ञाने च वक्तव्ये, तथा चाह–

'अजहन्नमणुक्कोतोगाहणए जहा जहन्नोगाहणए' इति, तथा जघन्यस्थितिसूत्रे द्वे अज्ञाने एव वक्तव्ये न तु ज्ञाने, यतः सर्वजघन्यस्थितिको लब्ध्यपर्याप्तको भवति न च लब्ध्यपर्याप्तकेषु मध्ये सास्वादनसम्यग्द्दष्टिरुत्पद्यं, किं कारणमिति चेत्, उच्यते, लब्ध्यपर्याप्तको हि सर्वसङ्क्लि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्टःसासादनसम्यग्दृष्टिश्च मनाक् शुभपरिणामस्ततः स तेषु मध्ये नोत्पद्यते तेनाज्ञाने एव लभ्येते न ज्ञाने, उत्कृष्टस्थितिषु पुनर्मध्ये सासादनसम्यकत्वसहितोऽप्युत्पद्यते इति तत्सत्रे ज्ञाना अज्ञाने च वक्तव्ये, तथा चाह– 'एवं उक्कोसठिइएवि, नवरं दो नाणा अब्भहिया' इति, एवमेवाजधन्योत्कृष्ट-स्थितिसूत्रमपि वक्तव्यं, भावसूत्राणि पाढसिद्धानि, एवं त्रीन्द्रियचतुरिन्द्रिया अपि वक्तव्याः, नवरं चतुरिन्द्रियाणां चक्षुर्दर्शनमधिकं अन्यथा चतुरिन्द्रियत्वायोगादिति तेषां चक्षुर्दर्शनविषयमपि सूत्रं वक्तव्यं, जघन्यावगाहनतिर्यक्पञ्चेन्द्रियसूत्रे 'ठिईए तिट्ठाणवडिए' इति,

मू. (३१९) *जहन्नोगाहणगाणं भंते! पंचिंदियतिरिक्खजोणियाणं केवइया पज्जवा पन्नत्ता गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्चइ जहन्नोगाहणगाणं पंचिंयतिरिक्ख-जोणियाणं अनंता पज्जवा पन्नत्ता?, गोयमा! जहन्नोगाहणए पंचिंदियतिरिक्खजोणिए जहन्नोगाहण-यस्स पंचिंदियतिरिक्खजोणियस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए तुल्ले ठिईए तिट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं दोहिं नाणेहिं दोहिं अन्नाणेहिं दोहिं दंसणेहि छट्ठाणवडिए, उक्कोसोगाहणएवि एवं चेव, नवरं तिहिं नाणेहिं तिहिं दंसणेहिं छट्ठाणवडिए, जहा उक्कोसोगाहणए तहा अजहन्नमणुक्कोसोगाणएवि, नवरं ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए चउट्ठाणवडिए,*

जहन्नठिइयाणं भंते! पंचिंदियतिरिक्खजोणियाणं केवइया पज्जवा पन्नत्ता?, गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्चइ जहन्नठिइयाणं पंचिंदियतिरिक्खजोणियाणं अनंता पज्जवा पन्नत्ता?, गोयमा! जहन्नठिइए पंचिंदियतिरिक्खजोणिए जहन्नठिइयस्स पंचिंदियति-रिक्खजोणियस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तुल्ले वन्नगंधरसफासपज्जवेहिं दोहिं अन्नाणेहिं दोहिं दंसणेहिं छट्ठाणवडिए, उक्कोसठिइएवि एवं चेव नवरं दो नाणा दो अन्नाणा दो दंसणा, अजहन्नमणुक्कोसठिइएवि एवं चेव, नवरं ठिईए चउट्ठाणवडिए तिन्नि नाना तिन्नि अन्नाणा तिन्नि दंसणा। जहन्नगुणकालगाणं भंते! पंचिंदियतिरिक्खजोणियाणं पुच्छा गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्चइ?, गोयमा! जहन्नगुणकालए पंचिंदियतिरिक्खजोणिए जहन्नगुणकालगस्स पंचिंदियतिरिक्खजोणियस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए चउट्ठाणवडिए कालवन्नपज्जवेहिं तुल्ले अवसेसेहिं वन्नगंधरसफासपज्जवेहिं तिहिं नाणेहिं तिहिं अन्नाणेहिं तिहिं दंसेणंहि छट्ठाणवडिए, एवं उक्कोसगुणकालएवि, अजहन्नमणुक्कोसगुणकालएवि एवं चेव, नवरं सट्ठाणे छट्ठाणवडिए, एवं पंच वन्ना दो गंधा पंच रसा अट्ठ फासा।

जहन्नाभिनिबोहियणाणीणं भंते! पंचिंदियतिरिक्खजोणियाणं केवइया पज्जवा पन्नत्ता गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्छइ?, गोयमा! जहन्नाभिनिबोहियनाणी पंचिंदियतिरिक्खजोणिए जहन्नाभिणिबोहियणाणिस्स पंचिंदियतिरिक्खजोणियस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं छट्ठाणवडिए आभिनिबोहियनाणपज्जवेहिं तुल्ले सुयनाणपज्जवेहिं छट्ठाणवडिए चक्खुदंसणपज्जवेहिं छट्ठाणवडिए अचक्खुदंसणपज्जवेहिं छट्ठाणवडिए, एवं उक्कोसाभिनिबोहियनाणीवि, नवरं ठिईए तिट्ठाणवडिए, तिन्नि नाणा तिन्नि दंसणा सट्ठाणे तुल्ले सेसेसु छट्ठाणवडिए।

अजहन्नमणुक्कोसाभिनिबोहियनाणी जहा उक्कोसाभिनिबोहियनाणी नवरं ठिईए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चउट्ठाणवडिए, सट्ठाणे छट्ठाणवडिए, एवं सुयनाणीवि,

जहन्नोहिनाणीणं भंते! पंचिंदियतिरिक्खजोणियाणं पुच्छा, गोयमा! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते! एवं वुच्चइ?, गोयमा! जहन्नोहिनाणी पंचिंदियतिरिक्खजोणिए जहन्नोहिनाणिस्स पंचिंदियतिरिक्खजोणियस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तिट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं आभिनिबोहियनाणसुयनाणपज्जवेहिं छट्ठाणवडिए ओहिनाणपज्जवेहिं तुल्ले, अन्नाणा नत्थि, चक्खुदंसणपज्जवेहिं अचक्खुदंसणपज्जवेहिं य ओहिदंसणपज्जेहिं छट्ठाणवडिए, एवं उक्कोसोहिनाणीवि।

अजहन्नोक्कोसोहिनाणीवि एवं चेव, नवंर सट्ठाणे छट्ठाणवडिए, जहा आभिनिबोहियनाणी तहा मइअन्नाणी सुयअन्नाणी य, जहा ओहिनाणी तहा विभंगनाणीवि, चक्खुदंसणी अचक्खुदंसणी य जहा आभिनिबोहियाणी, ओहिदंसणी जहा ओहिनाणी, जत्थ नाणा तत्थ अन्नाणा नत्थि जत्थ अन्नाणा तत्थ नाणा नत्थि, जत्थ दंसणा तत्थ नानावि अन्नाणावि अत्थित्ति भाणियव्वं।

वृ. इह तिर्यक्पञ्चेन्द्रियः सङ्ख्येयवर्षायुष्क एव जघन्यावगाहनो भवति, नाऽसङ्ख्येयवर्षायुष्कः, किं कारणं इति चेत्, उच्यते, असङ्ख्येयवर्षायुषो हि महाशरीराः कङ्ककुक्षिपरिणामत्वात् पुष्टाहाराः प्रबलधातूपचयाः ततस्तेषां भूयान् शुक्रनिषेको भवति शुक्रनिषेकानुसारेण च तिर्यग्मनुष्याणमुत्पत्तिसमयेऽवगाहेनेति न तेषां जघन्यावगाहना लभ्यते किं तु सङ्ख्येयवर्षायुषां, सङ्ख्येयवर्षायुशपश्च स्थित्या त्रिस्थानपतिताः, एतच्च भावितं प्राक्, तत उक्तं स्थित्या त्रिस्थानपतिता इति,।

'दोहिं नाणेहिं दोहिं अन्नाणेहिं' इति।

जघन्यावगाहनो हि तिर्यक्पञ्चेन्द्रियः सङ्ख्येयवर्षायुष्कोऽपर्याप्तो भवति सोऽपि चाल्पकायेषु मध्ये समुत्पद्यमानस्ततस्तस्यावधिविभङ्गज्ञानासंभात् द्वे ज्ञाने द्वे अज्ञाने उक्ते, यस्तु विभङ्गज्ञानसहितो नरकादुद्धृत्य सङ्ख्येयवर्षायुष्केषु तिर्यकपञ्चेन्द्रियेषु मध्ये समुत्पद्यमानो वक्ष्यते स महाकायेषूत्पद्यमानो द्रष्टव्यः नाल्पकायेषु, तथास्वाभाव्यात्, अन्यथाऽधिकृतसूत्रविरोधः, उत्कृष्टावगाहनतिर्यक्पञ्चेन्द्रियसूत्रे 'तिहिं नाणेहिं तिहिं अन्नाणेहिं' इति त्रिभिर्ज्ञानैस्त्रिभिरज्ञानैश्च षट्स्थानपतिताः, तत्र त्रीणि अज्ञानानि कथमिति चेत्, उच्यते, उह यस्य योजनसहस्रं शरीरावगाहना स उत्कृष्टावगाहनः स च सङ्ख्येयवर्षायुष्क एव भवति पर्याप्तश्च, तेन तस्य त्रीणि ज्ञानानि त्रीण्यत्रानानि च संभवन्ति, स्थित्याऽपि चासावुत्कृष्टावगाहनःत्रिस्थानपतितः, सङ्ख्येयवर्षायुष्कत्वात्, अजघन्योत्कृष्टावगाहनसूत्रेण स्थित्या चतुःस्थानपतितः, यतोऽजधन्योत्कृष्टवगाहनोऽसङ्ख्येयवर्षायुष्कोऽपि लभ्यते, तत्रोपपद्यते प्रागुक्तयुक्तया चतुःस्थानपतितत्वं, जघन्यस्थितिकतिर्यक्पञ्चेन्द्रियसूत्रे द्वे अज्ञाने एव वक्तव्ये न तु ज्ञाने, यतोसौ जघन्यस्तितिको लब्ध्यपर्याप्तक एव भवति न च तन्मध्ये सासादनसम्यग्दृष्टरुत्पाद इति, उत्कृष्टस्थितिकतिर्यक्पञ्चेन्द्रियसूत्रे

'दो नाणा दो अन्नाणा' इति, उत्कृष्टस्थितिको हि तिर्यक्पञ्चेन्द्रियस्त्रिपल्योपमस्थितिको भवति, तस्य च द्वे अज्ञाने तावन्नियमेन यदा पुनःषण्मासावशेषायुर्वैमानिकेषु बद्धायुष्को भवति तदा तस्य द्व ज्ञाने लभ्येते अत उक्तं द्वे ज्ञाने द्वे अज्ञाने इति, अजधन्योत्कृष्टस्तितिकतिर्यक्पञ्चेन्द्रियसूत्रे 'ठीईए चउट्ठाणवडिए' इति अजघन्योत्कृष्टस्थितिको हि तिर्यक्पञ्चेन्द्रियः सङ्ख्येयवर्षायुष्कोऽपि लभ्यते असङ्ख्येयवर्षायुष्कोऽपि समयोनत्रिपल्योपमस्थितिकः ततश्चतुःस्थानपतितः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जघन्याभिनिबोधिकतिर्यक्पञ्चेन्द्रियसूत्रे 'ठिईए चउट्ठाणवडिए' इति, असङ्ख्येयवर्षायुषोऽपि हि तिर्यक्पञ्चेन्द्रियय्स स्वभूमिकानुसारेण जघन्ये आभिनिबोधिकश्रुतज्ञाने लभ्येते ततः सङ्ख्येयवर्षायुषोऽसङ्ख्येयवर्षायुषश्च जघन्याभिनिबोधिकश्रुतज्ञानसंभवाद् भवन्ति स्थित्या चतुःस्थानपतिताः, उत्कृष्टाभिनिबोधिकज्ञानसूत्रे स्थित्या च त्रिस्थानपतिता वक्तव्याः । यत इह यस्योत्कृष्टे आभिनिबोधिकश्रुतज्ञाने स नियमात् सङ्ख्येयवर्षायुष्कः२ स्थित्यापि त्रिस्थानपतित एव यथोक्तं प्राक्, अवधिसूत्रे विभङ्गसूत्रेऽपि स्थित्या त्रिस्थानपतितः, किं कारणम् उच्यते, असङ्ख्येयवर्षायुषोऽवधिविभङ्गासंभवात्, आह च मूलटीकाकारः 'ओहिविभङ्गेसु नियमा तिट्ठाण-वडिए, किं कारणं ? भन्नइ, ओहिविभङ्गा असंखेज्जवासायस्स नत्थि' त्ति जघन्यावगाहनमनुष्यसूत्रे 'ठिईए तिट्ठाणवडिए' इति तिर्यक्पञ्चेन्द्रियवत्,

मू. (३२०) *जहन्नोगाहणगाणं भंते ! मणुस्साणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ—जहन्नोगाहणगाणं मणुस्साणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! जहन्नोगाहणए मणूसे जहन्नोगाहणगस्स मणूसस्स दव्वट्ठाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए तुल्ले ठिईए तिट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं तिहिं नाणेहिं दोहिं अन्नाणेहिं तिहिं दंसणेहिं छट्ठाणवडिए, उक्कोसोगाहणएवि एवं चेव, नवरं ठिईए सिय हीणे सिय तुल्ले सिय अब्भहिए, जइ हीणे असंखिज्जइभागहीणे अह अब्भहिए असंखेज्जइभागअब्भहिए, दो नाणा दो अन्नाणा दो दंसणा । अजहन्नमणुक्कोसोगाहणएवि एवं चेव, नवरं ओगाहणट्ठयाए चउट्ठाणवडिए, ठिईए चउट्ठा- णवडिए आइल्लेहिं चउहिं नाणेहिं छट्ठाणवडिए, केवलनाणपज्जवेहिं तुल्ले, तिहिं अन्नाणेहिं तिहिं दंसणेहिं छट्ठाणवडिए, केवलदंसणपज्जवेहिं तुल्ले ।*

जहन्नठिइयाणं भंते ! मणुस्साणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ ?, गोयमा ! जहन्नठिइए मणुस्से जहन्नठियस्स मणुस्सस्स दव्वट्ठयाए तुल्ले पएसट्ठयए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तुल्लो वन्नगंधरफासपज्जवेहिं दोहिं अन्नाणेहिं दोहिं दंसणेहिं छट्ठाणवडिए, एवं उक्कोसठिइएवि, नवरं दो नाणा दो अन्नाणा दो दंसणा, अजहन्नमणुक्कोसठिइएवि एवं चेव, नवरं ठिईए चउट्ठाणवडिए ओगाहणट्ठयाए चउट्ठा-णवडिए आइल्लेहिं चउहिं नाणेहिं छट्ठाणवडिए केवलनाणपज्जवेहं तुल्ले तिहिं अन्नाणेहिं तिहिं दंसणेहिं छट्ठाणवडिए केवलदंसणपज्जवेहिं तुल्ले । जहन्नगुणकालयाणं भंते ! मणुस्साणं केळइया पज्जवा प० गो० अनंता पज्जवा पन्नत्ता से केणट्ठेणं भंते ! एवं वुच्चइ ?, गोयमा ! जहन्नगुणकालए मणूसे जहन्नगुणकालगस्स मणुस्सस्स दव्वट्ठाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए चउट्ठाणवडिए कालवन्नपज्जवेहिं तुल्ले अवसेसेहिं वन्नगंधरसफासपज्जवेहिं छट्ठाणविए छउहिं नाणेहिं छट्ठाणवडिए केवलनाणपज्जवेहिं तुल्ले तिहिं अन्नाणेहिं तिहिं दंसणेहिं छट्ठाणवडिए केवलदंसणपज्जवेहिं तुल्ले, एवं उक्कोसगुणकालएवि, अजहन्मणुक्कोसगुणकालएवि एवं चेव, नवरं सट्ठाणे छट्ठाणवडिए, एवं पंच वन्ना दो गंधा पंच रसा अट्ठ फासा भा०

जहन्नाभिनिबोहियनाणीणं मणुस्साणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ ?, गोयमा ! जहन्नाभिनिबोहियणाणी मनूसे जहन्नाभिनिबोहि-यणाणिस्स मणुस्सस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले गाहणट्ठयाए चउट्ठाणवडिए ठिईए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चउट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं छट्ठाणवडिए आभिनिबोहियनाणपज्जवेहिं तुल्ले सुयनाणपज्जवेहिं दोहिं दंसणेहिं छट्ठाणवडिए, एवं उक्कोसाभिनिबोहियनाणीवि नवरं आभिनिबोहियनाणपज्जवेहिं तुल्ले ठिईए तिट्ठाणवडिए तिहिं नाणेहिं तिहिं दंसणेहिं छट्ठाणवडिए।

अजहन्नमणुक्कोसाभिनिबोहियनाणी जहा उक्कोसाभिनिबोहियनाणी, नवरं ठिईए चउट्ठाणवडिए सट्ठाणे छट्ठाणवडिए, एवं सुयनाणीवि, जहन्नोहियनाणीणं भंते ! मणुस्साणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पन्नत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ !, गोयमा ! जहन्नोहिनाणी मणुस्से जहन्नोहिनाणिस्स मणूसस्स दव्वट्ठायए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए तिट्ठाणवडिए ठिईए तिट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं दोहिं नाणेहिं छट्ठाणवडिए ओहिनाणपज्जवेहिं तुल्ले मणनाणपज्जवेहिं छट्ठाणवडिए तिहिं दंसणेहिं छट्ठाणवडिए, एवं उक्कोसोहिनाणीवि, अजहन्नमणुक्कोसोहिनाणी एवं चेव, नवरं ओगाहणट्ठयाए चउट्ठाणवडिए, सट्ठाणे छट्ठाणवडिए, जहा ओहिनाणी तहा मणपज्जवनाणीवि भाणियव्वे, नवरं ओगाहणट्ठयाए तिट्ठाणवडिए, जहा आभिणिबोहियणाणी तहा मइअन्नाणी सुयअन्नाणीवि भानियव्वे, जहा ओहिनाणी तहा विभंगनाणीवि भाणियव्वे चक्खुदंसणी अचक्खुदंसणी य जहा आभिनिबोहियनाणी ओहिदंसणी जहा ओहिनाणी। जत्थ नाणा तत्थ अन्नाणा नत्थि जत्थ अन्नाणा तत्थ नाणा नत्थि, जत्थ दंसणा तत्थ नाणावि अन्नाणवि।

केवलनाणीणं भंते ! मणुस्साणं केवइया पज्जवा पन्नत्ता ?, गोयमा ! अनंता पज्जवा पनत्ता, से केणट्ठेणं भंते ! एवं वुच्चइ केवलनाणीणं मणुस्साणं अनंता पज्जवा पन्नत्ता ?, गोयमा ! केवलनाणी मणूसे केवलनाणिसस मणूसस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए तुल्ले ओगाहणट्ठयाए चउट्ठाणवडिए ठिईए तिट्ठाणवडिए वन्नगंधरसफासपज्जवेहिं छट्ठाणवडिए केवलनाणपज्जवेहिं केवलदंसणपज्जवेहिं य तुल्ले एवं केवलदंसणीवि मणूसे भाणियव्वे ॥

वृ. मनुष्योऽपि जघन्यावगाहनो नियमात् सङ्ख्येयवर्षायुष्कः, सङ्ख्येयवर्षायुष्कश्च स्थित्या त्रिस्थानपतित एवेति 'तिहिं नाणेहिं' इति, यदा कश्चित् तीर्थकरोऽनुत्तरोपपातिकदेवो वा अप्रतिपतितेनावधिज्ञनेन जघन्यायामवगाहनायामुत्पद्यतेतदाऽवधिज्ञानमपि लभ्यते इतीह त्रिभिर्ज्ञानैरित्युक्तं, विभङ्गज्ञानसहितस्तु नरकादुद्व त्तो जघन्यायामवगाहनायां नोत्पद्यते तथास्वाभाव्यात् अतो विभङ्गज्ञानं न लभ्यते इति द्वाभ्यामज्ञानाभ्यामित्युक्तं, उत्कृष्टावगाहनमनुष्यसूत्रे 'ठिईए सिय हीणे सिय तुल्ले सिय अब्भहिए जइ हीणे असंखेज्जभागहीणे जइ अब्भहिए असंखेज्जभागअब्भहिए' इति, उत्कृष्टावगाहना हि मनुष्यास्त्रिगव्यूतोच्छ्रयाः त्रिगव्यूतानां च स्थितिर्जघन्यतः-पल्योपमासङ्ख्येयभागहीनानि त्रीणि पल्योपमानि उत्कर्षतस्तान्येव परिपूर्णानि त्रीणि पल्योपमानि, उक्तं च जीवाभिगमे – 'उत्तरकुरुदेवकुराए मणुस्साणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं तिन्नि पलिओवमाइं पलिओवमस्सासंखिज्जइभागहीणाइं उक्कोसेणं तिन्नि पलिओवमाइं' त्रिपल्योपमासङ्ख्येयभागश्च त्रयाणां पल्योपमानामसङ्ख्येयतमो भाग इति पल्योपमासङ्ख्येयभागहीन पल्योपमत्रयस्थितिकः परिपूर्णपल्योपमत्रयस्थितिकापेक्षयाऽसङ्ख्येयभागहीनः, इतरस्तु तदपेक्षयाऽसङ्ख्येयभागाधिकः, शेषा वृद्धिहानयो न लभ्यन्ते,

'दो नाणा दो अन्नाणा' इति उत्कृष्टावगाहना हि असङ्ख्येयवर्षायुषः, असङ्ख्येयवर्षायुषां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. अलोकसूत्रे प्रदेशार्थतायां सर्वस्तोका अलोकस्य चरमान्तप्रदेशाः, लोकनिष्कुटेष्वेवान्तस्तेषां भावात्, तेभ्योऽचरमान्तप्रदेशा अन्तगुणाः, अलोकस्यानन्तत्वात्, चरमान्तप्रदेशा अचरमान्तप्रदेशाश्च समुदिता विशेषाधिकाः, चरमान्तप्रदेशा ह्यचरमान्तप्रदेशापेक्षया अनन्तभागकल्पाः, ततस्तेषामचरमान्तप्रदेशराशौ प्रक्षेपेऽपि ते अचरमान्तप्रदेशेभ्यो विशेषाधिका एव भवन्ति। सम्प्रति लोकालोकसमुदायविषयं प्रश्नसूत्रमाह–

'लोगालोगस्स णं भंते! अचरमस्स य चरमाण य' इत्यादि-प्रश्नसूत्रं सुगमं, निवर्चनमाह–'गोयमे'त्यादि, लोकस्य अलोकस्य च यदेकैकं चरमखण्डं तत्स्तोकं, एकत्वात्, तेभ्यो लोकस्य चरमखण्डद्रव्याण्यसङ्ख्येयगुणानि, तेषामसङ्ख्यातत्वात्, तेभ्योऽप्यलोकस्य चरमखण्डानि विशेषाधिकानि, कथम्? इह यद्यपि लोकस्य चरमखण्डानि तत्त्तोऽसङ्ख्येयानि तथापि प्रागुपदर्शितपृथिवीन्यासपरिकल्पनया तान्यष्टौ परिकल्प्यन्ते, तद्यथा–एकैकं चतसृषु दिक्षु एकैकं च विदिक्ष्विति, अलोकचरमखण्डानि तन्न्यासपरिकल्पनया परिगण्यमानानि द्वादश, तद्यथा–

एकैकं चतसृषु दिक्षु द्वे द्वे विदिक्ष्विति, द्वादश चाष्टभ्यो न द्विगुणानि न त्रिगुणानि च, किन्तु विशेषाधिकानि, तेभ्योऽलोकस्य चरमखण्डेभ्यो लोकालोकस्य चरमाचरमखण्डानि समुदितानि विशेषाधिकानि, तथाहि–लोकस्य चरमखण्डानि प्रागुक्तपरिकल्पनया अष्टौ एकमचरमखण्डमित्युभयमीलने नव, अलोकस्यापि चरमाचरमखण्डानि समुदितानि त्रयोदश, उभयेषामेकत्र मीलनेन द्वाविंशतिः, सा च द्वादशभ्यो न द्विगुणा नापि त्रिगुणा किन्तु विशेषाधिकेति अलोकस्य चरमखण्डेभ्यो लोकालोकचरमाचरमखण्डानि समुदितानि विशेषाधिकानि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदेशार्थताचिन्तायां सर्वस्तोका लोकस्य चरमान्तप्रदेशाः, अष्टखण्डसत्कानामेव प्रदेशानां भावात्, तेभ्योऽलोकस्य चरमान्तप्रदेशा विशेषाधिकाः, तेभ्योऽपि लोकस्य अचरमान्तप्रदेशा असङ्ख्येयगुणाः,क्षेत्रस्यातिप्रभूततया तत्प्रदेशानामप्यतिप्रभूतत्वात्, तेभ्योऽप्यलोकस्याचरमान्तप्रदेशा अनन्तगुणाः, क्षेत्रस्यानन्तगुणत्वात्, तेभ्योऽपि लोकस्य चरमान्तप्रदेशा अचरमान्तप्रदेशा अलोकस्यापि चरमान्तप्रदेशा अचरमान्तप्रदेशाः समुदिता विशेषाधिकाः, कथमिति चेत्, उच्यते, इहालोकस्याचरमान्तप्रदेशराशौ लोकस्य चरमाचरमान्तप्रदेशा अलोकस्य चरमान्तप्रदेशाश्च प्रक्षिप्यन्ते, ते च सर्वसङ्ख्ययाऽप्यसङ्ख्येय(ऽसंख्यया)श्चानन्तराश्यपेक्षयाऽतिस्तोका इति प्रक्षेपेऽपि तेऽलोकस्याचरमान्तप्रदेशेभ्यो विशेषाधिका एव।

एतदनुसारेण द्रव्यार्थप्रदेशार्थचिन्तासूत्रमपि स्वयं परिभावनीयं, नवरं लोकालोकचरमाचरमखण्डेभ्यो लोकस्य चरमान्तप्रदेशा असङ्ख्येयगुणा इति, लोकस्य किल चरमाणि खण्डान्यष्टौ, एककैकस्मिंश्च खण्डदेशे खण्डप्रदेशा असङ्ख्येय लोकालोकचरमाचरमखण्डानि च समुदितानि द्वाविंशतिः, ततो घटन्ते लोकालोकचरमाचरमखण्डेभ्यो लोकस्य चरमान्तप्रदेशा असङ्ख्येयगुणाः, शेषपदभावना प्राग्वत्, 'सव्वदव्वा विसेसाहिया' इति लोकालोकचरमाचरमान्तप्रदेशेभ्यः सर्वद्रव्याणि विशेषाधिकानि, अनन्तानन्तसङ्ख्यानां जीवानां तथा परमाण्वादीनामनन्तपरमाण्वात्मकस्कन्धपर्यन्तानां प्रत्येकानामनन्तसङ्ख्यायनां पृथक् पृथक् द्रव्यत्वात्, तेभ्योऽपि सर्वप्रदेशा अनन्तगुणाः, तेभ्योऽपि सर्वपर्याया अनन्तगुणाः, प्रतिप्रदेशं स्वपरभेदभिन्नामनां पर्यायाणामानन्त्यात्, । तदेवं रत्नप्रभादिकं चरमाचरमभेदतश्चिन्तितं, इदानीं परमाण्वादिकं चिन्तयन्नाह–

मू. *(३६४) परमाणुपोग्गले णं भंते ! किं चरिमे १ अचरिमे २ अवत्तव्वए ३ चरमाइं ४ अचरमाइं ५ अवत्तव्वाइयं ६ उदाहु चरिमे य अचरिमे य ७ उदाहु चरमे य अचरमाइं ८ उदाहु चरमाइं अचरमे य ९ उदाहु चरमाइं च अचरमाइं च १० पढमा चउभंगी उदाहु चरिमे य अवत्तव्वए य ११ उदाहु चरमे य अवत्तव्वयाइं च १२ उदाहु चरमाइं च अवत्तव्वए य १३ उदाहु चरमाइं च अवत्तव्वयाइं च १४ बीया चउभंगी उदाहु अचरिमे य अवत्तव्वए य १५ उदाहु अचरमे य अवत्तव्वयाइं च १६ उदाहु अचरमाइं च अवत्तव्वए य १७ ।*

उदाहु अचरमाइं च अवत्तव्वयाइं च १८ तइया चउभंगी उदाहु चरमे य अचरमे य अवत्तव्वए य १९ उदाहु चरमे य अचरमे य अवत्तव्वयाइं च २० उदाहु चरमे च अचरमाइं च अवत्तव्वए य २१ उदाहु चरमे य अचरमाइं च अवत्तव्वयाइं च २२ उदाहु चरमाइं च अचरमे य अवत्तव्वए य २३ उदाहु चरमाइं च अचरमे य अवत्तव्वयाइं (च) २४ उदाहु चरमाइं च अचरमाइं च अवत्तव्व य २५ उदाहु चरमाइं च अचरमाइं च अवत्तव्वयाइं च २६, एते छव्वीसं भंगा, गोयमा ! परमाणुपोग्गले नो चरमे नो अचरमे नियमा अवत्तव्वए, सेसा भंगा पडिसेहेयव्वा ॥

वृ. 'परमाणुपोग्गले णं भंते !' इत्यादि, अत्र प्रश्नसूत्रे षडएविंशतिर्भङ्गाः, यतस्त्रीणि पदानि चरमाचरमावक्तव्यलक्षणानि, तेषां चैकैकसंयोगे प्रत्येकमेकवचनास्त्रयो भङ्गाः, तद्यथा– चरमोऽचरमोऽवक्तल्यकः त्रयो बहुवचनेन, तद्यथा–चरमाणि १२ अचरमाणि २ अवक्तव्यानि ३, सर्वसङ्ख्यया षट्, द्विकसंयोगास्त्रयः, तद्यथा–चरमाचरमपदयोरेकः चरमावक्तव्यपदयोर्द्वितीयः अचरमावक्तव्यकपदयोस्तृतीयः, एकैकस्मिन् चत्वारो भङ्गाः, तत्र प्रथमे द्विकसंयोगे एवं चरमश्चाच-

रमश्च, चरमश्चाचरमाश्च, चरमाश्चाचरमश्च, चरमाश्चचरमाश्च, । एवमेव चतुर्भङ्गी चरमावक्तव्य पदयोः, एवमेवाचरमावक्तव्यपदयोः सर्वसङ्ख्यया द्विकसंयोगे द्वादश भङ्गाः त्रिकसंयोगे एकवचनबहुवतचनाभ्यामष्टौ, –। सर्वसंकलनया षड्विंशतिः ।

अत्र निर्वचनमाह–'परमाणुपोग्गले नो चरमे' इत्यादि, परमाणुपुद्गलश्चरमो न भवति, चरमत्वं ह्यन्यापेक्षं, न चान्यदपेक्षणीयमस्ति तस्य, अविवक्षणात्, न च सांशः परमाणुर्येनांशापेक्षया चरमत्वं प्रकल्प्येत, निरवयवत्वात् (तस्य), तस्मान्न चरमो, नाप्यचरमः, निरवयवतया मध्यत्वा-योगात्, किन्त्ववक्तव्यः, चरमाचरमव्यपदेशकारण[तः]शून्यतया चरमशब्देनाचरमशब्देन वा व्यपदेष्टुमशक्यत्वात्, वक्तुं शक्यं हि वक्तव्यं, यत्तु चरमशब्देन अचरमशब्देन वा स्वस्वनिमित्त-शून्यतया वक्तुमशक्यं तदवक्तव्यमिति ।

शेषास्तु भङ्गाः प्रतिषेध्याः, परमाणौ तेषामसंभवात्, वक्ष्यति च–''परमाणुंमि य तइओ'' अस्यायमर्थः–परमाणौ–परमाणुचिन्तायां तृतीयो भङ्गः परिग्राह्यः, शेषास्तु निरवयवत्वेन प्रतिषेध्याः

मू. (३६५) *दुपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! दुपएसिए खंधे सिय चरमे नो अचरमे सिय अवत्तव्वए, सेसा भंगा पडिसेहेयव्वा ।। तिपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! तिपएसिए खंधे सिय चरमे, नो अचरमे, सिय अवत्तव्वए, नो चरमाइं, नो अचरमाइं, नो अवत्त-व्वयाइं, नो चरमे य अचरमे य, नो चरमे य अचरमाइं, सिय चरमाइं च अचरमे य, नो चरमाइं च अचरमाइं च, सिय चरमे य अवत्तव्वए य, सेसा भंगा पडिसेहेयव्वा ।*

चउपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! चउपएसिए णं खंधे सिय चरमे १ नो अचरमे २ सिय अवत्तव्वए ३ नो चरमाइं ४ नो अचरमाइं ५ नो अवत्तव्वयाइं ६ नो चरमे य अचरमे य ७ नो चरमे य अचरमाइं च ८ सिय चरमाइं अचरिमे य ९ सिय चरमाइं च अचरमाइं च १० सिय चरमे य अवत्तव्वए य ११ सिय चरमे य अवत्तव्वयाइं च १२ नो चरमाइं च अवत्तव्वए य १३ नो चरमाइं च अवत्तव्वयाइं च १४ नो अचरमे य अवत्तव्वए य १५ नो अचरमे य अवत्तव्वयाइं च १६ नो अचरमाइं च अवत्तव्वए अ १७ नो अचरिमाइं च अवत्तव्वयाइं च १८ नो चरमे य अचरिमे य अवत्तव्वए य १९ नो चरिमे य अचरिमे य अवत्तव्वयाइं च २० नो चरमे य अचरमाइं च अवत्तव्वए य २१ नो चरमे य अचरमाइं च अवत्तव्वयाइं च २२ सिय चरमाइं च अचरिमे च अवत्तव्वए य २३ । सेसा भंगा पडिसेहेयव्वा ।।

पंचपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! पंचपएसिए खंधे सिय चरमे १ नो अचरमे २ सिय अवत्तव्वए ३ नो चरमाइं ४ नो अचरमाइं ५ नो अवत्तव्वयाइं ६ सिय चरमे य अचरमे य ७ नो चरमे य अचरमाइं च ८ सिय चरमाइं च अचरमे य ९ सिय चरमाइं च अचरमाइं च १० सिय चरमे य अवत्तव्वए य ११ सिय चरमे य अवत्तव्वयाइं च १२ सिय चरमाइं च अवत्तव्वए य १३ नो चरमाइं च अवत्तव्वयाइं च १४ नो अचरमे य अवत्तव्वए य १५ नो अचरमे य अवत्तव्वयाइं च १६ नो अचरमाइं च अवत्तव्वए य १७ नो अचरमाइं च अवत्तव्वयाइं च १८ नो चरमे य अचरमे य अवत्तव्वए य १९ नो चरमे य अचरमे य अवत्तव्वयाइं च २० नो चरमे य अचरमाइं च अवत्तव्वए य २१ नो चरमे य अचरमाइं च अवत्तव्वयाइं च २२ सिय चरमाइं च अचरमे य अवत्तव्वए य २३ सिय चरमाइं च अचरमे य अवत्तव्वयाइं च २४ सिय चरमाइं च अचरमाइं च अवत्तव्वए य २५ नो चरमाइं च अचरमाइं च अवत्तव्वायइं च २६ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छप्पएसिए णं भंते ! पुच्छा, गोयमा ! छप्पएसिए णं खंधे सिय चरमे १ नो अचरमे २ सिय अवत्तव्वए ३ नो चरमाइं ४ नो अचरमाइं ५ नो अवत्तव्वयाइं ६ सिय चरमे य अचरमे य ७ सिय चरमे य अचरमाइं च ८ सिय चरमाइं च अचरमे य ९ सियचरमाइं च अचरमाइं च १० सिय चरमे य अवत्तव्वए अ ११ सिय चरमे य अवत्तव्वयाइं च १२ सिय चरमाइं च अवत्तव्वए अ १३ सिय चरमाइं च अवत्तव्वयाइं च १४ नो अचरमे य अवत्तव्वए य १५ नो अचरमे य अवत्तव्वयाइं च १६ नो अचरमाइं च अवत्तव्वए य १७ नो अचरमाइं च अवत्तव्वयाइं च १८ सिय चरमे य अचरमे य अवत्तव्वए य १९ नो चरमे य अचरमे य अवत्तव्वयाइं च २० नो चरमे य अचरमाइं च अवत्तव्वए य २१ नो चरमे य अचरमाइं च अवत्तव्वयाइं च २२ सिय चरमाइं च अचरमे य अवत्तव्वए य २३ सिय चरमाइं च अचरमे य अवत्तव्वयाइं च २४ सिय चरमाइं च अचरमाइं च अवत्तव्वए य २५ सिय चरमाइं च अचरमाइं च अवत्तव्वायाइं च २६ ।

सत्तपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! सत्तपएसिए णं खंधे सिय चरिमे १ नो अचरिमे २ सिय अवत्तव्वए ३ नो चरिमाइं ४ नो अचरिमाइं ५ नो अवत्तव्वयाइं ६ सिय चरमे य अचरमे य ७ सिय चरमे य अचरमाइं च ८ सिय चरमाइं च अचरमे य ९ सिय चरमाइं च अचरमाइं च १० सिय चरमे य अवत्तव्वए य ११ सिय चरमे य अवत्तव्वयाइं च १२ सिय चरमाइं च अवत्तव्वए य १३ सिय चरमाइं च अवत्तव्वयाइं च १४ नो अचरमे य अवत्तव्वए य १५ नो अचरमे य अवत्तव्वयाइं च १६ नो अचरमाइं च अवत्तव्वए य १७ नो अचरमाइं च अवत्तव्वयाइं च १८ सिय चरमे य अचरमे य अवत्तव्वए य १९ सिय चरमे य अचरमे य अवत्तव्वयाइं च २० सिय चरमे य अचरिमाइं च अवत्तव्वए अ २१ नो चरिमे य अचरिमाइं च अवत्तव्वयाइं च २२ सिय चरमाइं च अचरमे य अवत्तव्वए य २३ सिय चरमाइं च अचरमे य अवत्तव्वयाइं २४ सिय चरमाइं च अचरमाइं च अवत्तव्वए य २५ सिय चरमाइं च अचरमाइं च अवत्त २६ ।

अट्ठपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! अट्ठपएसिए खंधे सिय चरमे १ नो अचरमे २ सिय अवत्तव्वए ३ नो चरमाइं ४ नो अचरमाइं ५ नो अवत्तव्वयाइं ६ सिय चरिमे य अचरिमे य ७ सिय चरिमे यअचरिमाइं च ८ सिय चरिमाइं च अचरिमे य ९ सिय चरमाइं च अचरमाइं च १० सिय चरमे य अवत्तव्वए य ११ सिय चरम य अवत्तव्वयाइं च १२ सिय चरिमाइं च अवत्तव्वए य १३ सिय चरिमाइं च अवत्तव्वयाइं च १४ नो अचरिमे य अवत्तव्वए य १५ नो अचरिमे य अवत्तव्वयाइं च १६ नो अचरिमाइं च अवत्तव्वए य १७ नो अचरिमाइं च अवत्तव्वयाइं च १८ सिय चरिमे य अचरिमे य अवत्तव्वए य १९ सिय चरिमे य अचरिमे य अवत्तव्वयाइं च २० सिय चरिमे य अचरिमाइं च अवत्तव्वए अ २१ सिय चरिमे य अचरिमाइं च अवत्तव्वयाइं च २२ सिय चरिमाइं च अचरिमे य अवत्तव्वए अ २३ सियचरिमाइं च अचरिमे यअवत्तव्वयाइं च २४ सिय चरिमाइं च अचरिमाइं च अवत्तव्वए य २५ सिय चरिमाइं च अचरिमाइं च अवत्तव्वयाइं च २६

संखेज्जपेएसिए असंखेज्जपएसिए अनंतपएसिए खंधे०, जहेव अट्ठपएसिए तहेव पत्तेयं भाणियव्वं ।

वृ. 'दुपएसिए णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनमाह-'सिय चरमे नो अचरमे सिय अवत्तव्वए' इत्यादि, द्विप्रदेशिकःस्कन्धः स्यात्-कदाचित् चरमः, कथमिति चेत्, उच्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह यदा द्विप्रदेशिकः स्कन्धो द्वयोराकाशप्रदेशयोरवगाढो भवति समश्रेण्या व्यवस्थितया, –तदा एकोऽपि परमाणुपरपरमाण्वपेक्षया चरमः, अवरोऽप्यपरपरमाण्वपेक्षया चरम इति चरमः, अचरमस्तु नम भवति, सर्वद्रव्याणमामपि केवलाचरमत्वस्यायोगात्, यदा तु स एव द्विप्रदेशिकः स्कन्धः एकस्मिन्नाकाशप्रदेशे अवगाहते तदा स तथाविधैकत्वपरिणामपरिणततया परमाणुवत् चरमाचरमव्यपदेशकारणशून्यत्वान्न चरम शब्देन व्यपदेष्टु शक्यते नाप्यचरमशब्देनेति अवक्तव्यः, शेषास्तु भङ्गाः प्रतिषेध्याः, तथा च वक्ष्यति "पढमो तइओ य होइ दुपएसे" अस्यायमर्थः– द्विप्रदेशिके स्कन्धे प्रथमो भङ्गः–चरम इति, तृतीयः–अवक्तव्य इति भवति शेषास्तु प्रतिषेध्याः, असंभवात्, स चासंभवःसुप्रतीत एव।

'तिपएसिए णं भंते ! खंधे' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनं 'गोयमा ! सिय चरमे' इत्यादि, इह यदा त्रिप्रदेशिकः स्कन्धो द्वयोराकाशप्रदेशशयोः समश्रेण्या व्यवस्थितयोरेवमवगाढो भवति, तदाऽसौचरमः, सा चरमत्वभावना द्विप्रदेशिकस्कन्धवद् भावनीया, अचरमप्रतिषेधः प्राग्वत्, 'स्यादवक्तव्य' इति यदा स एव त्रिप्रदेशिकः स्कन्ध एकस्मिन्नाकाशप्रदेशेऽवगाहते तदा परमाणुवत् चरमाचरमव्यपदेशकारणशून्यतया चरमाचरमशब्दाभ्यां व्यपदेष्टुमशक्यत्वात् अवक्तव्यः चतुर्थादयोऽष्टमपर्यन्ताः प्रतिषेध्यः, असंभवात्, असभवस्तु सुप्रतीतत्वात् स्यवमुपयुज्य वक्तव्य;, नवमस्तु ग्राह्यः, तथा चाह–'सिय चरमाइं च अचरमे य' प्राकृते द्वित्वेऽपि बहुवचनं, ततोऽयमर्थः–स्यात्–कदाचिदयं भङ्गः–चरमौ अचरमश्च, तत्र यदा स त्रिप्रदेशिकः स्कन्धः त्रिष्वाकाशप्रदेषेषु समश्रेण्या व्यवस्थितेष्वेवमवगाहते,

तदाऽऽदिमान्तिमौ द्वौ परमाणू पर्यन्तवर्तित्वाच्चरमौ मध्यमस्तु मध्यवर्तित्वादचरम इति, दशमस्तु प्रतिषेध्यः, स्कन्धस्य त्रिप्रदेशिकतया चरमाचरमशब्दयोर्बहुवचननिमित्तासंभवात्, एकादशस्तु ग्राह्यः, तथा चाह–'सिय चरमे य अवत्तव्वए य' स्यात्–कदाचिदयं भङ्गश्चरमश्चाव-क्तव्यश्च, तत्र यदा स त्रिप्रदेशिकः समश्रेण्या विश्रेण्या चैवमगाहते स्थापना–तदा द्वौ परमाणू समश्रेण्या व्यवस्थिताविति द्विप्रदेशावगाढद्विप्रदेशस्कन्धवच्चरमव्यपदेशकारणभावतश्चरमः, एकश्च परमाणुर्विश्रेणिस्थश्चरमाचरमशब्दाभ्या व्यपदेष्टुमशक्य इत्यवक्तव्यः, शेषास्तु भङ्गाः सर्वेऽपि प्रतिषेध्याः, वक्ष्यति च "पढमो तइओ नवमो इक्कारसमो य तिपएसे" अस्यायमर्थः–त्रिप्रदेशे स्कन्धे प्रथमो भङ्गश्चरम इति, तृतीयोऽवक्तव्य इति, नवमश्चरमौ चाचरमश्च, एकादशश्चरमश्चाव-क्तव्यश्चेतिचि भवति, शेषा भङ्गा न घटन्ते ॥

'चउपएसिए णं भंते ! खंधे' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनमाह–'गोयमा ! सिय चरमे' इत्यादि, अत्र प्रथमतृतीयनवमदशमैकादशद्वादशत्रयोविंशतितमरूपाः सप्त भङ्गा ग्राह्याः, शेषाः प्रतिषेध्याः, तत्र प्रथमभङ्गोऽयम्–'स्याच्चरम' इति, इह यदा चतुष्प्रदेशकः स्कन्धो द्वयोरा-काशप्रदेशयोः समश्रेण्या व्यवस्थितयोरेवमगाहते, तदा चरमः, सा च चरमत्वाभावना समश्रेण्या व्यवस्थितद्विप्रदेशावगाढद्विप्रदेशस्कन्धवद् भावनीया, तृतीयो भङ्गः स्यादवक्तव्य इति, स चैवं–यदा स एव चतुष्प्रदेशकः स्कन्ध एकस्मिन्नाकाशप्रदेशेऽवगाहते , तदा परमाणुवदवक्तव्यः,

नवमः 'स्याच्चरमौ चाचरमश्च' स चैवं–यदा स चतुष्प्रदेशात्मकः स्कन्धः त्रिष्वाकाश-प्रदेशेष्वेवमवगाहते, तदा आद्यन्तप्रदेशावगाढौ चरमौ मध्यप्रदेशावगाढस्त्वचरमः, दशमः स्याच्चरमौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चाचरमौ च, तत्र यदा चतुष्प्रदेशात्मकः स्कन्धः समश्रेण्या व्यवस्थितेषु चतुष्वाकाशप्रदेशेषु एवमगाहते, तदाऽऽद्यन्तद्विप्रदेशावगाढौ द्वौ परमाणू चरमौ द्वयोस्तु मध्यमयोराकाशप्रदेशयोरगाढौ द्वौ परमाणू अचरमाविति, एकादशः स्याच्चरमश्चावक्तव्यश्च, स चैवं-, यदा स चतुष्प्रदेशकः स्कन्धः त्रिष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते स्थापना-, तदा समश्रेणियव्यवस्थितद्विप्रदेशावगाढाम्नयः परमाणवो द्विप्रदेशवगाढद्विप्रदेशस्कन्धवत् चरमः एकश्च विश्रेणिस्थः परमाणुरिव चरमाचरमशब्दाभ्यां व्यपदेष्टुमशक्यत्वात् अवक्तव्य इति, द्वादश; स्याच्चरमश्चावक्तव्यौ च, स चैवं-, यदा स चतुष्प्रदेशात्मकः स्कन्धश्चतुष्वाकाशप्रदेशेषु एवमवगाहते-द्वौ परमाणू द्वयोः समश्रेण्या व्यवस्थितयोराकाशप्रदेशयोः द्वौ परमाणू द्वयोर्विश्रेण्या व्यवस्थितयोः, तदा द्वौ परमाणू समश्रेण्या व्यवस्थितौ द्विप्रदेशावगाढद्विप्रदेशस्कन्धवत् चरमः द्वौ च परमाणू विश्रेणिव्यवस्थितौ केवलपरमाणुवच्चरमाचरमशब्दाभ्यां व्यपदेष्टुमशक्यावित्यवक्तव्यौ, त्रयोविंशतितमः स्याच्चरमौ चाचरमश्चावक्तव्यश्च, कथमिति चेद्, । उच्यते, इह यदा स चतुष्प्रदेशकः स्कन्धः चतुष्वाकाशप्रदेशेष्वेवमवगाहते- त्रयःपरमाणवस्त्रिषु समश्रेण्या व्यवस्थितेष्वाकाशप्रदेशेषु एको विश्रेणिस्थे प्रदेशे, तदा त्रिषु परमाणुषु समश्रेणिव्यवस्थितेषु मध्ये आद्यन्तौ परमाणू पर्यन्तवर्तित्वाच्चरमौ मध्यमस्त्वचरमः विश्रेणिस्थस्त्व- वक्तव्य इति, वक्ष्यति च-

॥१॥ "पढमो तइओ नवमो दसमो इक्कारसो य बारसमो ।
भङ्गा चउप्पएसे तेवीसइमो य बोद्धव्वो ॥" गतार्था ॥

'पंचपएसिए णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनमाह-'गोयमा ! सिय चरमे' इत्यादि, इह प्रथमतृतीयसप्तमनवमदशमैकादशद्वादशत्रयोदशत्रयोविंशतितमचतुर्विंशतितमपञ्चविंशतितमरूपा एकादश भङ्गा ग्राह्याः, शेषाः प्रतिषेध्याः, वक्ष्यति च-

॥१॥ "पढमो तइओ सत्तम नवदसइक्कारबारतेसमो ।
तेवीसचउव्वीसा पणवीसइमो य पंचमए ॥"

तत्रायं प्रथमो भङ्गः-स्याच्चरम इति, इह यदा पञ्चप्रदेशात्मकः स्कन्धो द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरेवमगाहते, त्रयः परमाणव एकस्मिन्नाकाशप्रदेशे द्वौ द्वितीये, - तदा द्विप्रदेशावगाढद्विप्रदेशस्कन्धवच्चरमः, तृतीयोऽवक्तव्यः, स चैवं-यदा स पञ्चमप्रदेशात्मकःस्कन्धः एकस्मिन् आकाशप्रदेशे अवगाहते, -तदा स परमाणुवदवक्तव्यः, सप्तमः स्याच्चरमश्चाचरमश्च, स चैवम्- यदा स पञ्चप्रदेशकः स्कन्धः पञ्चस्वाकाशप्रदेशेष्वेवमवगाहते, स्थापना-, तदा ये चरमाश्चत्वारः परमाणवस्तेषामेकसंबन्धिपरिणामपरिणतत्वादेकवर्णत्वादेकगन्धत्वादेकरसत्वादेकस्पर्शत्वाचैकत्वव्यपदेशे चरम इति व्यापदेशः, मध्यस्तु परमाणुर्मध्यवर्तित्वाद् चरम इति, नवमः चरमौ चाचरमश्च, तत्र यदा स पञ्चपदेशकः स्कन्धस्त्रिष्वाकाशप्रदेशेषु समश्रेण्या व्यवस्तितेष्वेवमवगाहते द्वौ-परमाणू अद्ये आकाशप्रदेशे द्वावन्ते एके मध्ये, तदाऽऽद्यप्रदेशावगाढौ द्वौ चरमो द्वावन्त्यप्रदेशावगाढो चरम इति चरमौ मध्यस्तु मध्यवर्त्तित्वादचरमः, दशमः चरमौ चाचरमौ च, तत्र यदा स पञ्चप्रदेशात्कमः स्कन्धश्चतुष्वाकाशप्रदेशेषु समश्रेणय्या व्यवस्थितेष्वेवमवगाहते-त्रयः परमाणवस्त्रिष्वाकाशप्रदेशेषु एकस्मिन् द्वाविति, -तदा आद्यप्रदेशवर्ती परमाणुश्चरमः द्वौ चान्त्यप्रदेशव्तिनौ चरम इति चरमौ द्वौ च मध्यवर्तित्वादचरमौ, एकादशः चरमश्चाव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्तव्यः, कथमिति चेत्?,

उच्यते, यदा स पञ्चप्रदेशात्मकस्त्रष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्य चैवमगाहते–द्वौ द्वौ परमाणू द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोः एको विश्रेणिस्थः, तदा चत्वारः परमाणवो द्विप्रदेशावगाहित्वात् द्विप्रदेशावगाढद्विप्रदेशस्कन्धवच्चरम एकश्च विश्रेणिस्थः परमाणुरवक्तव्यः, द्वादशः चरमश्चावक्तव्यौ च, तत्र यदा स पञ्चप्रदेशात्मकः स्कन्धश्चतुष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–द्वौ परमाणू द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरेको विश्रेणिस्थे द्वौ चान्यस्मिन् विश्रेणिस्थे, तदा द्वौ परमाणू समश्रेणिव्यवस्तितद्विप्रदेशावगाढौ द्विप्रदेशावगाढ्द्वि-प्रदेशस्कन्धवच्चरमः एकौ द्वौ च विश्रेणिस्थपृथगेकैकाकाशप्रदेशावगाढौ चावक्तव्यौ, त्रयोदशः चरमौ चावक्तव्यश्च, तत्र यदा स पञ्चप्रदेशावगाढः पञ्चस्वाकाशप्रदेशेष्वेवमवगाहते–द्वौ परमाणू उपरि द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरवगाढौ द्वौ च द्वयोस्तथैवाधः एकः पर्यन्ते मध्यसमे, तदा द्वावुपरितनौ द्विप्रदेशावगाढव्यणुकस्कन्धवच्चरमः द्वौ चाधस्तनौ चरम इति चरमौ एकश्च केवलः परमाणुरिवावक्तव्य इति, त्रयोविंशतितमः चरमौ चाचरमश्चावक्तव्यश्च,

स चैवं–यदा पञ्चप्रदेशकः स्कन्धश्चतुष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–त्रिष्वाकाशप्रदेशेषु समश्रेण्या व्यवस्थितेष्वद्ये एकः परमाणुः मध्ये द्वौ अन्ते एकः चतुर्थेऽपि विश्रेणिस्थ एकः, तदा त्रिष्वाकाशप्रदेशेषु मध्ये आद्यन्तप्रदेशावगाढौ चरमौ मध्यप्रदेशवर्ती तु द्व्यणुको मध्यवर्तित्वादचरमो विश्रेणिस्थश्चावक्तव्य इति, चतुर्विंशतितमः चरमौ चाचरमश्चाव-क्तव्यौ च, कथमिति चेत्, उच्यते, स एव यदा पञ्चप्रदेशकः स्कन्धः पञ्चस्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमगाहते–त्रयः परमाणवस्त्रिष्वाकाशप्रदेशेषु समश्रेणिव्यवस्थितेषु द्वयोराकाश-प्रदेशयो; परमाण्वोर्विश्रेणिस्थयोः, तदा त्रिष्वाकाशप्रदेशेषु मध्ये द्वावाद्यन्तप्रदेशवर्तिनौ चरमौ मध्यश्चाचरमो द्वौ च विश्रेणिस्थाववक्तव्यौ, पञ्चविंशतितमः चरमौ चाचरमौ चावक्तव्यश्च, स चैवं–यदा पञ्चप्रदेशकः स्कन्धः पञ्चस्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–चत्वारश्चतुष्वाकाशप्रदेशषुसमश्रेणिव्यवस्तितेषु एको विश्रेणिस्थः, – तदा चतुष्वा- काशप्रदेशेषु मध्ये द्वावाद्यन्तप्रदेशवर्तिनो चरमौ द्वौ च मध्यवर्तिनावचरमौ एको विश्रेणिस्थोऽ- वक्तव्यः।

'छप्पएसिए णं भंते!' इत्यादि प्रश्नसूत्रं प्राग्वत, निर्वचनं 'गोयमा! सिय चरमे' इत्यादि, इह द्वितीयचतुष्पञ्चमषष्ठपञ्चदशषोडशसप्तदशाष्टादशविंशतितमैकविंशतितमद्विंशतितमरूपा एकादश भङ्गाः प्रतिषेध्याः, वक्ष्यति च–

॥१॥ "बिचउत्थपञ्चछट्ठं पन्नरसोलं सत्तरट्ठारं।
वीसेक्कवीस बावीसगं च वज्जेज्ज छट्ठंमि॥"

शेषास्त्वेकादयः परिग्राह्याः, घटमानत्वात्, तत्र यथा द्वयादयो न घटन्ते एकादयस्तु घटन्ते तथा भाव्यन्ते–इह यदा षट्प्रदेशकः स्कन्धो द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरेवम-वगाहते–एकस्मिन्नाकाशप्रदेशे त्रयः परमाणवोऽपरिस्मिन्नपि त्रय इति, – तदा द्विप्रदेशावगाढ-द्विप्रदेशस्कन्धवच्चरमः, अचरमलक्षणस्तु द्वितीयो भङ्गो न घटते, चरमरहितस्य केवलस्याचरम-स्यासंभवात्, न खलु प्रान्ताभावे मध्यं भवतीति भावनीयमेतत्, तृतीयोऽवक्तव्यलक्षणः, स चैवं–यदा स षट्प्रदेशात्मकः स्कन्धः एकस्मिन्नाकाशप्रदशेऽवगाहते, – तदा परमाणुवच्चरमा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरमशब्देन व्यपदेशष्टुमशक्यत्वादवक्तव्यः, चतुर्थश्चरमाणीति पञ्चमोऽचरमाणीति षष्ठोऽवक्तव्यानीति पञ्चदशोऽचरमश्चावक्तव्यश्च षोडशोऽचरमश्चावक्तव्यानि च सप्तदशोऽचरमाणि चावक्तव्यश्च अष्टादशोऽचरमाणि चावक्तव्यानि चेत्येते सप्त भङ्गा ओघत एव न संभवन्ति,

तथाप्रकाराणा द्रव्याणामेवासंभवात्, न ह्येवं जगति केवलानि चरमादिनि द्रव्याणि संभवन्ति, असंभवश्च प्रागुक्तभावानानुसारेण सुगमत्वात्स्वयं भावनीयः, सप्तमश्च चरमश्चाचरमश्चेत्येवरूप एव, यदा स षट्प्रदेशात्मकः स्कन्धः पञ्चस्वाकाशप्रदेशेष्वेकपरिक्षेपेण व्यवस्थितेष्वेवमवगाहते, द्वौ परमाणू मध्यप्रदेशे एकैकः शेषेषु, तदा तेषां चतुर्णां परमाणूनामेकसंबन्धिपरिणामपरिणतत्वादेकवर्णत्वदेकगन्धत्वादेकरसत्वादेकस्पर्शत्वाच्चैकत्वव्यपदेशः एकत्वव्यपदेशत्वाच्चरम इति व्यपदेशः, यौ तु द्वौ परमाणू मध्ये तावेकत्वपरिणामपरिणतावित्यचरमः, अष्टमश्चरमश्चाचरमौ च, तत्र यदा स एव षट्प्रदेशात्मकः स्कन्धः षट्सु प्रदेशेषु एकपरिक्षेपेणैकाधिकमेवमवगाहते, तदा पर्यन्तवपर्तिनः परिक्षेपेणावस्थिताश्चत्वारः परमाणवः प्रागुक्तयुक्तेरेकश्चरमः, द्वौ मध्यवर्तिनावचरमाविति, अन्ये त्वभिदधति—चतुर्णां परमाणूनां क्षेत्रप्रदेशान्तरव्यवहिताधिकत्वपरिणामो न भवति ततभावाच्च नैष भङ्ग उपपद्यते, प्रतिषिद्धश्च सूत्रे, यतो वक्ष्यति—

''बिचउत्थपंचछट्ठ''मिति प्राकृतशैल्या 'छट्ठ' 'अट्ठ' इत्येतयोः पदयोर्निर्देशः, ततोऽयमर्थः—षष्ठमष्टमंच वर्जयित्वेति, अथ नामैवंरूपोऽपि भङ्गो भवति तदैवं गम्यते—ये एकवेष्टका अव्यवधानेन चत्वारः परमाणवस्ते तथाविधैकत्वपरिणामपरिणतत्वाच्चरमः, तस्मादधिकोऽपि समश्रेण्यैव प्रतिबद्धत्वान्न तदतिरिक्त इति सोऽपि तस्मिन्नेव चरमे गण्यते इत्येकं चरमं, पुनश्च योऽधिकमध्ये व्यवस्थित इति स मध्यवर्तित्वादनेकपरिणामित्वाच्च वस्तुनोऽचरमोऽपि ततोऽ (तश्चरमा) चरमावित्यपि भवति, अत्रापि न कश्चिद् विरोधः, तत्त्वं पुनः केवलिनो विदन्ति, नवमश्चरमौ चाचरमश्च, यदा स एव षट्प्रदेशकः स्कन्धस्त्रिष्वाकाशप्रदेशेषु समश्रेण्या व्यवस्तितेष्वेवमवगाहते—एकैकस्मिन्नाकाशप्रदेशे द्वौ द्वौ परमाणू इति, —तदाऽऽद्यप्रदेशवर्तिनौ द्वौ परमाणू चरमः द्वान्त्यप्रदेशवर्तिनौ चरम इति चरमौ, द्वौ तु मध्यप्रदेशवर्तिनौ एकोऽचरम इति, दशमश्चरमौ चाचरमौ च, स चैवं—यदा स षट्प्रदेशकः स्कन्धश्चतुष्वाकाशप्रदेशेषु समश्रेण्या व्यवस्थितेष्वेवमगाहते—द्वावाद्ये प्रदेशे द्वौ द्वितीये एकस्तृतीये एकश्चुतुर्थे इति,

तदा द्वौ परमाणू प्रथमप्रदेशवर्तिनावेकश्चरमः एकोऽन्त्यप्रदेशवर्ती चरम इति चरमौ द्वौ परमाणू द्वितीयप्रदेशवर्तिनाबेकोऽचरमः एकस्तृतीयप्रदेशवर्ती अचरम इत्यचरमावपि द्वौ, एकादशश्चरमश्चावक्तव्यश्च, स चैवं—यदा स एव षट्प्रदेशात्मकः स्कन्धस्त्रिष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते—द्वावाद्ये प्रदेशे द्वौ समश्रेण्या व्यवस्थिते द्वितीये प्रदेशे द्वौ विश्रेणिस्थे तृतीये प्रदेशे, तदा द्विप्रदेशावगाढाश्चत्वाराः परमाणवः समश्रेणिव्यवस्थितद्विप्रदेशावगाढद्व्यणुकस्कन्धवदेकश्चरमः द्वौ च विश्रेणिस्थप्रदेशावगाढौ परमाणुवदेकोऽवक्तव्यः, द्वादशश्चरमश्चावक्तव्यौ च, तत्र यदा स षट्प्रदेशात्मकः स्कन्धश्चतुष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते—द्वौ परमाणू प्रथमम् प्रदेशे द्वौ समश्रेणिव्यवस्थिते द्वितीये प्रदेशे एकः ततः परमुपरि तृतीये प्रदेशे एकश्चाधश्चतुर्थे इति,

तदा चत्वारः परमाणवो द्विप्रदेशावगाढाः पूर्ववदेकश्चरमः द्वौ च विश्रेणिस्थप्रदेश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दवयावगाढाववक्तव्याविति, त्रयोदशश्चरमौ चावक्तव्यश्च, यदा स एव षट्प्रदेशकः स्कन्धः पञ्चस्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–द्वौ परमाणू द्वयोराकाशप्रदेशयोः समश्रेणिव्यवस्थितयोः द्वौ तयोरेवाधः समश्रेणिव्यवस्तितयोराकाशप्रदेशयोः श्रेणिद्वयमध्यभागसमश्रेणिस्थे चैकस्मिन्नाकाशप्रदेशे द्वाविति, तदा द्विप्रदेशावगाढव्यणुकस्कन्धवदुपरितनद्विप्रदेशावगाढौ द्वौ परमाणू एकश्चरमो द्वावधस्तनाविति चरमौ, द्वावेकप्रदेशावगाढौ परमाणुवदेकोऽवक्तव्यः, चतुर्दशश्चरमौ चावक्तव्यौ च, तत्र यदा स एव षट्प्रदेशकः स्कन्धःषट्स्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–द्वौ परमाणू द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोः द्वौ तयोरेवाधः समश्रेणिव्यवस्तितयोराकाशप्रदेशयोः एकः श्रेणिद्वयमध्यभागमसश्रेणिस्थे प्रदेशे,

एक उपरितनयोर्द्वयोर्विश्रोणिस्थे, तदा द्वावुपरितनावेकश्चरमो द्वावधस्तनाविति चरमौ द्वा चावक्तव्याविति, एकोनविंशतितमश्चरमश्चारमश्चावक्तव्यः, स चैवं–यदा स षट्प्रदेशकः स्कन्धः षट्स्वाकाशप्रदेशेषु एकपरिक्षेपेण विश्रेणिस्थकैधिकमवगाहते,, तदा एकवेश्टकाश्चत्वारः परमाणवःप्रागुक्तयुक्तरेकश्चरम एकोऽचरमो मध्यवर्ती एकोऽवक्तव्यः, यश्च विंशतितमश्चरमश्चाचरमश्चावक्तव्यौ च, स सप्तमप्रदेशकस्यैवोपपद्यते न षट्प्रदेशकस्य, योऽप्येकविंशतितमश्चरमश्चाचरमौ चावक्तव्यश्च, सोऽपि सप्तप्रदेशकस्यैव न षट्प्रदेशकस्य, यस्तु द्वाविंशतितमश्चरमश्चाचरमौ चावक्तव्यौ च, सोऽष्टप्रदेशकस्यैवेति, त्रयोऽप्येते विंशत्यादयोऽत्र प्रतिषिद्धाः, यश्च त्रयोविंशतितमश्चरमौ चाचरमश्चावक्तव्यः,

स एवं–यदा स एव षट्प्रदेशकः स्कन्धश्चतुष्वाकाशप्रदेशेष्वेवमवगाहते–द्वौ द्वौ परमाणू द्वयोराकाशप्रदेशयोः एकस्तयोरेव समश्रेणिस्थे तृतीये आकाशप्रदेशे एको विश्रेणिस्थे इति, तदा आद्यप्रदेशावगाढौ द्वौ परमाणू चरमस्तृतीयप्रदेशावगाढश्चरम इति द्वौ चरमौ द्वितीयप्रदेशावगाढौ द्वौ परमाणू चरमो विश्रेणिस्थोऽवक्तव्यः, चतुर्विंशतितमः चरमौ चाचरमश्चावक्तव्यौ च, तत्र यदा स एव षट्प्रदेशात्मकः स्कन्धः पञ्चस्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–त्रिष्कावाकशप्रदेशेषु समश्रेण्या व्यवस्थितेष्वाद्ये एकः द्वितीये एकः तृतीये द्वौ द्वयोर्विश्रेणिस्थयोरेकैक इति, तदा आद्यन्त प्रदेशावगाढौ चरमौ मध्यावगाढोऽचरमः विश्रेणिस्थप्रदेशद्वयावगाढौ अवक्तव्यौ, पञ्चविंशतितमः चरमौ चाचरमौ चावक्तव्यश्च, यदा स एव षट्प्रदेशात्मकः स्कन्ध पञ्चसु प्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–चतुष्वाकाशप्रदेशेषु समश्रेणिव्यवस्थितेष्वाद्यप्रदेशत्रये एकैकश्चतुर्थे द्वौ पञ्चमे विश्रेणिस्थे एकः, तदा आद्यन्तप्रदेशवर्तिनो चरमौ मध्यप्रदेशद्वयवर्तिनौ द्वाचरमौ विश्रेणियप्रदेशस्थ एकोऽवक्तव्यः, षड्विंशतितम; चरमौ चाचरमौ चावक्तव्यौ च, स चैवं–यदा स षट्प्रदेशकः स्कन्धः षट्स्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–

तदा आद्यन्तप्रदेशावगाढौ द्वौ चरमौ द्वौ मध्यप्रदेशावगाढावचरमौ द्वौ च विश्रेणिस्थप्रदेशद्वयावगाढववक्तव्याविति। 'सत्तपएसिए णं भंते! खंधे' इत्यादि प्रश्नसूत्रं प्राग्वत, निर्वचनमाह–'गोयमा ! सत्तपएसिए णं खंधे सिय चरमे नो अचरमे' इत्यादि, इह द्वितीयचतुर्थपञ्चममष्ठपञ्चदशषोडशसप्तदशाष्टादशद्वाविंशतितमरूपा नव भङ्गाः प्रतिषेध्याः, शेषा उपादेयाः, वक्ष्यति च–

॥१॥ "बिचउत्थपंचछट्ठं पन्नरसोलं च सत्तरट्ठारं।
वज्जिय बावीसइमं सेसा भंगा उ सत्तमए ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र द्व्यादीनामष्टादशपर्यन्तानां प्रतिषेधकारणं प्रागुक्तमनुसर्तव्यं न केवलमत्र किन्तु सर्वष्वप्युत्तरेषु स्कन्धेषु, यस्तु द्वाविंशतितमः सोऽष्टप्रदेशकस्यैव घटते न सप्तप्रदेशकस्येत्युक्तं प्राक्, तत इह प्रतिषेधः, शेषास्तु प्रथमादयः षड्विंशतितमपर्यन्ताः सप्तदश भङ्गाः षट्प्रदेशकस्कन्धस्येव भावनीयाः, केवलं विनेयजनानुग्रहाय स्थापनामात्रेणोपदर्श्यन्ते-प्रथमो भङ्गश्चरमभङ्गः, तृतीयोऽवक्तव्यः, सप्तमश्चरमश्चाचरमश्च अष्टमश्चरमश्चाचरमौ च नवमश्चरमौ चाचरमश्च दशमश्चरमौ चाचरमौ च एकादशश्चरमश्चावक्तव्यश्च द्वादशश्चरमश्चावक्तव्यौ च त्रयोदशश्चरमौ चावक्तव्यश्च चतुर्दशश्चरमौ चावक्तव्यौ च एकोनविंशतितमश्चरमश्चाचरमश्चावक्तव्यश्च विंशतितमश्चरमश्चाचरमश्चावक्तव्यौ च एकविंशतितमश्चरमश्चाचरमौ चावक्तव्यश्च त्रयोविंशतितमश्चरमौ चाचरमश्चावक्तव्यश्च चतुर्विंशतितमश्चरमौ चाचरमश्चावक्तव्यश्च पञ्चविंशतितमश्चरमौ चाचरमौ चावक्तव्यश्च षड्विंशतितमश्चरमौ चाचरमौ चावक्तव्यौ च इह यस्मात्सप्ताप्रादेशिकः स्कन्ध एकस्मिन्नाकाशप्रदेशेऽयगाहते द्वयोरि त्रिष्वपि यावत्सप्तस्वपि तत एवं भङ्गाः संभवन्ति ॥

'अट्ठपएसिए णं भंते ! खंधे' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनसूत्रं 'अट्ठपएसिए णं खंधे सिय चरमे' इत्यादि, अत्र द्वितीयचतुर्थपञ्चमषष्ठपञ्चदशषोडशसप्तदशाष्टादशरूपा अष्टौ भङ्गाः प्रतिषेध्याः, शेषा ग्राह्याः, वक्ष्यति च-

॥१॥ "बिचउत्थपंचछट्ठं पन्नर सोलं च सत्तरऽट्ठारं ।
एए वज्जिय भंगा सेसा सेसेसु खंधेसु ॥"

सुगमा, नवरं 'सेसा सेसेसु खंधेसु' इति शेषा; भङ्गाः शेषेषु सप्तप्रदेशकात् स्कन्धादितरेषु-अष्टाप्रदेशादिकेषु सर्वेषु स्कन्धेषु द्रष्टव्याः, अन्ये त्वेवमुत्तरार्द्धं पठन्ति-"एए वज्जिय भंगा तेण परमवट्ठिया सेसा" सुगमं, ते च प्रथमादयो भङ्गाः षड्विंशतिपर्यन्ता अष्टादश भावनातः प्रागवद् भावनीयाः, नवरं 'चरमश्चाचरमौ चावक्तव्यौ च' इत्येवंरूपो द्वाविंशतितमो भङ्गः अथ द्विप्रदेशकादिषु स्कन्धेषु अवक्तव्यौ इत्येवंरूपः षष्ठो भङ्गः कस्मात्प्रतिषिध्यते ?, तस्यापि युक्तितः संभवभावात्, तथाहि-यदेकः परमाणुरेकस्मिन्नाकाशप्रदेशे द्वितीयो विश्रेणिस्थे प्रदेशे, तथा एकोप्यवक्तव्यो द्वितीयोऽप्यवक्तव्य इति भवत्यवक्तव्याविति भङ्गः, प्रदेशकचिन्तायामेकस्मिन्नेकः परमाणुः अपरस्मिन् द्वौ चतुष्प्रदेशकचिन्तायां प्रत्येकं द्वौ द्वौ परमाणू इत्यादि, सत्यमेतत्, केवलमेवंरूपं जगति द्रव्यमेव नास्ति, कथमेतदवसितम् ? इति चेत्, उच्यते, अत एव प्रतिषेधवचनात्, यदि हि तथारूपं द्रव्यं संभवेदुनाचार्यःप्रतिषेधं कुर्यादिति, यदिवा संभवेऽपि जातिपरनिर्देशात् तृतीयभङ्गक एवान्तर्भावो वेदितव्यः

यथा चाष्टप्रदेशके स्कन्धे भङ्गाः प्रतिषेध्या विधेयाश्चोक्तास्तथा संख्यातप्रदेशके असंङ्ख्यातप्रदेशके च प्रत्येकं वक्तव्याः, तथा चाह- 'संखेज्जपसिए असंखेज्जपएसिए' इत्यादि, पाठसिद्धं, नवरमियं सर्वत्र भावना-यस्मादेकादिष्वप्याकाशप्रदेशेष्वष्टप्रदेशकादीनां स्कन्धानामवगाहो भवति तथा(तो) घटन्ते यथोक्ताः सर्वेऽपि भङ्गाः, नन्वसंख्यातप्रदेशात्मकस्यानन्तप्रदेशात्मकस्य च स्कन्धस्य कथमेकस्मिन्नाकाशप्रदेशेऽवगाहः ?, उच्यते, [तथा] तथामाहात्म्यात्, न चैतदनुपपन्, युक्तितः सम्भाव्यमानत्वात्, तथाहि-अनन्तानन्ता द्विप्रदेशकाः स्कन्धा यावदनन्तानन्ताः संख्येयप्रदेशात्मकाः अनन्तानन्ता असंख्येयप्रदेशात्मकाः स्कन्धा अनन्तानन्ता अनन्तप्रदेशात्मकाः, लोकश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वात्मनाऽप्यसंख्येयप्रदेशात्मकस्ते च सर्वेऽपि लोक एवावगाढा नालोके, ततोऽवसीयते सन्त्येकस्मिन्नप्याकाशप्रदेशेऽवगाढा बहवःपरमाणवो बहवो द्विप्रदेशकाः स्कन्धाः यावद्बहवोऽनन्तप्रदेशात्मका; स्कन्धाः, तथा चात्र पूर्वसूरयः प्रदीपदृष्टान्तमुपर्वणयन्ति–

यथैकस्य प्रदीपस्य गृहमध्ये प्रज्वलितस्य प्रभापरमाणवः सर्वमेव गृहं प्राप्नुवन्ति तथा प्रत्येकं प्रदीपसहस्रस्यापि, न च प्रतिप्रदीपं प्रभापरमाणवो न भिन्नाः, प्रतिप्रदीपे पुरुषस्य मध्यस्थितस्य छायादिदर्शनात्, ततो यथैते स्थूला अपि प्रदीपप्रभापरमाणवः एकस्मिन्नप्याकाशप्रदेशे बहवो मान्ति तथा परमाण्वादयोऽपीति न कश्चिद्दोषः आकाशस्य तता तथाऽवकाशदानस्वभावतया वस्तूनां च विचित्रपरिणमनस्वभावतया विरोधाभावात्, सम्प्रति परमाण्वादिषु ये भङ्गा ग्राह्याः ये च षष्ठादिषु न ग्राह्यास्तत्सङ्ग्रहिकाः संग्रहणिगाथा आह–

मू. (३६६) *परमाणुम्मि य तइओ पढमो तइओ य होंति दुपएसे ।*
पढमो तइओ नवमो एक्कारसमो य तिपएसे ॥

मू. (३६७) *पढमो तइओ नवमो दसमो एक्कारसो य बारसमो ।*
भंगा चउप्पएसे तेवीसइमो य बोद्धव्वो ॥

मू. (३६८) *पढमो तइओ सत्तमनवदसइक्कारबारतेरसमो ।*
तेवीसचउव्वीसो पणवीसइमो य पंचमए ॥

मू. (३६९) *विचउत्थपंचछट्टं पनरस सोलं च सत्तरट्ठारं ।*
वीसेक्कवीस बावीसगं च वज्जेज्ज छट्ठंमि ।

मू. (३७०) *बिचउत्थपंचछट्टं पन्नर सोलं च सत्तरट्ठारं ।*
बावलीसइमविहूणा सत्तपदेसंमि खंधम्मि ॥

मू. (३७१) *बिचउत्थ पंचछट्टं पन्नर सोलं च सत्तरट्ठारं ।*
एते वज्जिय भंगा सेसा सेसेसु खंधेसु ॥

वृ. 'परमाणुंमि य तइओ' इत्यादि, पाठसिद्धं, भावितार्थत्वात्, नवरं षट्प्रदेशादिचिन्तायां प्रतिषेध्या भङ्गाः स्तोका इति लाघवार्थं त एव संगृहीताः ।

इहानन्तरं स्कन्धानां चरमाचरमादिवक्तव्यतोक्ता, स्कन्धाश्च यथायोगं परिमण्डलादिसंस्थानवन्तो भवन्ति इत्यतः संस्थानवक्तव्यतामाह–

मू. (३७२) *कइ णं भंते ! संठाणा पं०, गो० पंच संठाणा पं०, तं०–परिमंडले वट्टे तंसे चउरंसे आयते य । परिमंडला णं भंते ! संठाणा किं संखेज्ञा असंखेज्ञा अणंता ?, गो० ! नो संखिज्ञा नो असंखेज्ञा अनंता, एवं जाव आयता । परिमंडले णं भंते ! संठाणे किं संखेज्ञपएसिए असंखेज्ञपदेशिए अनंतपदेसिए ?, गो० ! सिय संखेज्ञपएसिए सिय असंखेज्ञपएसिए सिय अनंतपदेसिए एवं जाव आयते ।*

परिमंडले णं भंते ! संठाणे संखेज्ञपएसिए किं संखेज्ञपएसोगाढे असंखेज्ञपएसोगाढे अनंतपएसोगाढे ?, गो० ! संखेज्ञपएसगोगाढे नो असंखेज्ञपएसोगाढे नो अनंतपएसोगाढे, एवं जाव आयते, परिमंडले णं भंते ! संठाणे असंखेज्ञपएसिए किं संखेज्ञपएसोगाढे असंखेज्ञपएसोगाढे अनंतपएसोगाढे ?, गो० ! सिय संखेज्ञपएसोगाढे सिय असंखेज्ञपएसोगाढे नो अनंतपएसोगाढे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं जाव आयते, परिमंडले णं भंते! संठाणे अनंतपएसिए किं संखेज्जपएसोगाढे असंखेज्जपएसोगाढे अनंतपएसोगाढे?, गो० ! सिय संखेज्जपएसोगाढे सिय असंखेज्जपएसो गाढे नो अनंतपएसोगाढे, एवं जाव आयते। परिमंडले णं भंते! संठाणे संखेज्जपएसिए संखेज्जपएसोगाढे किं चरमे अचरमे चरमाइं अचरमाइं चरमंतपएसा अचरमंतपएसा ?, गो० ! परिमंडले णं संठाणे संखेज्जपएसिए संखेज्जपएसोगाढे नो चरमे नो अचरमे नो चरमाइं नो अचरमाइं नो चरमंतपएसा नो अचरमंतपएसा, नियमं अचरमं चरमाणि य चरमंतपएसा य अचरमंतपसा य, एवं जाव आयते,

परिमंडले णं भंते! संठाणे असंखेज्जपएसिए संखेज्जपएसोगाढे किं चरमे० पुच्छा, गो० ! असंखेज्जपएसिए संखेज्जप- एसोगाढे जहा संखेज्जपएसिए, एवं जाव आयते, परिमंडले णं भंते! संठाणे असंखेज्जपएसिए असंखेज्जपएसोगाढे किं चरमे पुच्छा, गो० ! असंखिज्जपएसिए असंखिज्जपएसोगाढे नो चरमे जहा संखेज्जपदेशोगाढे एवं जाव आयते, परिमंडले णं भंते! संठाणे अनंतपएसिए संखिज्जपएसोगाढे किं चरमे० पुच्छा, गो० ! तहेव जाव आयते, अणनतपएसिए असंखेज्जपएसोगाढे जहा संखेज्जपए- सोगाढे, एवं जाव आयते।

परिमंडलस्स णं भंते! संठाणस्स संखेज्जपएसियस्स संखेज्जपएसोगाढस्स अचरिमस्स य चरिमाण य चरमंतपदेसाण य अचरमंतपएसाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसटठयाए कयरे२ हिंतो अ० ब० तु० वि० ?, गो० ! सव्वत्थोवे परिमंडलस्स संठाणस्स संखेज्जपएसियस्स संखेज्जपएसोगाढस्स दव्वट्ठयाए एगे अचरिमे चरिमाइं संखेज्जगुणाइं अचरमं चरमाणि य दोऽवि विसेसाहियातिं पदेसट्ठयाए सव्वत्थोवा परिमंडलस्स संठाणस्स संखिज्जपएसियस्स संखेज्जपए- सोगाढस्स चरमंतपएसा अचरमंतपएसा संखेज्जगुणा चरमंतपएसा य अचरमंतपएसा य दोऽवि विसेसाहिया दव्वट्ठपएसट्ठयाए सव्वत्थोवे परिमंडलस्स संठाणस्स संखेज्जपएसियस्स संखेज्जपए- सोगाढस्स दव्वट्ठयाए एगे अचरिमे चरिमाइं संखेज्जगुणातिं अचरमं च चरमाणि य दोवि विसेसाहि- यातिं चरमंतपएसा संखेज्जगुणा अचरिमंतपएसा संखेज्जगुणा चरिमंतपएसा य अचरमंतपएसा य दोवि विसेसाहिया एवं वट्टतंसचउरंसायएसुवि जोएयव्वं।

परिमंडलस्स णं भंते! संठाणस्स असंखेज्जपएसियस्स संखेज्जपएसोगाढस्स अचरमस्स चरमाण य चरमंतपएसाण य अचरमंतपएसाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे २ हिंतो अ० ब० तु० वि० ?, गो० ! सव्वत्थोवे परिमंडलस्स संठाणस्स असंखेज्जपएसिअस्स संखेज्जपएसोगाढस्स दव्वट्ठयाए एगे अचरमे चरमातिं संखेज्जगुणातिं, अचरमं च चरमाणि य दोवि विसेसाहियातिं पदेसट्ठयाते सव्वत्थोवा परिमंडलसंठाणस्स असंखेज्जपएसियस्स संखेज्जपएसोगाढस्स चरमंतपएसा अचरमंतपएसा संखिज्जगुणा चरमंतपएसा य अचरमंतपएसा य दोवि विसेसाहिया दव्वट्ठयाएसट्ठयाए सव्वत्थोवे परिमंडलस्स संठाणस्स असंखेज्जपएसियस्स संखेज्जपएसोगाढस्स दव्वट्ठयाए एगे अचरिमे चरमातिं संखेज्जगुणातिं अचरमं च चरमाणि य दोवि विसेसाहियातिं चरमंतपएसा संखेज्जगुणा अचरमंतपएसा संखेज्जगुणा चरमंतपएसा य अचरमंतपएसा य दोवि विसेसाहिया, एवं जाव यआते।

परिमंडलस्स णं भंते! संठाणस्स असंखेज्जपएसियस्स असंखेज्जपएसोगाढस्स अचरमस्स चरमाण य चरमंतपएसाण य अचरमंतपएसाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कयरे२ हिंतो अ० ब० तु० वि० ?, गो० ! जहा रयणप्पभाए अप्पाबहुयं तहेव निरवसेसं भाणियव्वं, एवं जाव आयते ।

परिमंडलस्स णं भंते ! संठाणस्स अनंतपएसियस्स संखेज्जपएसोगाढस्स अचरिमस्स य ४ दव्वट्ठयाए ३ कयरे२ हिंतो अ० ब० तु० वि० गो० ! जहा संखेज्जपएसिअस्स संखेज्जपएसोगाढस्स, नवरं संकमेणं अनंतगुणा, एवं० जाव आयए, परिमंडलस्स णं भंते ! संठाणस्स अनंतपएसियस्स असंखेज्जपएसोगाढस्स अचरमस्स य जहा रयणप्पभाए, नवरं संकमे अनंतगुणा, एवं जाव आयते

वृ. 'कइ णं भंते ! संठाणा पं०' इत्यादि सुगमं, परिमण्डलादीनां संस्थानानां स्वरूपस्याधः प्रथमपद एव सविस्तरं प्ररूपितत्वात् शेषं पाठसिद्धं, नवरं 'परिमंडले णं भंते ! संठाणे संखेज्जपएसिए किं संखेज्जपएसोगाढे पुच्छा, गो० ! संखेज्जपएसोगाढे नो असंखेज्जपएसोगाढे नो अनंतपएसोगाढे' इति यस्मात् तस्य सङ्ख्येया एव प्रदेशास्ततः कथमसङ्ख्येयष्वनन्तेषु वा प्रदेशेष्ववगाहते इति, असङ्ख्यातप्रदेशात्मकमनन्तप्रदेशात्मकं वा पुनः परिमण्डलसंस्थानं सङ्ख्येयष्वसङ्ख्येयेषु वा प्रदेशेष्ववगाहते विरोधाभावान्नानन्तप्रदेशेषु असङ्ख्यातप्रदेशात्मकस्यानन्तेषु प्रदेशेष्ववगाहनाविरोधात् अनन्तप्रदेशात्मकस्यापि विरोध एव, यस्माल्लोकोऽप्यसभङ्ख्यतप्रदेशात्मक एव, लोकादन्यत्र च पुद्गलानां गत्यसम्भवः, तस्मादनन्तप्रदेशिकमप्यसङ्ख्येयेषु प्रदेशेष्ववगाहते नानन्तेषु, एवं वृत्तादीन्यपि संस्थानानि प्रत्येकं भावनीयानि, सङ्ख्यातप्रदेशासङ्ख्यातप्रदेशानन्तप्रदेशपरिमण्डलादिसंस्थानचरमाचरमादिचिन्तायां निर्वचनसूत्राणि रत्नप्रभाया इव प्रत्येतव्यानि, अनेकावयवाविभागात्मकत्वविवक्षायामचरमं च चरमाणि चेति निर्वचनं प्रदेशविवक्षायां चरमान्तप्रगदेशाश्चचरमान्तप्रदेशाश्च ।

सम्प्रति सङ्ख्यातप्रदेशस्य सङ्ख्यातप्रदेशावगाढस्य परिमण्डलादेश्चरमाचरमादिविषयमल्पबहुत्वमभिधित्सुराह- 'परिमंडलस्स णं भंते !' इक्यादि, सुगमं नवरं द्रव्यार्थताचिन्तायां 'चरमाणि संखेज्जगुणाइं'; इति सर्वात्मना परिमण्डलसंस्थानस्य सङ्ख्यातप्रदेशात्मकत्वात्, असङ्ख्यातप्रदेशस्यासङ्ख्यातप्रदेशवगाढस्यल्पबहुत्वं रत्नप्रभाया इव भावनीयं, अनन्तप्रदेशकस्याप्यसङ्ख्यातप्रदेशवागढस्य, नवरं 'सङ्क्रमे अनन्तगुणा' इति क्षेत्रचिन्तातो यदा द्रव्यचिन्तां प्रति सङ्क्रमणं तदा तानि चरमाण्यनन्तगुणानि वक्तव्यानि, तद्यथा- 'सव्वत्थोवे एगे अचरमे चरमाइं खेत्ततो असंखेज्जगुणाइं दव्वओ अनंतगुणाइं अचरमं चरमाणि य दोवि विसेसाहियाइं' इति ॥

तदेवं संस्थानान्यपि चरमाचरमादिविभागेन चिन्तितानि, सम्प्रति जीवादीन् चरमाचरमविभागेन चिन्तयति० ।

मू. (३७३) *जीवे णं भंते ! गतिचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, नेरइए णं भंते ! गतिचरमेणं किं चरिमे अचरिमे ?, गो० ! सिय चरमे सिय अचरमे एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! गतिचरमेणं किं चरिमा अचरिमा ?, गो० ! चरिमावि अचरिमावि, एवं निरंतरं जाव वेमाणिया ।*

नेरइए णं भंते ! ठितीचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! ठितीचरमेणं किं चरमा अचरमा ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! भवचरमेणं किं चरमा अचरमा ?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गो० ! चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया।

नेरइए णं भंते ! भासाचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! भासाचरमेणं किं चरमा अचरमा ?, गो० ! चरमावि अचरमावि, एवं जाव एगिंदियवज्जा, निरंतरं जाव वेमाणिया। नेरइए णं भंते ! आणापाणुचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते आणापाणुचरमेणं किं चरमा अचरमा ?, गो० ! चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया

नेरइए णं भंते ! आहारचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! आहारचरमेणं किं चरमा अचरमा ?, गो० ! चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया। नेरइए णं भंते ! भावचरमेणं किं चरमे अचरमे ? गो० सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! भावचरमेणं किं चरमा अचरमा ?, गो० ! चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया।

नेरइए णं भंते ! वण्णचरमेणं किं चरमे अचरमे !, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! वण्णचरमेणं किं चरमा अचरमा ?, गो० ! चरिमावि अचरिमावि, एवं निरंतरं जाव वेमाणिया। नेरइए णं भंते ! गंधचरमेणं किं चरमे अचरमे ?, गो० सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! गंधचरमेणं किं चरमा अचरमा ?, गो० !चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया।

नेरइए णं भंते ! रसचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! रसचरमेणं किं चरमा अचरमा ?, गो० !चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया। नेरइए णं भंते ! फासचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! फासचरमेणं किं चरमा अचरमा ?, गो० ! चरमावि अचरमावि एवं जाव वेमाणिया। संगहणिगाहा

मू. (३७४) *"गतिठिइभवे य भासा आणापाणुचरमे य बोद्धव्वा।*
आहारभावचरमे वण्णरसे गंधफासे य॥"

वृ. 'जीवे णं भंते ! गइचरमेणं किं चरमे ?' इत्यादि, गतिपर्यायरूपं चरमं गतिचरमं तेन जीवो भदन्त ! चिन्त्यमानः किं चरमः अचरमः ?, भगवानाह–हे गौतम ! स्यात् चरमः स्यादचरमः, कश्चिच्चरमः कश्चिदचरम इत्यर्थः, तत्र यः पृच्छासमये सामर्थ्यान्मनुष्यगतिरूपे पर्याये वर्त्तमानोऽनन्तरं न किमपि गतिपर्यायमवाप्स्यति, किन्तु मुक्त एव भविता स गतिचरमः, शेषस्त्वगतिचरम इति, 'नेरइए णं भंते ! गइचरमे' इत्यादि, नैरयिको भदन्त ! गतिचरमेण सामर्थ्यान्नरकगतिपर्यायरूपेणं चरमेण चिन्त्यमानः किं चरमः अचरमो वा ?, भगवानाह–गौतम ! स्याच्चरमः स्यादचरमो, नरकगतिपर्यायादुद्धृतो न भूयोऽपि नरकगतिपर्यायमनुभविष्यति सल चरमः शेषस्त्वचरमः,

एवं चतुर्विंशतिदण्डकक्रमेणं निरन्तरं तावद् वक्तव्यं यावद् वैमानिकावैमानिकसूत्रं, बहुवचनदण्डकसूत्रे निर्वचनं 'चरमावि अचरमावि' इति, पृच्छासमये ये केचन नैरयिकास्तेषां मध्येऽवश्यं केचन नैरयिकगतिपर्यायेण चरमा इतरे त्वचरमास्तत एकमेवेदमत्र निर्वचनं–चरमा अपि अचरमा अपि, एवं सर्वस्थानेष्वपि तां तां गतिमधिकृत्य भावनीयं। 'नेरइए णं भंते !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ठिइचरमेणं' इत्यादि, नैरयिको भदन्त ! तत्रैव नरकेषु चरमसमये स्थितिपर्यायरूपेण चरमेण चिन्त्यमानः किं चरमोऽचरमो वा ?, भगवानाह-स्याच्चरमः स्यादचरमः, किमुक्तं भवति ?-यो भूयोऽपि नरकमागत्य स्थितिचरसमयं प्राप्यस्यति सोऽचरमः शेषस्तु चरमः, एवं निरन्तरं यावद् वैमानिकः, बहुत्वदण्डकचिन्तायां 'रमावि अचरमावि' इति, इह ये पृच्छासमये स्थितिचरमसमये वर्त्तन्ते, ते चिन्त्यन्ते इत्येतन्न, अन्यथा उद्वर्त्तनाया विरहस्यापि सम्भवात् एकादीनामपि चोद्वर्त्तनाया भावात् 'चरमावि अचरमावी' त्युभयत्राप्यवश्यंभाविना बहुवचनेन निर्वचनं नोपपद्यते, किन्तु ये पृच्छासमये वर्त्तन्ते ते क्रमेण स्वस्वस्थितिचरमसमयं प्राप्ताः सन्तस्तेन रूपेण चरमा अचरमा वा इत्येतच्चिन्तनेन उपपद्यते यथोक्तं निर्वचनमिति, भवचरमसूत्रं गतिचरमसूत्रवत्, 'नेरइए णं भंते ! भासाचरमेण'मित्यादि, भाषाचरमं चरमभाषा, ततोऽयमर्थः-नैरयिको भदन्त ! चरमाया भाषाय किं चरमोऽचरमो वा ?, शेषं सुगमं, बहुवचनसूत्रे प्रश्नभावार्थो-ये पृच्छासमये नारका ते स्वकालक्रमेण चरमां भाषां प्राप्ताः सन्तः तया चरमया भाषया चरमा अचरमा वा इति, ततो निर्वचनसूत्रमप्युपपन्नं, एवमुच्छ्वासाहारसूत्रे अपि भावनीये, भाव औदयिकः, शेषं सुगमं ॥

पदं - १० - समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे दशमपदस्य मलयगिरिआचार्येण विरचिताटीका परिसमाप्ता

पदं -११ - "भाषा"

वृ. तदेवं व्याख्यातं दशमं पदं, इदानीमेकादशमारभ्यते, तस्य चामभिसम्बन्धः, इहानन्तरपदे सत्त्वानां यदुपपा तक्षेत्रं रत्नप्रभादि तस्य चरमाचरमविभागः प्रतिपादितः इह [सत्या १ मृषा २ सत्यामृषा ३ असत्यामृषा४] भाषा पर्याप्तानां सत्यादिभाषाविभागोपदर्शनं क्रियते, तत्र चेदमादिसूत्रम्-

मू. (३७५) *से नूनं भंते ! मण्णामीति ओहारिणी भासा चिंतेमीति ओहारिणी भासा अह मण्णामीति ओधारिणी भासा अह चिंतेमीति ओधारणी भासा तह मण्णामीति ओधारिणी भासा तह चिंतेमीति ओहारिणी भासा ?, हंता गो० ! मण्णामीति ओधारिणी भासा चिंतेमीति ओधारिणी भासा अह मण्णामीति ओधारिणी भासा अह चिंतेमीति ओधा० तह मण्णामीति ओधा० तह चिंकतेमीति ओधा०, ओहारिणी णं भंते ! भासा किं सच्चा मोसा सच्चामोसा असच्चामोसा ?, गो० ! सिय सच्चा सिय मोसा सिय सच्चामोसा सिय असच्चामोसा,*

-से केणट्ठेणं भंते ! एवं वुच्चति-ओधारिणी णं भासा सिय सच्चा सिय मोसा सिय सच्चामोसा सिय असच्चामोसा ?, गो० ! आराहिणी सच्चा विराहिणी मा सा आराहणविराहिणी सच्चामोसा जाणेव आराहणी नेव विराहिणी ने वाराहणविराहिणी सा असच्चमोसा नामं सा चउत्थी भासा, से तेणट्ठेणं गोयामा ! एवं वुच्चति-ओहारिणी णं भासा सिय सच्चा सिय मोसा सिय सच्चामोसा सिय असच्चामोसा ॥

वृ. 'से नूनं भंते ! मण्णामि इति ओहारिणी भासा' इत्यादि, सेशब्दो अथशब्दार्थः, स च वाक्योपन्यासे, नूनमुपमानावधारणतर्कप्रश्नहेतुषु इहावधारणे, भदन्त ! इत्यामन्त्रणे, मन्ये-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवबुध्ये इति-एवं, यदुत् अवधारणी भाषा अवधार्यते-अवगम्यतेऽर्थोनयेत्यवधारणी-अवबोधबीजभूता इत्यर्थः, भाष्यते इति भाषा, तद्योग्यतया परिणामितनिसृज्यमानद्रव्यसंहतिः एष पदार्थः, वाक्यार्थः पुनरयं-अथ भदन्त ! एवमहं मन्ये, यदुतावश्यमवधारणी भाषेति, न चैतत् सकृत अनालोच्यैव मन्ये, किन्तु चिन्तयामि युक्तिद्वारेणापि परिभावयामीति-एवं यदुत अवधारणीयं भाषेति, एवमात्मीयमभिप्रायं भगवते निवेद्याधिकृतार्थविनिश्चयनिमित्तमेवं भगवन्तं पृच्छति 'अह मण्णामी इह ओहारिणी भासा' इति,

'अथ-प्रक्रियाप्रश्नानन्तर्यमङ्गलोप- न्यासप्रतिवचनसमुच्चयेषु' इह प्रश्ने, काक्वा चास्य सूत्रस्य पाठस्ततोऽयमर्थः-अथ-भगवन्नेवमहं मन्येएवमहं मननं कुर्यां, यथा-अवधारणी भाषेति, द्वितीयाभिप्रायनिवेदनमधिकृत्य प्रश्नमाह- 'अह चिंतेमी ओहारिणी भासा' इति, अथ भगवन् ! एवमहं चिन्तयामि ? - एवमहं चिन्तनं कुर्यां, यदुतावधारिणी भाषेति निरवद्यमेतदित्यभिप्रायः, सम्प्रति पृच्छासमयात् यथा पूर्वं मननं चिन्तनं वा कृतवानिजानीमपि पृच्छासमये तथैव मननं चिन्तनं वा करोमि नान्यथेति भगवतो ज्ञानेन संवादयितुकामः पृच्छति- 'तह मन्नामी इति ओहारिणी भासा तह चिंतेमीति ओहारिणी भासा' इति,

'तथेति समुच्चयनिर्द्देशावधारणसादृश्यप्रश्नेषु' इह निर्द्देशे, काक्वा चास्यापि पाठः, ततःप्रश्नार्थत्वावगतिः, भगवन् ! यथा पूर्वं मतवानिदानीमप्यहं तथा मन्ये इति-एवं यदुत अवधारिणी भाषेति, किमुक्तं भवतकि ?-नेदानीन्तनमननस्य पूर्वमननस्य च मदीयस्य कश्चिद्विशेषोऽस्त्येतत् भगवनमनिति, तथा यथा पूर्वं भगवन् ! चिन्तितवान् इदानीमप्यहं तथा चिन्तयामि इत-एवं यदुत अवधारणी भाषेति, अस्त्येतदिति ?,एवं गौतमेनाभिप्रायनिवेदने प्रश्ने च कृते भगवानाह- 'हंता गोयमा ! मन्नामी इति ओहारिणी भासा' इति, 'हन्तेति सम्प्रेषणप्रत्यवधारणविवादेषु' इह प्रत्यवधारणे, मन्नामी इत्यादीनि क्रियापदानि प्राकृतशैल्या छान्दसत्वाच्च युष्मदर्थेऽपि प्रयुज्यन्ते, ततोऽयमर्थः-हन्त गौतम ! मन्यसे त्वं यदुत अवधारणी भाषेति जानाम्यहं केवलज्ञानेनेदमित्यभिप्रायः, तथा चिन्तयसि त्वमित्येवं यदुतावधारणी भाषेति इदमप्यहं वेद्मि केवलित्वात्, 'अह मन्नामी इति ओहारिणी भासा' इति अथेत्यानन्तर्ये, मत्सम्मतत्वात्, ऊर्द्धं निःशङ्कं मन्यस्व, इति-एवं यदुतावधारिणी भाषेति, अथ इत ऊर्ध्वं निःशङ्कं चिन्तय इति-एवं यदुतावधारणी भाषेति, अतीवेदं साध्वनवद्यमित्यभिप्रायः,

तथा तथा-अविकलं परिपूर्णं मन्यस्व इति-एवं यदुतावधारणी भाषेति यथा पूर्वं मतवान्, किमुक्तं भवति ?-यथा त्वया पूर्वं मननं कृतमिदानीमपि मत्सम्मतत्वात् सर्वं तथैव मन्यस्व मा मनागपि शङ्कां कार्षीरिति, तथा तथा-अविकलं परिपूर्णं चिन्तय इति-एवं यदुत अवधारिणी भाषेति, यथा पूर्वं चिन्तितवान्, मा मनागपि शङ्किष्ठा इति, तदेवं भाषा अवधारणीति निर्णीतमिदानीमियमवधारिणी भाषा सत्या उत मृषेत्यादिनिर्णयार्थं पृच्छति- 'ओहारिणी णं भंते !' इत्यादि, अवधारिणी अवबोधबीजभूता, णमिति प्राग्वत्, भदन्त ! भाषा किं सत्या मृषा सत्यामृषा असत्यामृषा इति, तत्र सन्तो मुनयस्तेषामेनव भगवदाज्ञासम्यगाराधकतया परमशिष्टत्वात् सद्भ्यो हिता-इहपरलोकाराधकत्वेन मुक्तिप्रापिका सत्या, युगादिपाठाभ्युपगमात् यंः प्रत्ययः, यद्वा यो यस्मै

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हितः स तत्र साधुरिति सत्सु साध्वी सत्या,

'तत्र साधो' विति यः प्रत्ययः, यदिवा सन्तो–मूलोत्तरगुणास्तेषामेव जगति मुक्तिपदप्रापकतया परमशोभनत्वात् अथवा सन्तो–विद्यमानास्ते च भगवदुपदिष्टा एव जीवादयः पदार्थाः अन्येषां कल्पनामात्ररचितसत्ताकतया तत्त्वतोऽसत्त्वात् तेभ्यो हिता तेषु साध्वी वा यथावस्थितवस्तुतत्त्वप्ररूपणेन सत्या, विपरीतस्वरूपा मृषा, उभयस्वभावा सत्यामृषा, या पुनस्तिसृष्वपि भाषास्वनधिकृता–तल्लक्षणायोगतस्तत्रानन्तर्भाविनी सा आमन्त्रणाज्ञापनदिविषया असत्यामृषा, उक्तं च–

॥१॥ "सच्चा हिया सयामिह संतो मुनयो गुणा पयत्था वा।
तव्विवरीया मोसा मीसा जा तदुभयसहावा॥

अणहिगया जा तीसुवि सद्दो च्चिय केवलो असच्चमुसा" इति, भगवानाह–'गोतम ! सिय सच्चा' इत्यादि, स्यात् सत्या सत्याऽपि भवतीत्यर्थः, एवं स्यादसत्या स्यात्सत्यामृषा स्यादसत्यामृषेति, अत्रैवार्थे प्रश्नमाह 'से केणट्ठेणं भंते !' इत्यादि, सुगमं, भगवानाह–गौतम ! आराधनी सत्या, इह विप्रतिपत्तौ सत्यां वस्तुप्रतिष्ठापनुबध्या या सर्वज्ञमतानुसारेण भाष्यते अस्त्यात्मा सदसन्नित्यानित्याद्यनेकधर्मकलापालिङ्गित इत्यादि सा यथावस्थितवस्त्वभिधायिनी आराध्यते मोक्षमार्गोऽनयेत्याराधनी, आराधिनीत्वात् सत्येति, विराधिनी मृषेति, विराध्यते मुक्तिमार्गोऽनयेति विराधिनी, विप्रतिपत्तौ सत्यां वस्तुप्रतिष्ठाशया सर्वज्ञत्रमतप्रातिकूल्येन या भाष्यते यथा नास्त्यात्मा एकान्तनित्यो वेत्यादि तथा सत्याऽपि परीपीडोत्पादिका सा विपरीतवलस्त्वभिधानात् परपीडाहेतुत्वाद्वा मुक्तिविराधनाद्विराधनी विराधिनीत्वाच्च मृषेति, या तु किञ्चन नगरं पत्तनं वाऽधिकृत्य पञ्चसु दारकेषु जातेष्वेवमभिधीयते,

यथाऽस्मिन् अद्य दश दारका जाता इति सा परिस्थूरव्यवहारनयमतेन आराधनविराधिनी, इयं हि पञ्चानां दारकाणां यज्जन्म तावताऽंशेन संवादनसम्भवादाराधिनी, दश न पूर्यन्ते इत्येतावताऽशेन विसंवादसम्भवात् विराधिनी, आराधिनी चासौ विराधिनी च आराधनविराधिनी, कर्म्मधारयत्वात् पुंवद्भावः, आराधनविराधिनीत्वाच्च सत्यामृषा, या तु नैवाराधनी तल्लक्षणविगमात् नापि विराधिनी विपरीतवस्त्वभिधानाभावात् परपीडाहेतुत्वाभावाच्च नाप्याराधनविराधिनी एकदेशसंवादविसंवादाभावात्, हे साधो ! प्रतिक्रमणं कुरु स्थण्डिलानि प्रत्युपेक्षस्वेत्यादिव्यवहारपतिता आमन्त्रिण्यादिभेदभिन्ना सा असत्यामृषा नाम चतुर्थी भाषा, 'से एएणट्ठेण' मित्याद्युपसंहारवाक्यं। इह यथावस्थितवस्तुतत्त्वाभधायिनी भाषा आराधिनीत्वात् सत्येत्युक्तं, ततः संशयापन्नस्तदपनोदाय पृच्छति–

मू. (३७६) *अह भंते ! गाओ मिया पसू पक्खी पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता गो० ! जा य गाओ मिया पसू पक्खी पन्नवणी णं एसा भासा, [पन्नवणी] न एसा भासा मोसा, अह भंते ! जा य इत्थीवऊ जा य पुरिसवऊ जा य नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता गो० ! जा य इत्थीवऊ जा य पुमवऊ जा य नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भासा मोसा,*

अह भंते ! जा य इत्थिआणमणी जा य पुमआणवणी जा य नपुंसगआणमणी पन्नवणी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णं एसा भासा न एसा भासा मोसा ?, हंत गो० ! जा य इत्थिआणवणी जा य पुमआणवणी जा य नपुसंगआणवणी पन्नवणी णं एसा भासा न एसा भासा मोसा।

अहं भंते ! जा य इत्थिपन्नवणी जा य पुमपन्नवणी जा य नपुंसगपन्नवणी पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता गो० ! जा य इत्थिपन्नवणी जा य पुमपन्नवणी जा य नपुंसगपन्नवणी, पन्नवणी णं एसा भासा णं एसा भासा मोसा, अह भंते ! जा जायीति इत्थिवऊ जातीय पुमवऊ जातीति नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता ! गो० जातीति इत्थिवऊ जाईति पुमवऊ जातीति नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भास मोसा।

अह भंते ! जा जातीइ इत्थियाणमणी जाइत्ति पुमआणवणी जातीति नपुंसगाणमणी पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता ! गो० ! जातीति इत्थिआणमणी जातीति पुमआणवणी जातीति नपुंसगाणमणी पन्नवणी णं एसा भासा न एसा भासा मोसा।

अह भंते ! जातीति इत्थिपन्नवणी जातीति पुमपन्नवणी जातीति नपुंसगपपन्नवणी पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता ! गो० ! जातीति इत्थिपन्नवणी जाईति पुमपन्नवणी जाईति नपुंसगपन्नवणी पन्नवणीणं एसा भासा नएसा भासा मोसा

वृ. 'अह भंते ! गाओ मिया' इत्यादि, अथ भदन्त ! गावः प्रतीताः, मृगा अपि प्रतीताः, पशवः-अजाः, पक्षिणोऽपि प्रतीताः, प्रज्ञापनी प्रज्ञाप्यतेऽर्थोऽनयेति प्रज्ञापनी, किं अर्थप्रतिपादनी प्ररूपणीयेतियावत्, णमिति वाक्यालङ्कारे, एषा भाषा सत्या नैषा भाषा मृषेति, इयमत्र भावना-गाव इति भाषा गोजातिं प्रतिपादयति, जातौ च त्रिलिङ्गा अप्यर्था अभिधेयाः, लिङ्गत्रयस्यापि जातौ सम्भवात्, एवं मृगपशुपक्षिष्वपि भावनीयं, न चैते शब्दास्त्रिलिङ्गाभिधायिनस्तथाप्रतीतेरभावात् किन्तु पुंल्लिङ्गगर्भास्ततः संशयः किमियं प्रज्ञापनी किं वा नेति ?, भगवानाह-

'हंता गोयमा !' हन्तेत्यवधारणे, गौतम ! इत्यामन्त्रेण, गाव इत्यादिका भाषा प्रज्ञापनी, तदर्थकथनाय प्ररूपणीया, यथावस्थितार्थप्रतिपादकतया सत्यत्वात्, तथापि जात्यभिधायिनीयं भाषा, जातिश्च त्रिलिङ्गार्थसमवायिनी, ततो जात्यभिधानेन त्रिलिङ्गा अपि यथासम्भवं विशेषा अभिहिता भवन्तीति भवति यथावस्थितार्थाभिधानादियं प्रज्ञापनी भाषेति,

यदप्युक्तम्-किन्तु पुंल्लिङ्गगर्भा इति, तत्र शब्दे लिङ्गव्यवस्था लक्षणवशात्, लक्षणं च 'स्त्रीपुंनपुंसकसहोक्तौ परं' तथा 'ग्राम्याशिशुद्विशखुरसङ्घे स्त्री प्राय' इत्यादि, ततो भवेत् क्वचित् शब्दे लक्षणवशात् स्त्रीत्वं क्वचित् पुंस्त्वं क्वचित् नपुंसकत्वं वा, परमार्थतःपुनः सर्वोऽपि जातिशब्दस्त्रिलिङ्गानप्यर्थान् तत्तद्देशकालप्रस्तावादिसामर्थ्यवशादभिधत्ते इति न कश्चिद्दोषः, न चेयं परपीडाजनिका नापि विप्रतारणादिदुष्टविवक्षासमुत्था ततो न मृषेति प्रज्ञापनी।

'अह भंते ! जा य इत्थिवऊ' इत्यादि, अथेति प्रश्ने भदन्त ! इत्यामन्त्रणे, या च स्त्रीवाक्-स्त्रीलिङ्गप्रतिपादिका भाषा खट्वा लतेत्यादिलक्षणा या पुरुषवाक् घटः पट इत्यादिरूपा या च नपुंसकवाक् कुड्यं काण्डमित्यादिलक्षणा प्रज्ञापनीयं भाषा नैषा भाषा मृषेति ?, किमत्र संशयकारणं येनेत्थं पृच्छति ? इति चेत्, उच्यते, इह खट्वाघटकुड्यादयः शब्दाः यथाक्रमं स्त्रीपुंनपुंसक-लिङ्गाभिधायिनः, स्त्रीपरुंनपुंसकानां च लक्षणमिदम्-

॥१॥ "योनिर्मृदुत्वमस्थैर्यं, मुग्धता क्लीबता स्तनौ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुंस्कामितेति लिङ्गानि, सप्त स्त्रीत्वे प्रचक्षते ॥

॥ २ ॥ मेहनं खरता दाढर्यं, शौण्डीर्यं श्मश्रु धृष्टता ।
स्त्रीकामितेति लिङ्गानि, सप्त पुंस्त्वे प्रचक्षते ॥

॥ ३ ॥ स्तनादिश्मश्रुकेशादिभावाभावसमन्वितम् ।
नपुंसकं बुधाः प्राहुर्मोहानलसुदीपितम् ॥" तथाऽन्यत्राप्युक्तम्–

॥ १ ॥ "स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च, तत्र भावे नपुंसकम् ॥"

न चैवंरूपाणि स्त्र्यादिलक्षणानि खट्वादिषूपलभ्यन्ते, तथाहि–यद्येकैकावयवपृथक्करणेन सम्यग् निभालनं क्रियते तथापि न तेषां स्त्र्यादिलक्षणानां तत्रोपलम्भोऽस्ति ततः प्रज्ञापनीयं भाषा न वेति जातसंशयः तदपनोदाय पृच्छति, अत्र भगवानाह–'हंता गोयमे'त्यादि अक्षरगमनिका प्राग्वत्, भावार्थस्त्वयं–नेह शब्दप्रवृत्तिचिन्तायां यथोक्तानि स्त्र्यादिलक्षणानि स्त्रीलिङ्गादिशब्दाभिधेयानि किन्त्वभिधेयधर्मा इयमयमिदंशब्दव्यवस्थाहेतवः गुरूपदेशपारम्पर्यगम्याः स्त्रीलिङ्गादिशब्दाभिधेयाः, न चैते कल्पनामात्रं, वस्तुतस्तत्तच्छब्दाभिधेयतया परिणमनभावात्, तेषामभिधेयधर्माणां तत्त्वतस्तात्तविकत्वात्, आह च शकटसूनुरपि–"अयमियमिदमितिशब्दव्यवस्थाहेतुरभिधेयधर्म उपदेशगम्यः स्त्रीपुंनपुंसकत्वानी"ति, व्यवस्थापितश्चायमर्थो विस्तरकेण स्वोपज्ञशब्दानुशासनविवरण इति, ततः शाब्दव्यवहारापेक्षया यथावस्थितार्थप्रतिपादनात् प्रज्ञापनीयं भाषा, दुष्टविवक्षातःसमुत्पत्तेरभावात् परपीडाहेतुत्वाभावाच्च न मृषेति ।

'अह भंते!' इत्यादि, अथ भदन्त ! या च स्त्र्याज्ञापनी आज्ञाप्यते–आज्ञासम्पादने प्रयुज्यतेऽनया सा आज्ञापनी स्त्रिया आज्ञापनी स्त्र्याज्ञापनी, स्त्रिया आदेशदयिनीत्यर्थः, या च पुमाज्ञापनी नपुंसकाज्ञापनी, प्रज्ञापनीयं भाषा नैषा भाषा मृषेति ?, अत्रेदं संशयकारणं–किल सत्या भाषा प्रज्ञापनी भवति, इयं च भाषा आज्ञासम्पादनक्रियायुक्ताभिधायिनी, आज्ञाप्यमानश्च स्त्र्यादिः तथा कुर्यान्न वा ?, ततः संशयमापन्नो विनिश्चयाय पृच्छति, अत्र भगवानाह–'हंता गोयमा !' इत्यादि, अक्षरगमनिका सुगमा, भावार्थस्त्वयं–आज्ञापनी भाषा द्विधा–परलोका बाधिनी इतरा च, तत्र या स्वपरानुग्रहबुध्या शाठ्यमन्तरेण आमुष्मिकफलसाधनाय प्रतिपन्नैहिकालम्बनप्रयोजना विवक्षितकार्यप्रसाधनसामथ्ययुक्ता विनीतस्त्रायादिविनेयजनविषया सा परलोकाबाधिनी एषैव च साधूना प्रज्ञापनी परलोकाबाधनात्, इतरा त्वितरविषया, सा च स्वपरसङ्क्लेशजननात् मृषेत्यप्रज्ञापनी साधुवर्गस्य, उक्तं च–

॥ १ ॥ "अविनीयमाणवंतो किलिस्सई भासई मुसं तह य ।
घंटालोहं नाउं को कडकरणे पवत्तेज्जा ? ॥"

क्रिया हि द्रव्यं विनमयति नाद्रव्यमित्यभिप्रायः ।

'अह भंते ! जा य इत्थिपन्नवणी' इत्यादि अथ भदन्त ! या च भाषा स्त्रीप्रज्ञापनी–स्त्रीलक्षणप्रतिपादिका, 'योनिर्मुदुत्वमस्थैर्यं मुग्धते'त्यादिरूपा, या च पुंप्रज्ञापनी–पुरुषलक्षणप्रतिपादिका 'मेहनं खरता दाढर्य' इत्यादिरूपा या च नपुंसकप्रज्ञापनी–नपुंसकलक्षणाभिधायिनी 'स्तनादिश्मश्रुकेशादिभावाभावसमन्वितमित्यादिलक्षणा प्रज्ञापनीयं भाषा नैषा भाषा मृषेति ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोऽत्राभिप्राय इति चेत्, उच्यते, इह स्त्रीलिङ्गादयः शब्दाःशाब्दव्यवहारबलादन्यत्रापि प्रवर्त्तन्ते, यथा खट्वाघटकुट्यादयः खट्वादिष्वर्थेषु, न खलु तत्र यथोक्तानि स्त्र्यादिलक्षणानि सन्ति यथोक्तं प्राक्, ततः किमियमव्यापकत्वात् स्त्र्यादिलक्षणप्रतिपादिका भाषा न वक्तव्या आहोश्वित् वक्तव्येति संशयापन्नः पृष्टवान्, अत्र भगवानाह-'हंता गोयमे'त्यादि, अक्षरगमनिका सुप्रतीता, भावार्थस्त्वयं-इह स्त्र्यादिलक्षणं द्विधा-शाब्दव्यवहारानुगतं वेदानुगतं च, तत्र यदा शाब्दव्य वहाराश्रितं प्रतिपादयितुमिष्यते तदैवं न वक्तव्यमव्यापाकत्वात्, यथा चाव्यापकता तथा प्रागेव लेशतो दर्शिता, विस्तरतस्तु स्वोपज्ञशब्दानुशासनविवरणे, तत इयं तदधिकृत्य प्रज्ञापनी, यदा तु वेदानुगतं प्रतिपादयितुमिष्यते तदा यथावस्थितार्थाभिधानात् प्रज्ञापन्येव, न मृषेति।

'अह भंते ! जा जातीति इत्थिवऊ' इत्यादि, अथ भदन्त ! या जातिः स्त्रीवाक् जातौ स्त्रीवचनं सत्तेति, या जातौ पुंवाक् पुंवचनं भाव इति, या च जातौ नपुंसकवाक् सामान्यमिति, प्रज्ञापनी एषा भाषा नैषा भाषा मृषेति ?, कोऽत्राभिप्राय इति चेत्, उच्यते, जातिरिह सामान्यमुच्यते, सामान्यस्य च न लिङ्गसङ्ख्याभ्यां योगो, वस्तूनामेव लिङ्गसख्यायभ्यां योगस्य तीर्थान्तरीयैरभ्युपगमात्, ततो यदि परं जातावोत्सर्गिकमेकवचनं नपुंसकलिङ्गं चोपपद्येत न त्रिलिङ्गता, अथ च त्रिलिङ्गाभिधायिनोऽपि शब्दाः प्रवर्त्तन्ते यथोक्तमनन्तरं ततः संशयः-किं एषा भाषा प्रज्ञापनी उत नेति ?, अथ भगवानाह-'हंता गोयमा !' इत्यादि, अक्षरार्थः सुगमः, भावार्थस्त्वयं-जातिर्नाम सामान्यमुच्यते, सामान्यं च न परिकल्पितमेकमनवयवमक्रियं, तस्य प्रमाणबाधितत्वात्, यथा च प्रमाणबाधितत्वं तथा तत्त्वार्थटीकायां भावितमिति ततोऽवधार्यं, किन्तु समानः परिणामो 'वस्तुन एव समानः परिणामो यः स एव सामान्य'मिति वचनात्, समानपरिणामश्चानेकधर्मात्मा, धर्माणां परस्परं धर्मिणोऽपि च सहान्योऽन्यानुवेद्याभ्युपगमात् तथा प्रमाणेनोपलब्धेः, ततो घटते जातेरपि त्रिलिङ्गतेति प्रज्ञापन्येषा भाषा, नैषा भाषा मृषेति।

'अह भंते !' इत्यादि, अथ भदन्त ! या जातिस्त्रयाज्ञापनी-जातिमधिकृत्य स्त्रिया आज्ञापनी, यथा अमुका ब्राह्मणी क्षत्रिया वा एवं कुर्यादिति, एवं जातिमधिकृत्य पुमाज्ञापनी नपुसंकाज्ञापनी, प्रज्ञापनी एषा भाषा नैषा भाषा मृषेति ?, अत्रापि संशयकारणमिदं-आज्ञापनी हि नाम आज्ञासम्पादनक्रियायुक्तस्त्र्याद्यभिधायिनी, स्त्र्यादिश्चाज्ञाप्यमानस्तथा कुर्यान्न वेति संशयः, किमियं प्रज्ञापनी किं वाऽन्येति ?, अत्र निर्वचनमाह-'हंता ! गोयमा' इत्यादि, अक्षरार्थःसुगमः, भावार्थस्त्वयं-आज्ञापनी हि नाम परलोकाबाधिनी सा प्रोच्यते या स्वपरानुग्रबुध्या विवितार्थसम्पादनसामर्थ्योपेतविनीतस्त्र्यादिविनेयजनविषया, यथा अमुका ब्राह्मणी साध्वी शुभं नक्षत्रमद्येत्युमुकमङ्गं श्रुतस्कन्धं च पठेत्यादि सा प्रत्रापन्येव, दोषाभावात्, शेषा तु स्वपरपीडाजननान्मृपेत्यप्रज्ञापनीति।

'अह भंते !' इत्यादि, अथ भदन्त ! या जातिस्त्रीप्रज्ञापनी जातिमधिकृत्य स्त्रिया-स्त्रीलक्षणस्य प्रतिपादिका, यथा स्त्रीः स्वभावात् तुच्छा भवति गौरवबहुला चलेन्द्रिया दुर्बला च धृत्येति, उक्तं च-"तुच्छा गारवबहुला चलिंदिया दुब्बला य धीईए'इत्यादि, या च जातिमधिकृत्य पुम्प्रज्ञापनी-पुरुषलक्षणस्य स्वरूपनिरूपिका, यथा पुरुषः स्वभावात् गम्भीराशयो भवति महत्यामपि चापदि न क्लीबतां भजते इत्यादि, या च जातिमधिकृत्य नपुंसकप्रज्ञापनी नाम-नपुंसक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जातिप्ररूपिका, यथा नपुंसकः स्वभावात् क्लीबो भवति, प्रबलमोहानलज्वालाकलापज्वलितश्चेत्यादि प्रज्ञापन्येषा भाषा नैषा भाषा मृषेति, अत्रापीदं संशयकारणं वण्यते—खलु जातिगुणाः एवंरूपाः परं क्वचित्कदाचिद् व्यभिचारोऽपि दृश्यते, तथाहि—रामाऽपि काचित् गम्भीराशया भवति धृत्या चातीव बलवती, पुरुषोऽपि च कश्चित्तुच्छप्रकृतिरूपो लभ्यते स्तोकायामपि चापदि क्लीबतां भजते, नपुंसकोऽपि कश्चिन्मन्दमोहानलो दृढसत्त्वश्च,

ततः संशयः—किमेषा प्रज्ञापनी किं वा नेति ?, अत्र भगवानाह—'हंता ! गोयमा !' इत्यादि, अक्षरार्थः सुगमः, परं भावार्थस्त्वयं—इह जातिगुणप्ररूपणं बाहुल्यमधिकृत्य भवति न समस्तव्यक्तयाक्षेपेणात् एव जातिगुणान् प्ररूपयन्तो विमलधियःप्रायः शब्दं समुच्चारयन्ति, प्रायेणेदं द्रष्टव्यं, यत्रापि न प्रायःशब्दश्रवणं तत्रापि स द्रष्टव्यंः प्रस्तावात्, ततः क्वचित्कदाचिद् व्यभिचारेऽपि दोषाभावात् प्रज्ञापन्येषा भाषा न मृषेति ॥

इह भाषा द्विधा दृश्यते—एका सम्यगुपयुक्तस्य द्वितीया त्वितरस्य, तत्र यः पूर्वापरानुसन्धानपाटवोपेतः श्रुतज्ञानेन पर्यालोच्यार्थान् भाषते स सम्यगुपयुक्तः, स चैवं जानाति—अहमेतद्भाषे इति, यस्तु करणापटिष्टतया वातादिनोपहतचैतन्यकतया वा पूर्वापरानुसन्धानविकलो यथाकथंचित् मनसा विकल्प्य विकल्प्य भाषते स इतरः, स चैवमपि न जानाति—यथा अहमेतत् भाषे इति, बालादयोऽपि च भाषमाणा दृश्यन्ते, ततः संशयः—किमेते जानन्ति यद्वयमेततु भाषामहे इति किं वा न जानन्तीति पृच्छति—

मू. (३७७) *अह भंते ! मंदकुमाराए वा मंदकुमारिया वा जानति बुयमाणा अहमेसे बुयामीति ?, गो० ! नो इणट्ठे समट्ठे, नन्नत्थ सण्णिणो, अह भंते ! मंदकुमारए वा मंदकुमारिया वा जाणइ आहारं आहारेमाणे अहमेसे आहारमाहारेमिति ?, गो० ! नो इणट्ठे समट्ठे, नन्नत्थ सण्णिणो, अह भंते ! मंदकुमारए वा मंदकुमारिया वा जानति अयं मे अम्मापियरो ?, गो० ! नो इणट्ठे समट्ठे, नन्नत्थ सण्णिणो,*

अह भंते ! मंदकुमारए वा मंदकुमारिया वा जानति अयं मे अतिराउलो अयं मे अइराउवलेत्ति गो० ! नो तिणट्ठे समट्ठे, नन्नत्थ सण्णिणो, अह भंते ! मंदकुमारए वा मंदकुमारिया वा जानति अयं मे भट्टिदारए अयं मे भट्टिदारियत्ति ?, गो० ! नो इणट्ठे समट्ठे, नन्नत्थ सण्णिणो, अह भंते ! उट्टे गोणे खरे घोडए अए एलतो जाणति बुयमाणे अहमेसे बुयामि ?, गो० ! नो इणट्ठे समट्ठे, नन्नत्थ सण्णिणो,

अह भंते ! उट्टे जाव एलते जानति आहारं आहारेमाणो अहमेसे आहारेमि ?, गो० ! नो इणट्ठे समट्ठे जाव नन्नत्थ सण्णिणो, अह भंते ! उट्टे गोणे खरे घोडए अए एलए जानति, अयं मे अम्मापियरो ?, गो० ! नो इणट्ठे समट्ठे जाव नन्नत्थ सण्णिणो, अह भंते ! उट्टे जाव एलए जाणति, अयं मे अतिराउलेत्ति ?, गो० ! नो इणट्ठे समट्ठे जाव नन्नत्थ सण्णिणो,

अह भंते ! उट्टे जाव एलए जानति अयं मे भट्टिदारए २ ?, गोयमा ! नो इणट्ठे समट्ठे जाव नन्नत्थ सण्णिणो ।

वृ. 'अह भंते ! मंदकुमारए वा' इत्यादि, अथ भदन्त ! मन्दरकुमारकः—उत्तानशयो बालको मन्दकुमारिका—उत्तानशया बालिका भाषमाणाभाषायोग्यान् पुद्गलानादाय भाषात्वेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिणमय्य विसृजती एवं जानाति–यथाऽहमेतद् ब्रवीमित इति ?, भगवानाह–गौतम! नायमर्थः समर्थः–युक्तयुपपन्नो, यद्यपि मनःपर्याप्तया पर्याप्तस्तथापि तस्याद्यापि मनःकरणमपटु अपटुत्वाच्च मनःकरणस्य क्षयोपशमोऽपि मन्दः, श्रुतज्ञानावरणस्य हि क्षयोपशमः प्रायो मनः–करणपटिष्ट-तामवलम्ब्योपजायते, तथा लोके दर्शनात्, ततो न जानाति मन्दकुमारो मन्दकुमारिका वा भाषमाणा यथाऽहमेतत् ब्रवीमीति, किं सर्वोऽपि न जानातीत्यत आह–'नण्णत्थ सण्णिणो' इति, अन्य-त्रशब्दोऽत्र परिवर्जनार्थः, दृष्टश्चान्यत्रापि परिवर्जनार्थो यथा–'अन्यत्र द्रोणभीष्माभ्यां, सर्व योधाः पराङ्मुखा' इति, द्रोणभीष्मौ वर्जयित्वा इत्यर्थः,

संज्ञी–अवधिज्ञानी जातिस्मरः सामान्यतो विशिष्टमनःपाटवोपेतो वा तस्मादन्यो न जानाति, संज्ञी तु यथोक्तस्वरूपो जानीते। एवमाहारादिविषयाण्यपि चत्वारि सूत्राणि भावनीयानि, नवर-मतिराउले इति देशीपदं, एतत् स्वामिकुलमित्यर्थः, 'भट्टिदारए' इति भर्त्ता–स्वामी तस्य दारकः–पुत्रो भर्तृदारकः, एवमुष्ट्रादिविषयाण्यपि पञ्च सूत्राणि भावयितव्यानि, नवरमुष्ट्रादयोऽप्यतिबालावस्थाः परिग्राह्याः न जरठाः, जरठावस्थायां हि परिज्ञानस्य सम्भवात् ॥

सम्प्रत्येकवचनादिभाषाविषयसंशयापनोदार्थं पृच्छति–

मू. (३७८) अह भंते! मणुस्से महिसे आसे हत्थी सीहे वग्घे विगे दीविए अच्छे तरच्छे परस्सरे सियाले विराले सुणए कोलसुणए कोक्कंतिए ससए चित्तए चिल्ललए जे यावन्ने तहप्पगारा सव्वा सा एगवऊ ?, हंता गो० ! मणुस्से जाव चिल्ललए जे यावन्ने त० सव्वा सा एगवऊ।

अह भंते! मणुस्सा जाव चिल्ललगा जे याव० तहप्पगारा सव्वा सा बहुवऊ ? हंता गो० ! मणुस्सा जाव चिल्ललगा सव्वा सा बहुवऊ। अह भंते! मणुस्सी महिसी वलवा हत्थिणिया सीही वग्घी विगी दीविया अच्छी तरच्छी परस्सरा रासभी सियाली बिराली सुणिया कोलसुणिया कोक्कंतिया ससिया चित्तिया चिल्ललिया जे यावन्ने तह० सव्वा सा इत्थिवऊ ?, हंता गो० ! मणुस्सी जाव चिल्ललिगा जे यावन्ने तहप्पगारा सव्वा सा इत्थिवऊ।

अह भंते! मणुस्से जाव चिल्ललये जे यावन्ने तहप्पगारा सव्वा सा पुमवऊ ?, हंता गो० ! मणुस्से महिसे जाव चिल्ललए जे यावन्ने तहप्पगारा सव्वा सा पुमवऊ।

अह भंते! कंसं कंसोयं परिमंडलं सेलं थूमभं जालं थालं तारं रूवं अच्छिपव्वं कुंडे पउमं दुद्धं दहिं नवणीतं असणं सयणं भवणं विमाणं छत्तं चारमं भिंगारं अंगणं निरंगणं आभरणं रयणं जे यावन्ने तहप्पगारा सव्वं तं नपुंसगवऊ ?, हंता गो० ! कंसं जाव रयणं जे यावन्ने तहप्पगारा तं सव्वं नपुंसगवऊ।

अह भंते! पुढवी इत्थिवऊ आयत्ति पुमवऊ धन्निति नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता गो० ! पुढवित्ति इत्थिवऊ आउत्ति पुमवऊ धन्निति नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भासा मोसा। अह भंते! पुढवीत्ति इत्थिआणमणी आउत्ति पुमआणमणी धन्नेत्ति नपुंसगाणमणी पन्नवणी णं एसा भासा न एसा भासा मोसा ? हंता गो० ! पुढवित्ति इत्तिआणमणी आउत्ति पुमआणमणी धण्णेत्ति नपुंसगाणमणी पन्नवणीणं एसा भासा न एसा भासा मोसा।

अह भंते! पुढवीति इत्थिपन्नवणी आउत्ति पुमपन्नवणी धन्नेत्ति नपुंसगपन्नवणी आराहणी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णं एसा भासा न एसा भासा मोसा ?, हंता ! गो० ! पुढवीति इत्थिपन्नवणी आउत्ति पुमपन्नवणी धन्नेत्ति नपुंसगपन्नवणी आराहणी णं एसा भासा, न एसा भासा मोसा । इच्चेवं भंते इत्थिवयणं वा पुमनवयणं वा नपुंसगवयणं वा वयमाणे पन्नवणी णं एसा भासा ण एसा भासा मोसा ?, हंता गो० ! इत्थिवयणं वा पुमवयणं वा नपुंसगवयणं वा वयमाणे पन्नवणी णं एसा भासा न एसा भासा मोसा ॥

वृ. अथ भदन्त ! मनुष्यो महिषोऽश्वो हस्ती सिंहो व्याघ्रो वृक एते प्रतीताः, द्वीपी–चित्रकविशेषः ऋक्षः–अच्छभल्लःतरक्षो–व्याघ्रजातिविशेषः परस्सरो–गण्डः श्रृगालो–गोमायु; बिडालो–मार्जारः शुनको–मृगदंश कोलशुनको–मृगयाकुशलः श्वा शशकः–प्रतीतः कोकंतिया–लुङ्की चित्रकः–प्रतीतः चिल्ललकः–आरण्यः पशुविशेषः, 'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये तथाप्परकारा एकवचनान्ता इत्यर्थः, सर्वा सा एकवाक्–एकत्वप्रतिपादिका वाणी,

अयमत्र प्रश्नहेतुरभिप्रायः–इह वस्तु धर्म्मधर्म्मिसमुदायात्मकं धर्म्माश्च प्रतिवस्त्वनन्ताः मनुष्य इत्याद्युक्तौ च सकलं वस्तु धर्मधर्मिसमुदायात्मकं परिपूर्णं प्रतीयते, तथा व्यवहारदर्शनात्, एकस्मिंश्चार्थे एकवचनं बहुषु बहुवचनं, अत्र बहवो धर्म्मा अभिधेयाः ततःकथमेकवचनं ?, अथ च दृश्यते लोके एकवचनेनपि व्यवहार इति पृच्छति–सर्वा सा एकत्वप्रतिपादिका वाग् भवति ?, काक्वा चेदं पठ्यते ततः प्रश्नार्थत्वावगतिः, भगवानाह–

'हंता गोयमा !' इत्यादि, अक्षरार्थः सुगमः, भावार्थस्त्वयं–शब्दप्रवृत्तिरिह विवक्षाधीना, विवक्षा च तत्तत्प्रयोजनवशात् वक्तुःक्वचित् कदाचित् कथञ्चित् भवतीत्यनियता, तथाहि–स एवैकः परुषो यदाऽयं मे जनक इति पुत्रेण विवक्ष्यते तदा जनक इत्यभिधीयते, स एव यदा तेनैव मामध्यापयतीति विवक्ष्यते तदा तूपाध्याय इति, तत्र यदा उपसर्जनीभूतधर्मा धर्मी प्राधान्येन विवक्ष्यते तदा धर्म्मिण एकत्वात् एकवचनं, धर्माश्च धर्म्मिण्यन्तर्गता इति परिपूर्णवस्तुप्रतीतिर्यथा त्वमिति, यदा तूपसर्जनीभूतधर्म्मिणो धर्माः पाण्डित्यपरोपकारित्वमहादानदातृत्वादयः प्राधान्येन विवक्ष्यन्ते तदा धर्म्माणां बहुत्वादेकस्मिन्नापि बहुवचनं यथा यूयमिति, तत इहापि मनुष्य इत्यादावुपसर्जनीकृतधर्म्मा धर्म्मी प्राधान्येन विवक्षित इति भवति सर्वाप्येवंजातीया एकत्वप्रतिपादिका वाक् । 'अह भंते ! मणुस्सा' इत्यादि, अक्षरगमनिका प्राग्वत्,

अत्रापीदं संशयकारणं–मनुष्यादयः शब्दा जातिवाचकाः, जातिश्च सामान्यं सामान्यं चैकं 'एकं नित्यं निरवयमक्रियं सर्वगं च सामान्य'- मितिवचनात्, ततः कथमत्र बहुवचनं ?, अथ च दृश्यते बहुवचनेनापि व्यवहार इति पृच्छति–सर्वा सा बहुत्वप्रतिपादिका वाक् भवति ?, काक्वा पाठात् प्रश्नार्थत्वावगतिः अत्र भगवानाह–'हंता गोयमा !' इत्यादि, अक्षरार्थः सुगमः, भावार्थस्त्वयं–यद्यपि नामैते जातिवाचकाःशब्दाः तथापि जातिरभिधीयते समानपरिणामः, समानपरिणामश्चासमानपरिणामविनाभावी, अन्यथैकत्वापत्तितः समानत्वायोगात्, ततो यदा समानपरिणामोऽसमानपरिणामसंलुलितः प्राधान्येन विवक्ष्यते तदाऽसमानपरिणामस्य प्रतिव्यक्ति भिन्नत्वात् तदभिधाने बहुवचनं, यथा घटा इति, यदा तु स एव एकः समानपरिणामः प्राधान्येन विवक्ष्यते इतरस्त्वसमान परिणाम उपसर्जनीभूतस्तदा सर्वत्रापि समानपरिणामस्य एकत्वात् तदभिधाने एकवचनं, यद्वा सर्वोऽपि घटः पृथुबृघ्नोदराद्याकार इति, अत्रापि मनुष्या इत्यादौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समानपरिणामोऽसमानपरिणामसंलुलितः प्राधान्येन विवक्षित इति, तस्यानेकत्वभावात् बहुवचनं।

'अहं भंते ! मणुस्सी'त्यादि, अत्रेदं संशयकारणं-इह सर्वं वस्तु त्रिलिङ्गं, तथाहि-मृद्रूपोऽयमिति पुंल्लिङ्गता मृत्परिणतिरियं घटाकारा परिणतिरियमिति स्त्रीलिङ्गता, इदं वस्तित्वति नपुंसकलिङ्गता, तत्रैवं शबलरूपे वस्तुनि व्यवस्थिते कथमेकलिङ्गमात्राभिधायी शब्दस्तदभिधायी भवति, न खलु नरसिंहे सिंहशब्दो नरशब्दो वा केवलस्तदभिधायी भवति, अथ च दृश्यते तदभिधायितयाऽपि लोके व्यवहारस्ततः पृच्छति 'सव्वा सा इत्थिवऊ' इति, सर्वा सा एवंप्रकारा स्त्रीवाक्-स्त्रीलिङ्गविशिष्टार्थप्रतिपादिका वाक् भवति ?, काक्वा पाठात् प्रश्नार्थत्वावगतिः, भगवानाह-'हंता गोयमे' त्यादि, अक्षरार्थः सुगमः, भावार्थस्त्वयं-यद्यपि नाम शबलरूपं वस्तु तथाऽप्येष शाब्दो न्यायः-येन धर्मेण विशिष्टः प्रतिपादयितुमिष्यते स तं प्रधानीकृत्य तेन विशिष्टं न्यग्भूतशेषधर्माणं धर्मिणं प्रतिपादयति, यथा पुरुषत्वे शास्त्रज्ञत्वे दातृत्वे भोक्तृत्वे जनकतवेऽध्यापयितृत्वे च युगपद् व्यवस्थितेऽपि पुत्रः समागच्छन्तमवलोक्य पिता आगच्छतीति ब्रूते, शिष्यस्तु उपाध्याय इति, एवमिहापि यद्यपि मानुषीप्रभृतिकं सर्वं त्रिलिङ्गात्मकं तथापि योनिर्मृदुकत्वमस्थैर्यादिलक्षणं स्त्रीत्वमत्र प्रतिपादयितुमिष्टमिति ततः प्रधानीकृत्य तेन विशिष्टं न्यग्भूतशेषधर्म्माणं धर्म्मिणं प्रतिपादयतीति भवति सर्वा सा स्त्रीवक्, एवं पुंवाग्नपुंसकवाचावपि भावनीये।

'अह भंते ! पुढवी' इत्यादि सुगमं, नवरं 'आऊ' इति पुंल्लिङ्गता प्राकृतलक्षणवशात्, संस्कृते तु स्त्रीत्वमेव, 'अह भंते ! पुढवीति इत्थीआणवणी' इत्यादि, अथ भदन्त ! पृथिवीं कुरु पृथ्वीमानयेत्येवं स्त्रियां-स्त्रीलिङ्गे पृथिव्या आज्ञापनी एवमाऊ इति पुमाज्ञापनी धान्यमिति नपुंसकाज्ञापनी प्रज्ञापन्येषा भाषा नैषा भाषा मृषेति ?, भगवानाह-'हंता गो० !' इत्यादि सुगमं,

'अह भंते' इत्यादि, अथ भदन्त ! पृथिवी इति स्त्रीप्रज्ञापनी-स्त्रीत्वस्वरूपस्य प्ररूपणी एवं आऊ इति पुंप्रज्ञापनी धान्यमिति नपुंसकप्रज्ञापनी आराधनी-मुक्तिमार्गाप्रतिपनथिनी एषा भाषा नैषा भाषा मृषेति ?, किमुक्तं भवति ? - नैवं वदतो मिथ्याभाषित्वप्रसङ्गः, भगवानाह-आराधनी एषा भाषा, नषा भाषा मृषेति, शाब्दव्यवहारापेक्षया यथावस्थितवस्तुतत्त्वप्ररूपणात्, इह कियत् प्रतिपदं प्रष्टुं शक्यते ततोऽतिदेशेन पृच्छति-

'इच्चेवं भंते !' इत्यादि, इतिः-उपदर्शने एवंशब्दः प्रकारे उपदर्शितेन प्रकारेणान्यदपि स्त्रीवचनं पुंवतचनं नपुंसकवचनं वा वदति साधुस्तदा तस्मिन्नेवं वदति या भाषा सा प्रज्ञापनी भाषा नैषा भाषा मृषेति ?, भगवानाह-प्रज्ञापनी एषा भाषा, शाब्दव्यवहारानुसरणतो दोषाभावात्, अन्यथास्तिथे हि वस्तुन्यन्यथा भाषणं दोषः यदा तु यद्वस्तु यथावस्थितं तत् तथा भाषते, तदा को दोष इति ? ॥ तदेवं भाषाप्रतिपादनविषया ये केचन सन्देहास्ते सर्वेऽप्यपनीताः, सम्प्रति सामान्यतो भाषायाः कारणादि पिपृच्छिषुराह-

मू. *(३७९) भासा णं भंते ! किमादीया किंपवहा किंसंठिया किं पज्जवसिया ?, गो० ! भासा णं जीवादीया सरीरप्पभवा वज्जसंठिया लोगंतपज्जवसिया पन्नत्ता,*

वृ. 'भासा णं भंते ! किमाइया' इत्यादि, भाषा अवबोधबीजभूता, णमिति वाक्यालङ्कारे, किमादिका-उपादा नकारणव्यतिरेकेण किमादिः-मौलं कारणं यस्याः सा किमादिका, तथा किंप्रभवा-कस्मात् प्रभव-उत्पादो यस्याः सा किंप्रभवा, सत्यपि मौले कारणे पुनः कस्मात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणान्तरादुत्पद्यते इति भावः, तथा किंसस्थितेति–केनाकारेण संस्थिता किंसंस्थिता, कस्येव संस्थानमस्या इति भावः, तथा किंपर्यवसिता इति–कस्मिन् स्थाने पर्यवसिता–निष्ठां गता किंपर्यवसिता ?, भगवानाह–गौतम ! 'जीवादिका' जीव आदिः–मौलं कारणं यस्याः सा जीवादिका जीवगततथाविधप्रयत्नमन्तरेणावबोधबीजभूतभाषाया असम्भवात्, आह च भगवान् भद्रबाहुस्वामी–

॥ १ ॥ "तिविहंमि सरीरंमि जीवपएसा हवंति जीवस्स ।
जेहि उ गेण्हइ गहणं तो भासइ भासओ भासं ॥"

मू. (३८०) *'भासा कओ य पभवति, कतिहि व समएहि भासती भासं ।*
भासा कतिप्पगारा कति वा भासा अनुमया उ ॥

मू. (३८१) *सरीरप्पभवा भासा दोहि य समएहिं भासती भासं ।*
भासा चउप्पगारा दोन्नि य भासा अनुमता उ ॥

वृ. "किंपभवा' इत्यस्य निर्वचनमाह–'शरीरप्रभवा' औदारिकवैक्रियाहाराकान्यतमशरीरसामर्थ्यादिव भाषाद्रव्यविनिर्गतेः, तथा किंसंस्थिता इत्यस्य निर्वचनं 'वज्रसंस्थिता' वज्रस्येव संस्थानं यस्याः सा वज्रसंस्थिता, भाषाद्रव्याणि हि तथाविधप्रयत्ननिसृष्टानि सन्ति सकलमपि लोकमभिव्याप्नुवन्ति, लोकश्च वज्राकारसंस्थित इति सापि वज्रसंस्थिता, 'किंपर्यवसिते'त्यत्र निर्वचनं लोकान्तपर्यवसिता, परतो भाषाद्रव्याणां गत्युपष्टम्भकधर्म्मास्तिकायाभावतो गमनासम्भवात्, प्रज्ञप्ता मया शेषैश्च तीर्थकृद्भिः –पुनरपि प्रश्नमाह 'भासा कतो य पभवा' इत्यादि, भाषा कुतो–योगात् प्रभव ति–उत्पद्यते काययोगाद्वाग्योगाद्वा ? तथा कतिभिः समयैर्भाषा भाषते ? किमुक्तं भवति ? –कतिभिः समयैर्निसृज्यमानद्रव्यसंहत्यात्मिका भाषा भवति, तथा भाषा कतिप्रकारा–कतिप्रभेदा ? कति वा भाषाः साधूनां वक्तुमनुमता–अनुज्ञाता ?

अत्र निर्वचनं–'सरीरप्पभा' इत्यादि, अत्र शरीरग्रहणेन शरीरयोगः परिग–ह्यते, शरीरमात्रप्रभवत्वस्य प्रागेव निर्णीतत्वात्, शरीरप्रभवा इति कोऽर्थः ? –काययोगप्रभवा, तथाहि–काययोगेन भाषायोग्यान् पुद्गलान् गृहीत्वा भाषात्वेन परिणमय्य वाग्योगेन निसृजति, ततः काययोगबलाद्भाषा उत्पद्यते इति काययोगप्रभवेत्युक्तं, आह च भगवान् भद्रबाहुस्वामी– "गिण्हइ य काइएणं निसरइ तह वाइएण जोगेण'मिति, 'कइहि व समएहिं भासाई भास'मित्यस्य निर्वचनं द्वाभ्यां समयाभ्यां भाषते भाषां, तथाहि–एकेन समयेन भाषायोग्यान् पुद्गलान् गृह्णाति द्वितीये समये भाषात्वेन परिणमय्य विसृजतीति, 'भासा कइप्पगारा' इत्यस्य निर्वचनं भाषा सत्यादिभेदाच्चतुःप्रकारा ते च सत्यादयो भेदाः प्रागेव भाविता इति, 'कइ वा भासा अनुमया य' इत्यस्य निर्वचनं सत्यादी द्वे भाषे साधूनां वक्तुमनुमते, तद्यथा–सत्या असत्यामृषा च, अर्थात् ये मृषासत्यामृषे ते नानुज्ञाते, तयोरयथाव- स्थितार्थप्रतिपादनपरतया मुक्तिप्रतिपन्थित्वात्,

मू. (३८२) *कतिविहा णं भंते ! भासा पन्नत्ता ?, गो० ! दुविहा भासा पं०, तं०–पज्ञत्तिया य अपज्ञत्तिया य, पज्ञत्तिया णं भंते ! भासा कतिविहा पं० ?, गो० ! दुविहा पं० तं०–सच्चा मोसा य, सच्चा णं भंते ! भासा पज्ञत्तिया कतिविहा पं० गो० ! दंसविहा, पं० तं०– जाणवयसच्छा १ सम्मयसच्चा २ ठवणासच्चा ३ नामसच्चा ४ रुवसच्चा ५ पडुसच्चा ६ ववहारसच्चा ७ भावसच्चा ८*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जोगसच्चा ९ ओवम्मसच्चा १०, ।

वृ. पुनः प्रश्नयति-'कइविहा ण'मित्यादि, 'पज्जत्तिया अपज्जत्तिया' इति पर्याप्ता नाम या प्रतिनियतरूपतया अवधारयितुं शक्यते सा पर्याप्ता, सा च सत्या मृषा वा द्रष्टव्या, उभयोरपि प्रतिनियतरूपतयाऽवधारयितुं शक्यत्वात्, या तु मिश्रतया उभयप्रतिषेधात्मकतया वा न प्रतिनियतरूपतयाऽवधारियुं शक्यते सा अपर्याप्ता, सा च सत्यामृषा असत्यामृषा वा द्रष्टव्या, उभयोरपि प्रतिनियतेन रूपेणावधारयितुमशक्यत्वात्, 'पज्जत्तिया णं भंते !' इत्यादि भावितं, नवरं सत्या मृषा चेत्युक्तमतः सत्याभेदावगमाय प्रश्नमाह-'सच्चा णं भंते ! भासा पज्जत्तिया कइविहा पण्णत्ता' इति पाठसिद्धं, भगवानाह-'गोयमा !' इत्यादि ।

मू. (३८३) *जनवय १ समंत २ ठवणा नामे ४ रूवे ५ पडुच्चसच्चे ६ य ।*
ववहार ७ भाव ८ जोगे ९ दसमे ओवम्मसच्चे य १० ॥

वृ. 'जनवयसच्चा' इति तं तं जनपदमधिकृत्येषार्थप्रतिपत्तिजनकतया व्यवहारहेतुत्वात् सत्या जनपदसत्या यथा कोङ्कणादिषु पयः पिच्चमित्यादि १,

सम्मतसत्या या सकललोकसाम्मत्येन सत्यतया प्रसिद्धा कुमुदकुवलयोत्पलतामरसानां समानेऽपि पङ्कसंभवत्वे गोपालजना अरविन्दमेव पङ्कजं मन्यन्ते न शेषमित्यरविन्दमेव पङ्कजमिति सम्मतसत्या २ स्थापनासत्या या तथाविधमङ्कादिविन्यासं मुद्राविन्यासं चोपलभ्य प्रयुज्यते यथा एककं पुरतो बिन्दुद्वयसहितमुपलभ्यशतमिदमिति, बिन्दुत्रयसहितं सहस्रमिदमिति, तथा तथाविधं मुद्राविन्यासमुपलभ्य मृत्तिकादिषु माषोऽयं कार्षापणोऽयमिति,

तथा नामतः सत्या नामसत्या यथा कुलमवर्द्धयन्नपि कुलवर्द्धन इति,

तथा रूपतः सत्या रूपसत्या, यथा दम्भतो गृहीतप्रव्रजितरूपः प्रव्रजितोऽयमिति,

तथा प्रतीत्य-आश्रित्य वस्त्वन्तरं सत्या प्रतीत्यसत्या यथा अनामिकाया कनिष्ठामधिकृत्य दीर्घत्वं मध्यमामधिकृत्य ह्रस्वत्वं, न च वाच्यं कथमेकस्यां ह्रस्वत्वं दीर्घत्वं च तात्त्विकं ?, परस्परविरोधादिति, भिन्ननिमित्तत्वेन परस्परविरोधासम्भवात्, तथाहि-तामेव यदि कनिष्ठां मध्यमां वा एकामङ्गुलिमङ्गीकृत्य ह्रस्वत्वं दीर्घत्वं च प्रतिपाद्येत ततो विरोधःसम्भवेत्, एकनिमित्तपरस्परविरुद्धकार्यद्वयासम्भवात्, यदा त्वेकामधिकृत्य हस्वत्वमपरामधिकृत्य दीर्घत्वं तदा सत्त्वासत्त्वयोरिव भिन्ननिमित्तत्वान्न परस्परं विरोधः, अथ यदि तात्त्विके ह्रस्वत्वदीर्घत्वे तत ऋजुत्ववक्रत्वे इव कस्मात्ते परनिरपेक्षे न प्रतिभासेते ?, तस्मात् परोपाधिकत्वात् काल्पनिके इमे इति, तदयुक्तं, द्विविधा हि वस्तुनो धर्माः-सहकारिव्यङ्ग्यरूपा इतरे च, तत्र ये सहकारिव्यङ्ग्यरूपास्ते सहकारिसम्पर्कवशात् प्रतीतिपथमायान्ति, यथा पृथिव्यां जलसम्पर्कतो गन्धः, इतरे त्वेवमेवापि यथा कर्पूरादिगन्धः, ह्रस्वत्वदीर्घत्वेन अपि च सहकारिव्यङ्ग्यरूपे, ततस्ते तं सहकारिणामासाद्याभिव्यक्तिमायात इत्यदोषः,

तथा व्यवहारो-लोकविवक्षा, व्यवहारतः सत्या व्यवहारसत्या, यथा गिरिर्दह्यते गलति भाजनं अनुदरा कन्या अलोमिका एडका, लोका हि गिरिगततृणदाहे तृणादिना सह गिरेरभेदं विवक्षित्वा गिरिर्दह्यते इति ब्रुवन्ति, भाजनादुदके श्रवति उदकभाजनयोरभेदं विवक्षित्वा गलति भाजनमिति, संभोगबीजप्रभवोदराभावे अनुदरा इति, लवनयोग्यलोमाभावे अलोमिकेति, ततो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकव्यवहारमपेक्ष्य साधोरपि तथाब्रुवतो भाषा व्यवहारसत्या भवति,

तथा भावो वर्णादिर्भावतः सत्या भावसत्या, किमुक्तं भवति ? –यो भावो वर्णादिर्यस्मिन्नुत्कटो भवति तेन या सत्या भाषा (सा) भावसत्या, यथा सत्यपि पञ्चवर्णसम्भये बलाका शुक्लेति,

तथा योगः–सम्बन्धः तस्मात् सत्या योगसत्या, तत्र छत्रयोगात् विवक्षितशब्दप्रयोगकाले छत्राभावेऽपि छत्रयोगस्य सम्भवात् छत्री एवं दण्डयोगात् दण्डी,

औपम्यसत्या यथा समुद्रवत्तडागः, अत्रैवार्थे विनेयजनानुग्रहाय सङ्ग्रहणिगाथामाह– 'जनवयसम्मयठवणा' इत्यादि भावितार्था।

मू. (३८४) *मोसा णं भंते ! भासा पज्ञत्तिया कतिविहा पं० ?, गो० ! दसविहा पं०, तं०–कोहनिस्सिया १ माननिस्सिया २ मायानिस्सिया ३ लोहनिस्सिया ४ पेज्ञनिस्सिया ५ दोसनिस्सिया ६ हासनिस्सिया ७ भयनि० ८ अक्खाइयानिस्सिया ९ उवघाइयनिस्सिया १० –*

वृ. मृषाभाषा दशविधा, तद्यथा– 'कोहनिस्सिया' इत्यादि, क्रोधान्निःसृताक्रोधाद्विनिर्गता इत्यर्तः एवं सर्वत्रापि भावनीयं, तत्र क्रोधाभिभूतो विसंवादनबुद्धा परप्रत्ययनाय यत्सत्यमसत्यं वा भाषते तत्सर्वं मृषा, तस्य हि आशयोऽतीव दष्टस्ततो यदपि धुणाक्षरन्यायेन सत्यमापतति साठ्यबुध्या वोपेत्य सत्यं भाषते तदाऽप्याशयदोषदुष्टमिति मृषेति १,

माननिःसृता यत् पूर्वमननुभूतमप्यैश्वर्यमात्मोत्कर्षख्यापनायानुभूतमस्माभिस्तदानीमैश्वर्यमित्यादि वदतः २ मायानिःसृता यत् परवञ्चनाद्यभिप्रायेण सत्यमसत्यं वा भाषते लोभनिःसृता यल्लोभाभिभूतः कुटतुलादि कृत्वा यथोक्तप्रमाणमिदं तुलादीति वदतः ४ प्रेमनिःसृता यदतिप्रेमवशाद्दासोऽहं तवेत्यादि वदतः ५

द्वेषनिःसृता यत्प्रतिनिविष्टः तीर्थकरादीनामप्यवर्णं भाषते ६ हास्यनिःसृता यत्केलिवशतोऽनृतभाषणं ७ भयनिःसृता तस्करादिभयेनासमञ्जसभाषणं ८ आख्यायिकानिःसृता यत्कथास्वसम्भाव्याभिधानं ९ उपघातनिःसृता चौरस्त्वमित्याद्यभ्याख्यानं १०,

मू. (३८५) *'कोहे माणे माया लोभे पिज्ञे तहेव दोसे य।*
हास भए अक्खाइय उवधाइयनिस्सिया दसमा ॥'

वृ. अत्रापि सङ्ग्रहणिगाथामाह– 'कोहे माणे' इत्यादि, भावितार्थाः।

मू. (३८६) *अपज्ञत्तिया णं भंते ! कइविहा भासा पं० ?, गो० ! दुविहा पं०, तं०–सच्चामोसा असच्चामोसा य, सच्चामोसा णं भंते ! भासा अपज्ञत्तिया कतिविहा पं० ?, गो० ! दसविहा पं० तं०, उप्पन्नमिस्सिया १ विगतमिस्सिया २ उप्पन्नविगतमिस्सिया ३ जीवमिस्सिया ४ अजीवमिस्सिया ५ जीवाजीवमिस्सिया ६ अनंतमि० ७ परित्तमिस्सिया ८ अद्धामिस्सिया ९ अद्धद्धामिस्सिया १०। असच्चामोसा णं भंते ! भासा अपज्ञत्तिया कइविहा पं०, गो० ! दुवालसविहा, पं०, तं०–*

वृ. सत्यामृषा दशविधा, तद्यथा– 'उप्पन्नमिस्सिया' इत्यादि, उत्पन्ना मिश्रिता अनुत्पन्नैः सह सङ्ख्यायपूर्णार्थं यत्र सा उत्पन्नमिश्रिता, एवमन्यत्रापि यथायोगं भावनीयं, तत्रोत्पन्नमिश्रिता यथा कस्मिंश्चित् ग्रामे नगरे वा ऊनेष्वधिकेषु वा दारकेषु जातेषु दश दारका अस्मिन्नद्य जाता इत्यादि १, एवमेव मरणकथने विगतमिश्रिता २, तथा जन्मतो मरणस्य च कृतपरिमाणस्याभिधाने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विसंवादेन चोत्पन्नविगतमिश्रिता ३, तथा प्रभूतानां जीवतां स्तोकानां च मृतानां शङ्खशङ्खनकादीनामेकत्र राशौ दृष्टे यदा कश्चिदेवं वदति–अहो महानू जीवराशिरयमिति तदा सा जीवमिश्रिता, सत्यामृषात्वं चास्या जीवत्सु सत्यत्वात् मृतेषु मृषात्वात् ४, तथा यदा प्रभूतेषु मृतेषु स्तोकेषु जीवत्सु एकत्र राशीकृतेषु शङ्खादिष्वेवं वदति–अहो महानयं मृतो जीवराशिरिति तदा सा अजीवमिश्रिता, अस्या अपि सत्यामृषात्वं मृतेषु सत्यत्वात् जीवत्सु मृषात्वात् ५,

तथा तस्मिन्नेव राशौ एतावन्तोऽत्र जीवन्त एतावन्तोऽत्र मृता इति नियमेनावधारयतो विसंवादे जीवाजीवमिश्रिता ६, तथा मूलकादिकमनन्तकायं तस्यैव सत्कैः परिपाण्डुपत्रैरन्येन वा केनचित्प्रत्येकवनस्पतिना मिश्रमवलोक्य सर्वोऽप्येषोऽनन्तकायिक इति वदतोऽनन्तमिश्रिता ७, तथा प्रत्येकवनस्पतिसङ्घातमनन्तकायिकेन सह राशीकृतमवलोक्यप्रत्येकवनस्पतिरयं सर्वोऽपीति वदतः प्रत्येकमिश्रिता ८, तथा अद्धा–कालः, स चेह प्रस्तावात् दिवसो रात्रिर्वा परिगृह्यते, स मिश्रितो यया साऽद्धामिश्रिता, यथा कश्चित् कञ्चन त्वरयन् दिवसे वर्त्तमान एव वदति–उत्तिष्ठ रात्रिर्यातेति, रात्रौ वा वर्त्तमानायामुत्तिष्ठोद्गतः सूर्य इति ९, तथा दिवसस्य रात्रेर्वा एकदेशोऽद्धाद्धा सा मिश्रिता यया सा अद्धाद्धामिश्रिता, यथा प्रथमपौरुष्यामेव वर्त्तमानायां कश्चित् कञ्चन त्वरयन् एवं वदति–चल मध्याह्नीभूतं इति। असत्यामृषा द्वादशविधा, तद्यथा–

मू. *(३८७) आमंतणि १ आणमणी २ जायणि ३ तह पुच्छणी य ४ पन्नवणी ५ ।*
पच्चक्खाणी ६ भासा भासा इच्छाणुलोमा, ७ य ॥

वृ. 'आमंताणि' इति तत्र आमन्त्रणी हे देवदत्त इत्यादि, एषा हि प्रागुक्तसत्यादिभाषात्रयलक्षणविकलत्वान्न सत्या नापि मृषा नापि सत्यामृषा केवलं व्यवहारमात्रप्रवृत्तिहेतुरित्यसत्यामृषा १ एवं सर्वत्र भावना कार्या, आज्ञापनी कार्ये परस्य प्रवर्त्तनं, यथेदं कुर्विति २ याचनी कस्यापि वस्तुविशेषस्य देहीति मार्गणं ३ पृच्छनी अविज्ञातस्य सन्दिग्धस्य कस्यचिदर्थस्य परिज्ञानाय तद्विदः पार्श्वे चोदना ४ प्रज्ञापनी विनीतविनयस्य विनेयजनस्योपदेशदानं यथा प्राणिवधान्निवृत्ता भवन्ति भवान्तरे प्राणिनो दीर्घायुष इत्यादि, उक्तं च–

॥१॥ "पाणिवहाउ नियत्ता हवंति दीहाउया अरोगा य य
एमाई पन्नत्ता पन्नवणी वीयरागेहिं ॥" ५

याचमानस्य प्रतिषेधवचनं प्रत्याख्यानी ६ इच्छानुलोमा नाम यथा कश्चित्किञ्चित्कार्यमारभमाणः कञ्चन पृच्छति, स प्राह–करोतु भवान् मामाप्येतदभिप्रेतमिति ७।

मू. *(३८८) अणभिग्गहिया भासा ८ भासा य अभिग्गहंमि बोद्धव्वा ९ ।*
संसयकरणी भासा १० वोगड ११ अव्वोगडा चेव १२ ॥

वृ. अनभिग्रहा यत्र न प्रतिनियतार्थावधारणं, यथा बहुकार्येष्ववस्थितेषु कश्चित् कञ्चन पृच्छति–किमिदानीं करोमि ?, स प्राह–यत्प्रतिभासते तत्कुर्विति ८ अभिगृहीता प्रतिनियतार्थावधारणं, यथा इदभिदानीं कर्त्तव्यमिदं नेति ९ संशयकरणी या वाक् अनेकार्थाभिधायितया परस्य संशयमुत्पादयति, यथा सैन्धवमानीयतामित्यत्र सैन्धवशब्दो लवणवस्त्रपुरुषवाजिषु १० व्याकृता या प्रकटार्था ११ अव्याकृता अतिगम्भीरशब्दार्था अव्यक्ताक्षरप्रयुक्ता वा अविभावितार्थत्वात् १२। शेषं सुगमं, यावत् 'कइ णं भंते ! भासज्ञाया' इत्यादि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३८९) जीवा णं भंते! किं भासगा अभासगा ?, गो० ! जीवा भासगावि अभासगावि, से केणट्ठेणं भंते ! एवं वुच्चति जीवा भासगावि अभासगावि ?, गो० ! जीवा दुविहा पं०, तं०– संसारसमावन्नगा य असंसारसमावन्नगा य, तत्थ णं जे ते असंसारसमावन्नगा ते णं सिद्धा सिद्धा णं अभासगा, ।

तत्थ णं जे ते संसारसमावन्नगा ते दुविहा पं०, तं०–, सेलेसीपडिवण्णगा य असेलेसीपडिवण्णगा य, तत्थ णं जे ते सेलेसिपडिवण्णगा ते णं अभासगा, तत्थ णं जे ते असेलेसिपडिवण्णगा ते दुविहा पं०, तं०–एगिंदिया य अणनेगिंदिया य, तत्त णं जे ते एगिंदिया ते णं अभासगा, तत्थ णं जे ते अनेगेंदिया ते दुविहा पं०, तं०–पज्ञत्तगा य अपज्ञत्तमा य, तत्थ णं जे ते अपज्ञत्तगा ते णं अभासगा, तत्थ णं जे ते पज्ञत्तगा ते णं भासगा, से एएणट्ठेणं गोयमा ! एवं वुच्चति–जीवा भासगावि अभासगावि। नेरइया णं भंते! किं भासगा अभासगा ?, गो० ! नेरइया भासगावि अभासगावि, से केणट्ठेणं भंते ! एवं वुच्चति–नेरइया भासगावि अभासगावि ? गो० ! नेरइया दुविहा, पं० तं०– पज्ञत्तगा य अपज्ञत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं अभासगा, तत्त णं जे ते पज्ञत्तगा ते णं भासगा, से एएणट्ठेणं गो० ! एवं वुच्चति–नेरइया भासगाविअभासगावि, एवं एगिंदियवज्ञाणं निरंतरं भाणियव्वं ॥

मू. (३९०) कति णं भंते! भासज्ञाया पन्नत्ता ?, गो० ! चत्तारि भासज्ञाया प०, तं०–सच्चमेगं भासज्ञायं बितियं मोसं ततियं सच्चामसों चउत्तं असच्चामोसं, जीवा णं भंते ! किं सच्चं भसं भासंति मोसं भासं भासंति सच्चामोसं भासं भासंति असच्चामोसं भासं भासंति ?, गो० ! जीवा संच्चंपि भासं भसंति मोसंपि भासं भासंति सच्चामोसंपि भासं भासंति असच्चामोसंपि भासं भासंति,

नेरइया णं भंते ! किं सच्चं भासं भासंति जाव असच्चामोसं भासं भासंति ?, गो० ! नेरइया णं सच्चंपि भासं भासंति जाव असच्चामोसंपि भासं भासंति, एवं असरुकुमारा जाव थणियकुमारा, बेइंदियतेइंदियचउरिंदिया य नो सच्चं नो मोसं नो सच्चमोसं भासं भासंति असच्चमामोसं भासं भासंति,

पंचिंदियतिरिक्खजोणिया णं भंते ! किं सच्चं भासं भासंति जाव किं असच्चमीमोसं भासं भसंति ?, गो० पंचिंदियतिरिक्खजोणियाणो सच्चं भासं भासंति नो मोसं भासं भासंति णो सच्चामोसं भासं भासंति एगं असच्चामोसं भासं भासंति नन्नत्थ सिक्खापुव्वगं उत्तरगुणलद्धिं वा पडुच्च सच्चंपि भासं भासंति मोसंपि सच्चामोसंपि असच्चामोसंपि भासं भासंति, मणुस्सा जाव वेमाणिया, एते जहा जीवा तहा भाणियव्वा ॥

वृ. कति भदन्त ! भाषाजातानि–भाषाप्रकाररूपाणि प्रज्ञप्तानि ?, इदं प्रागुक्तमपि बूयोऽप्युपात्तं सूत्रान्तरम्बन्धनार्थं, तान्येव सूत्रान्तराणि दर्शयति– 'जीवा णं भंते ! किं सच्चं भासं भासंति इत्यादि सुगमं, नवरं द्वित्रिचतुरिन्द्रियेषु सत्यदिभाषात्रयप्रतिषेधस्तेषां सम्यक्परिज्ञानपरवञ्चनाद्यभिप्रायासम्भवात्,

तिर्यक्पञ्चेन्द्रिया अपि न सम्यग्यथावस्थितवस्तुप्रतिपादनाभिप्रायेणभाषन्ते नापि परविप्रतारणवुध्या किन्तु यदा भाषन्ते तदा कुपिता अपि परं मारयितुकामा अप्येवमेव भाषन्ते ततस्तेषामपि भाषा असत्यामृषा, किं सर्वेषामपि तेषामसत्यामृषा ?, नेत्याह– 'नन्नत्थे' त्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्यादिकां भाषां न भाषन्ते शिक्षादेरन्यत्र, शिक्षापूर्वकं पुनः शुकसारिकादयः संस्कारविशेषात् तथा कुतश्चित्तथाविधक्षयोपशमविशेषाज्जातिस्मरणरूपां विशिष्टव्यवहारकौशलरूपां वा लब्धिं प्रतीत्य इत्यादिकां चतुर्विधामपि भाषां भाषन्ते, शेषं सुगमं ॥

सम्प्रति भाषाद्रव्यग्रहणादिविषयसंशयापनोदार्थमाह–

मू. (३९१) *जीवे णं भंते ! जातिं दव्वातिं भासत्ताए गिण्हति ताइं किं ठियाइं गेण्हति अठियाइं गेण्हति ?, गो० ! ठियाइं गिण्हति नो अठियाइं गिण्हति, जाइं भंते ! ठियाइं गिण्हति ताइं किं दव्वतो गिण्हति खेत्ततो गिण्हति कालतो गिण्हति भावतो गिण्हति ? गो० ! दव्वओवि गिण्हति खेत्तओवि कालओवि भावओवि गिण्हति,*

जातिं भंते ! दव्वओ गेण्हति ताइं किं एगपदेसिताइं गिण्हति दुपदेसियाइं जाव अनंत-पदेसियाइं गेण्हति ?, गो० ! नो एगपदेसियाइं गेण्हति जाव नो असंखिज्जपदेसियाइं, गिण्हइ अनंतपदेसियाइं गेण्हति, जाइं खेत्तओ गेण्हति ताइं किं एगपएसोगाढाइं गेण्हति दुपएसोगाढाइं गेण्हति जाव असंखेज्जपएसोगढाइं गेण्हति ?, गो० ! नो एगपएसोगाढइयं गेण्हति जाव नो संखेज्जपएसोगाढाइं गेण्हति असंखेज्जपएसोगाढाइं गेण्हति ?, गो० ! नो एगपएसोगाढाइं गेण्हति जाव नो संखेज्जपएसोगाढइं गेण्पति असंखेज्जपएसोगाढाइं गेण्हति,

जाइं कालतो गेण्हति ताइं किं एगसमयठिइयाइं गेण्हति दुसमयठिइयाइं गिण्हति जाव असंखिज्जसमयठिइयाइं गेण्हति ?, गो० ! एगसमयठितीयाइंपि गेण्हति दुसमयठितीयाइंपि गेण्हति जाव असंखेज्जसमयठितीयाइंपि गेण्हति, जाइं भावतो गेण्हति ताइं किं वण्णमंताइं गेण्हति गंधमंताइं रसमंताइं फासमंताइं गेण्हति ?, गो० ! वण्णमंताइंपि जाव फासमंताइंपि गेण्हपति,

जाइं भावओ वण्णमंताइंपि गेण्हति ताइं किं एगवण्णाइं गेण्हति जाव पंचवण्णाइं गेण्हति गो० ! गहणदव्वाइं पडुच्च एगवण्णाइंपि गेण्हति जाव पंचवण्णाइंपि गेण्हति, सव्वग्गहणं पडुच्च नियमा पंचवण्णाइं गेण्हति, तंजहा–कालाइं नीलाइं लोहियाइं हालिद्दाइं सुक्किल्लाइं, जाइं वण्णतो कालाइं गेण्हति ताइं किं एगगुणकालाइं गेण्हति जाव अणंतगुणकालाइं गिण्हति ?, गो० ! एगगुणकालाइंपि गिण्हति जाव अनंतगुणकालाइंपि गेण्हति, एवं जाव सुक्किल्लाइंपि,

जाइं भावतो गंधमंताइं गिण्हति ताइं किं एगगंधाइं गिण्हति दुगंधाइं गिण्हति ?, गो० ! गहणदव्वाइं पडुच्च एगगंधाइंपि दुगंधाइंपि गिण्हति, सव्वग्गहणं पडुच्च नियमा दुगंधाइं गिण्हति; जाइं गंधतो सुब्भिगंधाइं गिण्हति ताइं किं एगगुणसुब्भिगंधाइं गिण्हति जाव अनंतगुणसुब्भिगंधाइंपि गिण्हति ?, गो० ! एगगुणसुब्भिगंधाइंपि जाव अनंतगुणसुब्भिगंधाइंपि गेण्हइ, एवं दुब्भिगंधाइंपि गेण्हइ, जाइं भावतो रसमंताइं गेण्हति ताइं किं एगरसाइं गेण्हति जाव किं पंचरसाइं गेण्हति ?, गो० ! गहणदव्वाइं पडुच्च एगरसाइंपि गेण्हति जाव पंचरसाइंपि गेण्हति सव्वग्गहणं पडुच्च नियमा पंचरसाइं गेण्हति, जाइं रसओ तित्तरसाइं गेण्हति ताइं किं एगगुणतित्तरसाइं गिण्हति जाव अनंतगुणतित्तरसाइं गिण्हति ?, गो० ! एगगुणतित्ताइंपि गिण्हइ जाव अनंतगुणतित्ताइंपि गिण्हति, एवं जाव मधुररसो,

जाइं भावतो फासमंताइं गेण्हति ताइं किं एगफासाइं गेण्हइ जाव अट्ठफासाइं गिण्हति गो० ! गहणदव्वाइं पडुच्च नो एगफासाइं गेण्हति, दुफासाइं गिण्हइ जाव चउफासाइं गेण्हति, नो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचफासाइं गेण्हति, जाव नो अट्ठफासाइं गेण्हति, सव्वगहणं पडुच्च नियमा चउफासाइं गेण्हति, तंजहा–सीतफासाइं गेण्हति उसिणफासाइं निद्धफासाइं लुक्खफासाइं गेण्हति, जाइं फासतो सीताइं गिण्हति ताइं किं एगगुणसीताइं गेण्हति जाव अनंतगुणसीताइं गेण्हति ?, गो० ! एगगुणसीताइंपि गेण्हति जाव अनंतगुणसीताइंपि गेण्हति, एवं उसिणनिद्धलुक्खाइं जाव अनंतगुणाइंपि गिण्हति,

जाइं भंते ! जाव अनंतगुणलुक्खाइं गेण्हति ताइं किं पुट्ठाइं गेण्हति अपुट्ठाइं गेण्हति ?, गो० ! पुट्ठाइं गेण्हति नो अपुट्ठाइं गेण्हति, जाइं भंते ! पुट्ठाइं गेण्हति ताइं किं ओगाढाइं गेण्हति अनोगाढाइं गेण्हति ?, गो० ! ओगाढाइं गेण्हति नो अनोगाढाइं गेण्हति, जाइं भंते ! ओगाढाइं गेण्हति ताइं किं अनंतरोगाढाइं गेण्हति परंपरोगाढाइं गेण्हति ?, गो० ! अनंतरोगाढाइं गिण्हति नो परंपरोगाढाइं गेण्हति, जाइं भंते ! अनंतरोगाढाइं गेण्हति ताइं भंते ! किं अणूइं गेण्हति बायराइं गेण्हति ?, गो० ! अणूइंपि गेण्हति बायराइंपि गेण्हति,

जाइं भंते ! अणूइं गेण्हति ताइं किं उड्ढं गेण्हति अधे गेण्हति तिरियं गेण्हति ?, गो० ! उड्ढंपि गेण्हति अधेवि गेण्हति तिरियंपि गेण्हति, जाइं भंते ! उड्ढंति गेण्हति अधेवि गेण्हति तिरियंपि गेण्हति ताइं किं आदि गेण्हति मज्झे गेण्हति पज्जवसाणे गेण्हति ?, गो० ! आदिंपि गेण्हति मज्झेवि गेण्हति पज्जवसाणेवि गेण्हति, जाइं भंते ! आदिंपि गिण्हति मज्झेवि गेण्हति पज्जवसाणेवि गिण्हति ताइं किं सविसए गिण्हति अविसए गिण्हति ?, गो० ! सविसए गेण्हति नो अविसए गेण्हति,

जाइं भंते ! सविसए गेण्हति ताइं किं आनुपुव्विं गेण्हति अनानुपुव्विं गेण्हति ?, गो० ! आनुपुव्विं गेण्हति, नो अनानुपुव्विं गेण्हति, जाइं भंते ! आनुपुव्विं गेण्हति ताइं किं तिदिसिं गेण्हति जाव छद्दिसिं गेण्हति ?, गो० ! नियमा छद्दिसिं गेण्हति० ।

वृ. 'जीवे णं भंते ! जाइं दव्वाइं भासत्ताए गिण्हइ' इत्यादि, सुगमं नवरं 'ठियाइं' स्थितानि न गमनक्रियावन्ति द्रव्यतश्चिन्तायामनन्तप्रादेशिकानि–अनन्तरपरमाण्वात्मकानि गृह्णति, नैकपरमाण्वाद्यात्मकानि, तेषां स्वभावत एव जीवाना ग्रहणायोग्यत्वात्, क्षेत्रचिनतायमसङ्ख्यात-प्रदेशावगाढानि, एकप्रदेशाद्यवगाढानां तथास्वभावतया ग्रहणायोग्यत्वात्, कालतश्चिन्तायामेक-समयस्थितिकान्यपि यावदसङ्ख्येयसमयस्थितिकान्यपि गृह्णति, पुद्गलानामङ्ख्येयमपि कालं यावदवस्थानसम्भवात्, तथा चोक्तं व्याख्याप्रज्ञप्तौ सैजनिरेजपुद्गलावस्थानचिन्तायां– 'अनंतपएसिए णं भंते ! खंधे केवइकालं सेए ?, गो० ! जहन्नेणं एक्कं समयं उक्कोसेणं आवलियाए असङ्खेज्जतिभागं, निरेए जहन्नेणं एक्कं समयं उक्कोसेणं असंखेज्जं काल'मिति, तेषां च गृहीतानां ग्रहणानन्तरसमये अवश्यं निसर्ग इति स्वभावस्यानन्तरसमये ग्रहणं प्रतिपत्तव्यं, अन्ये तु व्याचक्षते–एकसमयस्थितकान्यपीति आदिभाषापरिणामपेक्षया द्रष्टव्यं, विचित्रो हि पुद्गलानां परिणामः, तत एकप्रयत्नगृहीतमुक्ता अपि ते केचिदेकं समयं भाषात्वेनावतिष्ठन्ते केचिद् द्वौ समयौ यावत् केचिदसङ्ख्येयानपि समयानिति, तथा 'गहणदव्वाइं' इति गृह्यन्ते इति ग्रहणानि ग्रहणाननि च तानि द्रव्याणि च ग्रहणद्रव्याणि, किमुक्तं भवति ?–

यानि ग्रहणयोग्यानि द्रव्याणि तानि कानिचित् वर्णपरिणामेन एकेन वर्णेनोपेतानि कानिचित्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वाभ्यां कानिचित् त्रिभिः कानिचित् चतुर्भिकानिचित्पञ्चभिः, यदा पुनरेकप्रयत्नगृहीतानामपति सर्वेषां द्रव्याणामपि समुदायो विवक्ष्यते तदा नियमात् पञ्चवर्णानि गृह्णन्ति एवं गन्धरसेष्वपि भावनीयं, स्पर्शतः चिन्तायामेकस्पर्शप्रतिषेध एकस्यापि परमाणोवश्यं स्पर्शद्वयभावात्, तथा चोक्तम्-

॥१॥ "कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः।
एकरसगन्धवर्णो द्विस्पर्शः कार्यलिङ्गश्च ॥"

द्विस्पर्शानि-मृदुशीतानि मृदूष्णानीत्यादि, 'जाव चउफासा' इति यावच्छब्दकरणात् त्रिस्पर्शपरिग्रहः, तत्र त्रिस्पर्शान्येवं-कानिचित् द्रव्याणि किल मृदुशीतस्पर्शानि कानिचित् मृदुस्निग्ध-स्पर्शानि, तत्र मृदुस्पर्शो मृदुस्पर्श एवान्तर्भूत इत्येकस्पर्शः शीतस्निग्धरूपो तु द्वान्यौ स्पर्शाविति समुदायमधिकृत्य त्रिस्पर्शानि, एवं स्पर्शान्तरयोगेऽपि त्रिस्पर्शानि भावनीयानि, कानिचिच्चतुः-स्पर्शानि तत्र चतुःस्पर्शेषु मृदुलघुरूपो द्वौ स्पर्शाववस्थितौ सूक्ष्मस्कन्धेषु तयोरवश्यंभावात्, अन्यौ तु द्वौ स्पर्शौ स्निग्धोष्णौ स्निग्धशीतौ रूक्षोष्णौ रूक्षशीतौ, सर्वसमुदायमपेक्ष्य नियमात्तानि चतुःस्पर्शानि गृह्णाति, तत्र यौ द्वौ मृदुलघुरूपौ स्पर्शाववस्थितौ ताववस्थितत्वादेव व्यभिचारा-मावान्न गण्येते ये त्वन्ये स्निग्धादयश्चत्वारस्ते किल वैकल्पिका इति तानधिकृत्य सूत्रमाह-, तद्यथा-'सीयफासाइं गेण्हइ' इत्यादि सुगमं, यावत् 'जाइं भंते! अनंतगुणलुक्खाइं गेण्हइ' इह किल चरमं सूत्रमनन्तरमिदमुक्तं 'अनंतगुणलुकअइखाइंपि गिण्हइ' ततः सूत्रसम्बन्धवशादिदमुक्तं, जाइं भंते! जाव अनंतगुणलुक्खाइं गेण्हइ', इति 'यावता जाइं भंते! एगगुणकालवण्णाइं' इत्याद्यपि द्रष्टव्यं, 'ताइं भंते! किं पुट्ठाइं' इत्यादि, तानि भदन्त! किं स्पृष्टानि-आत्मप्रदेशसंस्पृष्टानि गह्णाति, उतास्पृष्टानि? भगवानाह-गो० स्पृष्टानि-आत्मप्रदेशैः सह संस्पर्शमागतानि गृह्णाति नास्पृष्टानि, इहात्मप्रदेशैः संस्पर्शनमात्मप्रदेशावगाहक्षेत्राद्बहिरपि सम्भवति ततः प्रश्नयति-

'जाइं भंते!' इत्यादि, अवगाढानि-आत्मप्रदेशैः सह एकक्षेत्रावस्थितानि गृह्णन्ति नानवगाढानि, 'जाइं भंते!' इत्यादि, अनन्तरावगाढानि-अव्यवधानेनावस्थितानि गृह्णानि न परम्परावगाढानि, किमुक्तं भवति?-येष्वात्मप्रदेशेषु यानि भाषाद्रव्याण्यवगाढानि तैरात्मप्रदेशैस्तान्येव गृह्णाति न त्वेकद्वित्र्यात्मप्रदेशव्यवहितानि, 'जाइं भंते! अनंतरोगाढाइं' इत्यादि, अणून्यपि-स्तोकप्रदेशान्यपि गृह्णति बादराण्यपि-प्रभूतप्रदेशोपचितान्यपि, इहाणुत्वबादरत्वे तेषामेव भाषायोग्यानां स्कन्धानां प्रदेशस्तोकबाहुल्यापेक्षया व्याख्याते, मूलटीकाकारेण तथाव्याख्यानात्,

'जाइं भंते! अणूइंपि गेण्हइ' इत्यादि, ऊर्ध्वमपि अधोऽपि तिर्यगपीति, इह जीवस्य यावति क्षेत्रे ग्रहणयोग्यानि भाषाद्रव्याण्यवस्थितानि तावत्येव क्षेत्रे ऊर्ध्वधस्तिर्यकत्वं द्रष्टव्यं, 'जाइं भंते! उड्ढंपि गेण्हइ' इत्यादि, यानि भाषाद्रव्याण्यन्तर्मुहूर्त्तं यावत् ग्रहणोचितानि तानि ग्रहणोचितकालस्य उत्कर्षतोऽन्तर्मुहूर्त्तप्रमाणस्यादावपि-प्रथमसमये गृह्णति मध्येऽपि-द्वितीयादिष्वपि समयेषु गृह्णह्णाति, पर्यवसानेऽपि-पर्यवसा नसमयेऽपि गृह्णति, 'जाइं भंते! आइंपि गेण्हइ' इत्यादि, स्वविषयान्-स्वगोचरान् स्पृष्टवगाढानन्तरावगाढाख्यान् गृह्णति, न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वविषयान् स्पृष्टादिव्यतिरिक्तान्, 'जाइं भंते ! सविसए गेण्हइ' इत्यादिक, आनुपूर्वी नाम ग्रहणापेक्षया यथासन्नत्वं तद्विपरीता अनानुपूर्वी, तत्रानुपूर्व्या गृह्णाति न त्वनानुपूर्व्या, 'जाइं भंते आनुपुव्विं गेण्हइ' इत्यादि 'तिदिसिं'ति त्रिदिशि गृह्णाति तिसृभ्यो दिग्भ्य आगतानि गृह्णाति एवं चतुर्दिशि पञ्चदिशि षड्दिशि च, एवमुक्ते भगवानाह—गौतम ! नियमात् षड्दिशि गृह्णाति—षड्भ्यो दिग्भ्यः आगतानि गृह्णाति, भाषको हि नियमात् त्रसनाड्यां अन्यत्र त्रसकायासम्भवात्, त्रसनाड्यां च व्यवस्थितस्य नियमात् षड्दिगागतपुद्गलसम्भवात् ।

मू. (३९२) *''पुट्ठोगाढअनंतर अणू य तह बायरे य उड्ढमहे ।*
आदिविसयाणुपुव्विं नियमा तह छद्दिसिं चेव ॥''

वृ. एतेषामेवार्थानां सङ्ग्रहणिगाथामाह—'पुट्ठोगाढअनंत'रमित्यादि प्रथमतः स्पृष्टविषयं सूत्रं तदनन्तरमवगाढसूत्रं ततोऽनन्तरावगाढसूत्रं ततोऽणुबादरविषयं सूत्रं तदनन्तरमूर्ध्वाधःप्रभृतिविषयं सूत्रं तत 'आइ' इति उपलक्षणमेतत् आदिमध्यावसानसूत्रं ततो विषयसूत्रं तदनन्तरमानुपूर्वीसूत्रं ततो नियमात् षड्दिशितिसूत्रं, ।

मू. (३९३) *जीवे णं भंते ! जाइं दव्वाइं भासत्ताए गेण्हति ताइं किं संतरं गेण्हति निरंतरं गेण्हति ?, गो० ! संतरंपि गेण्हति, निरंतरंपि गेण्हति, संतरं गिण्हमाणे जहन्नेणं एगं समयं उक्कोसेणं असंखेज्जसमए अंतरं कट्टु गेण्हति, निरंतरं गेण्हमाणे जहन्नेणं दो समए उक्कोसेणं असंखेज्जसमए अणुसमयं अविरहियं निरंतरं गेण्हति,*

जीवे णं भंते ! जाइं दव्वाइं भासत्ताए गहियाइं निसिरइ ताइं किं संतरंनिसरइ निरंतरं निसरइ ?, गो० ? संतरं निसरइ नो निरंतरं निसरइ, संतरं निस्सरमाणे एगेणं समएणं गेण्हति एगेणं समएणं निसरइ, एतेणं गहणनिसरणोवाएणं जहन्नेणं दुसमइयं उक्कोसेणं असंखेज्जसमइयं अंतोमुहुत्तिगं गहणनिसरणोवायं करेति,

जीवे णं भंते ! जाइं दव्वाइं भासत्ताए गहियाइं निसिरति ताइं किं भिण्णाइं निसरति अभिन्नाइं निसरति ?, गो० ! भिन्नाइंपि निस्सरइ अभिन्नाइंपि निस्सरइ, जाइं भिन्नाइं निसरति ताइं अनंतगुणपरिवुड्ढीएणं परिववुड्ढमाणाइं लोयंतं फुसंति, जाइं अभिन्नाइं निसरइ ताइं असंखेज्जाओ ओगाहणवग्गणाओ गंता भेदमावज्जंति संखेज्जातिं जोअणातिं गंता विद्धंसमागच्छंति

वृ. 'जीवाणं भंते ! जाइं दव्वाइं' इद्याति, जीवा 'ण'मिति वाक्यालङ्कारे, भदन्त ! यानि द्रव्याणि भाषकत्वेन गृह्णाति तानि किं सान्तरं—सव्यवधानं गृह्णाति किं वा निरनन्तरं—निव्यवधानं भगवानाह—सान्तरमपि गृह्णति निरन्तरमपि, उभयथापि ग्रहणसम्भवात्, तत्र सानतरनिरन्तरग्रहणयोः प्रत्येकं कालमानं प्रतिपादयति—'संतरं गिण्हमाणे' इत्यादि, सान्तरं गृह्णन् जघन्यतः एकं समयं अन्तरं कृत्वा गृण्हाति, एतच्च जघन्यत एकं समयमन्तरं सततं भाषाप्रवृत्तस्य भाषमाणस्यावसेयं, तच्चेवं—

कश्चिदेकस्मिन् समये भाषापुद्गलान् गृहीत्वा तदनन्तरं मोक्षसमये अनुपादानं कृत्वा पुनस्तृतीये समये गृह्णत्येव न मुञ्चति द्वितीये समये प्रथमसमयगृहीतान् पुद्गलान् मुञ्चति अन्यान्नादत्ते, अथान्येन प्रयत्नविशेषेण ग्रहणमन्येन च प्रयत्नविशेषेण [च] निसर्गः तौ च परस्परं विरुद्धौ परस्परविरुद्धकार्यकरणात् ततः कथमेकस्मिन् समये तौ स्यातां ?,तदयुक्तं, जीवस्य हि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथास्वाभाव्यात् द्वावुपयोगावेकस्मिन् समये न स्यातां, ये तु क्रियाविशेषास्ते बहवोऽप्येकस्मिन् समये घटन्त एव, तथादर्शनात्, तथाहि-एकापि नर्त्तकी भ्रमणादिनृत्तंविदधाना एकस्मिन्नपि समये हस्तपादादिगता विचित्राः क्रियाः कुर्वती दृश्यते, सर्वस्यापि वस्तुनः प्रत्येकमेकस्मिन् समये उत्पादव्ययावुपजायेते, एकस्मिन्नेव च समये सङ्घातपरिशाटावपि, ततो न कश्चिद्दोषः, आह च भाष्यकृत्-

॥१॥ "गहणनिसग्गपयत्ता परोप्परकविरोहिणो कहं समये ?।
समए दो उपओगा न होज्ज किरियाण को दोसो ? ॥" इति,

तृतीये पुनः समये तानेव द्वितीयसमयोपात्तान् पुद्गलान् मुञ्चति न पुनरन्यानादत्ते, उत्कर्षेण त्वसङ्ख्येयान् यावन्निरनन्तरं गृह्णाति, तथा चाह-उत्कर्षेणासङ्ख्येयान् समयान् गृह्णाति इति योगः, कदाचित्परोऽसङ्ख्येययैः समयैरेकं ग्रहणं मन्येत तत आह-'अनुसमयं' प्रतिसमयं गृह्णाति, तदु कदाचिद्विरहितमपि व्यवहारतोऽनुसमयमित्युच्येत ततस्तदाशङ्क्य व्यवच्छे-दार्थमाह-अविरहितं, एवं निरन्तरं गृह्णति, तत्राद्ये समये ग्रहणमेव न निसर्गः, अगृहीतस्य निसर्गाभावात्, पर्यन्तसमये च मोक्ष एव, भाषाभिप्रायोपरमतो ग्रहणासम्भवात्, शेषेषु द्वितायादिषु समयेषु ग्रहणनिसर्गौ युगपत्करोति

'वा णं भंते! जाइं दव्वाइं भासत्ताए गहियाइं निसरइ' इत्यादि प्रश्नसूत्रं सुगमं, निर्विचनमाह- सान्तरं निसृजति नो निरन्तरं, इयमत्र भावना-इह तावत् ग्रहणं निरन्तरमुक्तं, तथा चानन्तरसूत्रं 'अणुसमयविरहियं निरंतरं गेण्हइ' इति ततो निसर्गोऽपि प्रथमवर्जेषु शेषेषु समयेषु निरन्तरं प्रतिपत्तव्यो, गृहीतस्यावश्यमनन्तरसमये निसर्गात्, ततो यदुक्तं 'सान्तरं निसृजति नो निरन्तर'- मिति, तत्र ग्रहणापेक्षया द्रश्टव्यं, तथाहि-यस्मिन् समये यानि भाषाद्रव्याणि गृह्णाति न तानि तस्मिन्नेव समये मुञ्चति, यथा प्रथमसमये गृहीतानि न तस्मिन्नेव प्रथमसमये मुञ्चति किन्तु पूर्वस्मिन् पूर्वस्मिन् समये ग-हीतानि उत्तरस्मिन् समये, ततो ग्रहणपूर्वो निसर्गोऽगृहीतस्य निसर्गायोगात् इति सान्तरं निसर्ग उक्तः, आह च भाष्यकृत-

॥१॥ "अनुसमयमनंतरियं गहणं भणियं ततो विमोक्खोऽवि।
जुत्तो निरन्तरोवि य भणइ कहं संतरो भणिओ ? ॥
॥२॥ गहणावेक्खाए तओ निरंतरं जंमि जाइं गहियाइं।
नउ तम्मि चेव निसरइ जह पढमे निसिरणं नत्थि ॥
निसिरिज्जइ नागहियं गहणंतरियंति संतरं तेणं।" इति,

एतदेव सूत्रकृदपि स्पष्टयति-'संतरं निसरमाणो एगेणं समएणं गेण्हइ एगेणं संएणं निस्सरइ' इति, एकेन-पूर्वपूर्वरूपेण समयेन गृह्णाति एकेन-उत्तरोत्तररूपेण समयेन निसृति, अथवा ग्रहणापेक्षं निसर्गभावात् एकेन-आद्येन समयेन गृह्णात्येव न निसृजत्यगृहीतस्य निसर्गाभावात्, तथा एकेन-पर्यवसानसमयेन निसृजत्येव न गृह्णाति, भाषाभिप्रायोपरमतो ग्रहणासम्भवात्, शेषेषु तु द्वितीयादिषु समयेषु युगपद् ग्रहणनिसर्गौ करोति, तौ च निरन्तरं जघन्यतो द्वौ समयौ उत्कर्षतोऽसङ्ख्येयान् समयान्, एतदेवाह-'एतेणं गहणनिसरणो वाएणं जहन्नेणं दुसमइयं उक्कोसेणं असंखेज्जसमइयं अंतोमुहुत्तिगं गहणनिसिरणं करेइ' इति, 'जीवेणं जाइं दव्वाइं' इत्यादि प्रश्नसूत्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुगमं, भगवानाह–गौतम ! भिन्नान्यपि निसृजति अभिन्नान्यपि, इयमत्र भावना–इह द्विविधो वक्ता–मन्दप्रयत्नस्तीव्रप्रयत्नश्च, तत्र यो व्याधिविशेषतोऽनादरतो वा मन्दप्रयत्नः स भाषाद्रव्याणि तथाभूतान्येव स्थूलखण्डात्मकानि निसृजति, यस्तु नीरोगतादिगुणयुक्तस्तथाविधाद-रभावतस्तीव्रप्रयत्नः स भाषाद्रव्याणि आदाननिसर्गप्रयत्नाभ्यां खण्डशः कृत्वा निसृजति, आह च भाष्यकृत–

॥१॥ "कोई मंदपयत्तो निसिरइ सकलाइं सव्वदव्वाइं ।
अन्नो तिव्वपयत्तो सो मुंचइ भिंदिउं ताइं ॥"

तत उक्तं–'भिन्नाइंपि निसिरइ अभिन्नाइंपि निस्सरइ, जाइं भिन्नाइं निसइ' इत्यादि, यानि तीव्रप्रयत्नो वक्ता प्रथमत एव भिन्नानि निसृजतितानि सूक्ष्मत्वात् बहुत्वाच्च प्रभूतान्यन्यानि द्रव्याणि वासयन्ति, तदन्यद्रव्यासकत्वादेव चानन्तगुणवृध्या परिवर्द्धमानानि षट्सु दिक्षु लोकान्तं स्पृश्नति, लोकान्तं प्राप्नुवन्तीत्यर्थः, उक्तं च–

॥१॥ "भिन्नाइं सुहुमयाए अनंतगुणवढ्ढियाइं लोगंतं ।
पावंति पूरयंति य भासाए निरंतरं लोगं ॥"

यानि पुनर्मन्दप्रयत्नो वक्ता यथाभूतान्येव प्राक् भाषाद्रव्याण्यासीरन् तथाभूतान्येव सकलान्यभिन्नानि भाषात्वेन परिणमय्य निसृजति तान्यसङ्ख्येया अवगाहनावर्गणा गत्वा, अवगाहनाः–एकैकस्य भाषाद्रव्यस्याधारभूता असङ्ख्येयप्रदशात्मकक्षेत्रविभागरूपास्ता-सामवगाहनानां वर्गणाः–समुदायास्ता असङ्ख्येया अतिक्रम्य भेदमापद्यन्ते, विशरारुभावं बिभ्रती-त्यर्थः,विशरारुभावं बिभ्राणानि च सङ्ख्येयानि योजनानि गत्वा विध्वंसमागच्छन्ति, शब्दपरिणामं विजहतीत्यर्थः, उक्तं च–

॥१॥ "गंतुमसंखेज्जाओ अवगाहणवग्गणा अभिन्नाइं ।
भिज्जंति धंसमेंति य संखिज्जे जोयणे गंतुं ॥"

भिन्नान्यपि निसृजतीत्युक्तं, तत्र कतिविधः शब्दद्रव्याणां भेद इति पृच्छति–

मू. (३९४) *तेसि णं भंते ! दव्वाणं कतिविहे भेए पन्नत्ते ?, गो० ! पञ्चविधे भेदे पं०, तं०–कंडाभेदे पयरभेदे चुन्नियाभेदे अनुतडियाभेदे उक्करियाभेदे, से किं तं खंडाभेदे ?, २ जण्णं अयखंडाण वा तउखंडाण वा तंबखंडाण वा सीसखंडाण वा रययखंडाण वा जातरूवखंडाण वा खंडएण भेदे भवति से तं खंडाभेदे १ ।*

से किं तं पयराभेदे ?, २ जण्णं वंसाण वा वेत्ताण वा नलाण वा कदलीथंभाण वा अब्भपडलाण वा पयरेणं भेदे भवति, से तं पयराभेदे २ ।

से किं तं चुन्नियाभेदे ?, २ जण्णं तिलचुण्णाण वा मुग्गचुण्णाण वा मासचुण्णाणवा पिप्पलीचुण्णाण वा मिरीयचु० वा सिंगबेरचुण्णाण वा चुण्णियाए भेदे भवति से तं चुण्णियाभेदे ३ ।

से किं तं अनुतडियाभेदे ?, २ जण्णं अगडाण वा तडागाण वा दहाण वा नदीण वा वावीण वा पुक्खरिणीण वा दीहियाण वा गुंजालियाण वा सराण वा सरसराण वा सरपंतियाण वा सरसरपंतियाण वा अणुतडियाभेदे भवति, से तं अनुतडियाभेदे ४ ।

से किं तं उक्करियाभेदे ?, २ जण्णं मूसाण वा मंडूसाण वा तिलसिंगाण वा मुग्गसिंगाण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा माससिंगाण वा एरंडबीयाण वा फुडिता उक्करियाभेदे भवति, से तं उक्करियाभेदे ५ ।

एएसि णं भंते! दव्वाणं खंडाभेएणं पयराभेदेणं चुण्णियाभेदेणं अनुतडियभेदेणं उक्करियाभेदेण य भिज्रमाणाणंकयरे२ हिंतो अ० ब० तु० वि० ?, गो० ! सव्वत्थोवाइं दव्वाइं उक्करियाभेदेणं भिज्रमाणाइं अणुतडियाभेएणं भिज्रमाणाइं अणंतगुणाइं चुण्णियाभेदेणं भिज्रमाणाइं अनंतगुणाइं पयराभेदेणं भिज्रमाणइं अनंतगुणाइं खंडाभेदेणं भिज्रमाणाइं अणनतगुणाइं ॥

वृ. 'तेसि णं भंते ! दव्वाण'मित्यादि, तत्र खण्डभेदो लोहखण्डादिवत् प्रतरभेदोऽभ्रमपटलभूर्यपत्रादिवत् चूर्णिकाभेदः क्षिप्तपिष्टवत् अनुतटिकाभेद इक्षुत्वगादिवत् उत्कटिकाभेदः स्रत्याघर्षवत् । एतानेव भेदान् व्याख्यातुकामः प्रश्ननिर्वचनसूत्राण्याह-'से किं तं खंडभेदे ?' इत्यादि पाठसिद्धं, नवरमनुतटिकाभेदे अवटाः-कूपाः तडागानि-प्रतीतानि, इदा अपि प्रतीताः, नद्यो-गिरिनद्यादयः, वाप्यः-चतुरस्राकारास्ता एव वृत्ताकारा पुष्करिण्यः दीर्घिकाः-ऋज्व्यो नद्यः वक्रा नद्यो गुञ्जालिकाः बहूनि केवलकेवलानि पुष्पर्करवत् विप्रकीर्णानि सरांसि तान्येव एकैक पङ्क्तया व्यवस्थितानि सरःपङ्क्तयः येषु सरस्सु पङ्क्तया व्यवस्थितेषु कूपोदकं प्रणालिकया सञ्चरति सा सरःसरःपङ्क्तिः अप्रतीता भेदा लोकतः प्रत्येतव्याः, अल्पबहुत्वं सूत्रप्रमाण्यात् तथेति प्रतिपत्तव्यं, युक्तेरविषयत्वात्,

मू. *(३१५) नेरइए णं भंते ! जाइं दव्वाइं भासत्ताए गेण्हति ताइं किं ठियाइं गेण्हति अठियाइं गेण्हति ?, गो० ! एवं चेव जहा जीवे वत्तव्वया भणिया तहा नेरइयस्सवि जाव अप्पाबहुयं एवं एगिंदियवज्रो दंडतो जाव वेमाणिता जीवा णं भंते ! जाइं दव्वाइं भासत्ताए गेण्हंति ताइं किं ठियाइं गेण्हति अठियाइं गेण्हंति ?, गो० ! एवं चेव पुहुत्तेणवि नेतव्वं, जाव वेमाणिया २ ।*

जीवे णं भंते ! जाइं दव्वाइं सच्चभासत्ताए गेण्हति ताइं किं ठियाइं गेण्हति अठियाइं गेण्हति ?, गो० ! जहा ओहियदंडओ तहा एसोऽवि, नवरं विगलिंदिया ण पुच्छिज्रंति, एवं मोसाभासाएवि, सच्चमोसाभासाएवि, असच्चामोसाभासाएवि एवं चेव, नवरं असच्चामोसाभासाए विगलिंदिया पुच्छिज्रंति इमेणं अभिलावेणं -

विगलिंदिए णं भंते १ जाइं दव्वाइं असच्चामोसाभासाए गिण्हइ ताइं किं ठियाइं गेण्हइ अठियाइं गेण्हइ ?, गो० ! जहा ओहियदंडओ, एवं एए एगत्तपुहुत्तेणं दस दंडगा भाणियव्वा

मू. *(३१६) जीवे णं भंते ! जाइं दव्वाइं सच्चभासत्ताए गिण्हति ताइं किं सच्चभासत्ताए निसिरइ मोसभासत्ताए निसरइ सच्चामोसभासत्ताए निसरति असच्चमोसभासत्ताए निसरइ ?, गो० ! सच्चभासत्ताए निसरइ नो मोसभासत्ताए निसरति नो सच्चामोसभासत्ताए निसरति नो असच्चामोसभासत्ताए निसरइ, एवं एगिंदियविगलिंदियवज्रो दंडतो जाव वेमाणिया, एवं पुहुत्तेणवि*

जीवे णं भंते ! जाइं दव्वाइं मोसभासत्ताए गिण्हति ताइं किं सच्चभासत्ताए निसरति मोसभासत्ताए सच्चमोसभा सत्ताए असच्चामोसभासत्ताए निसरइ ?, गो० ! नो सच्चभासत्ताए निसरति मोसभासत्ताए निसरति णो सच्चामोस० नो असच्चमोसभासत्ताए निसरति । एवं सच्चामोसभासत्ताएवि, असच्चामोसभासत्ताएवि एवं चेव, नवरं असच्चामोसभासत्ताए विगलिंदिया तहेव पुच्छिज्रंति, जाए चेव गिण्हति ताए चेव निसरति, एवं एते एगत्तपुहुत्तिया अट्ठ दंडगा भाणियव्वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३९७) *कतिविहे णं भंते! वयणे पं० ?, गो० ! सोलसविहे वयणे पं०, तं०—एगवयणे दुवयणे बहुवयणे इत्थिवयणे पुमवयणे नपुंसगवयणे अज्झत्थवयणे उवनीयवयणे अवनीयवणे उवनीयावनीयवणे अवनीयोवनीयवयणे तीतवयणे पडुप्पन्नवयणे अनागयवयणे पच्चक्खवयणे परोक्खवयणे। इच्चेइतं भंते ! एगवयणं वा जाव परोक्खवयणं वा वदमाणे पन्नवणी णं एसा भासा न एसा मासा मोसा ?, हंता गो० ! इच्चेइतं एगवयणं वा जाव परोक्खवयणं वा वदमाणे पन्नवणी णं एसा भासा न एसा भासा मोसा।*

वृ. शेषं सूत्रं सर्वमपि पाठसिद्धं, 'जाव कतिविहे णं भंते ! वयणे वण्णत्ते' इति,

एकवचनं पुरुष इति द्विवचनं पुरुषाविति बहुवचनं पुरुषा इति, स्त्रीवचनमियं स्त्री, पुरुषवचनमयं पुमान्, नपुंसकवचनमिदं कुण्डं, अध्यात्मवचनं यदन्यच्चेतसि निधाय विप्रतारकबुध्याऽन्यद् बिभणिषरपि सहसा यच्चेतसि तदेव ब्रूते, उपनीतवचनं-प्रशंसावचनं यथा रूपवतीयं स्त्री, अपनीतवचनं—निन्दावचनं यथेयं कुरूपा स्त्री, उपनीतापनीतवचनं—यत्प्रशंस्य निन्दति, यथा रूपवतीयं स्त्री परं दुःशीलाअपनीतोपनीतवचनं—यन्निन्दित्वा प्रशंसति यथेयं कुरूपा परं सुशीलेति, अतीतवचनमकरोदित्यादि प्रत्युत्पन्नवचनं—वर्त्तमानकालवचनं करोतीत्यादि अनागतकालवचनं—करिष्यतीत्यादि, प्रत्यक्षवचनं—अयमित्यादि परोक्षवचनं—स इत्यादि ॥

एतानि च षोडशापि वचनानि यथावस्थितवस्तुविषयाणि न काल्पनिकानि, ततो यदैतानि सम्यगुपयुज्य वदति तदा सा भाषा प्रज्ञापनी द्रष्टव्या, तथा चाह–'इच्चेइयं भंते ! एगवयणं दुवयण'मित्यादि, भावितार्थमक्षरार्थः प्रतीत एव ॥

सम्प्रति प्रागुक्तमेव सूत्रं सूत्रान्तरसम्बन्धनार्थं भूयः पठत्ति,

मू. (३९८) *कति णं भंते ! भासज्जाया पन्नत्ता ?, गो० ! चत्तारि भासज्जाया पं०, तं०—सच्चमेगं भासज्जायं बितियं मोसं भासज्जातं तइयं सच्चामोसं भासज्जातं चउत्थं असच्चामोसं भासज्जातं, इच्चेइयाइं भंते ! चत्तारि भासज्जायाइं भासमाणे किं आराहते विराहते ?, गो० ! इच्चेइयाइं चत्तारि भासज्जाइं आउत्तं भासमाणे आराहते नो विराहते, तेण परं असंजतअविरयअपडितहतअपच्चक्खायपावकम्मे सच्चं भासं भासंतो मोसं वा सच्चामोसं वा असच्चामोसं वा भासं भासमाणे नो आराहते विराहते।*

वृ. 'कइ णं भंते ! भासज्जाया पन्नत्ता' इत्यादि सुगमं, नवरं 'आउत्तं भासमाणे' इति सम्यक् प्रवचनमालिन्यादिरक्षणपरतया भाषमाणः, तथाहि—प्रवचनोड्डाहरक्षणादिनिमित्तं गुरुलाघपवपर्यालोचनेन मृषापि भाषमाणः साधुराराधक एवेति, 'तेण पर'मित्यादि, तत आयुक्तभाषमाणात्परोऽसंयतो—मनोवाक्कायसंयमविकलोऽविरतोविरमति स्म विरतो न विरतोऽविरतः सावद्यव्यापारादनिवृत्तमना इत्यर्थः अत एव न प्रतिहतं—मिथ्यादुष्कृतदानप्रायश्चित्तप्रतिपत्त्यादिना न नाशितमतीतं तथा न प्रत्याख्यातं भूयोऽकरणतया निषिद्धमनागतं पापकर्म येनासावप्रतिहताप्रत्याख्यातपापकर्मा, शेषं पाठसिद्धं।

मू. (३९९) *एतेसि णं भंते ! जीवाणं सच्चभासगाणं मोसभासगाणं सच्चामोसभासगाणं असच्चामोसभासगाणं अभासगाण य कयरे२हिंतो अ० ब० तु० वि० ?, गो० ! सव्वत्थोवा जीवा सच्चभासगा सच्चामोसभासगा असंखिज्जगुणा मोसभासगा असंखेज्जुणा असच्चामोसभागसगा असंखेज्जगुणा अभासगा अनंतगुणा ॥ पन्नवणाए भगवईए भासापदं समत्तं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. अल्पबहुत्वचिन्तायां सर्वस्तोकाः सत्यभाषकाः, इह यः सम्यगुपयुज्यसर्वज्ञमतानुसारेण वस्तुप्रतिष्ठानबुध्या भाषते स सत्यमाषकतस्ते च पृच्छाकाले कतिपया एव लभ्यन्ते इति सर्वस्तोकाः, तेभ्योऽसङ्ख्येयगुणाः सत्यमृषाभाषकाः, बहूनां प्रायो यथा तथा वा सत्यामृषाभाषणसम्भवात्, लोके तथा दर्शनात्, तेभ्योऽसङ्ख्येयगुणा मृषाभाषकाः, क्रोधाभिभूतानां परवञ्चनाद्यभियुक्तानां च प्रभूततराणामुपलम्भात् तेषां च मृषाभावकत्वात्, तेभ्योऽसङ्ख्येयगुणाः असत्यामृषाभाषकाः द्वीन्द्रियादीनामप्यसत्यामृषाभाषकत्वात्, तेभ्योऽनन्तगुणाः अभाषकाः, सिद्धानामनेकेन्द्रियाणां चानन्तत्वात् ॥

पदं - ११ - समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे एकादशपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं - १२ - "शरीरं"

वृ. तदेवं व्याख्यातमेकादशं पदं, इदानीं द्वादशममारभ्यते-अस्य चामभिसम्बधः- इहानन्तरपदे जीवानां सत्यादिभाषाविभागोपदर्शनं कृतं, भाषा च शरीराऱयत्ता, 'शरीरप्रभवा भाषे'त्यत्रैव प्रतिपादितत्वात्, अन्यत्राप्युक्तं-'गिण्हइ य काइएणं निस्सइ तह वाइएण जोएण'मिति, तत्र शरीरप्रविभागप्रदर्शनार्थमिदमारभ्यते, तत्र चेदमादि सूत्रम्-

मू. (४००) *कति णं भंते ! सरीरा पन्नत्ता ?, गो० ! पंच सरीरा पं०, तं०-ओरालिए वेउव्विए आहारए तेयए कम्मए, नेरइयाणं भंते ! कति सरीरया पन्नत्ता ?, गो० ! तओ सरीरया पं०, तं०-वेउव्विए तेयए कम्मए, एवं असुरकुमाराणवि जाव थणियकुमाराणं ।*

पुढविकाइयाणं भंते ! कति सरीरया पं० ?, गो० ! तओ सरीरया पं०, तं०-ओरालिए तेयए कम्मए, एवां वाउकाइयवज्जं जाव चउरिंदियाणं, वाउकाइयाणं भंते ! कति सरीरया पं० गो० ! चत्तारि सरीरया, पं०, तं०-ओरालिए वेउव्विते तेयए कम्मए, एवं पंचिंदियतिरक्खजोणियाणवि,

मणुस्साणं भंते ! कति सरीरया पं० ?, गो० ! पंच सरीरया पं० तं०-ओरिलिए वेउव्विते आहारए तेयए कम्मए, वाणमंतरजोइसियवेमामियाणं, जहा नारगाणं ।

वृ. 'कइ णं भंते ! सरीरा पन्नत्ता' इत्यादि, उत्पत्तिसमयादारभ्य प्रतिक्षणं शीर्यन्ते इति शरीराणि, तानि भदन्त ! कति-कियत्सङ्ख्याकानि, णमिति वाक्यालङ्कारे, प्रज्ञप्तानि, भगवानाह- पञ्च शरीराणि प्रज्ञप्तानि, तान्येव नामत आह-'ओरालिए' इत्यादि, अमीषां शब्दार्थमात्रमग्रे वक्ष्यामस्तथाऽपि स्थानाशून्यार्थं किञ्चिदुच्यते-उदारं-प्रधानं, प्राधान्यं चास्य तीर्थकरगणधरशरीरापेक्षया, ततोऽन्यस्यानुत्तरसुरशरीरस्याप्यनन्तगुणहीनत्वात्, अथवा ओरालं नाम विस्तरवत्, विस्तरवत्ता चास्यवस्थितस्वभावस्य सातिरेकयोजनसहस्रमानत्वातच्, वैक्रियं चैतावदवस्थितप्रमाणं न लभ्यते,उत्कर्षतोऽप्यवस्थितप्रमाणस्य पञ्चधनुःशतप्रमाणत्वात्, तच्च तावत्प्रमाणं सप्तम्यां नान्यत्र, यत्तूत्तरवैक्रियं योजनलक्षप्रमाणं न तदवसअथितमाभववर्त्तित्वाभावात्, ततो न तदपेक्षा, आह च चूर्णिकृत्-

"ओरालं नाम वित्थरालं विसालंति जं भणियं होइ, कहं ?, साइरेगजोयण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहस्समवट्ठियप्पमाणमोरालियं अन्नमेद्दहमेत्तं नत्थित्ति, विउव्वियं होज्ञा तं तु अणवट्ठियप्पमाणं, अवट्ठियं पुण पंच धनुसया अहेसत्तमाए, इमं पुण अवट्ठियप्पमाणं साइरेगं जोयणसहस्सं वनस्पतीना"मिति, अथवा उरलं–विरलप्रदेशं न तु वनं स्वल्पप्रदेशोपचितत्वात् बृहत्त्वाच्च भेण्डवत्, यदिवा ओरालं–समयपरिभाषया मांसास्थिस्नाय्वाद्यवबद्धं, स्वत्र स्वार्थिक इकप्रत्ययः, इहोदारमेव औदारिकं, पृषोदरादित्वादिष्टरूपनिष्पत्तिः, प्राकृतत्वात् ओरालियमिति, उक्तं च–

॥ १ ॥ "तत्थोदारमुरालं उरलं ओरालमेव विन्नेयं।
ओरालियंति पढमं पडुच्च तित्थेसरसरीरं॥

॥ २ ॥ भन्नइ य तव्वोरालं वित्थरवंतं वणस्सइं पप्प।
पगईए नत्थि अण्णं एगद्दहमित्तं विसालंति॥

॥ ३ ॥ उरलं थेवपएसोवचियंति महल्लं जहा भिण्डं।
मंसट्ठिण्हारुबद्धं ओरालं समयपरिभासा॥" १।

तथा विविधा विशिष्टा वा क्रिया विक्रिय तस्यां भवं वैक्रियं, उक्तं च–

॥ १ ॥ "विविहा विसिट्ठगा वा किरिया तीए उ जं भवं तमिह।
वेउव्वियं तयं पुण नारग्दवाण पगईए॥"

अथवा वैकुर्विकमिति शब्दसंस्कारः, तत्र विकुर्व इति सिद्धान्तप्रसिद्धोऽयं धातुः, विकुव्वा विकुर्व्वाः विविधा क्रिया इत्यर्थः,तेन निर्वृत्तं वैकुर्विकं २, तथा चतुर्दशपूर्वविदा कार्योत्पत्तौ योगबलेनाह्यते इत्यद्धारकं ३, तेजसो विकारस्तैजसं ४, कर्मणो जातं कर्मजमिति ५।

नन्वौदारिकादीनां शरीराणामित्थमुपन्यासे किञ्चिस्ति प्रयोजनमुत यथाकथञ्चिदेष प्रवृत्त इति ?, उच्यते, अस्तीति ब्रूमः, किं तदिति चेत्, उच्यते, परम्परप्रदेशसंभ्यं परम्परं वर्गणासु प्रदेशबाहुल्यं (च), तथा हि–औदारिकात् वैक्रियस्य प्रदेशसौक्ष्म्यं वैक्रियादप्याहारकस्य अहारकादपि तैजसस्य तैजसादपि कार्मणस्य, तथा औदारिकात् वैक्रियस्य वर्गणासु प्रदेशबाहुल्यं वैक्रियादाहारकस्याहान्दापि तैजसस्य तैजसादपि कार्मणस्येति, एतान्येव शरीराणि नैरयिकादिषु सम्भवतश्चिन्तयति–

'नेरइयाणं भंते ! केवइया सरीरा पन्नत्ता' इत्यादि, पाठसिद्धं, शरीराणि च जीवानां द्विविधानि, तद्यथा–बद्धानि मुक्तानि च तत्र यानि चिन्ताकाले जीवैः परिगृहीतानि वर्त्तन्ते तानि बद्धानि, यानि च पूर्वभवेषु परित्यक्तानि तानि मुक्तानि, तेषां बद्धानां मुक्तानां च परिमाणमिदानीं द्रव्यक्षेत्रकालैः प्ररूपणीयं, तत्र द्रव्यैरभव्यादिभिः क्षेत्रेण श्रेणिप्रत्यादिना कालेनावलिकादिना,

तत्रौदारिकशरीररमधिकृत्याह–

मू. (४०१) केवइया णं भंते! ओरालियसरीरया पं० ?, गो० ! दुविहा पं०, तं०–मुक्किल्लया य मुक्किल्लया य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्ञा असंखेज्ञाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कलतो, खेत्ततो असंखेज्ञा लोगा, तत्थ णं जे त मुक्केल्लया ते णं अनंता अनंताहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो खेत्तओ अनंता लोगा अभवसिद्धिएहिंतो अनंतगुणा सिद्धा (ण) नंतभागो। केवतिया णं भंते! वेउव्वियसरीरया पं० गो० ! दुविहा पं०, तं०–बद्धेल्लया य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्ञा असंखेज्ञाहिं उस्सप्पिणिओसप्पिणीहिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवहीरंति कालतो खेत्ततो असंखेज्ञातो सेढीओ पयरस्स असंखेज्ञतिभागो, तत्थ णं जे ते मुक्केल्लगा ते णं अनंत अनंताहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो जगा ओरालियस्स मुक्केल्लया तहेव वेउव्वियस्सवि भाणियव्वा।

केवतिया णं भंते ! आहारगसरीरया पन्नत्ता ?, गो० ! दुविहा, पं० तं०–बद्धेल्लया य मुक्केल्लया य, तत्थ णं जे ते बद्धेल्लगा ते णं सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सहस्सपुहुत्तं, तत्थ णं जे ते मुक्केल्लया ते णं अणनता जहा ओरालियस्स मुक्किल्लया तहेव भाणितव्वा।

केवइया णं भंते ! तेयगसरीरया पन्नत्ता ?, गो० ! दुविहा प० तं०–बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं अनंता अनंताहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो खेत्तओ अनंता लोगा दव्वओ सिद्धेहिंतो अणंतगुणा सव्वजीवानंतभागूणा, तत्थ णं जे ते मुक्केल्लगा ते णं अनंता अनंताहिं उस्सप्पिणि ओसप्पिणीहिं अवहीरंति कालतो खेत्ततो अनंता लोगा दव्वओ सव्वजीवेहिंतो अनंतगुणा जीववग्गस्सानंतभागे।

एवं कम्मगसरीराणिवि भाणितव्वाणि॥

वृ. 'केवइया णं भंते ! ओरालियसरीरया पन्नत्ता' इत्यादि, इह प्राकृतलक्षणवशादिल्लप्रत्ययः कप्रत्ययश्च स्वार्थे ततो 'बद्धिल्लया' इति बद्धानीत्यर्थः, 'मुक्किल्लया' इति मुक्तानीत्यर्थः, तत्र बद्धान्यसङ्खयेयानि, असङ्खयेयत्वमेव प्रथमतः कालतो निरूपयति–'असंखिज्ञाहिं' इत्यादि, प्रतिसमयमेकैकशरीरापहारेण असङ्खयेयाभिरुत्सर्प्पिण्यवसर्प्पिणीभिरनवयशोऽपहियन्ते, किमुक्तं भवति असङ्खयेयासु उत्सर्पिण्यवसर्प्पिणीषु यावन्तः समयास्तावत्प्रमाणानि बद्धान्यौदारिकशरीराणि वर्त्तन्ते, इदं कालतः परिमाणं, क्षेत्रत आह–'खेत्तओ असंखेज्ञा लोगा' इति, क्षेत्रतः परिसङ्खयायनमसङ्खयेया-लोकाः, एतदुक्तं भवति–सर्वाण्यपि बद्धान्यौदारिकशरीराणि आत्मीयात्मीयावगाहनाभिराकाशप्रदेशेषु परस्परम पिण्डीभावेन क्रमेण स्थाप्यन्ते तदानीं तैरेवमास्तीर्यमाणैरसङ्खयेया लोका अवाप्यन्ते, इह एकैकस्मिन्नप्याकाशप्रदेशे एकैकोदारिकशरीरस्थापनया असङ्खयेया लोका व्याप्यन्ते परं पूर्वाचार्या आत्मीयावगाहनास्थापनया प्ररूपणां कुर्वन्ति ततोऽपसिद्धान्तदोषो मा प्रापदित्यस्माभिरपि तथैव प्ररूपणा क्रियते, आह च चूर्णिकारोऽपि–

"जइवि इक्केक्के पएसे सरीरमेगं ठविज्ञइ तोऽवि असंखेज्ञा लोगा भवंति किंतु अवसिद्धंतदोसपरिहरणत्थमप्पप्पणियाहिं ओगाहणाहिं ठविज्ञंति" इति, आह–नन्वनन्ता जीवास्ततः कथमसङ्खयेयान्यौदारिकशरीराणि ?, उच्यते, इह द्विविधा जीवाः–प्रत्येकशरीरिणोऽनन्तकायिकाश्च, तत्र ये ते प्रत्येकशरीरिणस्तेषां प्रतिजीवमेकैकोदारिकशरीरमन्यथा प्रत्येकशरीरत्वायोगात्, ये त्वनन्तकायिकास्तेषामनन्तानामनन्तानामेकैकमौदारिकशरीरमतः सर्वसङ्खययापि असङ्खयेयान्यौदारिकशरीराणि, मुक्तान्यौदारिकशरीराणि अनन्तानि, तच्चानन्तत्वं कालक्षेत्रद्रव्यैर्निरूपयति–'अनंताहिं' इत्यादि, कालतः परिमाणं प्रतिसमयमेकैकशरीरापहारेऽनन्ताभिरुत्सर्पिण्यवसर्प्पिणीभिः सर्वात्मनाऽपहियन्ते, किमुक्तं भवति ?–

अनन्तासु उत्सर्प्पिण्यवसर्प्पिणीषु यावन्तः समयास्तावत्प्रमाणानीति, क्षेत्रतः परिमाणमनन्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकाः, अनन्तेषु लोकप्रमाणेष्वाकाशखण्डषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीत्यर्थः, द्रव्यतः परिमाणमभवसिद्धिकेभ्यः—अभव्येभ्योऽनन्तगुणानि, यद्येवं तर्हि सिद्धराशिप्रमाणानि भविष्यन्ति तत आह—सिद्धानामनन्तभागः—अनन्तभागमात्राणि, ननु द्वयोरपि राश्योरभवसद्धिकसिद्धिरूपयोर्मध्ये पठ्यन्ते प्रतिपतितसम्यग्दृष्टयः तत् किं तद्राशिप्रमाणानि भवेयुः ?, उच्यते, यदि तत्प्रमाणानि स्युस्तर्हि तथैव निर्देशः क्रियेत, सुखप्रतिपत्तिकृतप्रतिज्ञा हि भगवन्त आर्यश्यामाः, ततस्तथा निर्देशाभावादवसीयते—न तद्राशिप्रमाणानि, ननु तर्हि तेषां प्रतिपतितसम्यग्दृष्टीनामधस्ताद् भवेयुरुपरि वा ?, उच्यते, कदाचिदधस्तात्कदाचिदुपरि कदाचित्तुल्यान्यपि अनियतप्रमाणत्वात्, नतु सर्वकालं तत्प्रमाणानीति, आह च चूर्णिकृत—

"तो किं परिवडियसम्मद्दिट्टिरासिप्पमाणाइं होज्ञा ते ?, तेसिं दोण्हवि रासीणं, मज्झे पढिज्ञंतित्तिकाउं ?, भन्नइ, जइ तप्पमाणाइं होंताइं तो तेसिं चेव निद्देसो होंतो तम्हा न तप्पमाणाइं, तो किं तेसिं हिट्ठा होज्ञा उवरिं होज्ञा ?, भन्नइ, कयाइं हेट्ठा कयाइ उवरिं होंति कयाइ तुल्लाइं न निच्चकालं तप्पमाणाइं' इति, अपरः प्राह—कथं मुक्तानि यथोक्तानन्तसङ्ख्यापरिमाणान्युपपद्यन्ते यतो यदि तावदौदारिकादिशरीराणि यावदविकलानि तावद् गृह्यन्ते ततस्तेषामनन्तकालमवस्थानाभावादनन्तत्वं न घटते, यदि ह्यनन्तमपि कालमवस्थानं भवेत् ततोऽनन्तेन कालेन तत्तच्छरीरगणनादनन्तानि भवेयुः, यावताऽनन्तं कालमवस्थानं नास्ति, पुद्गलानामुत्कर्षतोऽप्यसङ्ख्येयकालावस्थानाभिधानात्, अथ च ये पुद्गदला जीवैरौदारिकत्वेन गृहीत्वा मुक्ता अतीताद्धायां तेषां ग्रहणं तर्हि सर्वेऽपि पुद्गलाः सर्वैरपि जीवैः प्रत्येकमौदारिकत्वेन गृहीत्वा मुक्ता इति सर्वपुंद्गलग्रहणमापन्नं, तथा च सति यदुक्तम्—

अभवसिद्धिकेभ्योऽनन्तगुणानि सिद्धानामनन्तभागमात्राणीति तद् विरुध्यते, सर्वजीवेभ्योऽनन्तानन्तगुणकारेणानन्तगुणत्वस्य प्रसक्तत्वादिति चेत्, उच्यते, इह मुक्तानामौदारिकशरीराणां नाविकलानामेव केवलानां ग्रहणं नाप्यौदारिकत्वेन गृहीत्वा मुक्ताः पुद्गलाः, तेषामुक्तदोषप्रसङ्गात्, किन्तु यच्छरीरमौदारिकं जीवेन गृहीकत्वा मुक्तं तत् विशरारुभावं बिभ्राणमनन्तभेदभिन्नं भवति ते चानन्ता भेदा भवन्तो यावत्ते पुद्गला औदारिकपरिणामं न जहति तावत्प्रत्येकमौदारिकशरीरव्यपदेशं लभन्ते, ये पुनरौदारिकपरिणामं त्यक्तवन्तस्ते न गण्यन्ते, तत एवमेकस्यापि शरीरस्यानन्तानि शरीराणि जातानि, एवं सर्वशरीरेष्वपि भावनीयं, तथा च सत्येकैकस्य शरीरस्यानन्तभेदभिन्नत्वादेकस्मिन्नपि समये प्रभूतान्यनन्तानि शरीराण्यवाप्यन्ते, तेषां चासङ्ख्येयकालमवस्थानं, तेन चासङ्ख्येयेन कालेनान्यानि जीवैर्विप्रमुक्तान्यसङ्ख्येयान्यवाप्यन्ते, तान्यपि च प्रत्येकमनन्तभेदभिन्नानि, तेषु च मध्ये तावता कालेन यान्यौदारिकशरीरपरिणामं विजहति तानि परित्यज्यन्ते शेषाणि गण्यन्ते, तत एवं मुक्तानि यथोक्तप्रमाणानन्तसङ्ख्याकान्यौदारिकशरीराण्युपपद्यन्ते इति, न चैतस्वमनीषिकाविजृम्भितं, यत आह चूर्णिकृत्—

"नवि अविगलाणमेव केवलाणंपि गहणं एयं न य ओरालियगहणमुक्काणं सव्वपुग्गलाणं, किन्तु जं सरीरमोरालिकं जीवेण मुक्कं तं चेव अणंतभेयभिन्नं [च] होइ जाव ते पुग्गलां तं जीवनिव्वत्तियं ओरालियसरीरकायप्पओगं न मुंचंति न ताव अन्नपरिणामेणं परिणमंति ताइं पत्तेयं सरीराइं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भन्नंति, एवमेक्केक्केस्स ओरालियसरीरस्स अमंतभेयभिन्नत्तणओ अनंताइं चेव ओरालियसरीराइं भवंति'' इत्यादि, आह-कथमेकैकशरीरद्रव्यदेशः शरीरत्वेन व्यवह्रियते ?, उच्यते, लवणदृष्टानतेन, तथाहि-खार्यपि लवणमुच्यते द्रोणोऽपि लवणमाढकोऽपि लवणं यावदेकापि शर्करा लवणमेवमिहापि सकलमप्यौदारिकशरीरमुच्यते तदर्द्धमपि तदेकदेशोऽपि यावदनन्तभागोऽपि शरीरमिति, कोऽत्राभिप्राय इति चेत् ?,

उच्यते, इह यथा लवणपरिणामपरिणतः स्तोको बहुर्वा पुद्गलसङ्घातो लवणमुच्यते तथौदारिकशरीरयोग्यपुद्गलसङ्घातोऽपि औदारिकत्वेन परिणतः स्तोको वा बहुर्वा औदारिकशरीरव्यपदेशं लभते, अथवा भवति समुदायैकदेशेऽपि समुदायशब्दोपचारो, यथा-अङ्गुल्यग्रे स्पृष्टे मया देवदत्ता इत्यादौ, तत उपचारान्न कश्चिद्दोषः, ननु यद्येवं कथं तान्यनन्तलोकाकाशप्रदेशप्रमाणान्यौदारिकशरीराण्येकस्मिन् लोकेऽवगाढानि ?, उच्यते, प्रदीपप्रकाशवत्, तथाहियथैकस्यापि प्रदीपस्यार्चीषि सकलभवनावभासीनि भवन्ति, अन्येषामनेकेषां प्रदीपानामर्चीषि तत्रैवानुप्रविशन्ति, परस्परमविरोधात्, तथौदारिकाण्यपि, एवं शेषशरीरेष्वपि मुक्तेष्वायोज्यं, ननु द्रव्यक्षेत्रे विहाय किमिति प्रथमतः कालेन प्ररूपणा कृता ?, उच्यते, कालाननतरावस्थायितया पुद्गलेषु शरीरोपचारो नान्यथा ततः कालो गरीयान् इति प्रथमस्तेन प्ररूपणा।

उक्तान्यौदारिकाणि, सम्प्रति वैक्रियसूत्रमाह-'केवइया णं भंते !' इत्यादि, बद्धान्यसङ्ख्येयानि, तत्र कालतः परिमाणं प्रतिसमयमेकैकशरीरापहारे सामस्त्येनासङ्ख्येयाभिरुत्सर्पिण्यवसर्प्पिणीभिरपह्रियन्ते, किमुक्तं भवन्ति ? - असङ्ख्येयासूत्सर्पिण्यवसर्प्पिणयसर्प्पिणीषु यावन्तः समायास्तावत्प्रमाणानीति, क्षेत्रतोऽसङ्ख्येयाः श्रेण्यस्तासां श्रेणीनां परिमाणं प्रतरस्यासङ्ख्येयो भागः किमुक्तं भवति ? -प्रतरस्यासङ्ख्येयतमे भागे यावत्यः श्रेण्यस्तासु च श्रेणिषुयावन्त आकाशप्रदेशास्तावत्प्रमाणानि बद्धानि वैक्रियशरीराणीति, अथ श्रेणिरिति किमभिधीयते ? उच्यते,

घनीकृतस्य लोकस्य सर्वतः सप्तरज्जुप्रमाणस्यायामतः सव्वरज्जुप्रमाणा मुक्तावलिरिवैकाकाशप्रदेशपङ्क्तिः, कथं पुनर्लोको घनीक्रियते ?, कथं वा सप्तरज्जुप्रमाणो भवति इति चेत् ?, उच्यते, इह लोक ऊर्ध्वाधश्चतुर्दशरज्जुप्रमाणोऽधस्ताद्विस्तरतो देशोनसप्तरज्जुप्रमाणाः एकरज्जुर्मध्यभागे ब्रह्मलोकप्रदेशे बहुमध्यदेशभागे पञ्चरज्जुरुपरि एका रज्जुर्लोकान्ते, रज्जोश्चपरिमाणं स्वयम्भूरमणसमुद्रस्य पूर्ववेदिकान्तादारभ्यापरवेदिकान्तं यावत्, एवंप्रमाणस्य लोकस्य वैशाखस्थानस्थकटिस्थकरयुग्मपुरुषाकारस्य बुध्या त्रसनाड्या दक्षिणभागवर्त्यधोलोकखण्डमधो देशोनत्रिरज्जुविस्तारमतिरिक्तसप्तचरज्जूच्छ्रयं परिगृह्य त्रसनाड्या उत्तरपार्श्वे ऊर्ध्वाधोभागाविपर्यासेन सङ्घात्यते-ऊध्वभागोऽधः क्रियते अधोभागस्तूर्द्धमिति सङ्घात्यते इति, तत ऊर्ध्वलोके त्रसनाड्या दक्षिणभागवर्त्तिनी ये द्वे खण्डे कूर्पराकारसंस्थिते प्रत्येकं देशोनार्द्धचतुष्टरज्जूच्छ्रये ते बुध्या समादाय वैपरीत्येनोत्तरपार्श्वे सङ्घात्येते, एवं च किं जातम् ?,

अधस्तनं लोकार्धं देशोनचतूरज्जुविस्तारं सातिरेकसप्तरज्जूच्छ्रयं उपरितनमर्द्धं त्रिरज्जुविस्तारं देशोनसप्तरज्जूच्छ्रयं, तेन उपरितनमर्द्धं बुध्या गृहीत्वाऽधस्तनस्यार्द्धस्योत्तरपार्श्वे सङ्घात्यते, तथा च सति सातिरेकसप्तरज्जूच्छ्रयो देशोनसप्तरज्जुविस्तारो धनो जातः, अतः सप्तरज्जूनामुपरि यदधिकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्परिगृह्य ऊध्र्वाध आयतमुत्तरपार्श्वे सङ्घात्यते, ततो विस्तरतोऽपि परिपूर्णाः सप्त रज्जवो भवन्ति, एवमेष लोको घनीक्रियते, घनीकृतश्च सप्तरज्जुप्रमाणो भवति, यत्र च क्वचन घनत्वेन सप्तरज्जुप्रमाणता न पूर्यते तत्र बुध्या परिपूरणीयं, एतच्च पट्टिकादौ लिखित्वा दर्शयितव्यं, सिद्धान्ते च यत्र क्वचनापिश्रेणेः प्रतरस्य वा ग्रहणं तत्र सर्वत्राप्येवं घनीकृतस्य लोकस्य सप्तरज्जुप्रमाणस्या-वसातव्यं, मुक्तान्यौदारिकवद् भावनीयानि ।

आहारकविषयं सूत्रं 'केवइया णं भंते ! आहारगसरीरगा इत्यादि, 'बद्धानि सिय अत्थि सिय नत्थि' इति अस्तीति निपातो बहुवचनगर्भः कदाचित्सन्ति कदाचित् न सन्तीत्यर्थः, यस्मादन्तरमाहारकशरीरस्य जघन्यत एकः समयः उत्कर्षतः षण्मासाः, उक्तं च–

॥ १ ॥ "आहारगाइं लोए छम्मासे जा न होंतिवि कयाइ ।
उक्कोसेणं नियमा एक्कं समयं जहन्नेणं ॥" इति,

यदापि भवन्ति तदाऽपि जघन्यतः एकं द्वे वा उत्कर्षतः सहस्रपृथकत्वं, मुक्तान्यौदारिकवत्

तैजसविषयं सूत्रमाह– 'केवइया णं भंते ! तेयगसरीरया' इत्यादि, तत्र बद्धान्यनन्तानि, अनन्तत्वं कालक्षेत्रद्रव्यैर्निरूपयति–'अनंताहिं' इत्यादि, कालतः परिमाणमन्तोत्सर्प्पिण्य-वसर्प्पिणीसमयप्रमाणानि क्षेत्रतोऽनन्तलोकप्रमाणाकाशखण्डप्रदेशपरिमाणानि, द्रव्यतः परिमाणं सिद्धेभ्योऽनन्तगुणानि, तैजसं हि शरीरं सर्वसंसारिजीवानां प्रत्येकं, संसारिणश्च जीवाः सिद्धेभ्योऽ-नन्तगुणाः ततस्तैजसशरीराण्यपि सिद्धेभ्योऽनन्तगुणानि भवन्ति, 'सव्वजीवअनंतभागूणा' इति सर्वजीवानां योऽनन्ततमो भागस्तेनोनानि, इयमत्र भावना–सिद्धानां तैजसशरीरं न विद्यते, सर्वशरीरातीतत्वात् तेषां, सिद्धाश्च सर्वजीवानामनन्तभागे, ततस्तेनोनानि सर्वजीवानामनन्त-भागोनानि भवन्ति, मुक्तानि अनन्तानि, तजेवानन्तत्वं कालक्षेत्रद्रव्यैः प्ररूपयति–'अनंताहिं' इत्यादि, । कालक्षेत्रसूत्रे प्राग्वत्, द्रव्यतः परिमाणं सर्वजीवेभ्योऽनन्तगुणानि, कथमिति चेत् ?, उच्यते, इह एकैकस्य संसारिजीवस्य एकैकं तैजसशरीरं, तानि च जीवैर्विप्रमुक्तानि सन्ति प्रागुक्तयुक्तेरनन्तभेदभिन्नानि भवन्ति, तेषां चासङ्ख्येयं कालं यावदवस्थानं, तावता च कालेन जीवैर्विप्रमुक्तान्यन्यानि तैजसशरीराणि प्रतिजीवमसङ्ख्येयानि अवाप्यन्ते, तेषामपि प्रत्येकं प्रागुक्तयुक्त्या अनन्तभेदभिन्नतेति भवन्ति सर्वजीवेभ्योऽनन्तगुणानि, तर्कि जीववर्गप्रमाणानि भवेयुरत आह–

'जीववग्गस्स अनंतभागे' इति, जीववर्गस्यानन्तभागप्रमाणानि, जीववर्गप्रमाणानि कस्मान्न भवन्तीति चेत्, उच्यते, यदि एकैकस्य जीवस्य सर्वजीवराशिप्रमाणानि किञ्चित्समधिकानि वा भवेयुर्येन सिद्धानन्तभागपूरणं भवति ततो जीववर्गप्रमाणानि भवन्ति, वर्गो हि तेनैव राशिना तस्य राशेर्गुणने भवति, यथा चतुष्कस्य चतुष्केन गुणने षोडशात्मको वर्ग इति, न चैकैकस्य जीवस्य सर्वजीवप्रमाणानि किञ्चित्समधिकानि वा तैजसशरीराणि किन्त्वतिस्तोकानि, तान्यपि असङ्ख्येयकालावसअथायीनीति, तावता कालेन यान्यप्यन्यानि भवन्ति तान्यपिस्तोकानि, कालस्य स्तोकत्वात्, ततो जीववर्गप्रमाणानि न भवन्ति, किन्तु जीववर्गस्यानन्तभागमात्राणि, अनन्तभागप्रमाणतायां च पूर्वाचार्यप्रदर्शितमिदं निदर्शनं–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वजीवास्तत्त्ववृत्त्या अनन्ता अपि असत्कल्पनया दश सहस्राणि, तेषां च दशसहस्राणां वर्गो दश कोट्यःस तैजशरीरराणि च मुक्तान्यसत्कल्पनया दशलक्षप्रमाणानि, ततः सर्वजीवेभ्यः किल शतगुणानीति सर्वजीवेभ्योऽनन्तगुणान्युक्तानि, जीववर्गस्य च शततमे भागे वर्त्तन्ते, ततो जीववर्गस्यानन्तभागमात्राणि।

एवं कार्मणशरीराण्यपि बद्धानि मुक्तानि च भावनीयानि, तैजसैः सह समानसङ्ख्यत्वात् उक्तान्यौधिकानि पञ्चानि शरीराणि, सम्प्रति नैरयिकादिविशेषणविशेषितानि चिन्त्यन्ते-

मू. (४०२) नेरइयाणं भंते! केवतिया ओरालियसरीरा पं० ?, गो० ! दुविहा पं०, तं०-बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं नत्थि, तत्थ णं जे ते मुक्केल्लगा ते णं अनंता जहा ओरालियमुक्केल्लगा तहा भाणियव्वा।

नेरइयाणं भंते! केवइया वेउव्वियसरीरा पं० ?, गो० दु०, तं०-बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्ञा, असंखेज्ञाहिं उस्सप्पिणिओसप्पिणिहिं अवहीरंति कालतो, खेत्ततो असंखिज्ञाओ सेढीओ पयरस्स असंखेज्ञइभागो, तासि णं सेढीणं विक्खंभसूई अंगुलपढमवग्गमूलं बितीयवग्गमूलपडुप्पण्णं अहवणं अंगुलबितीयवग्गमूलधणप्पमाणमेत्ताओ सेढीतो, तत्थ णं जे ते मुक्केल्लगा ते णं जहा ओरालियस्स मुक्केल्लगा तहा भाणियव्वा।

नेरइयाणं भंते! केवइआ आहारगसरीरा पं० ?, गो० ! दु०, तं०-बद्धे० मुक्के०, एवं जहा ओरालिए बद्धेल्लगा मुक्केल्लया य भणिया तहेव आहारगावि भाणियव्वा, तेयाकम्मगाइं जहा एएसिं चेव वेउव्वियाइं।

वृ. 'नेरइयाणं भंते!' इत्यादि, नैरयिकाणां बद्धान्यौदारिकशरीराणि न सन्ति, भवप्रत्ययतस्तेषामौदारिकशरीरासम्भवात्, मुक्तान्यौधिकमुक्तौदारिकशरीरवत्, वैक्रियाणि बद्धानि यावन्तो नैरयिकास्तावत्प्रमाणानि, तानि चासङ्ख्येयानि, तदेवासङ्ख्येयत्वं कालक्षेत्राभ्यां प्ररूपयति-'असंखेज्ञाहिं' इत्यादि, कालतः परिमाणं प्रतिसमयमेकैकशरीरापहारे सामस्त्येनासङ्ख्येयाभिरुत्सर्प्पिण्यवसर्प्पिणीभिरपहियन्ते, किमुक्तं भवति ? -

असङ्ख्येयासूत्सर्प्पिण्यवसर्प्पिणीषु यावन्तः समयास्तावत्प्रमाणानि, क्षेत्रतोऽसङ्ख्येयाः श्रेणयः, असङ्ख्येयासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीति भावः, अथ प्रतरेऽपि सकले असङ्ख्येयाः श्रेणयो भवन्ति प्रतरस्यार्द्धभागे त्रिभागादौ च ततः कियत्सङ्ख्याकास्ताः श्रेणय इत्याशङ्कायां विशेषनिर्द्धारणार्थमाह-प्रतरस्यासङ्ख्येयभागः, किमुक्तं भवति ? -

प्रतरस्यासङ्ख्येयतमे भागे यावत्यः श्रेणयस्तावत्यः परिगृह्यन्ते, इदमन्यद्विशेषतरपिमाणं-'तासि णं सेढीणं विक्खंभसूई' इत्यादि, तासां श्रेणीना विष्कम्भतो-विस्तारमधिकृत्य सूचिः-एकप्रादेशिकी श्रेणिरङ्गुलप्रथमवर्गमूलं द्वितीयवर्गमूलगुणितं, इयमत्र भावना-इह प्रज्ञापकेन धनीकृतः सप्तरज्जुप्रमाणो लोकः पट्टिकादौ स्थापनीयः, श्रेणिश्च रेखाकारेण दर्शनीया, दर्शयित्वा चैवं प्रमाणं वक्तव्यं-अङ्गुलप्रमाणमात्रस्य प्रदेशस्य क्षेत्रस्य यावान् प्रदेशराशिस्तस्यासङ्ख्येयानि वर्गमूलानि भवन्ति, तद्यथा- प्रथमं वर्गमूलं तस्यापि यद्वर्गमूलं तद् द्वितीयं वर्गमूलं तस्यापि यद् वर्गमूलं तत् तृतीयं वर्गमूलं एवमसङ्ख्येयानि वर्गमूलानि भवन्ति, तत्र प्रथमं यद्वर्गमूलं तद् द्वितीयेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्गमूलेन गुण्यते, गुणिते च सति यावन्तः प्रदेशा भवन्ति तावत्प्रदेशात्मिका सूचिर्बुद्धया क्रियते, कृत्वा च विष्कम्भतो दक्षिणोत्तरायततया स्थापनीया, तया च स्थाप्यमानया यावत्यः श्रेणयः स्पृश्यन्ते तावत्यः परिगृह्यन्ते, तत्रेदं निदर्शनम्-

अङ्गुलमात्रक्षेत्रप्रदेशराशिस्तत्त्वतोऽसङ्ख्यातोऽप्यसत्कल्पनया षट्पञ्चाशदधिके द्वे शते कल्प्येते, तयोः प्रथमं वर्गमूलं षोडश द्वितीयं चत्वारस्तृतीयं द्वौ, तत्र द्वितीयेन वर्गमूलेन चतुष्कलक्षणेन प्रथमं वर्गमूलं षोडशलक्षणं गुण्यते जाताः चतुःषष्टिः, एतावत्यः श्रेणयः परिगृह्यन्ते, अमुमेवार्थं प्रकारान्तरेण कथयति-

'अहवण' मित्यादि अथवेति प्रकारान्तरे णमिति वाक्यालङ्कारे अङ्गुलमात्रक्षश्रेत्र-प्रदेशराशेर्द्वितीयस्य वर्गमूलस्यासत्कल्पनया चतुष्कलक्षणस्य यो धनस्तावत्प्रमाणाः, इह यस्य राशेर्यो वर्गः स तेन राशिना गुण्यते ततो धनो भवति, यथा द्विकस्याष्टौ, तथाहि-द्विकस्य वर्गश्चत्वारस्ते द्विकेन गुण्यन्ते जाता अष्टाविति, एवमिहापि चतुष्कस्य वर्गः षोडश ते चतुष्केन गुण्यन्ते ततश्चतुष्कस्य घनो भवति, तत्रापि सैव चतुःषष्टिरिति, प्रकारद्वयेऽप्यर्थाभेदः, इहायं गणितधर्मो यद्बहु स्तोकेन गुण्यते, ततः सूत्रकृता प्रकारद्वयमेवोपदर्शितं,

अन्यथा तृतीयोऽपि प्रकारोऽस्ति 'अंगुलबिइयवग्गमूलं पढमवग्गमूलपडुप्पण्ण' मिति अन्ये त्वभिदधति-अङ्गुलमात्रक्षेत्रप्रदेशराशेः स्वप्रथमवर्गमूलेन गुणने यावान् प्रदेशराशिर्भवति तावत्प्रमाणया सूच्या यावत्यः स्पृष्टाः श्रेण्यस्तावतीषु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानि नैरयिकाणां बद्धानि वैक्रियशरीराणीति, मुक्तान्यौदारिकवत्।

आहारकाणि बद्धानि न सन्ति, तेषां तल्लब्ध्यसम्भवात्। मुक्तानि पूर्ववत्, तैजसकार्मणानि बद्धानि वैक्रियवत्, मुक्तानि पूर्ववत्।

मू. (४०३) *असुरकुमाराणं भंते! केवइया ओरालियसरीरा पं० ?, गो०! जहा नेरइयाणं ओरासियसरीरा भणिता तहेव एतेसिं भाणितव्वा, असुरकुमाराणं भंते! केवइया वेउव्वियसरीरा पं० ?, गो०! दुविहा पं०, तं०-बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्जा असंखेज्जाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालतो खेत्ततो असंखेज्जाओ सेढीतो पयरस्स असंखेज्जतिभागो तासि णं सेढीणं विक्खंभसूई अंगुलपढमवग्गमूलस्स संखेज्जतिभागो,*

तत्थ णं जे ते मुक्केल्लगा ते णं जहा ओरालियस्स मुक्केल्लगा तहा भाणियव्वा, आहारसरीरगा जहा एतेसिं चेव ओरालिया तहेव दुविहा भाणियव्वा, तेयाकम्मगसरीरा दुविहावि जहा एतेसिं चेव विउव्विया, एवं जाव थणियकुमारा।

वृ. असुरकुमाराणामौदारिकशरीराणि नैरयिकवत्, वैक्रियाणि बद्धान्यसङ्ख्येयानि, तदेवासङ्ख्येयत्वं कालक्षेत्राभ्यां प्ररूपयति, तत्र कालसूत्रं प्राग्वत्, क्षेत्रतोऽसङ्ख्येयाः श्रेणयः, असङ्ख्येयासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीत्यर्थः, ताश्च श्रेणयः प्रतरस्यासङ्ख्येयो भागः, प्रतरासङ्ख्येयभागप्रमिता इत्यर्थः, तत्र नारकचिन्तायामपि प्रतरासङ्ख्येयभागप्रमिता उक्ताः, ततो विशेषतरं परिमाणमाह-'तासि ण' मित्यादि, तासां श्रेणिनां परिमाणाय या विष्कम्भसूचिः सा अङ्गुलमात्रक्षेत्रप्रदेशराशेः सम्बन्धिनः प्रथमवर्गमूलस्य सङ्ख्येयो भागः, किमुक्तं भवति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अङ्गुलमात्रक्षेत्रप्रदेशराशेरसत्कल्पनया षट्पञ्चादशदधिकशतद्वयप्रमाणस्य यत्प्रथमवर्गमूलं षोडशलक्षणं तस्य सङ्ख्येयतमेभागे यावन्त आकाशप्रदेशा असत्कल्पनया पञ्चषड् वा तावत्प्रदेशात्मिका श्रेणिः परिमाणाय विष्कम्भसूचिरवसातव्या, एवं च नैरयिकापेक्षयाऽमीषां विष्कम्भसूचिरसङ्ख्येयगुणहीना, तथाहि-

नैरयिकाणां श्रेणिपरिमाणाय विष्कम्भसूचिरङ्गुलप्रथमवर्गमूलं द्वितीयवर्गमूलप्रत्युत्पन्नं यावद् भवति तावत्प्रदेशात्मिका द्वितीयं च वर्गमूलं तत्त्वतोऽसङ्ख्यातप्रदेशात्मकं ततोऽसङ्ख्येयगुणप्रथमवर्गमूलप्रदेशात्मिका नैरयिकाणां च सूचिरमीषा त्वङ्गुलप्रथमवर्गमूलसङ्ख्येयभागप्रदेशात्मिकेति, युक्तं चैतत्, यस्मान्महादण्डके सर्वेऽपि भवनपतयो रत्नप्रभानैरयिकेभ्योऽप्यमसङ्खयगुणहीना उक्तास्ततः सर्वनैरयिकापेक्षया सुतरामसङ्ख्येयगुणहीना भवन्ति, मुक्तान्यौधिकमुक्तवत्, आहारकाणि नैरयिकवत्, तैजसकार्मणानि बद्धानि बद्धवैक्रियवत्, मुक्तान्यौधिकमुक्तवत्, यथा चासुरकुमाराणामुक्तं तथा शेषाणामपि भवनपतीनां वाच्यं, यावत्स्तनितकुमाराणां।

मू. (४०४) *पुढविकाइयाणं भंते ! केवइया ओरालियसरीरगा पं० ?, गो० ! दुविहा, पं०, तं०-बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्ञा असखेज्ञाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो, खेत्ततो असंखेज्ञा लोगा, तत्थ णं जे ते मुक्केल्लगा ते णं अनंता अनंताहिं उस्सप्पिणिओस्सप्पिणीहिं अवहीरंति कालतो, खेत्ततो अनंता लोगा, अभवसिद्धिएहिंतो अनंतगुणा सिद्धाणं अनंतभागो, ।*

पुढविकाइयाणं भंते ! केवतिया वेउव्वियसरीरगा पन्नत्ता ?, गो० ! दु० पं०, तं०-बद्धे० मुक्के०, तत्थ णं जे ते बद्धेल्लगा ते णं नत्थि, तत्थ णं जे ते मुक्केल्लगा ते णं जहा एएसिं चेव ओरालिया तहेव भाणियव्वा, एवं आहारगसरीरावि, तेयाकम्मगा जहा एएसिं चेव ओरालिया, एवं आउकाइयतेउकाइयावि, वाउकाइयाणं भंते ! केवतिया ओरालियसरीरा पं० ?, गो० ! दु० पं०, तं०-बद्धे० मुक्के०, दुविहावि जहा पुढविकाइयाणं ओरालिया, वेउव्वियाणं पुच्छा, गो-! दु० तं०-बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्ञा समए समए अवहीरमाणा २ पलितोवमस्स असंखेज्ञइभागमेत्तेणं कालेणं अवहीरंति नो चेव णं अवहिया सिया, मुक्केल्लगा जहा पुढविकाइयाणं, आहारयतेयाकम्मा जहा पुढवीकाइयाणं वणप्फइकाइयाणं जहा पुढविकाइयाणं नवरं तेयाकम्मगा जहा ओहिया तेयाकम्मगा ।

बेइंदियाणं भंते ! केवइया ओरालिया सरीरगा पं० ?, गो० ! दु० तं०-बद्धे० मुक्के०, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्ञा असंखेज्ञाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो खेत्ततो असंखेज्ञाओ सेढीओ पयरस्स असंखेज्ञइभागो, तासिणं सेढिणं विक्खंभसूई असंखेज्ञाओ जोयणकोडाकोडिओ असंखेज्ञाइं सेढिवग्गमूलाइं ।

वृ. पृथिव्यप्तेजःसूत्रेषु बद्धान्यौदारिकशरीराणि असङ्ख्येयानि, तत्रापि कालतः परिमाणचिन्तायां प्रतिसमयमैकशरीरापहारे सामस्त्येनासङ्ख्येयाभिरुत्सर्प्पिण्यवसर्प्पिणीभिरपहियन्ते, क्षेत्रतः परिमाणचिन्तायामसङ्ख्येयालोकाः-आत्मीयावगाहनाभिरसङ्ख्येया लोका व्याप्यन्ते, मुक्तान्यौधिकमुक्तवत्, तैजसकार्णानि बद्धानि बद्धौदारिकवत् मुक्तान्यौधिकमुक्तवत्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वातकायस्यापौदारिकशरीराणि पृथिव्यादिवत्, वैक्रियाणि बद्धान्यसङ्ख्येयानि, तानि च प्रतिसमयमेकैकशरीरापहारे पल्योपमासङ्ख्येयभागेन निःशेषतोऽपहियन्ते, किमुक्तं भवति ? –पल्योपमासङ्ख्येयभागे यावन्तः समयास्तावत्पर्माणानीति न पुनरभ्यधिकानि स्युः, तथाहि–

वायुकायिकाश्चतुर्विधाः, तद्यथा–सूक्ष्मा बादराश्च, एकैके द्विधा–पर्याप्ता अपर्याप्ताश्च, तत्र बादरपर्याप्तव्यतिरिक्ताः शेषास्त्रयोऽपि प्रत्येकमसङ्ख्येयलोकाकाशप्रदेशप्रमाणाः, ये तु बादरपर्याप्तास्ते प्रतरासङ्ख्येयभागप्रमाणाः, तत्र त्रयाणां राशीनां वैक्रियलब्धिरेव नास्ति, बादरपर्याप्तानामपि सङ्ख्येयभागमात्राणां लब्धिः न शेषाणां, आह च चूर्णिकृत्–"तिण्हं ताव रासीणं वेउव्वियलद्धी चेव नत्थि, बायरपज्जत्ताणंपि संखेज्जइभागमेत्ताणं लद्धी अत्थि"त्ति, ततः पल्योपमासङ्ख्येयभागसमयप्रमाणा एव पृच्छासमये वायवो वैक्रियवर्त्तिनोऽवाप्यन्ते नाधिका इति, इह केचिदाचक्षते–सर्वे वायवो वैक्रियवर्त्तिन एव, अवैक्रियाणां चेष्टाया एवासम्भवात्, तदसमीचीनं, वस्तुगतेरपरिज्ञानात्, वायवो हि स्वभावाच्चलास्ततोऽवैक्रिया अपि ते वान्ति इति प्रतिपत्तव्यं, वाताद्वायुरिति व्युत्पत्तेः, आह च चूर्णिकृत्–"जेण सव्वेसु चेव लोगागासेसु चला वायवो वायंति तम्हा अवेउव्वियावि वाया वायंतीति धित्तव्व"मिति, मुक्तानि वैक्रियाण्यौधिकमुक्तवत्, तैजसकार्मणानि बद्धानि बद्धौदारिकवत् मुक्तान्यौधिकमुक्तवत्, वनस्पतिकायिकचिन्तायामौदारिकाणि पृथिव्यादिवत्, तैजसकार्मणान्यौधिकतैजसकार्मणवत् ।

द्वीन्द्रियसूत्रे बद्धान्यौदारिकशरीराणि असङ्ख्येयानि, ततः कालतः परिमाणचिन्तायामसङ्ख्येयाभिरुत्सर्प्पिण्यवसर्पिणीभिरपहियन्ते–असङ्ख्यातासूत्सर्प्पिण्यवसर्प्पिणीषु यावन्तःसमयास्तावत्प्रमाणानीति भावः, क्षेत्रतोऽसङ्ख्येयाः श्रेण्योऽसङ्ख्यातासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीत्यर्थः, तासां श्रेणीनां परिमाणविशेषनिर्द्धारणार्थमाह–प्रतरासङ्ख्येयभागः प्रतरस्यासङ्ख्येयभागप्रतिता असङ्ख्येया श्रेणयः परिगृह्यन्ते इति भावः । प्रतरासङ्ख्येयभागो नैरयिकभवनपतीनामपि प्रतिपादितस्ततो विशेषतरपरिमाणनिरूपणार्थं सूचीमानमाह–'तासि णं सेढीण'मित्यादि, तासां श्रेणीनां परिमाणावधारणाय या विष्कम्भसूची सा असङ्ख्येया योजनकोटीकोट्यः असङ्ख्येयोजनकोटीकोटिप्रमाणा इत्यर्थः, अथवेदमन्यद्विशेषतः परिमाणं–

'असंखेज्जाइं सेढिवग्गमूलाइं'इति, एकस्याः परिपूर्णायाः श्रेणेर्यः प्रदेशराशिस्तस्य प्रथमं वर्गमूलं द्वितीयं तृतीयं च वर्गमूलं यावदसङ्ख्येयतमं वर्गमूलं एतानि सर्वाण्यप्येकत्र सङ्कल्प्यन्ते, तेषु च सङ्कल्पितेषु यावान् प्रदेशराशिर्भवति तावत्प्रदेशात्मिका विष्कम्भसूचिरवसेया, अत्र निदर्शनं–

श्रेणौ किल प्रदेशा असङ्ख्याता अप्यसत्कल्पनया पञ्चषष्टिः सहस्राणि पञ्च शतानि षट्त्रिंशदधिकानि तेषां प्रथमं वर्गमूलं द्वे शते षट्पञ्चाशदधिके द्वितीयं षोडश तृतीयं चत्वारः चतुर्थं द्वौ एतेषां च सङ्कलने जाते द्वे शते अष्टसप्तत्यधिके एतावता किलासत्कल्पनया प्रदेशानां सूचिरिति, अथैते द्वीन्द्रियाः किंप्रमाणाभिरवगाहनाभिरास्तीर्यमाणाः कियता कालेन सकलं प्रतरमापूरयन्ति ?, उच्यते, अङ्गुलासङ्ख्येयाभागप्रमाणभिरवगाहनाभिः प्रत्यावलिकाऽसङ्ख्येयभागमेकैकावगाहनारचेनासङ्ख्येयाभिरुत्सर्प्पिण्यवसर्पिणीभिरापूर्यन्ते, इयमत्र भावना–एकैकस्मिन्नावलिकायाः असङ्ख्येयतमे भागे एकैका अङ्गुलासङ्ख्येयप्रमाणा अवगाहना रच्यते, ततोऽसङ्ख्येयाभिरुत्सर्प्पिण्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वसर्पिणीभिः सकलमपि प्रतरं द्वीन्द्रियशरीरैरापूर्यते,

एतदेवापहारद्वारेण सूत्रकृदाह–

मू. (४०४-वर्त्तते) *बेइंदियाणं ओरालियसरीरेहिं बद्धेल्लगेहिं पयरो अवहीरति, असंखेज्जाहिं उस्सप्पिणीओसप्पिणीहिं कालतो, खेत्ततो अंगुलपयरस्स आवलियाते य असंखेज्जतिभागपलिभागेणं, तत्थ णं जे ते मुक्केल्लगा ते जहा ओहिया ओरालियमुक्केल्लगा, वेउव्विया आहारगा य बद्धिल्लगा नत्थि, मुक्किल्लगा जहा ओहिया ओरालियमुक्केल्लगा, तेयाकम्मगा जहा एतेसिं चेव ओहिया ओरालिया, एवं जाव चउरिंदिया। पंचिंदियतिरिक्खजोणियाणं एवं चेव, नवरं वेउव्वियसरीरएसु इमो विसेसो पंचिंदियतिरिक्खजोणियाणं भंते! केवइया वेउव्वियसरीरया पं०, गो०! दु० पं०–बद्धे० मुक्के०, तत्थ णं जे ते बद्धेल्लया ते णं असंखिज्जा, जहा असुरकुमाराणं, नंवरं तासि णं सेढीणं विक्खंभसूई अंगुलपढमवग्गमूलस्स असंखेज्जइभागो, मुक्केल्लगा तहेव।*

मणुस्साणं भंते! केवइया ओरालियसरीरगा पं० ?, गो०! दु०, तं०–बद्धेल्लगा य मुक्के०, तत्थ णं जे ते बद्धेल्लगा ते णं सिय संखिज्जा सिय असंखिज्जा जहन्नपदे संखेज्जा संखेज्जाओ कोडाकोडीओ तिजमलयपस्स उवरिं चउजमलपयस्स हिट्ठा, अहव णं छट्ठो वग्गो अहव णं छन्नउईछेयणगदाइरासी, उक्कोसपए असंखिज्जा, असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो खेत्तओ रूवपक्खित्तेहिं मणुस्सेहिं सेढी अवहीरइ, तीसे सेढीए आकासखेत्तेहिं अवहारो मग्गिज्जइ असंखेज्जा असंखेज्जाहिं उस्सप्पिणिओसप्पिणीहिं कालतो खेत्ततो अंगुलपढमवग्गमूलं तइयवग्गमूलपडुप्पन्नं, तत्थ णं जे ते मुक्केल्लगा ते जहा ओरालिया ओहिया मुक्केल्लगा,

वेउव्वियाणं भंते! पुच्छा, गो०! दु०, तं०– बद्धे० मुक्के०, तत्थ णं जे ते बद्धेल्लगा ते णं संखिज्जा समए २ अवहीरमाणे २ संखेज्जेणं कालेणं अवहीरंति, नो चेव णं अवहीरिया सिया, तत्थ णं जे ते मुक्केल्लगा ते णं जहा ओरालिया ओहिया, आहारगसरीरा जहा ओहिया, तेयाकम्मगा जहा एतेसिं चेव ओरालिया।

वाणमंतराणं जहगा नेरइयाणं ओरालिया आहारगा य, वेउव्वियसरीरगा जहा नेरइयाणं, नवरं तासि णं सेढीणं विक्खंभसूई संखेज्जओअणसयवग्गपलिभागो पयरस्स, मुक्किल्लया जहा ओरालिया, आहारगसरीरा जहा असुरकुमाराणं तेयाकम्मया जगा एतेसिं णं चेव वेउव्विता। तासिणं सेढीणं विक्खंभसूई बिछप्पन्नंगुलसयवग्गपलिभागो पयरस्स, वेमाणियाणं एवं चेव, नवरं तासिणं सेढीणं विक्खंभसूई अंगुलबितीयवग्गमूलं तइयवग्गमूलपडुप्पन्नं अहवण्णं अंगुलतइयवग्गमूलधणप्पमाणमेत्ताओ सेढीओ, सेसं तं चेव॥

वृ. 'बेइंदियाण' मित्यादि, द्वीन्द्रियाणा सम्बन्धिभिरौदारिकशरीरैर्बद्धैः प्रतरसङ्ख्येयाभिरुत्सर्प्पिण्यवसार्प्पिणीभिरपह्रियते, अत्र प्रतरमिति क्षेत्रतः परिमाणं उत्सर्प्पिण्यवसर्प्पिणीभिरिति कालतः, किंप्रमाणेन पुनः क्षेत्रेण कालेन वा अपहरणमत आह–'अंगुलपयरस्स आवलियाए य असंखेज्जइभागपलिभागेणं' ति, अङ्गुलमात्रस्य प्रतरस्य–एकप्रादेशिकश्रेणिरूपस्य असङ्ख्येयभागप्रतिभागप्रमाणेन खण्डेन, इदं क्षेत्रविषयं परिमाणं, कालपरिमाणमावलिकाया असङ्ख्येय-

10 19

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भागप्रतिभागेनासंख्येयतमेन प्रतिभागेन, किमुक्तं भवति ?–एकेन द्वीन्द्रियेणाङ्गुलासंख्येय-भागप्रमाणं खण्डमावलिकाया असङ्ख्येयतमेन भागेनापह्रियते, द्वितीयेनापि तावत्प्रमाणं खण्डं तावता कालेन, एवमपह्रियमाणं प्रतरं द्वीन्द्रियैः सर्वैरसङ्ख्येयाभिरुत्सर्प्पिणीभिः सकलमपह्रियते इति, मुक्तान्यौघिकमुक्तवत्, तैजसकार्मणानि बद्धानि बद्धौदारिकवत्, वैक्रियाणि पुनर्बद्धानि तेषां न सन्ति, मुक्तान्यौधिकमुक्तवत्, एवं त्रिचतुरिन्द्रियाणामपि ।

तिर्यक्पञ्चेन्द्रियाणां बद्धानि मुक्तानि चौदारिकाणि द्वीन्द्रियवत्, वैक्रियाणि बद्धानि असङ्ख्येयानि, तत्र कालतः परिमाणचिन्तायामसङ्ख्येयाभिरुत्सर्प्पिण्यवसर्पिणीभिरपह्रियन्ते, क्षेत्रतोऽसङ्ख्येयासु श्रेणिषु यावन्तः आकाशप्रदेशास्तावत्प्रमाणानि, तासां च श्रेणीनां परिमाणं प्रतरस्यासङ्ख्येयो भागः, तथा चाह–'जहा असुरकुमाराण'मिति, यथा असुरकुमाराणां तथा वक्तव्यं, नवरं विष्कम्भसूचिपरिमाणचिन्तायां तत्राङ्गुलप्रमाणवर्गमूलस्य सङ्ख्येयो भाग उक्त इह त्वसङ्ख्येयो भागो वक्तव्यः, किमुक्तं भवति ? –अङ्गुलमात्रक्षेत्रप्रदेशराशेः यत्प्रथमं वर्गमूलं तस्यासङ्ख्येयतमे भागे यावन्त आकाशप्रदेशास्तावत्प्रदेशात्मिका सूचिः परिगृह्यते, तावत्या च सूच्या याः श्रेणयः स्पृष्टास्तासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानि तिर्यक्पञ्चेन्द्रियाणां बद्धानि वैक्रियशरीराणि, उक्तं च–

॥१॥ "अङ्गुलमूलासंखेयभागप्पमियाउ होंति सेढीओ ।
उत्तरविव्वियाणं तिरियाणं संन्निपज्ञाणं ॥"

मुक्तान्यौधिकमुक्तवत्, तैजसकार्मणानि बद्धानि बद्धौदारिकवत्, मुक्तान्यौधिकमुक्तवत्, मनुष्याणां बद्धान्यौदारिकशरीराणि स्यात्–कदाचित् सङ्ख्येयानि कदाचिदसङ्ख्येयानि, कोऽत्रा-भिप्रायः इति चेत् ?, उच्यते, इह द्वये मनुष्या–गर्ब्भव्युत्क्रान्तिकाः सम्मूर्च्छिमाश्च, तत्र गर्भव्युत्क्रा-न्तिकाः सदावस्थायिनो, न स कश्चित्कालोऽस्ति यो गर्ब्भव्युत्क्रान्तिकमनुष्यरहितो भवति, सम्मू-र्च्छिमाश्च कदाचिद्विद्यन्ते कदाचित्सर्वथा तेषामभावो भवति, तेषामुत्कर्शषतोऽन्तर्मुहूर्तायुष्कात्वात्, उत्पत्त्यन्तरस्य चोत्कर्षतश्चतुर्विंशतिमुहूर्त्तप्रमाणत्वात्, ततो यदा सर्वथा सम्मूर्च्छिममनुष्या न विद्यन्ते किन्तु केवला गर्ब्भव्युत्क्रान्तिका एव तिष्ठन्ति तदा स्यात् सङ्ख्येयाः, सङ्ख्येयानामेव गर्ब्भव्यु-त्क्रान्तिकानां भावात्, महाशरीरत्वे प्रत्येकशरीरत्वे च सति परिमितक्षेत्रवर्त्तित्वात्, यदा तु सम्मूर्च्छि-मास्तदा असङ्ख्येयाः, सम्मूर्च्छिमानामुत्कर्षतः श्रेण्यसङ्ख्येभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात्,

तथा चाह–'जहन्नपदे संखेज्ञा' इत्यादि, जघन्यपदं नाम यत्र सर्वस्तोकाः मनुष्याः प्राप्यन्ते, आह–किमत्र सम्मूर्च्छिमाणां ग्रहणमुत गर्भव्युत्क्रान्तिकानां ?, उच्यते, गर्ब्भव्युत्क्रान्तिकानां, तेषामेव सदाऽवस्थायितया सम्मूर्च्छिमविरहे सर्वस्तोकतया प्राप्यमाणत्वात्, उत्कृष्टपदे तूभयेषा-मपिग्रहणं, यदाह मूलटीकाकारः– "सेतराणां ग्रहणमुत्कृष्टपदे, जघन्यपदे गर्भव्युत्क्रान्तिकानामेव केवलानां ग्रहण" मिति, अस्मिन् जघन्यपदे सङ्ख्येया मनुष्याः, तत्र सङ्ख्येयकं सङ्ख्येयभेदभिन्नमिति न ज्ञायते कियन्तस्ते इति विशेषसङ्ख्यां निर्ध्धारयति–सङ्ख्येयाः कोटीकोट्यः, अथवा इदमन्यत् विशेषतरं परिमाणं–'तिजमलपयस्स उवरिं चउजमलपयस्सहेट्ठा' इति, इह मनुष्यसङ्ख्या-प्रतिपादिकान्येकोनत्रिंशदङ्कस्थानानि वक्ष्यमाणानि, तत्र समयपरिभाषया अष्टानां अष्टानमङ्क-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

स्थानानां यमलपदमिति संज्ञा, चतुर्विंशत्या चाङ्कस्थानैः त्रीणि यमलपदानि लब्धानि, उपरि पञ्चाङ्कस्थानानि तिष्ठन्ति, अथ च यमलपदमष्टभिरङ्कस्थाननैस्ततश्चतुर्थं यमलपदं न प्राप्यते तत उक्तं त्रयाणां यमलपदानामुपरि-पञ्चभिरङ्कस्थानैर्वर्द्धमानत्वात् चतुर्थस्य च यमलपदस्या-धस्तात्-त्रिभिरङ्कस्थानैर्हीनत्वात्, अथवा द्वौ द्वौ वर्गौ समुदितौ एकं यमलं चत्वारो वर्गाः समुदिता द्वे यमले षड् वर्गाः समुदितास्त्रीणि यमलपदानि अष्टौ वर्गाः समुदिताश्चत्वारि यमलपदानि, तत्र यस्मात् षण्णां वर्गाणामुपरि वर्त्तन्ते सप्तमस्य च वरगस्याधस्तात् तत उक्तं-त्रिमलपदस्योपरि चतुर्यमलपदस्याधस्तादिति, त्रियमलपदस्येति-त्रितयानां यमलपदानां समाहारस्त्रियमलपदं तस्य, तथा चतुर्णां यमलपदानां समाहारश्चतुर्यमलपदं तस्य, सम्प्रति स्पष्टतरं सङ्ख्यानमुपदर्शयति-

'अहवं णं छट्ठवग्गो पंचमवग्गपडुप्पण्णो' इति अथवेति पक्षान्तरे णमिति वाक्यालङ्कारे षष्ठो वर्गः पञ्चमवर्गेण प्रत्युत्पन्नो-गुणितः सन् यावान् भवति तावत्प्रमाणा जघन्यपदे मनुष्याः, तत्र एकस्य वर्ग एक एव स च वृद्धिं न गत इति वर्गो न गण्यते, द्वयोर्वर्गश्चत्वारः एष प्रथमो वर्गः चतुर्णां वर्गः षोडश एष द्वितीयो वर्गः षोडशानां वर्गे द्वे शते षट्पञ्चाशदधिके एष तृतीयो वर्गः द्वयोः शतयोः षट्पञ्चाशदधिकयोर्वर्गः पञ्चषष्टिः सहस्राणि पञ्च शतानि षट्त्रिंशदधिकानि, एष चतुर्थो वर्गः एतस्य वर्गश्चात्वारि कोटिशतानि एकोनत्रिंशत्कोट्यः एकोनपञ्चाशल्लक्षाः सप्तषष्टिः सहस्राणि द्वे शते षन्नवत्यधिके एष पञ्चमो वर्गः उक्तं च-

॥१॥ "चत्तारि य कोडिसया अउणत्तीसं च होंति कोडीओ।
अउणावन्नं लक्खा सत्तट्ठी चेव य सहस्सा ॥
॥२॥ दो य सया छन्नउया पंचमवग्गो समासओ होइ।
एयस्स कतो वग्गो छट्ठो जो होइ तं वोच्छं ॥"

एतस्य पञ्चचमस्य वर्गस्य यो वर्गः स षष्टो वर्गः, तस्य परिमाणमेकं कोटीकोटीशतसहस्रं चतुरशीतिः कोटीकोटीसहस्राणि चत्वारि सप्तषष्टयधिकानि कोटीकोटीशतानि चतुश्चत्वारिंश-त्कोटिलक्षाणि सप्तकोटीसहस्राणि त्रीणि सप्तत्यधिकानि कोटिशतानि पञ्चनवतिर्लक्षाः एकपञ्चाशत्सहस्राणि षट् शतानि षोडशोत्तराणि, एष षष्ठो वर्गः, उक्तं च-

॥१॥ "लक्खं कोडोकोडी चउरासीइ भवे सहस्साइं।
चत्तारि य सत्तट्ठा होंति सया कोडीकोडीणं ॥
॥२॥ चउयालं लक्खाइं कोडीणं सत्त चेव य सहस्सा।
तिन्नि सया सत्तयरी कोडीणं हुंति नायव्वा ॥
॥३॥ पंचानउई लक्खा एकावन्नं भवे सहस्साइं।
छसोलसुत्तरसया एसो छट्ठो हवइ वग्गो ॥" इति,

एष षष्ठो वर्गः पञ्चमवर्गेण गुण्यते, गुणिते च सति यावान् राशिर्भवति तावत्प्रमाणा जघन्यपदे मनुष्याः, ते च एतावन्तो भवन्ति, ७९२२८१६२५१४२६४३३७५९३५४३९५०३३६ एतान्येकोनत्रिंशदङ्कस्थानानि, एतानि च कोटीकोट्यादिद्वारेण कथमपि अभिधातुं न शक्यन्ते ततः पर्यन्तवर्त्तिनोऽङ्कस्थानादारभ्य अङ्कस्थानसङ्ग्रहमात्रं पूर्वपुरुषप्रणीतेन गाथाद्वयेनाभिधीयते-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ "छत्तिन्नि तिन्नि सुण्णं पंचेव य नव य तिण्णि चत्तारि।
पंचेव तिन्नि नव पंच सत्त तिण्णेव त्ति चउ छट्ठो ॥
॥२॥ दो चउ इक्को पंच दो छक्कगेक्कग (गं च अ)ट्ठेव।
दो दो नव सत्तेव य ठाणाइं उवरि हुंताइं ॥"
—अथवाऽयमङ्कस्थानप्रथमाक्षरसङ्ग्रहः —
॥१॥ "छत्तितिसु पण नव ति च प ति ण प स ति ति चउ छंदो।
च ए प दो छ ए अ बे बे ण स पढमक्खरसन्तियट्ठाणा ॥"

एतेषामेव एकोनत्रिंशदङ्कस्थानानां पूर्वपुरुषैः पूर्वाङ्गैः परिसङ्ख्यायनं कृतं तदुपदर्शयति, तत्र चतुरशीतिर्लक्षाणि पूर्वाङ्गं चतुरशीतिर्लक्षाश्चतुरशीतिर्लक्षैर्गुण्यन्ते ततः पूर्वं भवति, तस्य परिमाणं—सप्ततिः कोटिलक्षणाणि षट्पञ्चाशत्कोटिसहस्राणि ७०५६००००००००००, एतेन भागो ह्रियते तत इदमागतं—एकादशपूर्वकोटीकोट्यो द्वाविंशतिः पूर्वकोटीलक्षाणि चतुरशीतिः पूर्वकोटीसहस्राणि अष्टादशोत्तराणि पूर्वकोटीशतानि एकाशीतिः पूर्वलक्षाणि पञ्चनवतिः पूर्वसहस्राणि त्रीणि षट्पञ्चादशधिकानि पूर्वशतानि, अत ऊर्ध्वं पूर्वैर्भागो न लभ्यते ततः पूर्वाङ्गैर्भागहरणं, तत्रेदमागतं—एकविंशतिः पूर्वाङ्गलक्षाणि सप्ततिः पूर्वाङ्गसहस्राणि षट् एकोनषष्ठधिकानि पूर्वाङ्गशतानि, तत ऊर्द्ध च इदमन्यत् उद्धरितमवतिष्ठतेत्र्यशीतिर्लक्षाणि पञ्चाशत् सहस्राणि त्रीणि शतानि षट्त्रिंशदधिकानि मनुष्याणामिति १,१२,२८,४१,१८,८१,९५,३५६ ।२१७०६५९। तथा च पूर्वाचार्यप्रणीता अत्र गाथा—

॥१॥ "मणुयाण जहन्नपदे एक्कारस पुव्वकोडिकोडीउ।
बावीस कोडिलक्खा कोडिसहस्साइं चुलसीई ॥
॥२॥ अट्ठेव य कोडिसया पुव्वाण दसुत्तरा तओ होंति।
एकासीई लक्खा पंचानउई सहस्साइं ॥
॥३॥ छप्पन्ना तिन्नि सया, पुव्वाणं पुव्ववण्णिया अन्ने।
एत्तो पुव्वंगाइं इमाइं अहियाइं अन्नाइं ॥
॥४॥ लक्खाइं एगवीसं पुव्वंगाण सयरी सहस्सा य
छच्चेवेगूणट्ठा पुव्वंगाणं सया होंति ॥
॥५॥ तेसीइ सयसहस्सा पन्नासं खलु भवे सहस्साइं।
तिन्नि सया छत्तीसा, एवइया अविगला मणुया ॥" इति,

इमामेव सङ्ख्यां विशषोपलम्भनिमित्तं प्रकारान्तरेणा—'अहव णं छन्नउईछेयणगदायी रासी' इति, 'अहव णे'ति प्राग्वत्, षन्नवतिच्छेदनकानि यो राशिर्ददाति स षन्नवतिछेदनकदायी राशिः, किमुक्तभवति ? —योराशिरद्धैनार्द्धेन छिद्यमानः षन्नवतिं वारान् छेदं सहते पर्यन्ते च सकलमेकं रूपं पर्यवसितं भवति स षन्नवतिछेदनकदायी राशिरिति, कः पुनरेवंविध इति चेत् ?, उच्यते, एष एव षष्ठो वर्गः पञ्चमवर्गगुणितः, कोऽत्र प्रत्यय इति चेत् ?, उच्यते, इह प्रथम- वर्गश्छिद्यमानो द्वे छेदनके ददाति, तद्यथा—प्रथमच्छेदनकं द्वौ दिव्तीयमेकमिति, द्वितीयो वर्गश्चत्वारि छेदनकानि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र प्रथममष्टौ द्वितीयं चत्वारस्तृतीयं द्वौ चतुर्थमेक इति, एवं तृतीयवर्गोऽष्टौ छेदनकानि प्रयच्छति, चतुर्थः षोडश पञ्चमो द्वात्रिंशतं षष्ठश्चतुःषष्टिं, स चैवं पञ्चमवर्गेण गुणितः षन्नवतिः, कथमेतदवसेयमिति चेत् ?,

उच्यते, इह यो यो वर्गो येन येन वर्गेणं गुण्यते तत्र तत्र तयोर्द्वयोरपि छेदनकानि प्राप्यन्ते, यथा प्रथमवर्गेण गुणिते द्वितीयवर्गे षट्, तथाहि-द्वितीयो वर्गः षोडशलक्षणः प्रथमवर्गेण चतुष्करूपेण गुण्यते जाता चतुःषष्टिः, तस्याः प्रथमं छेदनकं द्वात्रिंशत् द्वितीयं षोडश तृतीयमष्टौ चतुर्थं चत्वारः पञ्चमं द्वौ षष्ठं एक इति, एवमन्यत्रापि भावनीयं, तत्र पञ्चमवर्गे द्वात्रिंशच्छेदनकानि षष्ठे चतुःषष्टिः ततः पञ्चमवर्गेण षष्ठे वर्गे गुणिते षन्नवतिछेदनकानि प्राप्यन्ते, अथवा एकं रूपं स्थापयित्वा ततः षन्नवतिवारान् द्विगुणद्विगुणीक्रियते, कृतं च सत् यदि तावत्प्रमाणो राशिर्भवति ततोऽवसातव्यं एष षन्नवतिच्छेदनकदायी राशिरिति, तदेवं जघन्यपदमभिहितम्,

इदानीमुत्कृष्टपदामाह-'उक्कोसफए असंखेज्जा' इत्यादि, उत्कृष्टपदे ये मनुष्या भवन्ति ते असङ्ख्येयाः, तत्रापि कालतः परिमाणचिन्तायां प्रतिसमयमेकैकमनुष्यापहारे सामस्त्येनासङ्ख्येयाभिरुत्सर्प्पिण्यवसर्प्पिणीभिरपह्रियन्ते, क्षेत्रतो रूपे प्रक्षिप्ते मनुष्यैरेका श्रेणिः परिपूर्णाऽपह्रियते, किमुक्तं भवति ?-उत्कृष्टपदे ये मनुष्यास्तेषु मध्ये एकस्मिन्नसत्कल्पनया रूपे प्रक्षिप्ते सकलाऽपि श्रेणिरेकाऽपह्रियते, तस्याश्च श्रेणेः क्षेत्रकालाभ्यामपहारमार्गणा कालतस्तावदसङ्ख्येयाभिरुत्सर्प्पिण्यवसर्प्पिणीभिः क्षेत्रतोऽङ्गुलप्रथमवर्गमूलं तृतीयवर्गमूलप्रत्युत्पन्नं, किमुक्तं भवति ?-अङ्गुलमात्रक्षेत्रप्रदेशराशिरसत्कल्पनया षट्पञ्चाशदधिकशतद्वयप्रमाणस्तस्य यत्प्रथमं वर्गमूलमसत्कल्पनया षोडशलक्षणं ततस्तृतीयेन वर्गमूलेनासत्कल्पनया द्विकलक्षणेन गुण्यते, गुणिते च सति यावान् प्रदेशराशिर्भवति असत्कल्पनया द्वात्रिंशत् एतावत्प्रमाणैः खण्डैरपह्रियमाणा यावत् श्रेणिर्निष्ठामियर्त्ति तावत् मनुष्या अपि निष्ठामुपयान्ति, आह-कथमेकस्याः श्रेणेर्यथोक्तप्रमाणैः खण्डैरपह्रियमाणायाः असङ्ख्येया उत्सर्पिण्यवसर्प्पिण्यो लगन्ति ? उच्यते, क्षेत्रस्यातिसूक्ष्मत्वात्, उक्तं च सूत्रेऽपि -

॥१॥ "सुहुमो य होइ कालो तत्तो सुहुमयरयं हवइ खेत्तं ।
अंगुलसेढीमेत्ते उस्सप्पिणीओ असंखेज्जा ॥" इति,

मुक्तान्यौघिकमुक्तवत्, वैक्रियाणि बद्धानि सङ्ख्येयानि, गर्भव्युत्क्रान्तिकानामेव केषांचित् वैक्रियलब्धिसंभवात्, मुक्तान्यौधिकमुक्तवत्, आहारकाण्यौधिकाहारकवत्, तैजसकार्मणानि बद्धानि बद्धौदारिकवत्, मुक्तान्यौधिकमुक्तवत्, व्यन्तराणामौदारिकाणि यथा नैरयिकाणां, वैक्रियाणि बद्धान्यसङ्ख्येयानि, तत्र कालतः परिमाणचिन्तायां प्रतिसमयमेकैकापहारे असङ्ख्येयाभिरुत्सर्प्पिण्यवसर्प्पिण्यवसर्प्पिणीभिरपह्रियन्ते, क्षेत्रतोऽसङ्ख्येयाः श्रेणयः, असङ्ख्यातासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीति भावः, ताश्च श्रेणयः कियत्य इति चेत् ?, उच्यते, प्रतरस्यास- ङ्ख्येयो भागः, प्रतरासङ्ख्येयभागप्रमिता इत्यर्थः, तथा चाह-

'वेउव्वियसरीरा जहा नेरइयाण'मिति वैक्रियशरीराणि व्यन्तराणां यथा नैरयिकाणां, केवलं सूच्यां विशेषः, तथा चाह-'नवर'मित्यादि, नवरं तासां श्रेणीनां विष्कम्भसूचिर्वक्तव्येति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शेषः, सा च सुप्रसिद्धत्वान्नोक्ता, कथं सुप्रसिद्धेति चेत्? उच्यते, इह महादण्डक पञ्चेन्द्रियतिर्यग्नपुंसकेभ्योऽसङ्ख्येयगुणहीना व्यन्तराः पठ्यन्ते, तत एषां विष्कम्भसूचिरपि तिर्यक्पञ्चेन्द्रियविष्कमभसूचेरसङ्ख्येयगुणहीना वक्तव्या इति, आह च मूलटीकाकारोऽपि, –

"जम्हा महादंडए पंचिंदियतिरियनपुंसएहिंतो असंखेज्जगुणहीणा वाणमंतरा पढिज्जंति, तम्हा विक्खंभसूईवि तेहिंतो असंखेज्जगुणहीणा चेव भाणियव्वा' इति, सम्प्रति प्रतिभाग उच्यते– प्रतिभागो नाम खण्डं, 'संखेज्जजोयणसयवग्गपलिभागो पयरस्स' इति सङ्ख्येयोजनशतवर्गप्रमाणः प्रतिभागः प्रतरस्य पूरणे अपहरणे वा इति वाक्यशेषः, इयमत्र भावना–असङ्ख्येययोजनशतवर्गप्रमाणे श्रेणिखण्डे यदि एकैको व्यन्तरः स्थाप्यते ततस्ते सकलमपि प्रतरमापूयन्ति, यदिवा यद्येकैकव्यनतरापहारे एकैकं सङ्ख्येययोजनशतवर्गप्रमाणं श्रेणिखण्डमपह्रियते तत एकत्र व्यन्तरा निष्ठां यान्ति परतः सकलं प्रतरमिति, मुक्तान्यौधिकमुक्तवत्, आहारकाणि नैरयिकवत्, तैजसकार्मणानि बद्धानि बद्धवैक्रियवत्, मुक्तान्यौधिकमुक्तवत्।

ज्योतिष्काणामौदारिकाणि नैरयिकवत्, वैक्रियाणि बद्धान्यसङ्ख्येयानि, तत्र कालतो मार्गणायां प्रतिसमयमेकैकापहारे सामस्त्येनासङ्ख्येयाभिरुत्सर्प्पिण्यवसर्प्पिणीभिरपह्रियन्ते, क्षेत्रतोऽसङ्ख्येयाः श्रेणयः, ताश्च श्रेणयः प्रतरासङ्ख्येयभागप्रमिताः, तथा चाह–'जोइसियाणं एवं चेव'इति, नवरमित्यादिना विशेषं दर्शयति, नवरं तासां श्रेणीनां विष्कम्भसूचिर्वक्तव्येति शेषः, इयमपि सुप्रसिद्धात्वान्नोक्ता, कथमियं सुप्रसिद्धेति चेत् ?, उच्यते, यस्मान्महादण्डके व्यन्तरेभ्यो ज्योतिष्काः सङ्ख्येयगुणा उक्तास्तत एतेषां विष्कम्भसूचिरपि तेषां विष्कम्भसूचेः सङ्ख्येययगुणा द्रष्टव्या, तथा चाह मूलटीकाकारः–'जम्हा वाणमंतरेहिंतो जोइसिया संखिज्जगुणा पढिज्जंति, तम्हा विक्खंभसूईवि तेसिं तेहिंतो संखेज्जगुणा चेव भवति', इति नवरं प्रतिभागे स्पष्टतरो विशेषस्तमेवाह–'बिछप्पन्नं गुलसयवग्गपलिभागो पयरस्स' इति षट्पञ्चादशधिकशतद्वयाङ्गुलवर्गप्रमाणः प्रतिभागः प्रतरस्य पूरणेऽपहरणे च,

अत्रापीयं भावना–षट्पञ्चादशधिकशतद्वयाङ्गुलवर्गप्रमाणे श्रेणिखण्डे यद्येकैको ज्योतिष्कोऽवस्थाप्यते ततस्ते सकलमपि प्रतरमापरयन्ति, यदिवा यद्यैकैकज्योतिष्कापहारेण एकैकं षट्पञ्चाशदधिकशतद्वयाङ्गुलवर्गदप्रमाणं श्रेणिखण्डमपह्रियते तत एकत्र ज्योतिष्काः परिसमाप्तिमुपयान्ति अपरत्र सकलं प्रतरमिति, एवं च ज्योतिष्काणां व्यन्तरेभ्यः सङ्ख्येयगुणहीनः प्रतिभागः सङ्ख्येयगुणाभ्यधिका सूचिः, पञ्चसङ्ग्रहे पुनः षट्पञ्चाशदधिकशतद्वयप्रमाण एव प्रतिभाग उक्तो नतु षट्पञ्चाशदधिकशतद्वयवर्गदप्रमाणः, तथा च तद्ग्रन्थः– "छप्पन्नदोसयंगुलसूइपएसेहं भाइयं पयरं। जोइसिएहिं हीरइ" इति, मुक्तान्यौधिकमुक्तवत्, आहारकाणि नैरयिकवत्, तैजसकार्मणानि बद्धानि वैक्रियवत्, मुक्तान्यौधिकमुक्तवत्।

वैमानिकानामौदारिकाणि नैरयिकवत्, वैक्रियमाणि बद्धानि असङ्ख्येयानि, तत्र कालतो मार्गणा ज्योतिष्कवत्, क्षेत्रतो मार्गणाऽसङ्ख्येयाः श्रेणयः, किमुक्तं भवति? –असङ्ख्येयासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीति, तासां च श्रेणीनां परिमाणां प्रतरस्यासङ्ख्येयो भागः, प्रतरासङ्ख्येयाभागप्रमिता ग्राह्या इत्यर्थः, तत्र प्रतरासङ्ख्येयाभागो नैरयिकादिमार्गणायामपि गृहीतं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति विशेषतरं परिमाणं प्रतिपादयति-'तासि णं'मित्यादि, तासां श्रेणीनां विष्कम्भसूचिरङ्गुलद्वितीय-वर्गमूलं तृतीयवर्गमूलप्रत्युत्पन्नं, एतदुक्तं भवति-

अङ्गुलमात्रश्रेत्रप्रदेशराशेरसत्कल्पनया षट्पञ्चाशदधिकशतद्वयप्रमाणस्य यत् द्वितीयं वर्गमूलं, असत्कल्पनया चतुष्कलश्रणं, तत्तृ तीयेन वर्गमूलेन, असत्कल्पनया द्विकरूपेण गुण्यते, गुणिते च सति यावान् प्रदेशराशिर्भवति, असत्कल्पनया अष्टौ, तावत्प्रदेशात्मिकया विष्कम्भसूच्या परिमिताः श्रेणयः परिग्राह्याः, तत्रापि ता एव अष्टौ श्रेणय इति प्रकारद्वयेऽप्यर्थभेदः, आहारकाणि नैरयिकवत्, तैजसकार्मणानि बद्धानि बद्धवैक्रियवत्, मुक्तान्यौधिकमुक्तवत् ॥

पदं - १२ - समाप्तम्

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे द्वादशपदस्य मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

पदं - १३ - "परिणाम"

वृ. तदेवं व्याख्यातं द्वादशमं पदं, सम्प्रति त्रयोदशमारभ्यते, तस्य चायमभिसम्बन्धः-इहानन्तरपदे औदारिकादिशरीरविभाग उक्तः, तानि पुनः शरीराणि तथा परिणामे भवन्ति नान्यथा ततः परिणामस्वरूपप्रतिपादनार्थमिदमारभ्यते, तत्र चेदमादिसूत्रं-

मू. *(४०५) कतिविधे णं भंते! परिणामे पन्नत्ते ?, गो० ! दुविहे परिणामे पं०, तं० जीवपरिणामे य अजीवपरिणामे य ।*

वृ. 'कइविहे णं भंते! परिणामे पं० ?' इत्यादि, कतिविधः-कतिप्रकारो, णमिति वाक्या-लङ्कारे, भदन्त ! परिणामः प्रज्ञप्तः, परिणमनं परिणामः, 'कर्त्तरी'ति भावे घञ्प्रत्ययः, परिणमनं च नयभेदेन विचित्रं, नयाश्च नैगमादयोऽनेके, तेषां च समस्तानामपि सङ्ग्राहकौ प्रवचने द्वौ नयौ, तद्यथा-द्रव्यास्तिकनयः पर्यायास्तिकनयश्च, तथा चाहुः श्रीमल्लवादिनः-

॥१॥ "तित्थयरवयणसंगहविसेसपत्थारमूलवागरणा ।
दव्वट्ठिओ य पज्जवनओ य सेसा विगप्पा सिं ॥"

तत्र द्रव्यास्तिकनयमतेन परिणमनं नाम यत्कथञ्चित् सदेवोत्तरपर्यायरूपं धर्मान्तरमधिगच्छति, न च पूर्वपर्यायस्यापि सर्वथाऽवस्थानं नाप्येकानतेन विनाशः, तथा चोक्तम्-

॥१॥ "परिणामो ह्यर्थान्तरगमनं न च सर्वथा व्यवस्थानम् ।
न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः ॥"

पर्यायास्तिकनयमतेन पुनः परिणमनं पूर्वसत्पर्यायापेक्षया विनाश उत्तरेण चासता पर्यायेण प्रादुर्भावः, तथा चामुमेव नयमधिकृत्यान्यत्रोक्तं-

॥१॥ "सत्पर्यायेण विनाशः प्रादुर्भावोऽसद्भावपर्ययतः ।
द्रव्याणां परिणामः प्रोक्तः खलु पर्ययनस्य ॥"

भगवानाह-गौतम ! द्विविधः परिणामः प्रज्ञप्तः, तद्यथा-जीवपरिणामश्चाजीवपरिणामश्च, तत्र जीवस्य परिणामो जीवपरिणामः, स प्रायोगिकः, अजीवस्य परिणामोऽजीवपरिणामः, स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैश्रसिकः, चशब्दौ स्वगतानेकभेदसूचकौ, तांश्च भेदान् अग्रे सूत्रकृदेव वक्ष्यति, तथा चाह–

मू. (४०६) *जीवपरिणामे णं भंते! कतिविधे पं० ? गो० ! दसविधे पं० तं०–गतिपरिणामे १ इंदियपरिणामे २ कसायपरिणामे ३ लेसापरिणामे ४ जोगपरिणामे ६ उवओगपरि० ६ नाणपरि० ७ दंसणपरि० ८ चरित्तपरि० ९ वेदपरिणामे १०*

वृ. 'जीवपरिणामे णं भंते !' इत्यादि, दशविधो जीवपरिणामः, तद्यथा–गतिपरिणाम इत्यादि, तत्र गम्यते नैरयिकादिगतिकर्मोदयवशादवाप्यते इति गतिः–नैरयिकत्वादिपर्यायपरिणतिः गतिरेव परकिणामो गतिपरिणामः १, तथा इन्दनादिन्द्रः–आत्मा ज्ञानलक्षणपरमैश्वर्ययोगात् तस्येदं, 'इन्द्रिय'मिति निपातनादिन्द्रशब्दादियप्रत्ययः, इन्द्रियाण्येव परिणाम इन्द्रियपरिणामः २, तथा कर्षन्ति–हिंसन्ति परस्परं प्राणिनोऽस्मिन्निति कषः–संसारस्तमयन्ते–अन्तर्भूतण्यर्थत्वात् गमयन्ति प्रापयन्ति ये ते कषायाः 'कर्मणोऽणि'त्यण्प्रत्ययः, कषाया एव परिणामः कषायपरिणामः ३,

–लेश्यादिशब्दार्थो वक्ष्यमाणः लेश्यां एव परिणामो लेश्यापरिणामः ४ योग एव परिणामो योगपरिणामः ५ उपयोग एव परिणाम उपयोगपरिणामः ६ एवं ज्ञानपरिणाम ७ दर्शनपरिणाम ८ चारित्रपरिणाम ९ वेदपरिणामेष्वपि भावनीयं ।

सम्प्रत्यमीषां पदानामित्थं क्रमेणोपन्यासे कारणमभिधीयते–तत्र सर्वे भावास्तत्तद्भावाश्रिता गतिपरिणामं विना न प्रादुष्ष्यन्ति ततः प्रथमं गतिपरिणामः १ गतिपरिणामे च सत्यवश्यमिन्द्रियपरिणाम इति तदनन्तरमिन्द्रियपरिणाम उक्तः २ इन्द्रियपरिणामे च सति इष्टानिष्टविषयसम्बन्धाद्रागद्वेषपरिणतिरुपजायते इति तदनन्तरं कषायपरिणामः ३ कषायपरिणामश्चावश्यं लेश्यापरिणामाविनाभावी, तथाहि– लेश्यापरिणामः सयोगिकेवलिनमपि यावद्भवति, यतो लेश्यानां स्थितिनिरूपणावसरे लेश्याध्ययने शुक्ललेश्याया जघन्या उत्कृष्टा च स्थितिः प्रतिपादिता–

॥१॥ "मुहुत्तद्धं तु जहन्ना उक्कोसा होइ पुव्वकोडी उ ।
नवहिं वरिसेहिं ऊणा नायव्वा सुक्कलेसाए ॥" इति,

सा च नववर्षोनपूर्वकोटिप्रमाणा उत्कृष्टा स्थितिः शुक्ललेश्यायाःसयोगिकेवलिन्युपपद्यते, नान्यत्र, कषायपरिणामस्तु सूक्ष्मसम्परायं यावद्भवति, ततः कषायपरिणामो लेश्यापरिणामाऽविनाभूतोलेश्यापरिणामश्च कषायपरिणामं विनापि भवति, ततः कषायपरिणामानन्तरं लेश्यापरिणाम उक्तः, नतु लेश्यापरिणामान्तरं कषायपरिणामः ४, तथा लेश्यापरिणामो योगपरिणामात्मको 'योगपरिणामो लेश्या' इति वचनात्, उपपादयिष्यते चायमर्थो लेश्यापदे सविस्तरमतो लेश्यापरिणामानन्तरं योगपरिणाम उक्तः ५ ।

